Bow, *v. i.* नम् 1P, प्रणम् (acc. or dat.); अभिवद् c., अभिवंद् 1 A, प्रह्वीभू; चरणयोः पत् 1 P. 2 अंगीकृ 8 U, अभ्युप-इ 2 P, °गम् 1 P; oft. by प्रमाणं; 'I b. to your decision' आर्यमिश्राः प्रमाणं (M. 1) or भवतो निर्णयो मे प्रमाणं. -*v. t.* अव-आवि-नम् c. (नमयति), प्रह्वी-नम्रीकृ; 'b. ing the head down' प्रणम्य शिरसा; 'b. ed down with age' जरानमितकायः; 'b. ing down the head on the ground' अवनितलनिवेशितलोल-शिरस् *a.*; -*s.* प्रणामः, प्रणति *f.*, नमस्कारः. 2 धनुस् *n.*, चापः-पं, कार्मुकं, शरासनं, कोदंडं, इष्वासः, शरावापः; 'b. man' धन्विन् *m.*, धनुष्मत् *m.*, धनुर्धरः, धनुर्भृत् *m.*, धानुष्कः, निषंगिन् *m.*; 'b. string' *s.* ज्या, मौर्वी, गुणः, शिंजिनी; 'b. shot' बाणगोचरं, शरपथः-विषयः. -*interj.* नमः. (with dat.).

Bowels, *s.* अंत्राणि (pl.). 2 (fig.) अभ्यंतरं, गर्भः.

Bower, *s.* कुंजः-जं, लतामंडपः. 2 कुटीरः, पर्णशाला. -*v. t.* परिवेष्ट् 1 A, परिवृ 5 U or c. **-y,** *a.* कुंजवत्, लतापरिच्छन्न.

Bowl, *s.* पात्रं, भाजनं, शरावः. 2 गुलिका. 3 विषं. -*v. i.* गुलिकाभिः क्रीड् 1 P.

Box, *s.* पेटिका, समुद्गकः, संपुटः, पिटकः, मंजूषा. 2 मुष्टिप्रहारः-घातः, पाणिघातः. -*v. i.* मुष्टीमुष्टि प्रह् 1 P; बाहुबाहवि-युध् 4 A or तड् 10; मल्लयुद्धं कृ 8 U. -*v. t.* मुष्टिना प्रह or तड्. 2 संपुटके निधा 3 U. **-er,** *s.* मल्लयोधः, बाहुयोधिन् *m.* **-ing,** *s.* मल्लयुद्धं, बाहुयुद्धं, बाहुबाहवि *ind.*

Boy, *s.* बालः-लकः, शिशुः, कुमारः-रकः, दारकः. **-hood,** *s.* बाल्यं, कौमारं; शैशव, बालभावः. **-ish,** *a.* बालिश, बालेय. 2 शिशुयोग्य; बालसदृश (शी *f.*), बालभावसुलभ; 'b. nature' बालभावः, शिशुत्वं, बालिशता.

Boycot, *s.* व्यवसायबहिष्कारः -*v. t.* व्यवसायाद्बहिष्कृ 8 U.

Brabble, *See* **Quarrel.**

Brace, *s.* युग्मं, युगं, युगलं, द्वयं, युगुलं. 2 बंधः-धनं, चर्मबंधः. -*v. t.* बंध् 9 P. 2 दृढीकृ 8 U, संस्तंभ् 9 P or c., शक्ति-बलं-वृध् c. **-ing,** *a.* शक्ति-बल-वर्धक.

Bracelet, *s.* कंकणं, कटकः-कं, आवापकः, पारिहार्यः, हस्तसूत्रं, वलयः-यं; करभूषणं; 'marriage b.' विवाहकौतुकं.

Bracket, *s.* नागदंतः. 2 अर्धचंद्रद्वयं.

Brackish, *a.* क्षार, क्षाररसयुक्त.

Brag, *v. i.* विकत्थ्-, श्लाघ् 1 A; *See* **Boast.** -*s.* आत्मश्लाघा, विकत्थनं, वृथास्तुति *f.* **-ingly,** *adv.* साहंकारं, आत्मश्लाघापूर्वं. **-Braggart, (Braggadocio)** *s., a.*, विकत्थनशीलः, आत्मश्लाघिन् *m.*, आत्मश्लाघापरः, पिंडीशूरः.

Brahman, *s.* ब्राह्मणः, विप्रः, द्विजः, द्विजन्मन् *m.*, अग्रजन्मन् *m.*, भूसुरः, भूदेवः; 'a pseudo b' ब्राह्मणब्रुवः. **-ical,** *a.* ब्राह्म (ह्मी *f.*); ब्राह्मणजातीय.

Braid, *s.* कबरी, वेणि-णी *f.*, धम्मिल्लः, केशबंधः-पाशः. -*v. i.* वेणीकृ 8 U, वेणीरूपेण केशान् संग्रंथ् 9 P or रच् 10. 2 संग्रंथ्, वे 1 P, संश्लिष् c, संसिव् 4 P.

Braille, *s* अंधलिपि *f.*

Brain, *s* मस्तिष्कं, मस्तिकं. गोर्दं. 2 बुद्धि *f.*, मति *f.*, **-less,** *a.* बुद्धिहीन, निर्बुद्धि. **-pan,** *s.* कपालः-लं, शिरोस्थि *n.* **-sick,** *a.* मूढमति, भ्रांतचित्त, संभ्रांत.

Brake, *s.* गुल्मगहनं, कंटकवनं. 2 कंटकखलीनं, खलीनः-नं.

Bramble, *s.* कंटकः, कंटकगुल्मः, गोक्षुरः.

Bran, *s.* तुषः, धान्यत्वच् *f*, बुस, कडगरः.

Branch, *s.* शाखा, विटपः. **2** अंगं, शाखा, एकदेशः-भागः. **3** उपनदी, अल्पसरित् *f.* **4** अपत्यं, कुलसंतानं; वंशः. **-***v. i.* शाखारूपेण विस्तृ pass., or भिद् pass.; 'the family b. ed into 8 parts' भिन्नोष्टधा विप्रससार वंशः. (R. xvi. 3) **-y, -ing,** *a.* शाखिन्, शाखामय (यी *f*), शाखासनाथ; विस्तीर्ण, विस्तारयुक्त.

Brand, *s.* अलातं, उल्का, दग्धकाष्ठं. **2** कलंकः, अंकः, लांछनं, अपकीर्तिचिह्नं. **-***v. t.* तप्तलोहेन अंक् 10 or चिह्न् 10; 'b. ed with disgrace' अपयशोंकितः, उपक्रोशमलीमसः. **-ed,** *a.* तप्तलोहेन चिह्नित, दुष्कीर्तिचिह्नांकित. **-new,** (Bran new) *See* **Fresh or New.**

Brandish, *v. t.* परि-भ्रम् c (भ्रमयति), विधू 5, 9 U.

Brandy, *s.* सुरा, आसवं, वारुणी, सीधु *f.*

Brangle, *s.* कलहः, व्याक्रोशः.

Brass, *s.* पित्तलं, आरकूटः-टं, रीति-ती *f.* **-y,** *a.* पित्तलमय (यी *f*). **-Efflorescence,** *s.* रीतिपुष्पं, पुष्पकेतु, पुष्पकं, कुसुमांजनं.

Brat, *s.* शिशुः, बालः, बटुः.

Brave, *v. t.* भर्त्स् 10 A, तर्ज् 10 A, **2** धृष् 5 P; आ-समा-ह्वे 1 A. **-***a.* वीर, शूर, विक्रांत, धीर, पराक्रमवत्, वीर्य-विक्रम-शालिन्, साहसिक (की *f.*); उदार, तेजस्विन् 'fortune favours the b.' साहसे श्रीः प्रतिवसति. **-***s.* शूरंमन्यः. **2** समाह्वानं. **-ly,** *adv.* सधैर्यं, निर्भयं, सविक्रमं, शूर-वीर-वत्. **-ry,** *s.* वीर्यं, शौर्यं, धैर्यं, परा-वि-क्रमः, साहसं. **2** (**Bravado**) विकत्थनं, आत्मश्लाघा.

Bravo, *interj.* साधु, साधु साधु. **-***s.* घातकः, आततायिन् *m.*

Brawl, *s.* कलिः, कलहः, विवादः, द्वंद्वं, विप्रतिपत्ति *f.* **-***v. i.* विवद् 1 A, कलहं कृ 8 U, कलहायते (D).

Brawn, *s.* शूकरमांसं. **2** स्नायुः; बाहुः. **-y,** *a.* मांसल; दृढांग (गी *f.*); संनद्धशरीर.

Bray, *v. t.* चीत्कारशब्दं कृ 8 U, आरट् 1 P. **-***v. t.* चूर्ण् 10, पिष् 7 P **-***s.*, **-ing,** *s.* ची-(चि)त्कारः, खरनादः.

Braze, *v. t.* पित्तलेन संधा 3 U. **-en,** *a.* पित्तलमय (यी *f.*). **2** निर्लज्ज, धृष्ट, निस्त्रपावरण. *v. t.* धृष् 5 P. **-ier,** *s.* ताम्र-कास्यकारः, कामंधमिन् *m.* **3** अंगारपात्रं.

Breach, *s.* छिद्रं, रंध्रं. **2** भंगः, भेदनं; अतिक्रमः, लंघनं; 'b. of promise' प्रतिज्ञाभंगः; आज्ञाभंगः. **3** भेदः (सुहृद्भेदः); 'b. in a wall' संधिः, सुरंगा.

Bread, *s.* अपूपः, पिष्टकः, कांदवं. **2** अन्नं, आहारः.

Breadth, *s.* *See* under **Broad.**

Break, *v. t.* भंज् 7 P (fig. also), खंड् 10. **2** क्षुद्-पिष् 7 P, चूर्ण् 10, मृद् 9 P. **3** अतिक्रम् 1 U, 4 P, उल्लंघ् 1 A, 10, अतिचर् 1 P; विलुप् c. **4** भिद् 7 U, विघट् c. (घटयति); विदृ 9 P, 10, स्फुट् c. (as heart); 'b. fast' पारणां निर्वृत् c., प्रातराशं-कल्यवर्तं सेव् 1 A; 'b. wind' गुदरवं कृ 8 U, पर्द् 1 A; 'b. the way for' अपसृ 1 P, अप-इ 2 P, अपक्रम्. **5** विनश् c., उच्छिद् 7 P. **-***v. i.* भिद्-दृ-भंज्- pass., त्रुट् 6, 4 P, स्फुट् 6 P, (स्फुटति हृदयं), दल् 1 P. **2** प्रभा 2 P; 'the day broke' उषाः समाघता, प्रभाता रजनी, दृष्टं दिनमुखं. **3** क्षि pass., अवसद् 1 P, विश् pass., ध्वंस् 1 A, जॄ 4, 9 P. **-***s.* विच्छेदः, निवृत्ति *f.*, विरामः, भंगः; 'b. of day' प्रभातं, उषःकालः, अरुणोदयः; 'the story has suffered a b.' विच्छेदमाप कथाप्रबंधः (Ka. 239). **-down,** चूर्ण् 10; (*v. i.*) *See* **Fail. -in upon,** प्रसह्य-सहसा-प्रविश् 6 P. **-into,** विनी 1 P, दम् c. (दमयति). **-into,** (a house) संधिं कृत्वा प्रविश्. **-loose,** प्रमुच्, विमुच् pass.; 'the elephant broke loose from the post' आलानस्तंभं भंक्त्वा निर्जगाम. **-off,** भंज्, भंगं कृ 8 U; (*v. i.*) अकस्मात् विरम् 1 P, त्यज् 1 P, निवृत् 1 A. **-open,** बलात्-सहसा-उद्घट् c. or अपवृ 5 U. **-out,** (*v. i.*) उद्भू 1 P, उत्पद् 4 A, प्रादुर्भू, उदि 2 P. **2** निर्गम् 1 P. **-through,** निर्भज्, अपाक्षुद् 6 P, निरस् 4 P; *See* **Dispel. -up,** (*v. t.*) *See* **Break** (*v. i.*) 'the party broke up' सभ्याः स्वं स्वं स्थानं प्रतिजग्मुः. **-upon,** आह्नन् 2 A; 'the dawn broke upon his eyes' तस्याक्ष्णोः प्रभातमासीत् (S. 2). **-with,** विवद् 1 A, कलहं कृ. **-er,** *s.* भंजकः, भेदकः. **2** प्रस्तर or तट-भग्ना ऊर्मि *f.*, लहरि *f.* **-fast,** *s.* प्रातराशः, कल्यवर्तः. **-water,** *s.* सेतुः, धरणः.

Breast, *s.* उरस् *n.*, क्रोडं, वक्षस् *n.* **2** स्तनः, पयोधरः, वक्षोजः, कुचः, (of human beings). **3** हृदयं, अंतःकरणं, चित्तं, मनस् *n.*; 'b. high' वक्षोदघ्न (घ्नी *f.*); 'b. plate' कवचं, उरस्त्राणं; 'b work' वक्षःप्रमाणः प्राकारः. 'Make a clean b. of,' *See* **Confess,**

Breathe, *v. i.* श्वस् 2 P; प्राण् 2 P. **2** अस् 2 P, जीव् 1 P, वृत् 1 A. **3** आ-प्रत्या-समा-श्वस्; 'b. deep' दीर्घ-स्थूलंस्थूलं निश्वस्; 'b. freely' उच्छ्वस्; 'b. the last' *See* **Die,** **-***v. t.* (out) उद्गॄ 6 P, अव-प्र-सं-कॄ 6 P. **2** प्रवा 2 P. **-Breath,** *s.* श्वासः, निश्वासः, उच्छ्वसितं. **2** प्राणाः (pl.); प्राणायामः 'holding the b.'; असवः (pl.). **3**

विरामः उपशमः. 4 उद्गारः. 5 मंदानिलः, मृदुवातः; 'in the same b.' एकावसरे, समकालमेव. **-ing,** *s.* श्वासः, श्वसितं. 2 स्पृहा, इच्छा; 'b. through nose' नासिकंधमः; 'b. hole' वातायन, गवाक्षः. **-less,** *a.* प्राणहीन, निरुच्छ्वास, विचेतन. 2 मृत, उत्क्रांतवायु 3 यष्टिप्राण.

Breech, *s.* पश्चाद्भागः, नितंबः, कटिदेशः. **-es,** *s.* कटिवस्त्रं, शाटकः.

Breed, *v. t.* जन् c. (जनयति), उत्पद् c., प्रसू 2 A. 2 पुष् 1, 4, 9 P or c., सं c. 3 विनी 1 P. **-***v. i.* वृध् 1 A, प्रजन्-उत्पद् 4 A. 2 गर्भवती भू, *See* **Conceive**; 'b. ing season' गर्भधारणकालः, उत्पत्तिसमयः. **-***s.* वंशः, कुलं, जाति *f.* 2 अपत्यं, प्रजा. 3 समुत्पन्नः शावकगणः, शिशुजातं. **-bred,** *a.* जनित; संवर्द्धित; विनीत, 'well b.' सुविनीत, सदाचार; 'ill b.' दुर्विनीत, दुराचार. **-er,** *s.* जनकः, पोषकः, विनेतृ *m.* **-ing,** *s.* पोषणं, पालनं, संवर्द्धनं. 2 शिक्षणं, विनयः. 3 सभ्यता, सुशीलता; 'of good b.' सुविनीत, सुशील. 4 गर्भधारणं, गर्भाधानं.

Breeze, *s.* मृदुपवनः, मंदानिलः, 2 वातः, अनिलः, *See* **Wind.** 3 *See* '**Coke,**' 'Agreeable b.' सुखस्पर्शः- सुखः-वायुः. **-y,** *a.* वातवत्, वातैरुपजीवित.

Breviary, *s.* संहिता, संग्रहः. 2 स्तोत्रसंग्रहः.

Brevity, *s.* क्षेपः, समासः, संहारः, संग्रहणं.

Brew, *v. t.* (यवसुरं) पच् 1 P or क्वथ् 1 P. 2 प्रचित् 10, प्रक्लृप् c. **-age,** *s.* निष्क्वाथः. **-ery,** *s.* यवसुरापचनस्थानं.

Bribe, *s.* उत्कोचः, उपायन. **-***v. t.* उत्कोचं दा 3 U, उत्कोचदानेन वशीकृ U. **-ry,** *s.* उत्कोचदानं-ग्रहणं. 2 उत्कोचदानादानापराधः.

Brick, *s.* इष्टका, सुधा; 'burnt b.' पक्वेष्टका; 'b. bit' इष्टकाशकलं; 'b. kiln' आपाकः, पचनस्थानं; 'b. layer' लेपकः, सुधाजीविन् *m.*; 'b. work' इष्टकानिर्मितं.

Bridal, *s.* विवाहोत्सवः, उद्वाहकर्मन् *n.* **-***a.* वैवाहिक (का *f.*), विवाहयोग्य.

Bride, *s.* वधूः, नववधू; पाणिगृहीता, नवोढा. 2 कन्या, कुमारी. **-groom,** *s.* वरः, परिणेतृ *m.*, परिग्रहीतृ *m.*, पाणिग्राहकः; 'bride and b.' वधूवर-रौ. **-maid,** *s.* जन्या.

Bridge, *s.* सेतुः, धरणं, संवरः, 2 आलि-ली *f.*. धरणः (small); 'make a b.' सेतुं निर्मा 3 A, or कृ 8 U, or बंध् 9 P; 'fort b.' सक्रमः; 'b. of the nose' नासावंशः. **-***v. t.* सेतुना बध् 9 P, सवृ 5 U.

Bridle, *s.* बल्गा; रश्मिः; 'giving the b. to the passions' रागाधीनः, रागवशः. 2 निग्रहः, संयमः **-***v. t.* बल्गासनाथ *a.* कृ, रश्मिभिः बध् 1 P. 2 निग्रह् 9 P, नि-सं-यम्; *See* **Control,** 'by un-b. ed tongue' निर्यंत्रणया वाचा.

Brief, *a.* स्वल्प, अचिर, अल्पकाल, क्षणिक (की *f.*), अचिरस्थायिन्, संक्षिप्त, परिमित, सहृत, अदीर्घ, संकुचित; 'to be b.' किं बहुना 2 संग्रहः, संक्षेपः. 3 सारपत्रं. **-ly,** *adv.* संक्षेपतः, संक्षेपेण, समासतः, समासेन. 2 अचिरेण, आशु, क्षिप्रं. **-ness,** *s.* संक्षेपः, समासः, संहारः, परिमितता.

Briar, Brier, *s.* गोक्षुरः, कंटकगुल्मः. **-y,** *a.* कंटकावृत.

Brig, *s.* कूपकद्वययुतः पोतः.

Brigade, *s.* चमूः, वाहिनी, सैन्यदलं, गुल्मः-ल्म. **-ier,** *s.* वाहिनीपतिः, चमूपतिः.

Brigand, *s.* दस्युः, चौरः.

Bright, *a.* उज्ज्वल, प्रदीप्त, भासुर, रुचिर, तेजस्विन्, भास्वत्, भ्राजमान, प्रभावत्, दीप्तिमत्, देदीप्यमान. 2 विशद, निर्मल. शुचि. 3 विश्रुत. **-en,** *v. t.* प्र-उत्-द्युत् c., प्र-उत्-दीप् c., उद्भास् c., भ्राज् c., विराज् c. 2 विमलयति (D.), विशदीकृ 8 U. **-***v. i.* विमलीभू 1 P, प्रसद् 1 P, प्रसादं गम् 1 P, विशदीभू, (दिशः प्रसेदुः R. III. 14). 2 शुभ्-द्युत् 1 A, *See* **Shine.** **-ly,** *adv.* उज्ज्वलं, विमलं, तेजसा, कांत्या. **-ness,** *s.* तेजस् *n.*, औज्ज्वल्य; द्युतिः, रुचिः, कांतिः, प्रभा, दीप्तिः, शोभा, (all fem.); भासुरत्वं, तेजस्विता; 'b. of intellect' प्रदीप्ता प्रज्ञा.

Brilliance, Brilliant, *See* **Bright.**

Brim, *s.* कंठः, प्रांतः, मुखं, धारः, कर्णः; 'to the b.' आमुखं, आकंठं. 2 (of a river) तीरं, तटः-टं. 3 अंचलः, दशा (of a cloth). **-ful,** *a.* परिपूर्ण, आकर्णपूर्ण; ex. by मद (दी *f.*), निर्भर; 'b. of joy' हर्षनिर्भरः.

Brimstone, *s.* गंधकः. **-y,** *a.* गंधकपूर्णविशिष्ट.

Brindle, *s.* चित्रता, चित्रांगत्वं, शबलत्वं. **-ed,** *a.* शबल, चित्रित, कल्माषित.

Brine, *s.* लवणजलं. 2 बाष्पः, अश्रु *n.*, अस्रं.

Bring, *v. t.* आनी, 1 P, आ-उपा-हृ 1 P, आवह् 1 P. 2 प्राप् c., आगम् c. (गमयति). 3 अनुनी 1 P, आकृष् 1 P. 4 जन् c. (जनयति), उत्पद् c.; ex. by प्रभू 1 P, जन् 4 A; 'poverty b. s one to shame' दारिद्र्याद् ह्रियमेति (Mr. 1); 'b. to end' समाप् c., निर्वृत् c., अवसो 4 P; 'b. to ruin' नश् c., नाशकारणं भू; 'b. word' निविद् c., वार्तां आख्या 2 P; 'b. action' अभियुज् 7 A. **-about,** (to pass) साध् 5 P, 10; घट् c., (घटयति), संपद् c., आवह् 1 P; क्लृप् 1 A, संपद् 4 A, (with dat.). **-down,** नि-अव-पत् c. अपकृष्, अभिभू **-forth,** *See* **Beget.** **-forward,** उपन्यस्. 4 P, उदाहृ 1 P, उपक्षिप् 6 P, उपाना, पुरस्कृ

2 अग्रे-पुरः-आनी, प्रसू c., -on, आवह् 1 P, or with dat. ; 'disgrace b. s on despair' परिभवः निर्वेदमावहति, निर्वेदाय (भवति); oft. by प्रभू, जन्; 's. avarice b. s on anger' लोभात् क्रोधः प्रभवति-जायते &c. -out, प्रकाश् c., प्रकटीकृ. -together, समा-नी, समुपाह्; *See* **Assemble.** -under, आनम् c. (नमयति); 'b. under one's power' वशं नी, दम् c. (दमयति), अभिभू. -up, संवृध् c., पोषणं-पालनं-कृ 8 U (with gen.); पुष् 10.

Brink, *s.* तीरं, तटः-टं, कूलं. 2 प्रांतः, अंतः, पर्यंतः; धारा, उत्संगः, परिसरः, कंठः.

Brisk, *a.* चपल, त्वरित, क्षिप्र, अविलंब. 2 प्रबल, ससार, तीव्र; 'b. shower' धारा-संपातः. -ly, *adv.* सत्वरं, क्षिप्रं, आशु. -ness, *s.* तेजस् *n.*, सारः, सत्वं.

Bristle, *v. i.* पुलकित-रोमांचित-कंटकित *a.* भू 1 P; 'his body b. ing with joy' हर्षरोमांचित-पुलकित-तनुः; हृष् 4 P (of hair). -*s.* शूकः-कं, दृढलोमन् *n.*, 2 शूकर-लोमन् *n.* -ing, *a.* हृषित, पुलकित, रोमांचित.

Brittle, *a.* भंगुर, भिदुर, सुखभेद्य, सुभंग.

Brize, *s.* दंशः; गोमक्षिका.

Broach, *s.* शूलः, शंकुः, कीलः-लं. -*v. t.* अपावृ 5 U. 2 निविड् c., प्रकाश् c., कथ् 10. 3 छिद्र 10.

Broad, *a.* विस्तीर्ण, पृथु, विपुल, विस्तृत, विशाल, परिणाहवत्, आयत; '10 yojanas b.' दशयोजनमायता (नगरी). 2 असभ्य, अश्लील, गर्हित; 'b. day-break' सुप्रभातं; स्पष्टे जाते प्रत्यूषसि (Ka. 26); 'b. day light' प्रखरतेजसि सवितरि; 'b. awake' प्रबुद्ध, उन्निद्र; 'b. breasted' व्यूढोरस्कः; विशालवक्षस्. -ness, **Breadth,** *s.* विस्तारः, परिणाहः, आयामः, विशालता, पृथुता; 'five fingers in b.' पंचांगुलं (दारु).

Brocade, *s.* कार्मिकवस्त्रं.

Brochure, *s.* लघुपुस्तकं.

Brogue, *s.* प्राकृतभाषा, अपभ्रंशः. 2 चर्म-पादुका.

Broider, *v. t.* चित्र् 10, सूच्या वस्त्रे पुष्पादिकं सिव् 4 P. -y, *s.* सूचिकर्मन् *n.*

Broil, *v. i.* तप्-पच्-pass. -*v. t.* भ्रस्ज् 6 P; (fig.) संक्षुभ् c., प्रकुप् c., उद्दीप् c. -*s.* कलहः, द्वंद्वं, कलिः, तुमुलं.

Broker, *s.* निरूपितमूल्येन कार्यनिर्वाहकः. -age, *s.* कार्यनिर्वाहणार्थं दत्तं द्रव्यं.

Bronze, *s.* *See* **Brass.**

Brooch, *s.* वक्षोभूषणं, उरोमणिः.

Brood, *v. i.* (lit.) (अंडानां) उपरि-सद् 1 P. निविश् 6 P; (fig.) नि-ध्यै 1 P, पुनः पुनर् आलोच् 10; चिंताव्यग्र *a.* भू. -*s.* प्रजा, संतति *f.*, अपत्यं. 2 समसुत्पन्नः शावकगणः, अपत्यजातं.

Brook, *s.* कुसरित् *f.*, स्रोतस् *n.*, क्षुद्रनदी, क्षुद्र-अल्प-सरित्. -*v. t.* सह् 1 A, क्षम् 1 A, मृष् 4 P, 10.

Broom, *s.* संमार्जनी, शोधनी. 'b. stick-staff' मार्जनीदंडः; दीर्घ-कुश-यष्टिः.

Broth, *s.* सूपः, यू(जू)षं.

Brothel, *s.* वेशः, वेश्यालयः, गणिकागृहं.

Brother, *s.* भ्रातृ *m.*, सोदरः, सहोदरः, सोदर्यः. 2 बंधुः, सहकारिन् *m.*, संसर्गिन् *m.*; 'spiritual brethren' एकगुरवः. -hood, *s.* भ्रातृभावः,-त्वं, सौभ्रात्रं. 2 साहचर्यं, बंधुता, संसर्गः, समाजः. -ly, *a.* भ्रात्रीय, भ्रातृसदृश (शी *f.*); 'b. in law,' *s.* श्यालः, देवृ, *m.*, देवरः (husband's brother.).

Brow, *s.* कटकः, उत्संगः, *See* **Edge.** 2 भ्रूः, भ्रूलता; 'knit the b. s.' भ्रूभंगं कृ 8 U, भ्रूकुटिं बंध् 9 P, भ्रूकुटिरचनां कृ. 3 ललाटं; वदनं, आननं. -beat, *v. t.* भ्रूभंगेण-कटाक्षेण-तर्ज् 10, or निरीक्ष् 1 A. -Bound, *a.* किरीटिन्.

Brown, *a.* कपिश, पिशंग (गी *f.*), पिंगल, कपिल, श्याव. -ish, *a.* ईषत्कपिश, आपिंगल. -ness, *s.* कपिशः, पिंगलवर्णः.

Browse, *v. t.* अद् 2 P, चर्व् 10, लंघ् 1 A, (पल्लवान् लंघितुमागच्छति M. 4), भक्ष् 10, संदंश् 1 P. -*s.*, -ing, *s.* किसलयः-यं, नव-पल्लवः-वं; नवतृणं, शाद्वलं.

Bruin, *s.* ऋक्षः, भल्लूकः,

Bruise, *v. t.* अपकृ 8 U, क्षण् 8 P, प्रहारेण हिंस् 7 P. 2 मृद् 9 P, पिष् 7 P. -*s.* क्षतं, अपकारः, प्रहारः, आघातः. 2 पिच्चितव्रणः.

Bruit, *s.* ध्वनिः. 2 वार्ता, जनप्रवादः. -*v. t.* ख्या c. (ख्यापयति), घुष् 10.

Brunette, *s.* श्यामा, श्यामवर्णा.

Brunt, *s.* भारः; 'b. of battle' रणधुरा; संघट्टः, प्रथमाक्रमः; प्रहारः, आघातः.

Brush, *s.* आघर्षणी; लोममयी मार्जनी or शोधनी. 2 तूलिका, शलाका, वर्तिका. 3 संघट्टः, समाघातः. -*v. t.* मृज् 2 P, घृष् 1 P, घर्षणेन शुध् c. 2 मृदु तड् 10, लघुगत्या प्रह् 1 P. -*v. i.* (by) लघु घृष्. 2 अपधाव् 1 P, विसृप् 1 P. -wood, *s.* गुल्मः, जंगलं. -y, *a.* लोमश.

Brusque, *a.* अविनीत. 2 असंबद्ध. 3 अनवहित.

Brute, *s.* पशुः, तिर्यच् *m.* 2 नृपशुः, दुर्वृत्तः, क्रूराचारः. -*a.* अ-वि-चेतन, अज्ञान. 2 क्रूर-कर्मन्, असभ्य. -al, -ish, *a.* नृशंस, क्रूर, पशु in comp; *See* **Cruel.** 2 पशुशील, पाशव (वी *f.*), पशुसदृश (शी *f.*), पशुतुल्य. -ally, *adv.* पशुवत्; निर्दयं, अतिक्रौर्येण.

Bubble, *s.* बुद्बुदः, डिबिंबका. **2** (fig.) असारं वस्तु, माया, वंचकः, मोहः, मायाजालं. **-***v. i.* बुद्बुदायते (D). **-***v. t. See* **Cheat.**
Bubby, *s. See* **Breast.**
Bubo, *s.* ग्रंथि *f.*
Buck, *s.* हरिणः, मृगः. **2** वस्त्रधावनार्थं जलं. **3** सुभगंमन्यः. **-***v. t.* वस्त्र धाव् 1 P.
Bucket, *s.* अरघट्टः, उदंचनं, घटीयंत्रं. **2** पात्रं, द्रोणी, सेचनी-नं.
Buckle, *s.* कुडुपः, गंडकः. **-***v. t.* कुडुपेन बंध् 9 P; 'to be b. ed to' परायण-आसक्त *a.* भू 1 P. **-er,** *s.* फलकः-कं, चर्मन् *n.*
Buckram, *s.* स्थूलपट्टं-पटः.
Bud, *s.* कलिका, कोरकः-कं, मुकुलः.लं, कुड्मलः; जालं, कोशः-षः, प्ररोहः, अंकुरः, पल्लवः-वं. **-***v. t.,* **-ed,** *See* under **Blossom.**
Budge, *v. i.* प्रचल् 1 P, अपसृ 1 P, नि-परा-वृत् 1 A, त्यज् 1 P.
Budget, *s.* शाणपुटः, दृति *f.* **2** कोषः, संग्रहः, संचयः. **3** आयव्ययगणना, °पत्रं.
Buff, *s.* महिषचर्मन् *n.* **2** पांडुवर्णः.
Buffalo, *s.* महिषः; 'she-b.' महिषी; 'b. milk' माहिषं पयः.
Buffer, *s.* आघात-भंजकः or मोघीकारकः.
Buffet, *s.* मुष्टिप्रहारः, कराघातः, चपेटिका. **2** कुशूलः. **-***v. t.* मुष्टिना तड् 10 or प्रह 1 P.
Buffoon, *s.* विदूषकः, वैहासिकः, भंडः. **-ery,** *s.* परिहासः, हास्यं, नर्मन् *n.*
Bug, *s.* मत्कुणः, उद्दंशः; 'b. bear' महाभयास्पदं, भयहेतुः.
Bugle, *s.* काहलः-ला, व्याधशृंगं-विषाणं. **2** शृंग, विषाणं.
Build, *v. t.* निर्मा 3 A or c. (मापयति), प्रकल्प् c., विधा 3 U, विरच् 10; 'b. upon' समालंब् 1 A, आ-समा-श्रि 1 U. **-er,** *s.* निर्मातृ *m.*, विधायकः. **2** स्थपतिः, शिल्पिन् *m.*, दारुकर्मन् *m.* **-ing,** *s.* निर्माणं, विधानं. **2** भवनं, गृहं, हर्म्यं.
Bulb, *s.* कंदः-दं, गोलमूलं. **-ous,** *a.* कंदिन्, कंदविशिष्ट. **2** कंदाकृति.
Bulge, *v. i.* बहिर्लंब् 1 A, उदराकारेण प्रलंब्.
Bulk, *s.* प्रमाणं, परिमाणं, मात्रा. **2** स्थूलता, बृहत्त्वं. **3** प्रधान-अधिक-भागः, भूयस् *m.* **-y,** *a. See* **Big.**
Bull, Bullock, *s.* वृषः, वृषभः, बलीवर्दः, ऋषभः, अनडुह् *m.*, उक्षन् *m.*, ककुद्मत् *m.* **2** वाग्दोषः, महास्खलितं, सुस्पष्टो वचनविरोधः.
Bullet, *s.* सीसकगुलिका.
Bulletin, *s.* शरीरस्थितिज्ञापकं पत्रं.
Bullion, *s.* हिरण्यं; रूप्यं.
Bully, *s.* पिंडीशूरः, शूरंमन्य; दांभिकः, कलहकारिन् *m.* **-***v. t.* तर्ज् 10, भर्त्स् 10 A; आह्वे 1 A.
Bulwark, *s.* वप्रः-प्रं, प्राकारः. **2** आश्रयः, शरणं, संश्रयस्थानं, आलंबः; रक्षणसानं.
Bum, *s.* नितंबः, कटिप्रोथः.
Bump, *s.* स्फोटः, गंडः, शोफः. **-***v. i.* ध्वि 1 P. **2 Beat,** q. v.
Bumper, *s.* अतिपूर्णं पात्रं; चषकः; 'b. crops' अतिप्रचुरः शस्यागमः; 'b. house' जनाकीर्णं प्रेक्षागृहं.
Bumpkin, *s.* वृषलः, जानपदः, ग्राम्यजनः.
Bumptious, *a.* सावलेप, अवलिप्त.
Bunch, *s.* गुच्छः, स्तवकः. **2** पिंडः, गंडः. **3** ग्रंथिः, शेखरः-रं. **4** पोट्टली, संघातः, संहतद्रव्य. **-***v. i.* (out) पिंडीभू 1 P.
Bundle, *s.* भारः, कूर्चः, पोटलिका, गुच्छः, संघातः; 'b. of goods' भांडकं. **-***v. t.* (up) गुच्छीकृ 8 U, एकत्र समाहृ 1 P.
Bung, *v. t.* छिद्रं निरुध् 7 U or पिधा 3 U. **-hole,** *s.* पात्रच्छिद्रं, पात्रधारा.
Bungalow, *s.* हर्म्यं.
Bungle, *v. i.* अदक्षतया कार्यं निर्वह् c., प्रमद् 4 P, स्खल् 1 P. **-***s.* प्रमादः, स्खलितं, दोषः. **-er,** *s.* अदक्षः, प्रमादिन् *m.*, अनिपुणः. **-ingly,** *adv.* सप्रमादं, प्रमादतः, अदक्षतया.
Bunter, *s.* अकुलीना स्त्री.
Bunting, *s.* ध्वजपटः, केतुवसनं. **-***s.* तरणः, प्लवः.
Buoy, (up) *v. t.* उत्तंभ् 9 P, उद्धृ 1 P, 10, आलंब् 1 A. **2** प्लु c. **-***s.* तरणः, प्लवः. **-ancy,** *s.* लघुता, लाघवं, प्लवनशीलता.
Burden, *s.* भारः, भरः, धुर् *f.* (राज्यधुरा); 'beast of b.' धुर्यः, धुरीणः. **2** ध्रुवकं, अनुपद. **3** पीडाकर *a.* (री *f.*), पीडाहेतुः, भारभूत *a.* **-***v. t.* भारं न्यस् 4 P or निविश् c. **-ed,** *a.* भाराक्रांत, आरोपितभार. **-some,** *a.* दुर्वह, दुर्भर, दुरुद्वह. **2** पीडाकर, दुःखावह.
Bureau, *s.* आधारः. **2** लेखनस्थानं, लेखनसाधनाधारः.
Bureaucratic, *a.* अनियंत्रितशासन.
Burgh, *s.* नगरं, पुरं. **-er, Burgess,** *s.* नगरजनः; पारः. **2** नगरप्रतिनिधिः, पुरप्रतिनिधिः. **-ership,** *s.* नगरजनाधिकारः, पौराधिकारः.
Burglar, *s.* संधिचौरः, गृहभगकृत् *m.*, कुड्यच्छेदिन् *m.*, संधिच्छेदकः. **-y,** *s.* भित्तिचौर्यं, गृहभंगः.
Burgomaster, *s.* नगराध्यक्षः
Burke, *v. t.* श्वासनिरोधेन हन् 2 P or व्यापद् c. or मृ. **2** त्वरितं संपद् c.
Burlesque, *a.* परिहासकर (री *f.*), हासजनन (नी *f.*), परिहास्य. **-***s.* परिहासः, भांडं, नर्मन् *n.* **-***v. t. See* **Laugh.**
Burly, *a. See* **Big.**
Burn, *v. t.* दह् 1 P, प्लुष् 1 P, ज्वल् c. (ज्वलयति), तप् 1 P or c., उष् 1 P, दीप् c. **-***v. i.* ज्वल् 1 P, दह् pass., तप् 4 A, दीप् 4 A; 'b. after' उत्कंठ् 1 A, स्पृह्

10; 'b. out' शम् 4 P; 'b. up' निर्दह्. -s. दाहव्रणः,-अंकः. 2 *See* **'Brook', -er,** s. दाहकः, तापकः दीपकः. **-ing,** s. दाहः, दहनं, क्षोषः, तापः, ज्वलनं; 'b. ground' श्मशानं. -a. दाहक, तापक. 2 चंड, पखर; 'b. glass' सूर्यकांतः, सूर्योपलः.

Burnish, v. t. प्रमृज् 2 P (प्रमृष्टं चामीकरं); तिज् c., परिष्कृ 8 U. **-er,** s. तेजकः, धावकः.

Burrow, s. बिलं, बिवरं, गर्तः-र्ता. -v. i. बिले-गर्ते-वस् 1 P.

Bursar, s. धनाध्यक्षः, कोषाधिपतिः. 2 शिष्य-वृत्युपजीविन् m. **-y,** s. कोषः, धनागारं. 2 शिष्यवृत्ति f.

Burst, v. i. स्फुट् 6 P, दल् 1 P, वि-दृ-शृ-pass., भिद्-भंज् pass.; 'b. in pieces' शकलीभू, खंडशो भिद् pass.; 'b. into tears' सहसा रोदितुमारेभे, सहसा प्रावर्तता-श्रुधारा. -v. t. भिद्-भंज् 7 P, स्फुट् c., दृ 9 P, 10, शकलीकृ 8 U, दल् c. (दलयति); 'she b. herself' हृदयस्फोटनेन मृता. -s. स्फोटनं, विदलनं, भंगः, भेदः, 'there was a b. of applause' संभूय प्रशंसागिरः उद-तिष्ठन्; 'b. of laughter' अट्टहासः, उच्चैर्हासः.

Burthen, s. *See* **Burden.**

Bury, v. t. निखन् 1 P, निगुह् 1 U, (श्मशाने-भूमौ) निधा 3 U, स्था c. (स्थापयति), निक्षिप् 6 P, निर्-हृ 1 P; 'this buried the king into sorrow' एतेन (वचसा) राजा दुःखमग्नो-दुःखोदधिमग्न इव-बभूव; 'b. the hatchet' कलहाद्विरम् 1 P. **-ing,** s. निखननं, श्मशाने स्थापनं; 'b. ground' श्मशानं, प्रेतावासः, परेतभूमि f., पितृवनं, पितृसद्मन् n.

Bush, s. गुल्मः-ल्मं, क्षुपः, स्तंबः; 'why do you beat about the b.' अप्रस्तुतं किमिति अनुसंधीयते, (निरर्थकं किमिति वनमालोडयसि); 'a bird in the hand is worth two in the b.' ध्रुवाणि परित्यज्य अध्रुव-निषेवणं नेष्टं, अध्रुवाद् ध्रुवं वरं, वरं तत्कालोपनता तित्तिरिः न पुनर्दिवसांतरिता मयूरी or वरमद्य कपोतो न श्वो मयूरः. **-y,** a. गुल्मावृत, निविड; गाढ, अविरल. 2 घन, स्थूल; लोमश.

Business, s. कार्यं, अर्थः, कृत्यं, कर्मन् n., व्यवसायः, व्यवहारः; व्यापारः; नियोगः (duty). 2 अर्थः, प्रयोजनं; 'what b. had you to talk with him' तेन सहालापेन किं तव कार्यमासीत्. 3 वृत्ति f., जीविका; 'a man of b.' कार्यकुशलः, दृष्टकर्मन् m.

Buss, *See* **Kiss.**

Bust, s. ऊर्ध्वकायप्रतिमा-प्रतिकृति f.

Bustle, s. संभ्रमः, आकुलत्वं, त्वरा, व्यग्रता. 2 कोलाहलः, तुमुलरवः. -v. i. कार्यव्यापृत-त्वाद् इतस्ततो धाव् 1 P or गम् 1 P or चेष्ट् 1 A, or व्यवसो 4 P. **-er, -ing,** s., a. चपलप्रकृतिः, व्यवसायिन् m.

Busy, a. व्यापृत (with loc.); कार्यसमाकुल, कार्यव्यग्र; 'with what work are you b.' कस्मिन्कार्ये व्यापृतोसि, किमारंभस्त्वं; कार्योद्युक्त, सोद्योग, अतंद्रित, अनलस, व्यग्र. -v. t. व्यापृ c., कार्ये नियुज् 10 or अधिकृ 8 U. **-Body,** s. पराधिकारचर्चकः. **-ly,** adv. अतंद्रितं, सोत्साहं, मनोभिनिवेशेन, औत्सुक्येन, व्यग्रतया.

But, prep. अन्य, इतर, ऋते with abl. विना, विहाय, मुक्त्वा (acc.). -adv. एव, केवलं, मात्रं. -conj. तु, पुनः, (not at beginning); in 'not only but' अपि takes the place of '*but*'; न केवलं रूपे शिल्पेप्यद्वितीया मालविका (M. 2); 'b. for' (=if it were not) यदि न; 'all b.' *See* **Almost;** 'next b. one' एकांतर a.

Butcher, शौ(सौ)निकः, आखेटकः, मांसिकः, विशसितृ m. -v. t. विशस् 1 P, निषूद् 10, हन् 2 P. **-y,** s. वधः, हननं, विशसनं. 2 शूना, वधस्थानं.

Butler, s. गृहकर्म-दासः-करः.

Butt, s. लक्ष्यं, शरव्यं. 2 उपहासास्पदं, परिहासभूमि f. 3 आशयः, अभिप्रायः. 4 पात्रं; (सुरा-) भाजनं-भांडं. -v. t. शिरसा-शृंगेण-आहन् 2 U. **-end,** s. घनाग्रं, स्थूलाग्रं.

Butter, s. नवनीतं, नवोद्धृतं; दधिजं, किलाटः, 'clarified b.' घृतं, सर्पिस् n., आज्यं; 'b. man' नवनीतविक्रयिन् m.; 'b. milk' (s.) तक्रं, अरिष्टं, कालशेयं, दंडाहतं, गोरसः, 'b. of last day's milk' हेयंगवीनं. -v. t. नवनीतेन लिप् 6 P.; (fig.) चाटूक्तिभिः प्रसद् c. or अनुनी 1 P.

Butterfly, s. चित्रपतंगः.

Buttock, s. नितंबः, कटिप्रोथः, जघनं, श्रोणिणी f.

Button, s. गंडः, कुडुपः, 'b. hole' गंडाधारः. -v. t. गंडेन बंध् 9 P.

Buttress, s. वप्रः-प्रं, आधारार्थं कृतः प्राकारः. 2 आश्रयः, आधारः.

Buxom, a. सानंद, प्रफुल्लवदन, हृष्ट. 2 सरस, सविलास, ललित. **-ly,** adv. सानंदं, सरसं, ललितं. **-ness,** s. लीला, लालित्यं, विलासः.

Buy, v. t. क्री 9 U; 'b. off' मूल्यदानेन परिक्री. **-er,** s. क्रेतृ m., क्रयिकः, क्रयिन् m.

Buzz, v. i. गुंज् 1 P, विरु 2 P. -s., **-ing,** गुंजितं, गुंजारवः, कलरवः.

Buzzard, s. श्येनकः. 2 स्थूल-मंद-धीः.

By, prep. Gen. ex. by instr. of noun; रामेण हतः, बाणेन हतः, &c. 2 (Near) उप in comp., or समीपे-निकटे-पार्श्वे with gen.; 'b. her father' उपजनकं, पितुः पार्श्वे-

समीपे; 'by this time' अनेन समयेन; 'day b. day' अनुदिवसं-दिनं, दिने दिने; 'b. god' ईश्वरं साक्षीकृत्य-ईश्वरसमक्षं; 'b. and b.' अचिरात्; अचिरेण, क्रमशः; शनैः शनैः; 'b. the b.' अपरंच; 'b. degrees' क्रमशः; 'b. hundreds' शतशः; 'one b. one' एकैकशः, आनुपूर्वेण; 'b. end' स्वार्थः, स्वहितं; 2 गौणार्थः. 'b. oneself' रहसि, निभृतं, रहः. 'b.-gone' अतीत, अतिक्रांत, गत; 'b.-path' विमार्गः, विपथः, उपमार्गः, गूढपथः; 'b. law' उपव्यवस्था, उपविधिः; 'b.-name' उपाधिः; by-product,' s. गौण-फलं-उत्पन्नं-लाभः. 'b.-stander' पार्श्वस्थः, प्रेक्षकः, समीपस्थः; 'b. word' उपहासास्पदं. 2 जनोक्ति f. आभाणकः.

Byre, s. व्रजः, गोष्टं, गोशाला.

C.

Cab, s. एकाश्ववाहनं-शकटः; 'c. man,' *See* **Coachman.**

Cabal, s. गूढमंत्रणा, कुविचारणा. -v. i. निभृतं मन्त्र् 10 A, कूटार्थं संभिल् 6 P. **-ler,** s. कुमंत्रणकृत् m., गूढमंत्रिन् m., भेदकरः.

Cabala, s. गूढशास्त्रं, गुप्तविद्या. **-Cabalist,** s. गूढशास्त्रज्ञः. **-ic,** a. निगूढार्थ, गुप्तार्थ.

Cabbage, s. शाकं, हरितकं. 2 s. (सूचिकेन) सुषितं पटखंडं. -v. i. (सूचिकवत्) पटखंडं सुष् 9 P.

Cabin, s. कुटि-टी f., शाला, कोष्ठः. 2 नौकाभ्यंतरे कोष्ठः. 3 वेश्मन् n., कुटीरः. 4 Tent, q. v. **-et,** s. वेश्मन् n., कक्षांतरं, उपरोधकं. 2 शिष्टसभा, धीसचिवसभा; गूढमंत्रणं. 3 रत्नकोष्ठः. 4 समुद्गकः, संपुटः; *See* **Box.**

Cable, s. नौरज्जु f. 2 विद्युत्संदेशवाहकं तंत्रं. **-ed,** a. रज्जुबद्ध. **-gram,** विद्युत्संदेशः.

Cachexy, s. दोषत्रयं, त्रिदोषं, शरीरदोषः.

Cachination, s. अट्टहासः, प्रहासः.

Cackle, Cackling, s. कूजनं, हंसरुतं; अव्यक्तरवः. 2 जल्पितं, प्रलापः. -v. i. कूज् 1 P, अव्यक्तं रु 2 P. **-er,** s. कूजकः.

Cad, s. ग्राम्यजनः, असभ्यः.

Cadaverous, a. शवतुल्य, शवसवर्ण.

Caddie, s. संदेशहरः, दूतः.

Cadence, s. पातः, च्युति f. 2 स्वरः, विरावः, निन्हादः; स्वरसंक्रमः, स्वरावरोहः.

Cadet, s. अनुजः, अवरजः. 2 युद्धकर्माध्यायिन् m.

Cadge, v. i. छद्मना जीविकां कृ 8 U. 2 घोषणपूर्वकं अल्पद्रव्यं विक्री 9 U. 3 *See* **'Beg.'** **-er,** s. आपणिकः. विवधिकः, 2 छद्मजीविन् m.

Cafe', s. पानगृहं.

Cæsura, s. विच्छेदः, विरामः.

Cage, s. पंजरः-रं, पिंजरं, वर्तिसः. 2 Prison, q. v. -v. t. पंजरे रुध् 7 U or बंध् 9 P.

Cairn, s. उपल-पाषाण-राशिः, शिलासमुच्चयः, प्रस्तरचिति f.

Caitiff, s. खलः, शठः, दुर्वृत्तः; *See* **Wicked.**

Cajole, v. t. लल् 10, उपच्छंद् 10. 2 **Cheat,** q. v. **-ry,** s. चाटूक्ति f. 2 वंचनं, छलं, &c.

Cake, s. पूपः, पिष्टकः, अपूपः. -v. i. पिंडीभू 1 P.

Calamity, s. विपद् f., आपद् f., व्यसनं, अनर्थः, उपप्लवः, दुःखं, संकटं, अत्याहितं. 2 उत्पातः, दैवी आपद्. **-ous,** a. विपद्ग्रस्त, व्यसनोपेत, विपदापन्न, दुर्गत, विधुर.

Calamus, s. वेत्रः, वेणुः.

Calash, s. केलिरथः, क्रीडायानं.

Calcareous, a. शार्करीय. 2 चूर्णमय-गुण.

Calcine, v. t. भस्मीकृ 8 U.

Calculate, v. t. गण् 10, परिसं-सं-ख्या 2 P, संकल् 10. 2 निरूप् 10; चिंत् 10, प्रकल्प् c. **-ed,** a. गणित, संख्येय. 2 युक्त, पर्याप्त, उचित, अलं with inf. **-ion,** s. गणनं-ना, संख्यानं. **-or,** s. गणकः.

Calculous, a. शिला-अश्म-मय (यी f.)

Calculus, s. अश्मरी, मूत्रकृच्छ्रं.

Caldron, s. पिठरः-रं, उखा, कुंडं, स्थाली.

Calefy, v. t. तप् 1 P.

Calendar, s. पंजी, पंजिका.

Calends, s. प्रतिपद् f.; प्रथमदिवसः.

Calf, s. गोवत्सः, वत्सः, तर्णकः. 2 जंघापिंडः, पिंडिका.

Calibre, s. छिद्र; छिद्रव्यासः. 2 परिमाणं. 3 प्रकारः, जाति f. 4 मेधा.

Calico, s. चित्रितकार्पासपटः.

Caligation, *See* **Darkness.**

Caligraphy, s. शोभनलेखनकला-शिल्पं.

Calisthenics, s. व्यायामः.

Calix, s. पुष्पगर्भः, पुष्पकोशः.

Call, v. t. ह्वे 1 P, आह्वे, शब्दायति (D.), आकृ c. 2 अभिधा 3 U, आख्या 2 P, आह्वे, चक्ष् 2 A, नाम कृ 8 U; कृत् 10; 'c. ed her by the name of Parvati' तां पार्वतीति नाम्ना जुहाव (बधुजनः) (K. 1. 26), तस्याः पार्वतीति नाम चकार; वच् 2 P, उदाहृ 1 P, ब्रू 2 U. 3 नि-आ-मंत्र् 10 A; 'c. by name' नामग्राहमाह्वे, संबुध् c.; 'c. to mind' स्मृ 1 P, मनसि कृ 8 U; 'c. to account' किं किं कृतमिति प्रच्छ् 6 P or अनुयुज् 7 A or अनुसंधा 3 U; 'c. to witness' साक्षिणं कृ, तमेव (अग्निं) चाधाय विवाहसाक्ष्ये

(R. VII. 20). -*s.* आह्वानं; पृच्छा; निमंत्रणं; संबोधनं. 2 प्रयोजनं. 3 अभिगमः; नियोगः; 'I have many c. s upon me today' मयाद्य कर्तव्या बहवो नियोगाः संति. **-back,** प्रत्यादिश् 6 P, निवृत् c.; खंड् 10, निरस् 4 P. **-for,** अर्ह् 1 P; 'this matter c. s for consideration' अयमर्थो विचारणामर्हति; or अत्र विचारणया प्रयोजनं; अपेक्ष् 1 A. **-forth,** प्रोत्सह् c., उद्युज् 10; प्रकटीकृ, प्रकाश् c. **-out,** पठ् 1 P; उत्क्रुश् 1 P. 2 तारस्वरेण. उच्चैः आह्वे, घुष् 10. **-upon, on,** अर्थ् 10 A, याचू 1 A. 2 द्रण्डुं गम् 1 P, अभिगम्. **-up,** (from sleep) प्रबुध् c. **-ed,** *a.*: आहूत; 2 अभिहित, उक्त, उदाहृत; gen. ex. by नाम *ind.*, नामन्, अभिधान, आख्या, अभिधा, संज्ञा, नामधेय, in comp.; 'a boy c. Rama,' रामो नाम, रामनामा, रामसंज्ञः, &c. बालः. **-ing,** *s. See* (*s.*). 2 वृत्ति *f.*, जीवनसाधनं, उपजीविका; व्यवसायः.

Calligraphy, *See* **Caligraphy.**

Callous, *a.* कठिन, घन. 2 कठोर, निर्दय, कर्कश; 'c. to contempt' तिरस्कारमगणयन्, तिरस्कारानभिज्ञः. 3 निर्लज्ज, धृष्ट; अविनीत. **-ness,** *s.* काठिन्यं, निर्दयता, &c. **-Callosity,** *s.* किणः, त्वग्दृढता.

Callow, *a.* अजातपक्ष, पक्षहीन. 2 *See* **Inexperienced.**

Calm, *a.* प्र-उप-शांत, निश्चल, प्रसन्न, स्तिमित, अनुत्तरंग, अक्षुब्ध, निष्कंप, निर्वात, अव्याकुल; 'to be c.' शम् 4 P, प्रसद् 1 P; 'heart, be c.' हृदय प्रसीद, मा उत्तास्य. -*s.* निर्वातः, शांति *f.*; प्रसादः, विश्रामः. 2 शांतता, स्तिमितता; ex. by (*a.*). -*v. t.* उप-प्र-शम् c. (शमयति), उप-परि-सांत्व् 10; तुष् c., प्रसद् c. 2 लघूकृ 8 U, अपनी 1 P. **-ly,** *adv.* निश्चलं, अक्षोभं, शांत्या, प्रशांतं. **-ness,** *s.* प्र-उप-शांति *f.*, निर्विकारता, प्रसादः, अव्याकुलता, असंभ्रमः. 2 निर्वातत्वं, अक्षोभः, स्तिमितता.

Caloric, *s.* उष्णता, तापः.

Calorific, *a.* तापकर (री *f.*); तापजनक.

Calve, *v. i.* वत्सं सू 2 A; प्रजन् 4 A.

Calumniate, *v. t.* परि-अप-वद् 1 U; निर्भर्त्स् 10 A, निंद् 1 P, अपभाष् 1 A मिथ्या अभियुज् 7 A, 10; आ-अधि-क्षिप् 6 P. **-or,** *s.* परिवादरतः, परिवादिन् *m.*, निंदकः, अभ्यसूयकः, अभिशापकः, पिशुनः, आक्षेपकः. **-Calumny,** *s.* परिवादः, पैशुन्यं, अभ्यसूया, अलीकप्रवादः, मिथ्याभिशापः, पिशुनवचनं, आक्षेपः, निंदाभियोगः. **-ous,** *a.* पिशुन, कलंकमय (यी *f.*). **-ously,** *adv.* सापवादं, पारवादन, साभ्यसूयं.

Calx, *s.* चूर्ण, भस्मन् *n.* 2 रीतिपुष्पं.

Calyx, *s. See* **Calix.**

Cambric, *s.* अंशुकं, दुकूलं.

Camel, *s.* उष्ट्रः; क्रमेलकः, मयः, महांगः; 'young c.' करभः; 'she-c.' उष्ट्री.

Camisado, *s.* रात्रियुद्धं.

Camlet, *s.* ऊर्णावस्त्रं.

Camp, *s.* शिबिरं, निवेशनस्थानं, निवेशः. 2 सैन्यनिवासः. -*v. t.* सैन्यं निविश् c.

Campaign, *s.* समरभूमि *f.*, -स्थलं. 2 युद्धकालः, युद्धप्रवृत्त *f.*

Camphor, *s.* कर्पूरः-रं, घनसारः, सिताभ्रः, हिमवालुका, चंद्रः, सोमः. **-ated,** *a.* कर्पूरसंमिश्र-संसृष्ट.

Camus, *a.* चिपिट.

Can, *v. i.* शक् 5 P, प्रभू 1 P, or समर्थ-क्षम-शक्त *a.* भू with inf. of verb; *See* **Able;** oft. by ईश् 2 A; पृ 10. 2 In pass. ex. by pot. pass. part.; 'c. be done' करणीय *a.*, कार्य, &c.; 'I cannot but go' मयावश्यं गंतव्यमेव. -*s.* कंसः, भाजनं, धातुपात्रं, चषकः.

Canal, *s.* कुल्या, प्रणाली.

Canard, *s.* अश्रद्धेया कथा.

Cancel, *v. t.* अव-वि-लुप् 6 P or c., व्या-अप-निर्-मृज् 2 P; निरस् 4 P, खंड् 10, निवृत् c.

Cancer, *s.* कर्कटः, कर्कः. 2 कुलीरः. 3 मांसार्बुदं; तनुव्रणः, विस्फोटः. **-ate,** *v. i.* व्रणीभू 1 P.

Candent, *a. See* **Ho**

Candid, *a.* निष्कपट, निर्व्याज, सरल, स्फुट-स्पष्ट-वादिन्, ऋजु, निर्मल, शुद्धात्मन्, निर्व्यलीक; शुचि. **-ly,** *adv.* निष्कपटं; स्फुटं, निर्व्याजं - **-ness, -Candour,** *s.* निष्कापट्यं निर्व्याजता; आर्जवं, सरलता, अमाया, दाक्षिण्यं निर्व्यलीकता, शौचं.

Candidate, *s.* अर्थिन् *m.*, याचकः, प्रार्थकः, पदान्वेषिन् *m.*

Candify, *v. t.* धवलीकृ 8 U, शुक्लीकृ.

Candle, *s.* दीपः, दीपिका, वर्ति-र्ती *f.* **-holder,** *s.* दीपहस्तः-वाहः. **-stick,** *s.* दीपपादपः, दीपशिखा-वृक्षः.

Candy, *v. t.* घनी-खंडी-सांद्री-कृ 8 U, श्यै c. -*v. i.* श्यै 1 A, घनीभू 1 P. -*s.* शर्करा सितोपला, खंडमोदकः.

Cane, *s.* वेतसः, वेत्रः, वेणुः, वंशः, वानीरः. 2 वेत्रयष्टि *f.* -दंडः; 'sugar-c.' इक्षुः; 'seat of c.' वेत्रासनं; 'made of c.' वैणव (वी *f.*), वैदल (ली *f.*). -*v. t.* वेत्रेण तड् 10 or हन् 2 P or प्रह् 1 P.

Canine, *a.* कुक्कुरीय, श्वन् in comp.

Canker, *s.* विद्रधिः, व्रणः. 2 फलनाशी कीटः. 3 कलंकः, विष. 3 दूषणं, विलयनं, विनाशः. -*v. t.* विनश् c., विली c., दुष् c. (दूषयति). -*v. i.* विली 4 A, दुष् 4 P.

Cannibal, *s.* नृभुंज् *m.*, पिशिताशः -शनः, पुरुषादः, क्रव्याशिन् *m.* **-ism,** *s.* क्रव्याशित्वं, &c.

Cannon, *s.* गुलिप्रक्षेपणी लोहनाडि-डी *f.* **-Ball,** *s.* आग्नेयास्त्रं, रणगुलि *f.*

Canoe, *s.* लघुनौका, उडुपं, प्लवः, कोलः.

Canon, *s.* विधिः, नियमः; शास्त्रं, व्यवस्था. **2** पौरोहितधर्मशास्त्रं. **3** धर्मपुस्तकसंहिता. **4** (a ravine) जलप्रवाहकृतदरी. **-ical,** *a.* वैधिक (की *f.*), नियमानुसारिन्. **-ically,** *adv.* विधिवत्, यथाविधि,-शास्त्रं. **-ize,** *v. t.* सिद्धजनमध्ये आरुह् c. (रोपयति) or गण् 10 or संख्या 2 P.

Canopy, *s.* वितानं, उल्लोचः, आच्छादनं, पिधानं. **-***v. t.* वितानीकृ 8 U, वितानेन आच्छद् 10.

Canorous, *a.* सुस्वर, मधुस्वन.

Cant, *s.* परिभाषा, कल्पितसंज्ञा. **2** अपभाषा. **3** वाक्छलं, दंभोक्ति *f.*, दांभिकवचनं. **4** प्रावण्यं. **5** उद्घोषणेन विक्रयः. **-***v. i.* परिभाष् 1 A. **2** दांभिकतया वद् 1 P **3** अर्धवल्गितेन चल् 1 P. *v. t.* उद्घोषणेन विक्री 9 A. *a.* उत्साहिन्, तेजस्विन्. **-ation,** *s.* गानं, गीतं. **-er,** *s.* अर्धवल्गितं. **2** दांभिकः, धर्मध्वजिन् *m.* **-icle,** *s.* उपगानं.

Cantankerous, *a.* दुराग्रह, दुर्दम, आग्रहिन्.

Cantharides, *s.* विस्फोटकीटकः.

Canthus, *s.* अपांगः- गं, नेत्रपर्यंतः.

Cantillate, *v. t.* or *v. i.* गै 1 P.

Cantle, Cantlet, *s.* खंडः, भागः.

Canto, *s.* सर्गः, पर्वन् *n.*, परिच्छेदः; अध्यायः; स्कंधः, (of different compositions).

Canton, *s.* चक्रं; भूभागः, प्रदेशः. **-***v. t.* खंडशो विभज् 1 P. **2** आवासं कल्प् c. **-ment,** *s.* सैन्यावासः, शिबिरं.

Canty, *a.* उत्साहिन्, तेजस्विन्.

Canvas, *s.* शणवस्त्रं, शाणं, स्थूलपटः. **2** वातवस्त्रं.

Canvass, *v. t.* Beg, q. v. **2** परि-ईक्ष् 1 A, विचर् c., निरूप् 10; अनुसंधा 3 U. **-***s.* स्थूलपटः, शाणं. **2** वातवस्त्रं. **-er,** *s.* प्रार्थकः.

Cap, *s.* शिरस्त्राणं, शिरस्कं, शिरोवस्त्रं, शिरोवेष्टनं. **2** अग्रे. **-***v. t.* पिधा 3 U; *See* **Cover.** **2** अति-शी 2 A **3** अग्रं आच्छद् 10 **-***v. i.* अभिवादनार्थं शिरस्त्रमुन्मुच् 6 P or अवतृ c. or अपनी 1 P.

Capable, *a.* समर्थ, शक्त, क्षम, योग्य, उचित; gen. ex. by शक्य with inf., or pot. pass. part.; 'c. of being defeated' पराजेतुं शक्यः, पराजेतव्यः, 'Râma is not c. of such atrocity' नेदृशं नृशंसचरितं रामेण कर्तुं शक्यते, रामे संभाव्यते; 'c. person' पात्रं, गुणवत्, 'to be c.' शक् 5 P, उत्सह् 1 A, क्लृप् 1 A (with dat.). **-Capability,** *s.* सामर्थ्यं, शक्ति *f.*, पात्रता, योग्यता.

Capacious, *a.* विशाल, उरु, प्रसृत; *See* **Broad.** **2** विपुल, प्रचुर.

Capacitate, *v. t.* उपयुक्त-क्षम *a.* कृ 8 U.

Capacity, *s.* धारणशक्ति *f.*, ग्रहणसामर्थ्यं (lit. & fig.); 'c. for all knowledge' अशेषविद्याग्रहणसामर्थ्यं. **2** बलं, शक्ति *f.*, सामर्थ्यं, पात्रता, योग्यता. **3** परिणामं, विस्तारः. **4** (Relation) gen. ex., by इति or रूपेण; 'he served the king in the c. of a servant' सेवकरूपेण राजानं सिषेवे; अवस्था, भावः, वृत्ति *f.*, विषयः; विधेयविषये सभवान्नियुंक्ते (Mal. 1) 'employs me in the c. of a servant.'

Cap-a-pie, *adv.* नखशिखांतं, सर्वांगं.

Caparison, *s.* आस्तरणं; अश्वसज्जा-प्रसाधनं, अश्वालंकाराः (pl.). **-***v. t.* विभूष् 10, अलंकारैर्भूष्.

Capcase, *s.* समुद्गकः, संपुटः.

Cape, *s.* भूशिरस् *n.*, अंतरीपः-पं. **2** स्कंधप्रावरणं, ग्रीवाप्रच्छदः.

Caper, *s.* *See* **Leap.**

Capillament, *s.* केशरः-रं, किंजल्कः.

Capillary, *a.* केशोपम; सूक्ष्म, केश in comp., 'c. attraction' केशाकर्षणं.

Capital, *a.* श्रेष्ठ, परम, मुख्य, प्रधान, विशिष्ट, वरिष्ठ, उत्तम, उत्कृष्ट; 'c. punishment' उत्तमसाहसं, देहदंडः, प्राणदंडः; 'c. crime' वधार्हं पातकं; वधदंड्यं पापं. **-***s.* राजधानी. **2** मूलं, मूलद्रव्यं; 'floating or circulating c.' *s.* परिवर्तिन् *a.* मूलद्रव्यं. 'fixed c.' स्थायिन् *a.* मूलद्रव्यं; 'make c. out of,' हितं साध् c., हितानुकूल *a.*, कृ. 8U. **3** शीर्षं, अग्रं. **-ist,** *s.* द्रव्यवत् *m.*, कोटीश्वरः. **-ly,** *adv.* उत्तमसाहसेन; प्राणदंडेन. **2** परमं, श्लाघ्यप्रकारेण, विशिष्टतया.

Capitation, *s.* एकैकशः परिगणनं; मस्तकसंख्या.

Capitulate, *v. i.* शत्रुहस्ते आत्मानं ससमयं सम्-ऋ c. (अर्पयति), शत्रोरधीन *a.* भू, वशं गम् 1 P. **2** संक्षेपतः लिख् 6 P or कथ् 10. **-ion,** *s.* समयपूर्वकं समर्पणं; वशीभवनं, शत्रुकरार्पणं.

Caprice, *s.* कामचारः, चापल्यं, मनोलौल्यं; 'c. of fortune' दैवविलसित-विजृंभणं; दैवस्य कामचारः (Mu. 2). **-Capricious,** *a.* कामचारिन्, चपल, चंचलप्रकृति, लोलचल-चित्त, लोल, अस्थिर, स्वैरवृत्त, स्वैरिन्. **-ly,** *adv.* लोलचेतसा, चापल्येन; कामतः, स्वैरं, कामचारेण. **-ness,** *s.* चापल्यं, लोलता, कामचारिता, &c.

Capricorn, *s.* मकरराशिः, मकरः.

Capsize, *See* **Overturn.**

Capstan, *s.* चक्रयंत्रं.

Capsule, *s.* बीजकोषः. पुटः-टं. **-ar,** *a.* पुटाकार.

Captain, *s.* सैनानीः, गुल्मपतिः, दंडनायकः. **2** पोताध्यक्षः. **3** नायकः, नेतृ *m.*. मुखरः, अग्र-पुरो-गः.

Captation, *s.* लोकरंजनं, जनश्लाघासेवनं.

Caption, *s.* निरोधः, आसेधः.

Captious, *a.* दोषैकदृश्, छिद्रान्वेषिन् विवादशील **2** भ्रांतिकर (री *f.*). **-ly,** *adv.* विवादेच्छयैव, छिद्रान्वेषिवत्. **-ness,** *s.* छिद्रान्वेषिता; विवादशीलता.

Captivate, *v. t.* मुह् c., ग्रह् 9 P; हृ 1 P; विलुभ् c. (eye, ear, &c.); 'c. s the eye' विलोभयति चक्षुः. **2** दासीकृ 8 U, बंदीकृ, वशीकृ, दस् c. (दसयति). **-ing,** *a.* मनोहर, चित्तहारिन्, मनोज्ञ, हृदयग्राहिन्, हारिन्, मोहिन्. **-ion,** *s.* बंदी-दासीकरणं &c.

Captive, *s.* बंदी, बंदि *f.*; कारागुप्तः; 'made c.' (taken prisoner) बंदीकृत, बंदीग्राहं गृहीत. **2** दासः. **-***a.* बंदीकृत, दासीकृत, शत्रुवश, कारास्थ. **-ity,** *s.* बंधनं, बंदित्वं, कारावासः. **2** दासत्वं, दासभावः.

Captor, *s.* जेतृ *m.*, बंदीकर्तृ *m.*

Capture, *v. t.* ग्रह् 9 P, बंदी-दासी-कृ 8 U; (a fort) भंज् 7 P, लंघ् 10, आक्रम् 1 U, 4 P. **-***s.* ग्रहः, ग्रहणं; लोप्त्रं, लोत्रं; 'c. of a fort' दुर्गलंघनं; 'c. of cattle' गोग्रहः, धेनुहरणं.

Car, *s.* रथः, वाहनं, चक्रयानं, प्रवहणं; 'heavenly c.' विमानं; 'war c.' स्यंदनः.

Caracole, *s.* तिर्यक्प्लुतं, वक्र-कुटिल-गति *f.* **-***v. i.* तिर्यक् प्लु 1 A, or वल्गू 1 U.

Caravan, *s.* सार्थः, संघः; 'leader of c.' सार्थवाहः. **-sary,** *s.* पथिकावासः; पांथनिवासस्थानं.

Carbuncle, *s.* विस्फोटः; वल्मीकं. **2** पद्मरागः.

Carcanet, *s.* मुक्तावलि *f.*, मणिमाला.

Carcass, *s.* शवः-वं, कुणपः, मृतं शरीरं.

Card, *s.* पत्रं; क्रीडापत्रं. **2** ऊर्णामार्जनी. **-***v. t.* ऊर्णां संमृज् 2 P or घृष् 1 P. **-er,** *s.* ऊर्णामार्जकः.

Cardamom, *s.* एला, विष्कुटि-टी *f.*; पृथ्वीका, चंद्रबाला, बहुला; 'small c.' उपकुंचिका, तुत्था, कोरंगी, त्रिपुटा, त्रुटि-टी *f.*

Cardiac, *a.* तेजस्कर, दीपक, अग्निद. **-***s.* हृद्रोगः

Cardinal, *a.* प्रधान; *See* **Capital,** *a.*; 'c. point' दिग्भागः. **-***s.* धर्माध्यक्षः.

Care, *s.* चिंता, औत्सुक्यं, उद्वेगः; *See* **Anxiety.** **2** यत्नः, प्रयत्नः, आदरः, मनोयोगः; 'brought up with c.' प्रयत्नसंवर्धितः, सादरं परिपालितः. **3** सूक्ष्मता, निपुणता; 'searching with c.' निपुणमन्विष्य; 'thinking with c.' सुनिपुणं विमृश्य. **4** रक्षा; अवेक्षा; 'leave under the c. of' *See* **Charge.** **5** अप्रमादः, सावधानता, अवधानं; 'have a c. what you do' यत्कर्तव्यं तद्विमृश्य-समीक्ष्य-कुरुत. **-***v. i.* अव-अप-ईक्ष् 1 A, चिंत् 10, मनो धा 3 U, oft. ex. by the several nouns above; 'I do not c. now' अधुनाहं वीतचिंतः, 'I c. very much for your protection' तव रक्षणे बलवान्ममादरः. **2** गण् 10, (न तृणमपि गणयति शत्रुं), आद्र 6 A (न त्यागमाद्रियते); ईक्ष् 1 A, (the sense being clear), न कामवृत्तिर्वचनीयमीक्षते (K. V. 82) 'a self-willed person c. s not for blame'. **-**'take c' रक्ष् 1 P, अव-ईक्ष् 1 A (श्लाघ्यां दुहितरमवेक्षस्व जानकीं U. 1), चिंत् 10 (तातस्त्वां चिंतयिष्यति). **2** लल् 10; संवृध् c., पा c (पालयति), विनी 1 P. **3** अप्रमत्त-सावधान *a.* भू 1 P, अवधा 3 U. 'let c. be taken of each character' प्रतिपात्रमाधीयतां यत्नः (S. 1), 'do not c. to think' सावधानेन चेतसा न विचारयंति, इति विचारं नाद्रियंते. **-ful,** *a.* Anxious, q. v. **2** अप्रमत्त, सावधान, अभियुक्त, अवहित, दक्ष. **-fully,** *adv.* सावधानं, प्रयत्नतः, अप्रमत्तं, सादरं, निपुणं. **-less,** *a.* प्रमत्त, अनवधान, निरपेक्ष, निरवधान, असमीक्ष्यकारिन्, 'to be c. in' प्रमद् 4 P (with abl.), स्वाधिकारात्प्रमत्तः (Me. 1.). **-lessly,** *adv.* सप्रमादं, अनवधानेन, &c.

Career, *s.* चर्या; धावनं. **2** गति *f.*, क्रमः, चलनं, चरितं; 'c. in life' जीव-लोक-यात्रा; 'during his c.' तस्मिन् (भुवं) शासति. **-***v. i.* वेगेन धाव् 1 P.

Caress, *v. t.* परामृश् 6 P, आलिंग् 1 P, परिरभ् 1 A; *See* **Clasp.** **2** लल् 10. **-***s.* परिरंभः-णं, लालनं, आलिंगनं, परिष्वंगः.

Caret, *s.* काकपदं, हंसपादाकृति चिह्नं.

Cargo, *s.* पोतभारः, पोतस्थं द्रव्यं-भांडं.

Caricature, *s.* हासजनकं चित्रं, हास्यचित्रं. **-***v. t.* चित्रेण हास्यास्पदं नी 1 P; हास्यप्रकारेण चित्र् 10. **-ist,** *s.* हास्यप्रतिमाकृत् *m.*

Cariole, Carriole, *s.* लघुशकटः, अनावृत *a.* यानं.

Carious, *a.* गलित, क्षीण, पूयपूर्ण. **-Caries, -Cariosity,** *s.* अस्थिक्षयः-शोषः.

Cark, *v. i.* चिंताकुल *a* भू 1 P.

Carle, *s.* दुर्वृत्तः; ग्राम्यः अविनीतः; *See* **Wicked.**

Carminative, *a.* वायुनाशिन्, अग्निद, अग्निवर्धक.

Carmine, *s.* जतुजरंगः.

Carnage, *s.* वधः, विशसनं, संहारः, हत्या.

Carnal, *a.* कायिक-शारीरिक (की *f.*). **2** ऐहिक (की *f.*). **3** विषयिन्, विषयासक्त, विषयोपसेविन्, 'c. pleasure' विषयसुख; 'c. desires' विषयवासनाः; 'c. union' संभोगः, अभिगमः. **-ity,** *s.* विषयासक्ति *f.*, विषयोपसेवा, कामुकता. **-ly,** *adv.* कामुकवत्.

Carnation, *s.* मांसवर्णः; लोहितवर्णः

Carnival, *s.* तुमुलोत्सवः.

Carnivorous, *a.* क्रव्याद्, मांसभुज्, पिशिताशन, क्रव्यभोजन.

Carnosity, *s.* गंडः; मेदोग्रंथिः.

Caroche, *s.* क्रीडारथः, चातुरं.

Carol, *s.* हर्ष-आनंद-गीतं. **2** स्तोत्रं, भक्तिगीतं. **-***v. t.* हर्षेण गै 1 P, उपगै, स्तु 2 U.

Carouse, *v. i.* अतिपानं कृ 8 U, पानोत्सवं कृ, अतिपानेन क्षीव *a.* भू 1 P. **-***s.*, **-al,** *s.* अतिपानं, पानोत्सवः. **-ver,** *s.* पानरतः, अतिपायिन् *m.*

Carp, *s.* शफरी, प्रोष्ठः-ष्ठी. **-***v. i.* (at) छिद्रं अन्विष् 4 P; दोषं दृश् 1 P or निरूप् 10, निंद् 1 P; *See* **Censure.** **-er,** *s.* छिद्रान्वेषिन् *m.*, दोषैकदृश् *m.* **-ing,** *s.* गर्हा, निंदा, छिद्रान्वेषः.

Carpenter, *s.* तक्षकः, सूत्रधारः, स्थकारः, स्थपतिः, त्वष्टृ *m.*, तक्षन् *m.* **-Carpentry,** *s.* दारुकर्मन् *n.*, तक्षकक्रिया, तक्षशिल्पं.

Carpet, *s.* कुथः-था, आस्तरणं; 'brought on the c.' प्रस्तुत, उपक्षिप्त.

Carrion, *s.* पूतिमांसं, अखाद्यमांसं; कुणपः. **-eater,** *s.* कुणपभुज् *m.*

Carry, *v. t.* वह् 1 P, नी 1 P, भृ 3 U, हृ 1 P; 'c. ed a dog on his shoulder' स्कंधे-धेन श्वानमुवाह. **2** साध् 5 P or c.; 'c. a fort' दुर्गं लंघ् 1 A, 10 or भंज् 7 P, or वशीकृ 8 U; 'the enemy c. ed the day' शत्रवो जयमापुः; 'c. one's point' अभीष्टं लभ् 1 A, प्रतिज्ञां पूर् 10, 'c. oneself' आचर् 1 P, *See* **Act,** 'c. arms' शस्त्राणि ग्रह् 9 P, सैनिकवृत्तिं आस्था 1 A. **-away, -off.** अपवह्, अपनी, अपहृ; अपऊह् 1 U, अपकृष् 1 P. **-on,** प्रवृत् c., प्रणी विधा 3 U, 'c. on war' युद्धं-संग्रामं कृ, विग्रह् 9 P. **-out,** अनुष्ठा 1 P, कृ 8 U, साध् 5 P or c. **-through.** पारं नी. 'c. ing through all difficulties' आपदां पारं नयनं. **-Carriage,** *s.* वाहनं, यानं, रथः, प्रवहणं, शकटः-टं; 'closed c.' कर्णीरथः, प्रवहणं, डयनं; 'c. road' रथ्या; 'c. horse' रथ्यः. **2** आचरणं, व्यवहारः, गति *f.*, चरितं, चेष्टा. **3** निर्वाहः, प्रणयनं. **-Carrier,** *s.* वाहकः-हरः, in comp. **2** भांडवाहनजीविन् *m.*

Cart, *s.* शकटः-टं, शकटिका, वाहनं, प्रवहणं, यानं. **-***v. t.* शकटेन वह् 1 P. **2** शकटे निधा 3 U. 'Carter,' 'c. man' शाकटिकः, शकटवाहः, 'c. horse' शकटवाहनः; धुर्यः धुरीणः; 'c. load' शाकटं, शलाटः, शाकटो भरः; 'c rut' शकटचिह्नं-पदवी-पद्धति *f.*; 'c. wright' शकटकारः. 'To put the c. before the horse,' विपर्यस् 4 P, विपर्यासं नी 1 P.

Carte, *s.* भोजनपत्रिका. 'c. blanche,' अनिर्दिष्टसमय *a.* पत्रं.

Cartel, *s.* युद्धाह्वानपत्रं.

Cartilage, *s.* कोमलास्थि *n.* **-Cartilaginous,** *a.* तरुणास्थिविशिष्ट.

Carto-graphy, *s.* भूम्यालेख्य-कला-वृत्तिः *f.*

Cartoon, *s.* चित्रितपटः, विचित्रमालेख्यं, हास्योत्पादकं चित्रं.

Caruncle, *s.* गंडः, मांसपिंडः.

Carus, *s.* निःसंज्ञता.

Carve, *v. t.* कृ 6 P, तक्ष् 1, 5 P, उत्कृ, (उत्कीर्णा इव वासयष्टिषु V. 3); उल्लिख् 6 P. **2** कृत् 6 P, छिद् 7 P, कॢप् c., विभज् 1 U; 'c. out (a plan)' युज् 10; प्रकॢप् c.; प्रतियुज् 10; चिंत् 10, निरूप् 10 **-er,** *s.* तक्षकः, कारुः, त्वष्टृ *m.*, तष्टृ *m.*, **2** परिकल्पकः.

Cascade, *s.* प्रपातः, प्रस्रवणं, वारिप्रवाहः, निर्झरः, उत्सः.

Case, *s.* अवस्था, भावः, दशा, स्थिति *f.*, वृत्ति *f.*; 'what is the c. with him' किं तस्य वृत्तं. **2** पदं. **3** अर्थः. **4** कार्यं, पक्षः. **5** पुटः, पिधानं, कोषः, आवेष्टनं. **6** भांडं, आधारः. **7** स्थानं, स्थलं. 'In c.' यदि चेत्; 'this being the c.' एवं सति-गते; 'in this c.' अत्र, अत्र विषये; 'in the c. of' gen. ex. by gen., or विषये in comp.; 'in the c. before us,' 'in the present c.' प्रस्तुतविषये, प्रकृते 'if such be the c.' यद्येवं, तेन हि; 'in both c.s' उभयथा, उभयपक्षे. **-***v. t.* भांडे निधा 3 U or निविश् c. **2** पिधा 3 U, आवृ 5 U

Casement, *s.* गवाक्षः, वातायनं, जालं.

Cash, *s.* टंकः, मुद्रा, नाणकं. **-keeper, -ier,** *s.* टंकाधीशः रक्षकः. 'in c.' सधन *a.* 'Out of c,' निर्धन *a.*

Cashier, *v. t.* अधिकारात् भ्रंश् c. or च्यु c. or निरा-कृ 8 U or अपास् 4 P.

Cask, *s.* भांड, भाजन, पात्रं.

Casket, *s.* समुद्गकः, भांडं, मंजूषा, करंडकः, संपुटः-टकः.

Casque, *s.* शिरस्त्राणं, शिरस्कं.

Cast, *v. t.* क्षिप् 6 P, प्र क्षि-°; अस् 4 P, मुच्-सृज् 6 P, पत् c. **2** (about) विगण् 10, आकल् 10, चिंत् 10 विचर् c. **3** विलाप्य संधा 3 U; 'c. glance' दृशं क्षिप्, दृष्टिचक्षुः &c. दा 3 P (कृष्णसारे ददच्चक्षुः S. I) 'c. skin' कंचुकं विमुच्; 'c. lots'

गुटिकां पत् c.; 'why c. pearls before swine' किमिष्टमन्नं खरसूकराणां. **-s.** क्षेपः; पातः. **2** मूर्ति *f.*; घटनं-ना; 'c. of characters' भूमिकासंविभागः. **-aside,** अपाकृ 8 U, निराकृ. **-away,** अपास्, परित्यज्, उत्क्षिप्. **-down,** अव-वि-सद् 1 P, म्ले 1 P; विषण्ण *a.* भू 1 P; 'with a face c.' खिन्न-विषण्ण-वदनः; 'c. look' अधोदृष्टि *f.* **2** निपत् c., अधः क्षिप्. **-forth,** उत्सृज्, उद्गम् 1 P, उद्गृ 6 P. **-off,** विमुच्; अप-निर्-अस्. **-out,** अपाकृ, निःसृ c., निष्कस् c., प्रत्यादिश् 6 P. **-away,** *s.* त्याज्यः; अपांक्तेयः. **-ling,** *s.* गर्भपातितः, गर्भच्युतः.

Caste, *s.* वर्णः, जाति *f.*, कुलं; 'of the same c.' सवर्णः; 'low c.' हीनवर्णः, नीचः, निकृष्टजातिः; 'high c.' उत्तमवर्णः; 'mixture of c.s' वर्णसंकरः; 'low c. man' अंत्यजः; 'loss of c.' जातिभ्रंशः; 'out of c.' अपसदः, चांडालः, जातिहीनः, 'c. man' सजातीयः.

Castigate, *v. t.* दंड् 10; तड् 10. **-ion,** *s.* कशाघातः, तीव्रप्रहारः; दंडः, निग्रहः.

Castle, *s.* दुर्गं, कोटः, 'c. in the air (in Spain), मनोराज्यं. **-Castellan,** *s.* दुर्गाधिपतिः. **-Castellated,** *a.* दुर्गाकार.

Castor-oil, *s.* एरंडतैलं.

Castrate, *v. t.* वृषणौ कृत् 6 P or उत्पट् 10 or छिद् 7 P. **-ed,** *a.* छिन्नमुष्क, निर्वृषण. **-ion,** *s.* मुष्क-वृषण-छेदः, पुंस्त्वहरणं.

Castrel, *s.* श्येनः.

Casual, *a.* अतर्कित, अचिंतित; आकस्मिक. आपातिक-आगंतुक-दैविक (की *f.*), दैवायत्त. **-ly,** *adv.* अचिंतितं, दैवात्, समापत्या, दैवयोगात्. **-ty,** *s.* दैवयोगः-घटना, संगति *f.* समापत्ति *f.* **2** अदृष्टं, आकस्मिकी आपद्. **-ties,** युद्धे हताः.

Casuist, *s.* धर्माधर्मविचारकः. **-ry,** *s.* धर्माधर्मविचारणा. **2** विवेचनविद्या **3** वितंडवादः.

Cat, *s.* मार्जारः, बिडालः, ओतुः, आखुभुज् *m.* 'c. a. (o)' mountain,' वनमार्जारः. **2** चित्रव्याघ्रः. 'c. eyed' तिमिरदर्शिन् *a.* **-ling,** *s.* मार्जारशावकः; 'c.'s paw मंदवातः; (fig.) सुखप्रतार्य; *a.* 'c. witted' *a.* सासूयदृष्ट; 'it rained c.s and dogs,' अतिवृष्टिर्बभूव. 'cat o' nine-tails' नवरज्जुयुक्ता चर्मयष्टि *f.*, or कशा or ताडनी.

Cataclysm, *s.* पृथ्वीप्लावः, भूतसंप्लवः. **2** राज्यपरिवृत्ति *f.*

Catacomb, *s.* अंतर्भौमं, श्मशानं.

Catalepsis, } *s.* अपस्मारः; ग्रहामयः.
Catalepsy, }

Catalogue, *s.* परिसंख्या, परिगणना; 'c. of names' नामावलि-ली *f.*

Cataplasm, *s.* प्रलेपः, उपनाहः.

Catapult, *s.* गोफणा.

Cataract, *s.* निर्झरः, प्रपातः, प्रस्रवणं, उत्सः. **2** नेत्रपटलं, मंथः, शुक्रः; काचः.

Catarrh, *s.* अभिष्यंदः. **2** श्लेष्मन् *m.*, कफः, (variety of c.). **-al, ous,** *a.* अभिष्यंदिन्-कफिन्, श्लेष्मल.

Catastrophe, *s.* परिणामः, निर्वाहः, निर्वहणं. **2** आपद् *f.*; *See* **Calamity.**

Catch, *v. t.* ध्रु 1 P, 10, ग्रह् 9 P, बंध् 9 P (in a net &c.). **2** परामृश् 6 P, अवलंब् 1 A. **3** प्रलुभ् c., आकृष्-हृ 1 P; 'the house caught fire' ज्वलनमुपगतं-अग्निदीप्तं-गेहं; 'caught cold' शीताकुलो बभूव, पीनसोपहतः, अभिष्यंदाकुलः; 'c. in the act' (red-handed) कर्मगृहीत, रूपाभिग्राहित, लोपूत्रेण गृहीतः; 'Sir, you are c.' भो निगृहीतोऽसि (U. 4); 'c. in his own words' स्ववचनेनैव गृहीतः-निरुत्तरीकृतः. **-at,** अवलंब् 1 A, आश्रि 1 U. **-up,** अपहृ 1 P, अपनी 1 P. **-s.** तालकं. **2** लाभः; फलं. **3** पर्यायगीतं. **-er,** *s.* ग्राहकः, जालिकः. **2** वागुरा, जालं. **-ing,** *a.* संपर्कीय, संचारक **2** हारिन्.

Catchpole, *s.* दंड-यष्टि-धरः; राजपुरुषः.

Catechism, *s.* प्रश्नोत्तरं, सप्रश्नोत्तरः पाठः **-Catechize,** *v. t.* प्रश्नोत्तरद्वारेण-क्रमेण-अधि-इ c. (अध्यापयति) or उपदिश् 6 P or प्रच्छ् 6 P. **-Catechist, -Catechiser,** *s.* प्रश्नोत्तरविधिना अध्यापकः-पाठकः.

Catechu, *s.* खदिरसारः.

Catechumen, *s.* नवशिष्यः-छात्रः.

Category, *s.* पदार्थः. **2** समानवर्गः, अधिकरणं. **-ical,** *a.* सुव्यक्त, स्पष्टार्थ; नियत, व्यक्त. **-ically,** *adv.* स्पष्टं, सुव्यक्तं.

Catenation, *s.* संबंधः, अन्वयः, परस्परान्वयः. **2** शृंखलात्वं, दामता; परंपरा.

Cater, *v. i.* भोजनादि परि-उप-क्लृप् c.

Caterpillar, *s.* कोषकारः-वासिन् *m.*

Cates, *s.* स्वाद्वन्नं, विशिष्टान्नं.

Catgut, *s.* पुरीतत् निर्मिता तंत्री, तंतु *m.*

Cathartic, *s.* रेचकं, रेचनं, उदरशोधनं.

Cathedral, *s.* महामंदिरं, महता पूजाशाला.

Catholic, *a* सर्वसामान्य, साधारण (णी *f.*), सार्वलौकिक (की *f.*). **-ism,** *s.* साधारण्यं, सार्वलौकिकता.

Cattle, *s.* गावः (pl.); गोकुलं, पशुसमूहः, गोव्रजः; 'c. for draught' धुर्यः, धुरीणः; 'keeper of c.' गोपालः, पशुपालः

Caudal, *s.* लांगुलीय.

Caul, *s.* शिरोवेष्टनं. **2** अंत्रावेष्टनं. **3** गर्भावेष्टनं

Cauldron, *s. See* **Caldron.**

Cause, *s.* कारणं, (oft. with loc. of effect, दैवं नृणां वृद्धौ कारणं), निदानं, बीजं, हेतुः, निमित्तं, मूलं, योनि *f.* **2** कार्यं, प्रयोजनं. **3** स्थानं, अवसरः, पदं. **4** उत्पादकः,

Defy, *v. t.* तृणीकृ 8 U, अवज्ञा 9 U, अवमन् 4 A, अनादृ 6 ', लघूकृ, तृणाय मन्, परिभू 1 P, अवगण् 10; 'I d. a king' राजेति कियती-का मम मात्रा; 'I d. you to find a mistake in my writing' मम लेखे स्खलितं कथं त्वं दर्शयसीति प्रेक्षे तावत्; 'a disease which d.ed medical skill' वैद्ययत्नपरिभाविनं गदं (R. xix. 53). 2 युद्धार्थं आह्वे 1 A, अभियुज् 7 A, धृष् 5 P. -ance, *s.* समाह्वानं, युद्धाह्वानं, योधसंरावः. 2 अवज्ञा, अवगणना; 'in d. of' अवमत्य, तृणीकृत्य, अनादृत्य; ex. by gen. or loc. abs. -ant, *a.* उद्धत, सदर्प, सावज्ञ; अवमानिन्; 'in a d. tone' उद्धतं, सदर्पं, सावज्ञं. -er, *s.* समाह्वातृ *m.*, अभियोक्तृ *m.*

Degenerate, *v. i.* (कुलाचारात्) च्यु 1 A, भ्रंश् 1 A, 4 P, दुष् 4 P. -*a.* क्षीणपुण्य, -नष्टधर्मन्, परिभ्रष्ट, अपकृष्ट, कुलाचारभ्रष्ट. -ness, -Degeneracy, *s.* क्षीणपुण्यत्वं, कुलाचारभ्रंशः, कुलमर्यादातिक्रमः. 2 अपकर्षः, नीचावस्था, अपकृष्टदशा.

Deglutition, *s.* निगरणं, ग्रसनं.

Degrade, *v. t.* (पदात् or अधिकारात्) अपकृष् 1 P, भ्रंश् c., च्यु c., अवरुह् c. (रोपयति), नीचपदं प्राप् c. 2 अवमन् c., लघूकृ 8 U, मूल्यं लघयति (D.) or ऱ्हस् c., 'd.-ed from office' अधिकारभ्रष्ट, पदभ्रष्ट, भ्रष्टाधिकार, पदावरोपित. -ation, *s.* पद्-अधिकारभ्रंशः, अपकर्षः, पदच्युति *f.*, पदलोपः. 2 अवमानना, लघूकरणं, मानभंगः. 3 अपकृष्टता, अधोगति *f.*, नीचावस्था, अपकृष्टस्थिति *f.* -ing, *a.* लाघवकारिन्, अयशस्कर (री *f.*).

Degree, *s.* पदं, स्थानं, पदवि-वी *f.*, आस्पदं. 2 दशा, स्थिति *f.*, अवस्था. 3 उपाधिः, उपपदं. 4 कुलं, वंशः, अन्वयः. 5 प्रमाणं, परिमाणं. 6 गणः, वर्गः. 7 भागः, अंशः. 8 कोटि *f.*, काष्ठा; 'the highest d.' पराकोटिः-काष्ठा, अतिभूमिः. 9 क्रमः, अनुक्रमः, आवृत् *f.*, परिपाटि-टी *f.*, आनुपूर्व्य-र्वी, पर्यायः, तारतम्यभावः; 'in the hightest d.' निरतिशयं, एकांततः; 'in some d.' किंचित्, कियताप्यंशेन, ईषत्; 'not in any d.' न केनाप्यंशेन; 'by d.s' क्रमेण, क्रमशः, शनैःशनैः, प्रतिपदं.

Deify, *v. t.* देवत्वमारुह् c. (आरोपयति), देवं कृ 8 U. 'to be deified' देवीभू 1 P, देवत्वं इ 2 P, देवत्वमापद् 4 A. -Deiform, *a.* देवाकार, देवरूप. -Deification, *s.* ईश्वरसायुज्यं, ब्रह्मणि लयः, देवत्वप्राप्ति *f.* 2 देवत्वं, देवकरणं.

Deign, *v.* अर्ह् 1 P, प्रसद् 1 P, with inf., 'd. to took at me' मयि दृष्टिप्रसादं कुरु; *See* **Please.** 2 प्रसादपूर्वं दा 3 U, अनुग्रह् 9 P. 3 अनुज्ञा 9 U, अनुमन् 4 A.

Deism, *s.* ईश्वरवादः, आस्तिक्यं. -Deist, *s.* आस्तिकः, ईश्वरवादिन् *m.*

Deity, *s.* देवता, दैवतं, देवः; *See* **God.**

Deject, *v. t.* विषद् c., निर्विद् c, विषादं उत्पद् c., म्लानीकृ, धैर्यं त्यज् c. -ed, *a.* विषण्ण, निर्विण्ण, विषादापन्न, अवसन्न, दीन, म्लान, खिन्न; 'd. in mind' दीनमनस्, दुर्मनायमान, उद्विग्न, विमनस्, धैर्यच्युत; 'to be b.d' विषद् 1 P, विषादं गम् 1 P, दुर्मनायते (D.), धैर्यं त्यज् 1 P. -edly, *adv.* सविषादं, सोद्वेगं, विषण्णं. -edness, -ion, *s.* विषादः, वैमनस्यं, निर्वेदः, अवसादः, उद्वेगः, विषण्णता, दीनता, म्लानि *f.*, ग्लानि *f.*, खेदः, दौर्मनस्यं.

Dejecture, *s.* अवस्करः, पुरीषं.

Delate, *v. t.* वह् 1 P, आनी 1 P. **2** Accuse, q. v.

Delay, *v. t.* विलंब् c., व्याक्षिप् 6 P, अतिपत् c. **2** निरुध् 7 U, धृ 1 P, विष्टंभ् 9 P. **–***v. i.* विलंब् 1 A, चिर(रा)यति (D.), कालं या c. (यापयति) or क्षिप् 6 P or हृ 1 P; 'why d. then' ततः किं विलंब्यते (U. 1). **2** विक्लृप् c., विचर् c. **–***s.* विलंबः, व्याक्षेपः, कालातिपातः, कालयापनं, कालहरणं, कालक्षेपः. **2** आघातः, अंतरायः, विलंबं, हेतुः. **3** दीर्घसूत्रता; 'without d.' अविलंबितं, अविलंबं, अविलंबेन, अचिरं-रात्-रेण; 'd. is dangerous' दीर्घसूत्री विनश्यति. **–er,** *s.* कालक्षेपकः.

Delectable, *a.* रम्य, कमनीय, मनोज्ञ, आह्लादक, मनोरम-हर, रुचिर. **–Delectation,** *s.* आनंदः, आह्लादः, प्रमोदः, हर्षः.

Delegate, *v. t.* नियुज् 7 A, 10, व्यादिश् 6 P; प्रेष् c., (with acc. of person); न्यस् 4 P, निक्षिप् 6 P, ऋ c. (अर्पयति), प्रतिपद् c. **–***s.* प्रतिनिधिः, नियोगिन् *m.*, नियोज्यः, प्रतिपुरुषः, अधिकृतः पुरुषः. **–ion,** *s.* नियोजनं, प्रेरणं, निक्षेपः, &c.

Delete, *v. t.* अप-व्या-मृज् 2 P, विलुप् c., विनश् c., उच्छिद् 7 P. **–ion,** *s.* व्यामर्शः, लोपः, उच्छेदः. **–Deleterious,** *a.* विनाशक, घातिन्, हिंस्र, घातुक.

Delf, *s.* मृद्भांडं, मृण्मयद्रव्यं, कौलालकं.

Deliberate, *v. i.* विचर् c., चिंत् 10, विमृश् 6 P, संमंत्र् 10 A, विक्लृप् c.; *See* Consider. **–***a.* कामतः-विचारपूर्वकं-कृत, विमृश्य-कृत. **2** विमृश्यकारिन्, स्ववहित, असाहसिक, अप्रमत्त. **–ion,** *s.* विचार-रणं-णा, चिंता, मंत्रणं-णा, विमर्शः, समीक्षा, वितर्कः, विवेचनं, चर्चा. **–ive,** *a.* विचारशील, विचारिन्, विमर्शिन्. **–ly,** *adv.* जानत् with अपि or एव, बुद्धिपुरःसर, कामतः, विचारपूर्वकं **2** विमृश्य, समीक्ष्य, अवधानेन, असहसा, अप्रमत्तं. **–ness,** *s.* समीक्ष्य-विमृश्य-कारित्वं, अमाप्रदः, सावधानता, अवेक्षा.

Delicate, *a.* मधुर, स्वादु, मिष्ट. **2** ललित, चारु, शोभन. **3** (Soft) मृदु, कोमल, सुकुमार, तनु, श्लक्ष्ण, लघु, प्रतनु, विरल, परि,-पेलव; 'd. of person' कोमलांग (गी *f.*), मृदुशरीर; 'a d. woman' तन्वी, तन्वंगी, पेलवांगी. **4** विशिष्ट, उत्कृष्ट, उत्तम. **5** सभ्य, विनीत, शिष्ट, 'of a d. constitution' प्रकृतिकोमल, जन्मरोगिन्. **–ly,** *adv.* ललितं, सुकुमारं; मृदुतया. **–Delicacy,** *s.* माधुर्यं, स्वादुता, सौरस्यं. **2** लालित्यं, लावण्यं. **3** सौकुमार्य, मार्दवं, पेलवता, तनुता. **4** आदरः, विनयः, शिष्टाचारः, सुशीलता, सौजन्यं. **5** प्रकृतिदुर्बलता. **6** स्वाद्वन्नं, भोजनविशेषः, विशिष्टान्नं

Delicious, *s.* स्वादु, मिष्ट, रुचिकर (री *f.*), मधुर, सुरस, आस्वादवत्. **2** (of beauty &c.) मनोरम-हर, मधुर, कमनीय, रमणीय, हारिन्, चित्ताकर्षिन्. **–ly,** *adv.* स्वादु, मधुरं, मनोरमं. **–ness,** *s.* स्वादुता, माधुर्यं, रम्यता, &c.

Delight, *s.* आह्लादः, आ-प्र-मोदः, सुखं, हर्षः, प्रीति *f.*, प्र-सं-मदः, उल्लासः, शर्मन्, आनंदः, संतोषः, तृप्ति *f.*, मुद्-दा *f.*; 'takes no d. in sports' नाभिनंदति केलिकलाः (Mal. 3); 'thrill of d.' पुलकः, रोमांचः; 'thrilling with d.' आनंदपुलकिततनुः. **2** आनंदनं, आनंददः, हर्षकरः, आनंदहेतुः. **–***v. i.* 'to be d.ed' मुद् 1 A, हृष् 4 P, आनंद् 1 P, ह्लाद् 1 A, रम् 1 A, प्री 4 A, सं-परि-तुष् 4 P, उल्लस् 1 P **–***v. t.* सुखयति (D.), causal of roots above. **–ed,** *a.* सानंद, प्रीत, सहर्ष, मुदान्वित, हृष्ट, आह्लन्न, आनंदित, प्रमुदित, सोल्लास, आह्लादित, उल्लसित, साह्लाद. **–ful,** *a.* प्रमोदिन्, प्रामोदिक (की *f.*), आनंदप्रद, हर्षजनन (नी *f.*), आह्लादक, आनंदक, सुखद; रुचिर, कांत, रम्य, रमणीय, मनोहर-रम. **–fully,** *adv.* सानंदं, सहर्षं, साह्लादं; रम्यं, कांतं.

Delimit, *v. t.* मर्यादीकृ 8 U.

Delineate, *v. t.* वर्ण् 10; *See* Describe. **2** आलिख् 6 P, चित्र् 10, चित्रे निविश् c. **–ed,** *a.* चित्रालिखित, चित्रगत, आलिखित, वर्णित. **–ion,** *s.* आलेखनं, वर्णनं. **2** आलेख्यं, चित्रं, चित्रारंभः.

Delinquency, *s.* दोषः-अपराधः, पापं, दुष्कर्मन् *n.*, पापचरितं, अपक्रिया, दुष्कृति *f.* **–Delinquent,** *s.* पापिन्-पापकृत्-अपराधिन् *m.*, सदोषः, कृतापराधः.

Deliquesce, *v. i.* द्रवीभू 1 P, विली 9 P.

Deliquium, *s.* विलयनं, द्रवः.

Delirium, *s.* चित्तभ्रमः, चैतन्यनाशः, ज्ञानभ्रांति *f.* **–Delirious,** *a.* भ्रांतचित्त, नष्टचेतन, चैतन्यरहित.

Deliver, *v. t.* मुच् c., वि-प्र-मोक्ष् 10, उद्-हृ-धृ 1 P, निस्तृ c., रक्ष् 1 P, परि-त्रै 1 A. **2** समर्पय c (अर्पयति), न्यस् 4 P, प्रतिपद् c., प्र-दा 3 U, 1 P, संक्रम् c., आरुह् c. (रोपयति), हस्ते निक्षिप् 6 P, हस्तं प्राप् c., हस्तगत-गामिन् *a.* कृ 8 U, (तस्य वसुधामपि हस्तगामिनीमकरोत् R. VIII 1); 'shall d. it into his hand (to him)' इमं अस्य हस्तं, प्रापयिष्यामि (S. 3); 'd. ed charge of office' स्वाधिकारं अन्यहस्ते न्यक्षिपत्. **3** उद्-ईर् c., उच्चर् c., उदाहृ 1 P, व्याहृ, वद् 1 P. **4** (Of a message) निविद् c., कथ् 10, आख्या 2 P, आचक्ष् 2 A, शंस् 1 P. **5** (Give back) उत्सृज् 6 P, प्रतिदा, नियत् c., (हस्तन्यासं निर्यातय V. 5):

'd. a woman' प्रसवं कृ c., सू c.; 'to be d.ed of' प्रसू 2 A, जन् c. (जनयति), उत्पद् c.; 'was d.ed of a son' सा पुत्रं प्रासूत. **-ance,** *s.* मोचनं, मोक्षः, मुक्ति *f.*, उद्धारः, परित्राणं, रक्षणं, निस्तारणं, मोक्षणं, विमुक्तिः-मोचन. **-er,** *s.* मोचकः, रक्षकः, त्रातृ *m.*, मुक्तिदातृ *m.*, तारकः, उद्धर्तृ *m.* **2** निवेदकः,आख्यायकः. **-y,** *s.* मुक्ति *f.*;*See* **Deliverance,** above. **2** अर्पणं, निक्षेपणं, प्रतिपादनं, संक्रामणं, न्यसनं, प्रदानं. **3** उच्चारणं, उदीरणं, व्याहारः-हरणं; 'a fluent d.' अस्खलितभाषणं, अप्रतिहतभाषणौघः-वाक्सरणिः. **4** निवेदनं, विज्ञापनं, विज्ञप्ति *f.*, कथनं. **5** उत्सर्गः, निर्यातनं, वितरणं. **6** प्रसवः, प्रसूति *f.*, गर्भमोचनं; 'd. bed' अरिष्टशय्या, 'a woman near her d.' आसन्न-प्राप्त-प्रसवा; 'place of d.' अरिष्टं, सूतिकागृहं.

Dell, *s.* दरी, गुहा, कंदरः.

Delude, *v. t.* मुह् c., वंच् 10, प्रलुभ् c., आकृष् 1 P, वि-सं-भ्रम् c. (भ्रमयति); *See* **Cheat** also. **-er,** *s.* मोहकः, वंचकः, प्रतारकः, मायिन् *m.* **-Delusion,** *s.* मोहः, भ्रमः, आभासः, माया, मतिभ्रमः, इंद्रजालं, विवर्तः; 'the world is all a d.' विश्वमिदं मायामयं, असारं, विवर्त एव. **2** वंचनं, प्रतारणा, प्रलोभनं, कपटं. **-Delusive,-Delusory,** *a.* मायामय (यी *f.*), असार, मायिन्, मोहक, ऐंद्रजालिक (की *f.*), मोहिन्, मोह-भ्रांति-जनक.

Deluge, *s.* आप्लावः, संप्लवः, जलप्रलयः, भूतसंप्लवः, तोयविप्लवः; 'universal d.' प्रलयः, महासंप्लवः, संवर्तः, क्षयः, कल्पांतः. **2** धारासंपातः, वारिपूरः, अविरलधारासारः, अतिवृष्टिः *f.* **3** उत्पातः, आकस्मिकी आपद्. *-v. t.* प्लु c., आ-सं°, निमज्ज् c. (मज्जयति).

Delve, *v. t.* खन् 1 P, नि-अव°; उर्वीं भिद् 7 P. *-s.* खातं, विवरं, बिलं, गर्तः-र्त्तः. **-er,** *s.* खनकः, खनितृ *m.*

Demagogue, *s* प्राकृतजननायकः, प्रजानायकः.

Demain, Demesne, *s.* स्वाधीना भूमिः.

Demand, *v. t.* प्रच्छ् 6 P, अनुयुज् 7 A, जिज्ञासे (जिज्ञासते); 'd. ed his name' किं तव नामेति पप्रच्छ; 'd. a boon' वरं वृ-वृ-5, 9 U. **2 Claim,** q. v. **3** अर्ह् 1 P; oft. by pot. pass. part.; 'Oh Goddess, Godâvari the matter d. s thy care (attention)' भगवति गोदावरि तत्र त्वया सावधानया भवितव्यं (U. 3); अयमर्थोवेक्षामर्हति 'd. s consideration'; 'this offence d. s an atonement of serious expense' भूरिद्रव्यव्ययेनायं दोषः प्रमार्ष्टुं शक्यः, भूरिधनव्ययसाध्यप्रायश्चित्तः दोषः. *-s.* प्रश्नः, अनुयोगः, पृच्छा, जिज्ञासा. **2** अभियोगः, प्रार्थना, याचना; 'on d.' दातुं पृष्टः सन्. **-ant,-er,** *s.* प्रार्थयितृ *m.*, याचितृ *m.*, अभियाक्त *m.*, अर्थिन् *m.*

Demarkation, *s.* सीमा-मर्यादा-परिच्छेदः.

Demean (oneself), *v. i.* वृत्तिं 'अनुष्ठा 1 P, चेष्ट् 1 A, वृत् 1 A, व्यवह् 1 P; *See* **Act. -our,** *s.* वृत्ति *f.*, आचरणं, आचारः, चेष्टितं, व्यवहारः.

Dementate, *v. t.* उन्मद् c. संज्ञां अपह् 1 P. *-a.* उन्मत्त, नष्टसंज्ञ, मूढचित्त.

Demerit, *s.* अगुणः, दोषः, न्यूनता.

Demi, अर्ध, सामि *ind.* in comp.

Demi-god, *s.* नरदेवः, विद्याधरः,यक्षः, गंधर्वः, उपदेवता, देवयोनिः.

Demi-man, *s.* अर्धपुरुषः-नरः, किन्नरः.

Demise, *s.* मृत्युः, मरणं, उपरति *f.* **2** समर्पणं, विधिवत् प्रदानं. *-v. t.* मृत्युपत्रेण प्रदा 3 U.

Demission, *s.* अवपातः,अवसादनं,अपकर्षणं.

Demobilize, *v. t.* *See* **'Disband.'**

Democracy, *s.* प्रजाप्रभुत्वं, प्रजासत्तात्मक राज्यं, प्रजातंत्रं. **-Democrat,** *s.* प्रजातंत्रवादिन् *m.*,प्रजापक्षानुकूलः, प्रजाप्रभुत्वानुग्राहकः, प्रजापक्षावलंबिन् *m.* **-tical,** *a.* सार्वलौकिक (की *f.*), प्रजातंत्रीय.

Demolish, *v. t.* विनश् c., उच्छिद् 7 P, अवसद् c., ध्वंस् c., प्र-वि-°; उन्मूल् 10, उत्पद् 10. **-er,** *s.* विनाशकः, उच्छेदकः. **-Demolition,** *s.* विनाशः, उच्छेदः, प्र-विध्वंसः, उन्मूलनं, उत्पाटनं, अवसादनं.

Demon, *s.* दानवः, असुरः, रक्षस् *n.*, राक्षसः, दैत्यः, दनुजः, दैतेयः,सुरद्विष्; भूतः, पिशाचः, रात्रि(त्रिं)चरः, निशाचरः, यातुधानः. **-iac,** *s.* भूताविष्टः, वेतालोपहतः. *-a.*, **-iacal,** *a.* राक्षस (सी *f.*), पैशाच (ची *f.*), आसुर (री *f.*), (*s.*) in comp. **-ology,** *s.* भूतपिशाच-विद्या.

Demonstrate, *v. t.* साध् c., सिध् c. (साधयति), प्रदृश् c., प्रतिपद् c., उपपद् c., प्रमाणयति (D.); निर्णी 1 P, निर्दिश् 6 P **-ion,** *s.* साधनं, सिद्धि *f.*, उपपत्ति *f.*, प्रतिपादनं. **2** निर्णयः; प्रामाण्यं, सिद्धांतः; 'ocular d.' प्रत्यक्षप्रमाणं-चाक्षुषज्ञानं-प्रमाणं. **-ive,** *a.* दर्शक, निर्देशक, निर्णायक, प्रतिपादक, सिद्धांतकरण. **-ively,** *adv.* सिद्धिपूर्वं, सप्रमाणं, सुव्यक्तं, सोपपत्तिकं. **-or,** *s.* निर्देशकः, प्रतिपादकः, प्रदर्शकः.

Demoralize, *v. t.* धर्माद्-आचाराद्-भ्रंश् c. or च्यु c., आचारं दुष् c. (दूषयति), भ्रष्टीकृ 8 U, दुर्वृत्त *a.* कृ **-ation,** *s.* आचारभ्रष्टता धर्मच्युति *f.*, धर्म-आचार-विप्लवः, अपकर्षः.

Demulcent, *a.* शामक, शांतिद. **2** स्निग्ध, चिक्कण.

Demur, *v. i.* शंक् 1 A, वि-आ°; विचर् c., विकृष् c., विलंब् 1 A, मनसा दोलायते (D.); सवितर्कं व्याक्षिप् c. *-s.* आशंका-

संदेहः, वितर्कः. विचारणं, विकल्पः; 'without d.' अविचारितं, अविलंबं.

Demure, *a.* विनीत, अतिनम्र, गंभीर, धीर, शांत, सलज्ज, सव्रीड, अवनत; 'with d. looks' सव्रीडवदन. **-ly,** *adv.* सलज्जं, सव्रीडं, धीरं, सविनयं. **-ness,** *s.* विनयः, नम्रता, गांभीर्यं, त्रपा, लज्जा, व्रीडा, ह्रीः.

Den, *s.* बिलं, विवरं, गुहा, गह्वरं, कंदरः, कुहरं.

Dengue, *s.* संधिकसंनिपात,

Denizen, *s.* नि-वासिन् *m.*, ओकस् in comp.; 'd.s of heaven' दिवौकसः, &c. **2** पौरः, नागरः, नगरजनः, स्वतंत्रजनः.

Denominate, *v. t.* वद्-भण्-गद् आह्वे 1 P, व्यपादिश् 6 P, अभिधा 3 U, वच् 2 P, ख्या 2 P; *See* **Call** also. **-ion,** *s.* नामन् *n.*, अभिधानं, संज्ञा, आख्या. **-ive,** *a.* अभिधायिन्, आख्यायक, in grammar) नामधातुः. **-or,** *s.* नामकृत्-नामदातृ *m.* **2** हरः, हारः, छेदः; 'of the same d.' समच्छेद; 'reduced to the same d.' सवर्णित.

Denote, *v. t.* निर्दिश् 6 P, सूच् 10, उपलक्ष् 10, वच् 2 P, अभिधा 3 U, द्युत् c., गम् c. (गमयति); oft. ex. by अर्थ in comp.; *See* **Mean;** 'the word क्षेत्र here d.s body' अत्र क्षेत्रशब्दः शरीरार्थे-र्थः. **-ation,** *s.* निर्देशः; सूचनं; अभिधा-धानं, उपलक्षणं-णा. **-ing, -ative,** *a.* सूचक, दर्शक, वाचक, अभिधायक, गमक.

Denouement, *s.* कार्यं, निर्वहणं, निष्ठा.

Denounce, *v. t.* (अमंगलं or अनिष्टं) प्रकाश् c. ख्या c, (ख्यापयति), आ-नि-विद् c., कथ् 10. **2** प्रकाशं तर्ज् 10 A, भर्त्स् 10A, अभिशप् 1 U, अभिशंस् 1 P, निंद् 1 P, गर्ह् 1, 10 A, आक्रुश् 1 P. **-er,** *s.* अनिष्टावेदकः. **2** अभिक्षेपकः, निंदकः. **-ment, Denunciation,** *s.* अनिष्टख्यापनं-प्रकाशनं. **2** निर्भर्त्सना-नं, आक्रोशः, अभिशंसन, निंदा, गर्हा.

Denovean / **Denovo** } *adv.* पुनर्, भूयः.

Dense, *a.* घन, निबिड, सांद्र, अविरल, निरंतर, अनंतर, गाढ, गहन. **2** सुसंहत, दृढ, पीवर. **-ity,** *s.* घनता, सांद्रता, आनंतर्यं; पीवरता.

Dent, *s.* प्रहार-आघात-चिह्नं.

Dental, *a.* दंत्य; 'a d. letter' दंत्यं.

Dented, Dentated, *a.* दंतुर, भंगुर, अनुक्रकच.

Dentifrice, *s.* दंतशोधनं-धावनं.

Dentist, *s.* दंतवैद्यः-चिकित्सकः.

Dentition, *s.* दंतोद्भदः, दंतवृद्धि *f.*

Denude, Denudate, *v. t.* नग्नीकृ 8 U, विवस्त्रीकृ विवस्त्रयति (D.), वस्त्रं अपहृ 1 P, शून्यीकृ; निर् in comp.; 'a tree d.ed of leaves' निष्पत्रो or निष्पत्रीकृतो वृक्षः.

Deny, *v. t.* अपलप् 1 P, अपवद् 1 P, न स्वीकृ-अंगी-कृ 8 U, निषिध् 1 P, प्रत्याख्या 2 P, नि-अप-ह्नु 2 A, प्रत्यादिश् 6 P. **-al,** *s.* अप-नि-ह्नवः, प्रत्यादेशः, निषेधः, अस्वीकारः, प्रत्याख्यानं, अपलापः; 'self d.' आत्मसंयमः, आत्मनिग्रहः. **-er,** *s.* नि-ह्नोतृ *m.*, अपलापिन् *m.*, प्रत्यादेशकः.

Deobstruct, *v. t.* निर्विघ्नीकृ 8 U, विघ्नान् हृ or अपनी 1 P.

Deodand, *s.* देवोपहारः.

Deodorize, *v. t.* दुर्गंधं हृ or अपनी 1 P.

Depaint, *See* **Paint.**

Depart, *v. i.* प्रस्था 1 A, प्रया 2 P, वि-निर्-गम् 1 P, अपक्रम् 1 U, 4 P, अपया, अप-इ 2 P, अपगम् अपसृ-सृप् 1 P, 'whose life has d.ed' वि-गत-जीवितः. **2** प्र-इ, देहं उत्सृज् 6 P, विपद् 4 A, मृ 6 A, संस्था 1 A; *See* **Die.** *-v. t.* त्यज् 1 P, हा 3 P, उत्सृज्. **-ed,** *a.* अपगत, व्यपेत 'not d. from the meaning' अर्थादनपेत, अर्थ्य. **2** प्रेत, मृत, दिवंगत, संस्थित, विपन्न. **-ment,** *s.* भागः, विच्छेदः, प्र-वि-भागः. **2** विषयः, प्रकरणं, अंगं. **3** अधिकारः, नियोगः, कर्मन् *n.*, व्यापारः. **4** देशः, विषयः. मंडलं. **-ure,** *s.* अपगमः, अपयानं, प्रस्थानं, प्रयाणं, अपसरणं, अपसृति *f.*, निर्गमः, अपक्रमः. **2** देहत्यागः, संस्थिति *f.*, मरणं, उपरति *f.*

Depend, *v. i.* अवलंब् 1 A, प्रलंब्. **2** अव-आ-लंब्, आश्रि 1 U, संश्रि; निबंधन, तंत्र, अधीन, आयत्त, वश, in comp.; 'every thing d.s on fate' सर्वं दैवाधीनं-यत्तं; मम प्राणास्त्वदाशानिबंधनाः (M. 4); oft. by अपेक्ष् 1 A. व्यपेक्ष्; *See* below. **3** अनु-उप-जीव् 1 P. **4** (rely) विश्वस् 2 P (with loc); सम्-ऋ c. (अर्पयति.); 'I d. upon you alone' त्वय्येव मे विश्वासः; 'd. upon it, I shall starve myself to death' मया प्रायोपवेशनं कृतं विद्धि (P. IV. 1); 'd. upon it' असंशयं, नियतं, नूनं, खलु. **5** संबंध्-, प्र-अनु-संज् pass., समनु-इ 2 P. **-ance, -ence,** *s.* अवलंबनं, आश्रयः, संश्रयः, निष्ठा, तंत्रता, निबंधनं, अधीनता; 'mutual d.' परस्परनिबंधनं, अन्योन्याश्रयः. **2** पराधीनता, परवशता, परवत्ता, पारतंत्र्यं, परायत्तत्वं. **3** विश्वासः, प्रत्ययः. **4** संबंधः, अनुषंगः, समन्वयः, संपर्कः. **-ency,** *s.* आयत्तता, अधीनता, &c. **2** अधीनः प्रदेशः, अन्यतंत्रं राज्यं. **-ant, -ent,** *a.* प्रलंब. **2** अधीन, आयत्त, आश्रित, अवलंबिन्, वश, संबद्ध, निम्नतंत्र in comp. **3** (d. on another) पराश्रित, पराधीन, परतंत्र, परायत्त, परवश, परवत्; 'd. on a cause' निमित्तसव्यपेक्षः (Mal.

-s. उप-अनु-जीविन् m., आश्रितः, परायत्तो जनः, भृत्यः, परिवारः.

Depict, v. t. आलिख् 6 P, वर्ण् 10, निर्दिश् 6 P.

Depilation, s. लो(रो)महरणं, उल्लुंचनं. **-Depilatory,** a. केशनाशक, लोमहरिन्.

Depilous, a. अकेश, रो(लो)महीन.

Deplete, v. t. शून्यीकृ 8 U, रिच् c. निःशिष् c. **-ion,** s. अवक्षयः, निःशेषता, रिक्तता, शून्यत्वं, शून्यीकरणं.

Deplore, v. t. शुच् 1 P, विलप् 1 P, परिदेव् 1 A, परिदिव् 10 A; *See* **Lament. -ably,** adv. शोच्यप्रकारेण, शोचनीयं. **-er,** s. परिदेवकः, अनुशोचकः.

Deploy, v. t. विस्तृ 9 U (सैन्यव्यूहान्).

Deplume, v. t. पक्षान् उत्पद् 10 or उद्ग्रह् 1 P, निष्पक्षीकृ 8 U. **-ation,** s. पक्षोत्पाटनं.

Depone, v. i. सशपथं वद् 1 P or कथ् 10, शपथपूर्वं उपक्षिप् 6 P or उपन्यस् 4 U. **-ent,** s. साक्षिन् m. **2** अकर्तरि क्रिया.

Depopulate, v. t. निर्जनीकृ 8 U, विजनीकृ, नरशून्य a. कृ; उपपीड् 10, बाध् 1 A, समुच्छिद् 7 P. **-ion,** s. निर्जनीकरणं. **2** उपप्लवः, उच्छेदः, उपपीडनं, बाधा. **-or,** s. उच्छेदकः, उपपीडकः, विप्लवकारिन् m.

Deport, v. t. प्रव्रज् c., निः-प्र-वि-वस् c., देशांतरं गम् c. (गमयति). -v. i. (oneself) आचर्-व्यवहृ 1 P, वृत् 1 A; *See* **Act. -ation,** s. प्र-वि-वासनं, प्रव्राजनं. **-ment,** s. वृत्ति f., आचरणं, चेष्टितं, व्यवहारः, वृत्तं.

Depose, v. t. (राज्यात् or अधिकारात्) अवरुह् c. (रोपयति), भ्रंश् c., पत् c., च्यु c. -v. i. साक्ष्यं दा 3 U, वद् 1 P, वच् 2 P, कथ् 10. **-ition,** s. साक्ष्यं, साक्ष्यदानं. **2** (Deposal) राज्यभ्रंशः-च्युति f., राज्यावरोपणं, अधिकारच्युतिः-भ्रंशः.

Deposit, v. t. निक्षिप् 6 P, न्यस् 4 P, निधा 3 U, आधा, ऋ c. (अर्पयति), आधीकृ 8 U. -s. न्यासः, निक्षेपः, आधिः, उपनिधिः. **2** किट्टं, शेषः, खलं, कालुष्यं, मलः-लं. **-ary,** s. निक्षेपग्राहकः, न्यासधारिन् m. **2** विश्वासस्थानं-पात्रं-भूमि f. **-or,** s. निक्षेपिन् m., न्यासकर्तृ m. **-ory,** s. आधारः, आशयः, निधानं, निधिः, भाजनं, आगारं, संग्रहस्थानं.

Depot, s. आगारं, शाला, स्थानं, आलयः, 'book d.' पुस्तकालयः, ग्रंथशाला; 'military d.' युद्धसामग्र्यागारं.

Deprave, v. t. दुष् c. (दूषयति) भ्रंश् c. मलिनीकृ 8 U, कलुषयति (D.). **-ed,** a. दुराचार, भ्रष्ट, दुष्ट, खंडितवृत्त, दुरात्मन्, पापचेतस् दुर्वृत्त, भ्रष्टशील, कलुषाचार. **-edness,-ity,** s. दुष्टता, भ्रष्टता, दुष्टभावता, दौरात्म्यं, दुराचारता, दौर्जन्यं, कालुष्यं, दुर्वृत्तता.

Deprecate, v. t. (प्रार्थनापूर्वकं) निवार् 10, व्यावृत् c., मा भूदिति याच् 1 A. **2** अनुशुच् 1 P. **-ion,** s. निवारणार्थं प्रार्थनास्तवः. **-ive,-atory,** a. अनिष्टनिवारक.

Depreciate, v. t. अर्घतः पत् c., अवमन् 4 A, लघूकृ 8 U, लघु मन्, मूल्यं न्यूनीकृ, अवक्षिप् 6 P, अपलप् 1 P, अपकृष् 1 P. **-ion,** s. लघूकरणं, अवमानना, अपकर्षः, अपलापः.

Depredate, v. t. अपहृ 1 P, लुंट्-ठ् 1 P, 10, उपप्लु 1 A, उपद्रुत्य ग्रह् 9 P. **-ion,** s. उपप्लवः, अपहरणं, लुंठनं, लोप्त्रग्रहणं. **-or,** s. विप्लवकारिन् m., अपहारकः.

Deprehend, *See* **Apprehend.**

Depress, v. t. अवनम् c. (नमयति), पत् c., अपकृष् 1 P, अवपीड् 10, निम्नीकृ 8 U, अवसद् c., भ्रंश् c., अवगाह् 1 A. **2** विषादं नी 1 P, विषद् c., विषण्णीकृ; 'd. ed behind' पश्चादवगाढां (S. 3); 'd. ed in spirits' विषण्ण, म्लान, मुक्तावयव, खिन्नचित्त; *See* **Dejected. -ion,** s. पातः, अवनमनं, अपकर्षः-र्षणं. **2** विषादः, खिन्नता, अवसादः, उद्वेगः, दौर्मनस्यं, म्लानि f., 'd. of spirits' सत्वभ्रंशः.

Deprive, v. t. अपनी 1 P, अपहृ 1 P, (with gen. of person); भ्रंश् c., च्यु c. (with abl.); वियुज् 7 A, 10, विनाकृ 8 U, (with instr. of the object deprived). **-ation,** s. हरणं, अपचयः, क्षयः, लोपः, हानि f., नाशः. **-ed,** a. हृत, अपहृत, हीन, वियुक्त, भ्रष्ट, विरहित, विनाकृत (gen. in comp.); वीत-लुप्त निर् in comp.; 'd. of wealth' निर्धन, लुप्तवित्त; 'd. of authority' भ्रष्टाधिकार, पदभ्रष्ट; 'to be d.' हा pass.; परिहा, वियुज् pass.

Depure, Dupurate, *See* **Purify.**

Depute, v. t. नियुज् 7 A, 10, प्रेष् c., प्रेष् c., प्रहि 5 P, समादिश् 6 P (of a person); निक्षिप् 6 P, न्यस् 4 P, (of business). **-ation,** s. नियोजनं, प्रेरणं, प्रेषणं. **2** नियुक्ताः-समादिष्टाः (pl.), नियोगिगणः, नियुक्तजनाः. **-y,** s. प्रतिनिधिः, प्रतिहस्तः-स्तकः, नियोगिन् m.; नियुक्तः, प्रतिपुरुषः.

Deracinate, *See* **Eradicate.**

Derail, v. लोहमार्गात् निःसृ 1 P, or c.

Derange, v. t. विपर्यस् 4 U, विक्षिप् 6 P, क्रमं-व्यवस्थां-भंज् 7 P, or उपहन् 2 P, विक्षुभ् c., संकृ 6 P, आकुलीकृ 8 U. **-ed,** a. व्यस्त, अनवस्थित, भग्नक्रम, अव्यवस्थित, विक्षिप्त, संकीर्ण; 'd. in mind' उन्मत्त, भ्रांतचित्त. **-ment,** s. व्युत्क्रमः, प्रक्रमभंगः, अव्यवस्था, व्यस्तता, अक्रमः, विसूत्रता, वैलक्षण्यं; 'd. of mind' मतिभ्रमः चित्तविप्लवः, मतिविपर्यासः.

Derelict, *a.* त्यक्त, उत्सृष्ट, परित्यक्त. **-ion,** *s.* त्यागः, उत्सर्गः, उपेक्षा.

Deride, *v. t.* वि-उप-अव-हस् 1 P, उपहासास्पदी कृ 8 U, अवज्ञा 9 U, भर्त्स् 10 A, गर्ह् 1, 10 A; 'to be d. ed' उपहास्यतां गम् 1 P, उपहासास्पदं भू 1 P; 'are d.ed by all' सर्वजनस्योपहास्यतामुपयांति (Ka. 108). **-er,** *s.* उपहासकः, अवक्षेपकः. **-ingly,** *adv.* अवहासेन, उपहासपूर्वं. सोपहासं. **-Derision,** *s.* उप-अव-हासः, अवमानना, धिक्कारः, अवज्ञा, गर्हणं, निर्भत्सनं. **-Derisive,** *a.* सोपहास, अवहासगर्भ, अवहासिन्; उपहास्य; गर्ह्य.

Derive, *v. t.* निष्कृष् 1 P, उद्-भू c., जन् c. (जनयति). उत्पद् c., **2** प्राप् 5 P, लभ् 1 A, Ge , q. v.) **3** व्युत्पद् c. निर्वच् 2 P, 10, व्युत्पत्तिं वद् 1 P. **-ed,** *a.* उत्पन्न, उद्भूत; oft. ex. by प्र-,भव-मूल-उद्भव-ज in comp.; 'the race d. ed from the Sun' सूर्यप्रभवो वंशः; 'to be d. ed' उत्पद् 4 A, प्रभू 1 P, जन् 4 A, उद्-भू, निर्गम् 1 P. **-ation,** *s.* व्युत्पत्ति *f.*, निर्वचनं, शब्दोत्पत्ति *f.*, शब्दयोनि *f.* **2** प्रभवः, उद्भवः. योनि *f.*, मूलं, निर्गमः. **-ative,** *a.* व्युत्पन्न; यौगिक (की *f.*); 'd. suffixes' तद्धितप्रत्ययाः. **-s.** साधितः शब्दः, व्युत्पन्नः शब्दः.

Dermis, *s. See* **Skin.**

Derogate, *v. t.* अल्पीकृ 8 U, न्यूनीकृ, लघयति (D.); *See* **Depreciate.** **-ion,** *s.* लघूकरणं, अपमानः, गौरवन्यूनता अवमानना, लाघवं. **-ory,** *a.* अननुरूप, अकीर्तिकर, लाघवकारिन्, असदृश (शी *f.*), अयशस्करं (री *f.*).

Dervise, *s.* संन्यासिन् *m.* (महंमदीयः).

Descant, *v. i.* सविस्तरं व्याख्या 2 P, वि-वृ 5 U, विस्तरेण वर्ण् 10. **2** गै 1 P, वर्ण् 10. **-s.** वचनं, वादः, प्रवादः, भाषितं. **2** गीतं.

Descend, *v. i.* अवतृ-अवरुह्-अवपत् 1 P, निपत्, च्यु 1 A, भ्रंश् 1 A, 4 P. **2** आ-अभि-गम् 1 P, प्रविश् 6 P. **3** (upon) अभिद्रु 1 P, अभिधाव् 1 P, आक्रम् 1 U, 4 P; *See* **Attack.** **4** (from) उत्पद् 4 A, प्र-उद्-भू 1 P, जन् 4A; *See* **Derive.** वंश-कुल-क्रमेण आगम् 1 P, or या 2 P, परंपरया प्राप् pass.; 'd. into details' सविस्तरं वर्ण् 10, विस्तरशः वद् 1 P, प्रपंच ति (D.). **-v.** *t.* Causal of roots (1) above. **-ant,** *s.* वंश्यः, वंशजः, अपत्यं, संतति *f.* प्रसूति *f.*, संतानः; 'd. s.' पुत्रपौत्राः, कुलसंततिः, वंशः, अन्वयः, कुलं; 'male d.' पुत्रसंतानः. **-ed,** *a.* अवतीर्ण, अधोगत; 'lineally d.' कुलक्रमागत, वंशपरंपराप्राप्त, क्रमायात, पितृप्राप्त; 'to be d.' उत्पद्. जन्, प्रभू 1 P; gen. by derivative affixes; 'd. from Puru' पौरवः. **-ent,** *a.* अवरोहिन्, अधोगामिन्. **-Descent,** *s.* अवतरणं, अवपातः, अवरोहः-हणं, अवतारः. **2** आक्रमः, अवस्कंदः, अभिद्रवणं. **3** जन्मन् *n.*, उत्पत्ति *f.*, वंशः, उद्भवः, कुलं; 'of noble d.' कुलीन, कुलोत्पन्न, महाकुलप्रसूत, अभिजात, अभिजनवत्. **4** संतति *f.*, अन्वयः, आवलि-ली *f.*, संतानः-नं. **5** वंशक्रमागमः, अन्वयागमः. **6** अवसर्पिणी भूमिः, प्रवणस्थानं.

Descension, *s.* अवपातः, अधोगमनं, अधःपतनं.

Describe. *v. t.* वर्ण् 10, निर्दिश् 6 P, वि-वृ 5 U, कृत् 10, कथ् 10, निरूप् 10, वच् 2 P, व्याख्या 2 P; 'her splendour can't be d. ed' तस्याः श्रीर्वचनानामविषया. **2** (Draw) लिख् 6 P. **-Description,** *s.* वर्णनं-ना, निर्देशः, व्याख्यानं, कथनं, निरूपणं, विवरणं. **-Descriptive,** *a.* निर्देशक, वाचक, अभिधायिन्, निर्देशिन्. **2** वर्णनपर.

Descry, *v. t.* दूराद् आलोक् 1 A, 10 or दृश् 1 P, or ईक्ष् 1 A, निर्वर्ण् 10, आलक्ष् 10. **2** ज्ञा 9 U, अवगम् 1 P; *See* **Know.**

Desecrate, *v. t.* दुष् c. (दूषयति), अपवित्रीकृ 8 U, पुण्यत्वं लुप् c., संस्कारहीन *a.* कृ. **-ion,** *s.* दूषणं, संस्कारदूषणं, अपवित्रीकरणं.

Desert, *s.* मरुः, मरुस्थलं-ली, वालुकाप्रदेशः, धन्वन् *m.* **2** गुणः, पुण्यं, योग्यता, पात्रत्वं, पुण्यापुण्यं, अर्हत्वं, **-***a.* निर्जन, निर्मानुष (षी *f.*), वन्य, खिल, निर्जल, शून्य, आरण्यक. **-***v. t.* त्यज् 1 P, हा 3 P, उत्-विसृज् 6 P, रह् 10, (रहयति), अपव्यध् 4 P, **-***v. i.* सेनां त्यक्त्वा पलाय् 1 A. **-er,** *s.* त्यागिन् सेनात्यागिन् *m.*, परावर्तकः-रणपराङ्मुखः, पलायिन् *m.* **-ion,** *s.* त्यागः, उत्सर्गः; सेनात्यागः, निर्गमनं, अपक्रमणं. **-less,** *a.* निर्गुण, अनर्ह, अयुक्त, अपात्र.

Deserve, *v. t.* अर्ह् 1 P, अर्ह-उचित-योग्य *a.* in comp.; oft. by pot. pass. part. **-ed,** *a.* योग्य, उचित, अर्ह. **-edly,** *adv.* उचितं, योग्यं, न्यायतः. **-er, -ing,** *a.* अर्हत् गुणवत्, अर्ह, उचित, योग्य, पात्र; 'd. of' ex. by pot. pass. part. 'd. of pity' अनुकंप्य, &c. **-s.** गुणः, पात्रता, योग्यता, अर्हत्वं.

Deshabille, *See* **Dishabille.**

Desiccate. *v. t.* शुष् c., आचम् 1 P, **-***v. i.* शुष् 4 P, **-ion,** *s.* शोषणं, परिशोषः. **-ive,** *a* शोषक. **-Dessicants,** *s.* व्रणशोषकाः.

Desiderate, *See* **Desire.** **-ive,** *a.* इच्छार्थक, सन्नंत. **-Desideratum,** *s.* अभीष्टवस्त्वभावः.

Design, *v. t.* परि-सं-कल्प् c., अनुसंधा 3 U, व्यवसो 4 P, अभि-प्र-इ 2 P, उद्दिश् 6 P; चिंत् 10, घट् c. (घटयति), मनःमतिं कृ.

8 U. 2 प्र-विनि-युज् 7 A, 10. 3 आलिख् 6 P, सूत्रपातं कृ. -s. अभिप्रायः, अर्थः, आकांक्षा, उद्देशः, संकल्पः, आशयः, हेतुः, चिकीर्षितं, प्रयोजन, कार्य. 2 उपायः, चिंता, कल्पना, घटना, विधानं, व्यवसायः. 3 आलिखनं, सूत्रपातः, संस्कारः. -edly, *adv.* कामतः, यथाकामं, इच्छातः, बुद्धिपुरःसरं. -er, *s.* चिंतकः परिकल्पकः. 2 आलेखकः, सूत्रपातकः. -ing, *a.* उपजातिन्, मायिन्, छलिन्, वंचनशील, प्रतारक, विदग्ध, कपटपटु, धूर्त. -less, *a.* निरर्थक, निष्प्रयोजन.

Designate, *v. t.* उप-लक्ष् 10, अप-व्यप-दिश् 6 P, निर्दिश्, सूच् 10, श्रुत c., अभिधा, 3 U, निर्वच् 2 P, गम् c. (गमयति). 2 नियुज् 7 A, 10, परि-सं-कृप् c. -ing, *s.* लक्षणं, उपलक्षणं, चिह्नं विशेषणं, अभिधानं, संज्ञा, आख्या, नामन् *n.*

Desire, *v. t.* इष् 6 P, वांछ् 1 P, कम् 10 A, स्पृह् 10 (with dat.), इह् 1 A, आकांक्ष् 1 U, अभिलष् 1, 4 P. oft. ex. by desid. of roots. 2 अर्थ् 10A, याच् 1A, वृ 5U. -*s.* इच्छा, अभिलाषः, कामः, ईहा, आकांक्षा, समीहितं, आशा, इष्टं, ईप्सितं, मनोरथः, स्पृहा, अभीष्टं; 'according to one's d.' यथाकामं, यथेष्टं, स्वेच्छातः, स्वच्छंदं, स्वरुच्या; 'ardent d.' लालसा, औत्सुक्यं, उत्कंठा, लोभः, तृष्णा. -able, *a.* स्पृहणीय, काम्य. 2 इष्ट, प्रशस्त, श्रेयस्. -ous, *a.* सस्पृह, वांछिन्, इच्छु, ईप्सु; oft. by desid. forms; 'd. to spear.' विवक्षुः; 'd. to take' जिघृक्षुः or by काम or मनस् in comp. with i f.; 'd. to take' आदातुकामः मनाः.

Desist, *v. i.* विरम् 1 P, निवृत् 1 A, विश्रम् 4 P, (with abl.) *See* **Cease.** -ance, *s.* विरामः, निवृत्ति *f.*, विश्रामः.

Desk, *s.* लिखनफलकः, लेखनाधारः.

Desolate, *a.* निर्गृह (ही *f.*), निर्जन, शून्य, विविक्त, वसतिहीन, विजन. 2 उच्छिन्न, जीर्ण, उद्ध्वस्त, उत्सन्न. 3 असहाय, निराश्रय, अगतिक, अनाथ. -*v. t.* उच्छिद् 7 P, अवसद् c., निर्जनीकृ 8 U; उपपीड् 10, शून्यीकृ, प्रबाध् 1 A. -ion, *s.* उच्छेदः, अवसादनं, वसतिनाशः, निर्जनीकरणं. 2 शून्यता, निर्जनत्वं, विविक्तता.

Despair, *v. i.* निराश् *a.* भू 1 P, आशां हा 3 P, नैराश्यं गम्-व्रज् 1 P, विषद् 1 P, भग्नाश *a.* भू; 'd. of success' जयविषये निराशीभूत. -*s.* नैराश्यं, निराशता, आशाहीनता, वैक्लव्यं, विषादः; 'being in d.' त्यक्ताश, गताश. -Desperate, *a.* निराश, आशातीत, त्यक्ताश, आशाहीन. 2 जीवितनिरपेक्ष, आततायिन्, निर्भय, साहसिक (की *f.*) 3 निष्प्रतीकार, उग्र, संरब्ध, साहसद्योतक, अत्यंत; 'a d. act' साहसं, आततायिता. -ly, *adv.* जीवितनिरपेक्षं, प्रसह्य, उग्रं, उन्मत्तवत्. 2 अति-सु pr.; अत्यंतं, भृशं. -ness, साहसिकता, उन्मादः, सरंभः जीवितनिरपेक्षता.

Despatch, *v. t.* (सत्वरं) प्रेष् c., प्रहि 5 P. प्रस्था c. (स्थापयति), विसृज् 6 P. 2 शीघ्रं, झटिति संपद् c., त्वर् c. (त्वरयति), आशु संविधा 3 U. 3 हन् 2 U, व्यापद् c.; *See* **Kill.** -*s.* त्वरा, शीघ्रता, शीघ्रकारित्वं, अदीर्घसूत्रता. 2 पत्रं, राजलेखः-लेख्यं, वाचिकपत्रं. 3 धावकः, प्रजविन् *m.*, वाताहरः, दूतः. -ful, *a.* त्वराशील, शीघ्रकारिन्, अविलंबिन्, अदीर्घसूत्र.

Desperado, *s.* साहसिकः, प्रसह्यचौरः, साहसिन् *m.*, आततायिन् *m.*, वधोद्यतः.

Despise, *v. t.* अवज्ञा 9 U, तिरस्कृ 8 U, अवमन् 4 A, परिभू 1 P, अवधीर् 10; *See* **Contemn.** -er, *s.* अवमंतृ *m.*, अवज्ञातृ *m.*, निंदकः. -ingly, *adv.* सावज्ञं, सावमानं. -Despicable, *a.* अवमान्य, अवज्ञेय, गर्ह्य, निंद्य, नीच, निकृष्ट, अधम, तुच्छ, कुत्सित, क्षुद्र.

Despite, *s.* द्वेषः, जुगुप्सा, मात्सर्यं, ईर्ष्या, अभ्यसूया, असूया. 2 प्रतिरोधः, प्रतिकारः; 'in d. of' (prep.) अनादृत्य, अवगणय्य, or gen. abs.; 'd. the (presence of the) teacher' पश्यतोपि गुरोः; *See* 'in spite of' under **Spite.** -ful, *a.* द्वेषिन्, सासूय, अभ्यसूयक, मत्सरिन्, द्रोहबुद्धि. -fully, *adv.* सद्वेषं, सद्रोहं, ईर्ष्यया. -fulness, *s.* मात्सर्यं, असूया, दौर्जन्यं, द्रोहः, द्रोहबुद्धि *f.*

Despoil, *v. t.* हृ 1 P, अपहृ; *See* **Deprive;** 'd. ed of everything' हृतसर्वस्व. -er, *s.* अपहारकः. -Despoilation, *s.* अपहरणं.

Despond, *v. i.* निर्विद् 4 A, नैराश्यं-निर्वेदं-विषादं-गम् 1 P or आपद् 4 A, विषद् 1 P, आशां त्यज् 1 P, अंगानि मुच् 6 P. -ency, *s.* निर्वेदः, विषादः, नैराश्यं, उद्वेगः, अवसादः, विषण्णता. -ent, -ing, *a.* निर्विण्ण, विषण्ण, निराश, त्यक्ताश, म्लान, उद्विग्न; 'do not take a d. view' मा भवानंगानि मुंचतु (V. 2). -ingly, *adv.* सविषादं, सनिर्वेदं.

Despot, *s.* प्रजापीडकः, लोकोपप्लवकः, 2 अधीश्वरः, सम्राज् *m.*, सार्वभौमः, चक्रवर्तिन् *m.* -ic, -ical, *a.* स्वतंत्र, निष्प्रतिबंध, अनियंत्रण, अनियत, नियंत्रण. -ically, *adv.* स्वैरं, स्वेच्छातः, कामचारेण. -ism, *s.* प्रजापीडनं, निष्ठुरशासनं, प्रजोपप्लवः, स्वेच्छाचारित्वं, स्वेच्छाप्रभुत्वं; नियंत्रणाराज्यसरणिः *f.*

Despumate, *v. i.* उत्सिच् pass., फेनायते (D.)

Dessert, *v. t.* (भोजनांते) फलाहारः.

Destine, *v. t.* (Destinate) निरूप् 10, परि-प्र-कल्प् c., निर्दिश् 6 P, नियुज् 7 A, 10,

समुपस्था 1 U, (न जाने भोक्तारं कमिह समुपस्थास्यति विधिः S. 2); oft. ex. by pot. pass. part., with or without अवश्यं, नूनं; 'he is d. ed to be a king' अनेनावश्यं राज्ञा भवितव्यं; 'man is d. ed to die' मनुष्या नश्वराः; 'who is able to avoid what is d. ed for him' लिखितमपि ललाटे प्रोज्झितुं कः समर्थः; तथा भवितव्यतया च तस्य तस्य वस्तुनः (Ka. 143) 'every thing being d. ed to occur' &c. **-ation,** *s.* ईप्सितं स्थानं, इष्टः प्रदेशः, निरूपित-निर्दिष्ट-स्थानं. **2** उपयोगः, प्रयोजनं, उद्देशः; अर्थः, अभिप्रायः. **-y,** *s.* दैवं, भवितव्यता, नियति, *f.*, भाग्यं, भागधेयं; विधातृ *m.*, विधिः, दिष्टं, अदृष्टं, प्राक्तनं.

Destitute, *a.* निर्धन, अर्थहीन, निराश्रय, दुर्गत, अशरण, दीन, अकिंचन, दुःस्थित. **2** (of) हीन, रहित, वर्जित, शून्य, वियुक्त, हृत, विहीन, परिहीण, with instr. or in comp.; gen. by निर्-अ-वि- in comp.; 'd. of courage' धैर्यहीन-शून्य, &c.; निरुत्साह 'd. of energy'; 'd. of hands and feet' अपाणिपाद्. **-ion,** *s.* दैन्यं, धनाभावः, अकिंचनत्वं, दारिद्र्यं, निराश्रयता. **2** हीनत्वं, राहित्यं, शून्यत्वं, अभावः, विरहः, वियोगः.

Destroy, *v. t.* नश् c., प्र-वि°; अव-उत्-सद् c., ध्वंस् c., प्र-वि°; विलुप् c., क्षै c. (क्षपयति), क्षि 5 P or c., संहृ 1 P, उत्-निर्-दल् c., उच्छिद् 7 P, प्रतिहन् 2 P. **2** (persons &c.) हन् 2 P, निषूद् 10, व्यापद् c., मृ c.; 'to be d. ed' वि-, नश्, 4 P, ध्वंस् 1 A, क्षयं या-इ 2 P, or गम् 1 P, प्र-वि-ली 4 A. **-er,** *s.* नाशकः, हंतृ *m.*, निषूदनः, घातिन् *m.*, अंतकः, ध्वंसकः, हन्-अपह in comp; 'd. of Vritra' वृत्रहा, वृत्रनिषूदनः; 'd. of every thing' कृतांतः. **-Destructible,** *a.* नश्वर, विध्वंसिन्, भंगुर, क्षयिन्. **-Destruction,** *s.* नाशः, विनाशः, प्रणाशः; प्र-, वि-, ध्वंसः, क्षयः, उच्छेदः, संहारः; उद्दलनं, उत्पाटनं. **2** निषूदनं, घातः, वधः; 'd. of the whole world' प्रलयः, प्रत्यवहारः, कल्पांतः, संवर्तः. **-Destructive,** *a.* विनाशिन्, क्षयकर (री *f.*), घातिन्, अंतकर, घातुक, अपह-घ्न (घ्नी *f.*) in comp.: 'd. to life' जीवितापह, प्राणहर, निधनकारिन्.

Desuetude, *s.* विरति *f.*, निवृत्ति *f.*, विच्छेदः, विरामः, प्रवृत्तिविच्छेदः.

Desultory, *a.* असतत, उच्छृंखल, अस्थिर, लोल, अनियत, चंचल, अनवस्थित, अव्यवस्थित.

Detach, *v. t.* विश्लिष् c., विभिद् 7 P, विच्छिद् 7 P, वियुज् 7 A, 10, पृथक् कृ 8 U; *See* **Separate. -ed,** *a.* वियुक्त, विभिन्न, विच्छिन्न; असंसक्त, असंलग्न, गतसंग, विश्लिष्ट, असंगत. **-ment,** *s.* विभागः, वियोगः, विच्छेदः, विश्लेषः, विभेदः. **2** सैन्यदलं, गुल्मः-ल्मं.

Detail, *s.* विस्तरः, विस्तारः; वाग्विस्तरः, प्रपंचः. **2** वृत्तांताख्यानं; 'in d.' or 'd. ed' सविस्तर (*a.*), विस्तरेण, विस्तरतः-शः, सविस्तरं. **-***v. t.* सविस्तरं-विस्तरेण-वर्ण् 10 or आख्या 2 P. or कथ् 10, प्रपंचयति (D.).

Detain, *v. t.* धृ 1 P, निरुध् 7 U; जामातृयज्ञेन वयं निरुद्धाः (U. 1) 'd. ed by reason of' &c. **2** निवार् 10, निग्रह् 9 P. **3** (In custody) आसिध् 1 P, बंध् 9 P, निरुध्. **-Detention,** *s.* धरणं, निग्रहः, संरोधः, निरोधः. **2** आसेधः, प्रति-नि-रोधः, बंधनं, बलात्कारेण धरणं.

Detect, *v. t.* निरूप् 10, ज्ञा 9 U, अनुसंधा 3 U, अधि-अव-गम् 1 P; दृश् 1 P, उपलभ् 1 A, आसद् c. **2** धृ 1 P, प्रकाश् c., व्यंज् 7 P; 'd. ed in a crime' दृष्टदोष; निर्णीतापराध. **-ion,** *s.* ज्ञानं, निरूपणं, अनुसंधानं, उपलंभः, अवगमनं. **-ive,** *a.* (Officer) चरः, चारः, प्रणिधिः, अपसर्पः; *See* **Spy**

Deter, *v. t.* (सभयं) निवृत् c., निवार् 10, विरम् c. (रमयति), भी c., निरुध् 7 U; *See* **Prevent. -ment,** *s.* निवर्तनं, निवारणं.

Deterge, *v. t.* शुध् c., मलं अपनी 1 P, परिमृज् 2 P. **-ent,** *a.* शोधन (नी *f.*), परिमार्जक.

Deteriorate, *v. i.* क्षि-हा pass., ऱ्हस् 1 P, क्षयं गम् 1 P; दुष् 4 P, भ्रंश् 4 P, 1 A, अपकृष् pass. -*v. t.* अपकृष् 1 P, दुष् c. (दूषयति), विकृ 8 U, ऱ्हस् c. **-ion,** *s.* क्षयः, अपचयः, विकारः, विकृति *f.*, ऱ्हासः, भ्रष्टता. **2** अपकर्षः, दूषणं.

Determine, *v. t.* निश्चि 5 U, स्था c. (स्थापयति), संकल्प् c., निरूप् 10, निर्णी 1 P, निर्-अव-धृ 10, निर्दिश् 6 P. लक्ष् 10, परिच्छिद् 7 P. **2** निरूप्, अनुसंधा 3 U, निर्णी (a dispute &c.). -*v. i.* व्यव-अव-सो 4 P, निश्चयं कृ 8 U; 'd. ed to go' गमने कृतसंकल्प, गंतुं व्यवसित. **-ate,** *a.* स्थिर, दृढ, निर्धारित, निश्चित, निर्णीत, नियत, सिद्ध, व्यवस्थित. **2** निश्चायक, निर्णायक. **3** (of persons) कृतनिश्चय, दृढसंकल्प, व्यवसित. **-ately,** *adv.* सनिश्चयं, सनिर्णयं, नूनं. **-ation,** *s.* निश्चयः, निर्णयः, संकल्पः, निर्धारणं, व्यवसायः, विचारः, निरूपणं, परिच्छेदः, अवधारणं-णा. **2** अभिनिवेशः, अध्यवसायः, निर्बंधः. **-ative,** *a.* निर्णायक, निर्धारक. **-ed,** *a.* निश्चित. निर्णीत, सिद्ध, नियत, व्यवस्थित, परिच्छिन्न, अवधारित. **2** (of persons) स्थिरनिश्चय, दृढ-कृतसंकल्प, अभिनिविष्ट, कृतनिश्चय. **-edly,**

adv. स्थिरचेतसा, दृढं, दृढनिश्चयेन. **-er,** *s.* निर्णयकृत् *m.*, निर्णेतृ *m.*

Detest, *v. t.* विद्विष् 2 U, गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते) (with abl.); *See* **Abhor. -able,** *a.* जुगुप्सित, गर्हित, निंद्य, गर्हणीय, विद्वेष्य. **-ation,** *s.* गर्हा, जुगुप्सा, घृणा, विद्वेषः. **-er,** *s.* द्वेषिन् *m.*, विद्वेष्टृ *m.*

Dethrone, *v. t.* राज्याद् भ्रंश् c. or च्यु c. or अवपत् c. or अवरुह् c. (रोपयति). **-ment,** *s.* राज्यभ्रंशः-च्युति *f.*

Detonate, *v. i.* सहसा स्तन् 1 P or ध्वन् 1 P. **-ion,** *s.* स्तनितं, आकस्मिकध्वनि *m.*

Detort, *See* **Pervert.**

Detract, *v.* अपकृष्-अपनी 1 P. **2** अपलप् 1 P, अपवद्-भाष् 1 A, अधिक्षिप् 6 P, निंद् 1 P, असूयति (D.) (with dat.); मूल्यं न्यूनीकृ 8 U; लघूकृ; *See* **Depreciate. -ion,** *s.* अपकर्षः, लघूकरणं, ऱ्हासः. **2** असूया, अप-परि-वादः, आक्षेपः, गुणनिंदा, पैशून्यं, परदोषाविष्करणं, मात्सर्यं. **-or,** *s.* अपवादकः, अधिक्षेपकः, निंदकः, असूयकः, परिवादरतः. **-ory,** *a.* अपवादिन्, निंदक, अभ्यसूयक; पिशुन.

Detriment, *s.* हानि *f.*, अपकारः, क्षति *f.*, नाशः, अपायः, बाधा, विरोधः. **-al,** *a.* हानिकर (री *f.*), विरोधिन्, अपायकारक.

Detrude, *v. t.* अवपत् c, अधः क्षिप् 6 P, भ्रंश् c. **-Detrusion,** *s.* अवपातनं.

Detruncate, *v. t.* अवच्छिद् 7 P, निकृत् 6 P, वि-लू 9 U. **-ion,** *s.* अवच्छेदः, निकर्तनं.

Deuce, *s.* द्वयं, द्विकं. **2** पिशाचः, भूतः.

Devastate, *v. t.* उच्छिद् 7 P, उत्-अव-सद् c.; उपपीड् 10, वि-उप-प्लु 1 A, प्रबाध् 1 A, निर्जनीकृ 8 U. **-ion,** *s.* उच्छेदः, उपप्लवः, प्रबाधनं, विनाशः, निर्जनीकरणं.

Develop, *v. t.* पुष् 1, 4, 9 P, प्र-उप-चि 5 U, प्र-सं-वृध् c.; 'she d. ed her lovely limbs' पुपोष लावण्यमयान् विशेषान् (K. I. 25); also प्रचीयमानावयवा R. III. 7) उपचितांगी. **2** विकस् c., विस्तृ c., उद्भिद् c.; तस्य (कार्योपक्षेपस्य) विस्तारमिच्छन् (Mu. 4) 'wishing to d. it.' —*v. i.* प्र-उप-चि pass., उद्भिद् pass., क्रमशः विकस् 1 P, क्रमेण प्र-सं-वृध् 1 A. **-ment,** *s.* प्रचयः, उपचयः, संवर्धनं; विस्तारः, विकासः, उद्भेदः.

Devergence, *See* **Divergence.**

Deviate, *v. i.* अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, अति-व्यभि-चर् 1 P; 'did not d. even an inch from the beaten path' क्षुण्णाद्वर्त्मनो रेखामात्रमपि न व्यतीयुः (R. I. 17); अप-या-इ 2 P, चल् 1 P, प्र-वि-°; च्यु 1 A, भ्रंश् 4 P, 1 A, (with abl.). **-ion,** *s.* अतिक्रमः, विचलनं, च्युति *f.*, भ्रेषः, भ्रंशः, व्यभिचारः, त्यागः; 'd. from the right path' उत्पथयानं, विमार्गगमनं.

Device, *s.* उपायः, युक्ति *f.*, प्रयोगः, कल्पना, साधनं. **2** अप-व्यप-देशः, छलं, माया, छद्मन् *n.*, कैतवं, व्याजः. **3** लक्षणं, चिह्नं, अंकः. **4** निर्माणशक्ति *f.*, कल्पनाचातुर्यं.

Devil, *s.* भूतः, वेतालः, पिशाचः; 'I shall not raise a d. for my own destruction' नाहमात्मविनाशाय वेतालोत्थापनं करिष्यामि.

Devious, *a.* वक्र, कुटिल, जिह्म. **2** मर्यादातिक्रामिन्, व्यभिचारिन्.

Devise, *v.* चिंत् 10, उप-सं-कॢप् c., निरूप् 10, युज् 7 U, 10, आ-पर्या-लोच् 10, घट् c. **2** इच्छापत्रेण प्रदा 3 U. —*s.* इच्छापत्रेण रिक्थदानं. **-er,** *s.* धनाधिकारिन्, *m.* **-er,** *s.* उपायज्ञः, परिकल्पकः, प्रयोजकः.

Devoid, (of), *a. See* **Destitute** (of).

Devoir, *s.* स्वकर्तव्यं, कर्तव्यता, धर्मः. **2** सत्कारः, आदरः, पूजा, संमानः.

Devolve, *v. t.* निक्षिप् 6 P, न्यस् 4 P, संक्रम् c., सम्-ऋ c. (अपयति), आरुह् (रोपयति) 'having d. ed their property upon their sons' पुत्रसंक्रांतलक्ष्मीकाः (U. 1); गुणवत्सुतरोपितश्रियः (R. VIII. 11). **2** प्रपत् c., प्रसृ-प्रवह् c. —*v. i.* आगम् 1 P, आया 2 P, पत् 1 P, संक्रम् 1 U, 4 P; न्यस् निक्षिप्-समृ c. pass.; 'after his death the kingdom d. ed upon his eldest son' मृते तस्मिंस्तस्य ज्येष्ठपुत्रो राजपदभाग्बभूव. **2** अधः पत् 1 P, अवपत्. **-Devolution,** *s.* निक्षेपणं, समर्पणं, संक्रामणं.

Devote, *v. t.* प्र-विनि- युज् 7 A, 10, सम् ऋ c. (अर्पयति), निक्षिप् 6 P, उत्सृज् 6 P, सं-उप-कॢप् c. **2** (Oneself to) आसंज्-अनुरंज्-pass., मनः युज् or बंध् 9 P or अभिनिविश् c., आसक्त-अभिनिविष्ट *a.* भू (all with loc.); भज् 1 U, आसेव् 1 A. **3** नाशाय कॢप् c; *See* **Doom. -ed,** *a.* सक्त, आ-प्र-व्या-सक्त; नि-, रत, अभिनिविष्ट, समाहित, पर-तत्पर- परायण in comp. **2** भक्त, दृढभक्ति, अनुरक्त, अनुरागिन्; 'd. to the king' राजनिष्ठ, नृपासक्तचित्त; 'a d. wife' एकपत्नी, पतिव्रता, साध्वी, सती, 'a d. husband' भार्यानिरतः, पत्नीसेविन् *m.* 'a d. friend' स्थिरप्रेम मित्रं, रूढसख्यः सुहृद् **-edly,** *adv* चित्तैकाग्रतया, भक्त्या, निष्ठया, अभिनिविष्टं, मनोभिनिवेशेन, मनोयोगेन, सुसमाहितं. **-edness,** *s* आसक्ति *f.*, भक्ति *f.*, अभिनिवेशः, परायणता. **-ee,** *s.* तापसः, यतिः, योगिन् *m.*, तपस्विन् *m.*, मुनिः, व्रतिन् *m.* **2** भक्तजनः, प्रणयिजनः, उपासकः, भक्तः. **-ion,** *s.* अभियोगः, अभिनिवेशः, अनुरागः

सेवा, उपासना, प्रसक्ति *f.*, आसक्ति *f.*, भक्तिः, निरति *f.*, परायणता. **2** नियमः, धर्मक्रिया, तपस् *n.* ईश्वरभक्ति *f.* सेवा; 'self-d.' आत्मोत्सर्गः-परित्यागः; 'd. to a husband' पातिव्रत्यं, पतिसेवा; 'to perform d. s' तपश्चर् 1 P or तप् 4 A, तपस्यति (D.). **-ional,** *a.* धर्मपर. धर्मनिष्ठ, भजनशील. **2** धर्मक्रियाविषयक, तपोमय (यी *f.*).

Devour, *v. t.* भक्ष् 10, अद् 2 P, खाद् 1 P, ग्रस् 1 A, गृ 6 P. **2** उपयुज् 10, उपयोगेन विनश् c. **-er,** *s.* भक्षकः, खादकः.

Devout, *a.* धार्मिक, धर्म-परायणशील, धर्मनिष्ठ, धर्मात्मन्, भक्त, ईश्वरनिरत, पुण्यशील, प्रयत त्मन्, पुण्यात्मन्. **-ly,** *adv.* भक्त्या, भक्तिपूर्वकं, भक्तिपुरःसरं, श्रद्धान्वितं. **-ness,** *s.* धार्मिकता, धर्मात्मता, ईश्वरनिष्ठता, भक्ति *f.*

Dew, *s.* नीहारः, अवश्यायः, तुषारः, प्रालेयं, हिम-रात्रि-ख-जलं. **-***v. t.* नीहारेण सिच् 6 P or प्रोक्ष् 1 P; 'd. drop' तुषारकणः-बिंदुः-शीकरः, and sim. comps. **-y,** *a.* तुषारमय (यी *f.*), अवश्यायावसिक्त; तुषारकणोपम.

Dexterous, *a.* कुशल, निपुण, पटु, दक्ष, लघुहस्त, करदक्ष. **-ly,** *adv.* निपुणं, दक्षतया, सपाटवं, हस्तलाघवेन. **-Dexterity,** *s* दक्षता, पटुता, नैपुण्यं, हस्तकौशलं, हस्तलाघवं.

Dextral, *a.* दक्षिण, अपसव्य, दक्षिणपार्श्वस्थ.

Diabetes, *s.* मधुमेहः, प्रमेहः, बहुमूत्ररोगः.

Diabolical, *a.* पैशाच (ची *f.*), पिशाचोपम. **2** घोर, दारुण, पापिष्ठ, अतिघोर-पाप, अतिनिंद्य.

Diacoustics, *s.* ध्वनिविद्या.

Diadem, *s.* मुकुटं, किरीटः-टं, मौलिः, उष्णीषः-षं, शिरोवेष्टनं, 'd. ed' किरीटिन्, किरीटधारिन्.

Diagnosis, *s.* रोगनिर्णयः निरूपणं, रोगनिदानं, मीमांसा, चिकित्सा.

Diagnostic, *s.* रोगलक्षणं-चिह्नं.

Diagonal, *s.* कर्णः, श्रुति *f.* **-ly,** *adv.* कोणाकोणि, कर्णाकर्णि.

Diagram, *s.* चित्रं.

Dial, *s.* शंकुयंत्रं, सूर्यघटी.

Dialect, *s.* प्राकृतभाषा, भाषा (as opposed to संस्कृत). **2** भाषणं, वचनं, उक्ति *f.*

Dialectic, *s.* तर्कः, न्यायः, हेतुविद्या, आन्वीक्षिकी विद्या. **-al,** *a.* तार्किक (की *f.*), न्यायिन्. **-ian,** *s.* तार्किकः, नैयायिकः, न्यायविद् *m.*

Dialogue, *s.* संलापः, संवादः, संकथा, संभाषणं, प्रश्नोत्तरं, कथोपकथनं. **-Dialogist,** *s.* संवादकः, उत्तरप्रत्युत्तरदायकः.

Diameter, *s.* व्यासः, विष्कंभः. **-Diametrically,** *adv.* विपरीतं, प्रतिकूलं, अत्यंतं, एकांततः.

Diamond, *s.* वज्रः-ज्रं, हीरं, हीरकः; 'd. cutter' हीरकारः-मार्जकः.

Diapason, *s.* स्वराष्टकं, स्वरग्रामः.

Diaper, *s.* चित्रितं क्षौमं. **-***v. i.* क्षौमं चित्र् 10 or कर्बुरीकृ, &c.

Diaphanic, *a.* स्वच्छ, विशद; *See* **Clear.**

Diaphoretic, *a.* स्वेदन (नी *f.*), स्वेदजनक, घर्मोत्पादक; 'd. medicine' स्वेदनं.

Diaphragm, *s.* शरीरमध्यदेशः.

Diarrhœa, *a.* अतिसारः, प्रवाहिका; ग्रहणी-, रुज् *f.*

Diary, *s.* दिनपत्रिका, दैनिकवृत्तपुस्तकं.

Diatribe, *s.* अधिक्षेपः, कुत्सात्मको लेखः.

Dibble, *s.* लघुखनित्रं.

Dice, *s.* plural of **Die,** *s.* q. v.

Dictate, *v. t.* आज्ञापूर्वकं कथ् 10, आदिश् 6 P, आज्ञा c. (ज्ञापयति). **2** सूच् 10, प्रोत्साह् c., प्रचुद् 10, प्रेर् c.; 'd. ed by good motives' सदाशयप्रेरित. **-***s.* आज्ञा, आदेशः, शासनं. **2** चोदनं-ना, प्रेरणं-णा. **-ion,** प्रोत्साहनं. **2** आज्ञापनं, आज्ञापूर्वकं कथनं. **-or,** *s.* एकाधिपतिः, अनन्याधीनः शास्ता, अनियंत्रणः प्रभुः. **2** आदशकः, शासितृ *m.* **-orial,** *a.* अवलिप्त; *See* **Arrogant.**

Diction, *s.* भाषा, वाणी, वाक्सरणि *f.*, वचोविन्यासः.

Dictionary, *s.* कोशः-षः, शब्दसंग्रहः; अभिधानं.

Dictum, *s.* वचनं, आदेशः, विधिः, नियमः.

Didactic,-al, *a.* उपदेशपर, प्रबोधक.

Die, *s.* अक्षः, पाशकः, देवनः; 'a loaded d.' कूटाक्षः. **-Dice,** (pl.) अक्षाः, &c. **-***v. i.* अक्षैः दिव् 4 P, ग्लह् 1 P. **-er,** *s.* अक्षधूर्तः, अक्षदेविन् *m.*, धूर्तः, कितवः. **-ing,** *s.* द्यूतं, अक्षक्रीडा; 'd. board' अष्टापदं, शारिफलं; 'd. box' अक्षाधारः; 'the die is cast' कृतं दैवाधीनं (अप्रतिविधेयं) कर्म, अधुना यद्भावि तद्भवतु.

Die, *v. i.* मृ 6 A, प्राणान्-असून्-जीवितं त्यज् 1 P or उत्सृज् 6 P or हा 3 P, पंचत्वं या 2 P or गम् 1 P, उपरम् 1 P; परासु-गतासु-*a.* भू 1 P, देहं-तनुं त्यज्, प्र-इ 2 P, विपद् 4 A, संस्था 1 A, प्रमी pass. **2** विनश् 4 P, प्रली 4 A, ध्वंस् 1 A क्षि pass., अवसद् 1 P. **3** ग्लै 1 P, विशृ pass. **-Dead,** *a.* मृत, उपरत, संस्थित, प्रेत, परेत, परासु, गतासु, विपन्न, गतप्राण, विचेतन, प्राणहीन, प्रमीत. **2** निश्चल, निश्चेष्ट, जड, निस्तेजस्, निःसत्व, असार, निष्फल. **3** सुप्त, स्तब्ध (as of limbs); 'd. body' शवं, मृतशरीरं; कुणपः. 'd. language' अप्रचलिता भाषा; 'd. sleep' घोर-गाढ-निद्रा; 'd. loss' परिपूर्णा-सकला हानिः; 'd. letter' लुप्तार्थं वचनं, 'd. soul' निरभिमानः आत्मा. **-***s.* (Of night) मध्यरात्रः, निशीथः, अर्धरात्रः. **2** मध्यं; *See* **Depth.** **-en,** *v. t.* दुर्बलीकृ. 8 U, शिथिलीकृ, तेजो हृ 1 P, नश् c.,

म्लानीकृ. -*v. i.* म्लै 1 P, शिथिलीभू. **-ly,** *a.* प्राणापहारक, जीवितापह, मारात्मक, निधनकारिन्, प्राणांतक, प्राणहारिन्, प्राणनाशक, जीवितघ्न (घ्नी *f.*). **2** अशाम्य; 'd. enmity' आमरणांतिकं वैरं, अशाम्यं वैरं; 'd. poison' हाला(ल)हलं विषं. -*adv.* मृतवत्; प्राणांतिकं; 'd. wounded' भिन्नमर्मन्; 'd. pale' प्रेतसवर्ण. **-ness,** *s.* दौर्बल्यं, निःसत्वता, जडत्वं, स्तंभः; वैकल्यं, विरक्ति, *f.*, शिथिलता. **-Death,** *s.* मरणं, मृत्युः, उपरमः, निधनः-नं, अंतः, पंचत्वं-ता, संस्थिति *f.*, कालधर्मः, दिष्टांतः, प्रलयः, अत्ययः, नाशः, प्राणनाशः, तनुत्यागः, &c. **2** यमः, कालः, कृतांतः. **3** वधः, घातः, व्यापादनं; 'he was pelted to d.' सलोष्टघातं हतः; 'he was sentenced to d.' तस्य प्राणदंड आदिष्टः; 'to put to d.' हन् 2 P, व्यापद् c., वधं आदिश् 6 P; 'a violent d.' अपमृत्युः; अपघातः; 'angel of d.' यमदूतः; 'd. by fasting' प्रायः, प्रायोपवेशनं; 'd. bed' तनु शय्या. **-less,** *a.* अमर, अनश्वर, अमर्त्य, चिरस्थायिन्.

Diet, *s.* आहारः, अन्नं, भोजनं, भक्ष्यं. **2** पथ्यं, पथ्यान्नं., पथ्याशित्वं. **3** राजसभा, शिष्टसभा. -*v. t.* पु c., भृ 3 U. **2** पथ्यं निर्दिश् 6 P.

Differ, *v. i.* भिद् pass., प्र-वि-°; विशिष् pass., (न कारणात्स्वाद्विभिदे कुमारः R. v. 35); gen. ex. by (*s.*); 'they two do not d.' न तयोर्भेदः, विशेषः, &c. **2** अन्यथा मन् 4 A, न संमन्, विवद् 1 A, भिन्नमत *a.* भू, विप्रतिपद् 4 A, (एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः S. B. 702); 'I d. from you' मम मतं त्वन्मताद्भिन्नं. **3** वि-प्रति-रुध् pass. **-ence,** *s.* भेदः, विशेषः, अंतरं, (with gen.). **2** पार्थक्यं, इतरत्वं, भिन्नत्वं, व्यतिरेकः; 'that makes no d.' तेन न कोपि विशेषो जायते. **3** विरोधः, वैपरीत्यं, विपर्ययः, वैलक्षण्यं. **4** विप्रतिपत्ति *f.*, मतिभेदः, विसंवादः, वैमत्यं; कलिः, कलहः, विवादः. **5** असाम्यं, असादृश्यं; 'd. in quantity' वैषम्यं. **-ent,** *a.* भिन्न, वि-प्र-भिन्न, इतर-अन्य-पर-*pron. a.*, व्यतिरिक्त, विपरीत, पृथक्, विशिष्ट, (with abl.); अंतर in comp.; 'she is not d. from my body (myself)' अव्यतिरिक्तेयमस्मच्छरीरात् (Ka. 151); 'a d. sense' अर्थांतरं. **2** असदृश (शी *f.*), असमान, विषम, असम. **3** विविध, नानाप्रकार, नाना in comp.; तत्तत् *pron. a.*, 'd. S'âstras' तानि तानि शास्त्राणि; 'in a d. way' अन्यथा, भिन्नप्रकारेण. **-ential,** *a.* भेदकर (री *f.*), विशेषक. **-ently,** *adv.* अन्यथा, इतरथा, भिन्नरूपेण; अन्यप्रकारेण, पृथक्.

र, कठिन, दुष्कर, दुःसाध्य, कष्ट. **2** गहन, विषम, दुर्बोध, असुगम, कष्टज्ञेय गूढार्थ, दुर्ज्ञेय. **3** (With inf.) ex. by दुर्, दुःख, कष्ट, in comp.; 'd. to get दुष्प्राप, दुराप, कष्टसाध्य; दुरारोह, दुःखच्छेद्य, &c.; 'a d. case' सशल्योर्थः; 'a d. road' दुर्गसंचा(च)रः, संक्रमः; 'a d. place' विषमस्थानं, दुर्गं, दुर्गमस्थलं. **-ly,** *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कष्टं, आयासेन, दुर्, pr. **-y,** *s.* असौकर्यं, वैषम्य, कठिनता, दुष्करत्वं, कष्टता, दुःसाध्यता. **2** आयासः, वैक्लव्यं, विरोधः. **3** कृच्छ्रं, संकटं, विघ्नः, आयासः, दुर्गं, दुःखं, विरोधः, क्लेशः, बाधा, कष्टः ष्टं. **4** विषमपदं, असुबोधं-दुर्बोधं पदं, असुगमं स्थानं; 'without d. 'अनायासेन, सुखं; 'with d.' कथमपि, कथं कथमपि, कथंचित्, दुःखेन, कृच्छ्रेण; 'a commentary explaining the d. es' विषमपदविमर्शिनी टीका; 'beset with d. es' सशल्य, सकंटक; 'overcoming d. es' दुर्गलंघनं.

Diffidence, *s.* अविश्वासः, अप्रत्ययः, आ-, शंका. **2** (In oneself) अप्रगल्भता, विनयः, ह्रीः, लज्जा. **-Diffident,** *a.* अविश्वासिन्, शंकाशील, अप्रत्यय, साशंक; 'the mind feels d. of itself' आत्मन्यप्रत्ययं चेतः (S. 1). **2** अप्रगल्भ, अधृष्ट, विनीत, ह्रीमत्, लज्जावत्. **-ly,** *adv.* अप्रगल्भं, साशंकं, लज्जया, सविनयं.

Diffract, *v. t.* वियुज् 7 A, 10, विश्लिष् c.

Diffuse, *v. t.* प्रसृ c., वि-परि-स्तृ c., विसृप् c., प्रचर् c. विकृ 6 P, तन् 8 U, अभि-प्र-वृध् c. **2** प्र-स्रु c., विद्रु c., प्रक्षिप् P. **3** (Itself) व्याप् 5 P, विसृ-विसृप् 1 P विस्तृ pass., व्यश् 5 A, सर्वत्र गम् 1 P, or प्रविश् 6 P. -*a.* वितत, सविस्तर, विस्तृत, असंक्षिप्त, विस्तीर्ण, सप्रपंच. **-ly,** *adv.* सविस्तरं, विस्तरेण, विस्तरशः, प्रपंचेन, असंक्षेपतः, असमासेन. **-ion,** *s.* प्रसारः, प्र-वि-सरः, विस्तारः, अभिवृद्धि *f.*, विततिः *f.*, प्रचारणं, प्रसरणं- **-ive,** *a.* वि-प्र-सारिन्, व्यापक, व्यापिन्, प्रसरणशील. **-iveness,** *s.* विस्तारः, विस्तृति *f.*, व्यापकत्वं. **2** वाग्विस्तारः, प्रपंचः, वाक्यविस्तरः.

Dig, *v. t.* खन् 1 P; 'd. down' (भूमिं) अवदृ 10, भिद् 7 U; 'd. in' निखन्. **2** निर्भिद्, छिद् 10, व्यध् 4 P. **-ger,** *s.* खनकः, खनितृ *m.*

Digest, *v. t.* (जठरे) जॄ c. (जरयति), पच् 1 P, परिपाकं नी 1 P, परिणम् c. (णमयति), दह् 1 P, **2** क्रमेण-यथाक्रमं-विन्यस् 4 U or रच् 10 or ग्रंथ् 9 P or लिख् 6 P. **3** मनसा विचर् c. or चिंत् 10. **4** suffer, q. v. -*v. i.* जॄ 4 P, पच् pass., परिणम् 1 P. **-er,** *s.* पाचकं, जारणं, अग्निवर्धनं, रोचनं, रोचकं. **-ion,** *s.* पाकः; वि-परि-पाकः, पचनं, परिणामः. **2** जठराग्निः, जठरानलः, अग्निः; 'slowness of d.' अग्निमांद्यं; 'having a'

good d.' प्रदीप्ताग्निः. **-ive,** *a.* पाचन (नी *f.*), पाचक, अग्निवर्धक, परिपाकिन्.

Dight, *See* **Adorn.**

Digit, *s.* कला, लेखा, रेखा. **2** अंकः.

Dignity, *s.* महिमन् *m.*, माहात्म्यं, औदार्यं. **2** अनुभावः, प्रतापः, तेजस् *n.*, प्रौढि *f.*, प्रौढत्वं-ता. **3** प्रतिष्ठा, गौरवं, पदं, उत्कृष्ट-परमपदं, उत्कर्षः, उन्नति *f.*, आभिजात्यं, प्रतिपत्ति *f.*, ओजस्विता, उच्चत्वं, कुलीनता; 'd. of style' ओजस् *n.* **4** मानः, अभिमानः, गर्वः, दर्पः; 'd. of expression' प्रौढत्वं वचसां. **-Dignify,** *v. t.* संमन् c., सत्कृ 8 U, पूज् 10. **2** उत्कृष्टपदे नियुज् 7 A, 10, परमपदं प्राप् c., उत्कर्षं नी 1 P. **-ed,** *a.* महानुभाव, अनुभाववत्, ग(गं)भीर, ओजस्विन्, प्रौढ, महाप्रताप; 'd. in mien' गंभीराकृति. **2** मानिन्, महाशय, महेच्छ. **3** उत्कृष्टपदनियुक्त, प्रतिपत्तिमत्, परमपदारूढ. **-Dignitary,** *s.* मान्यजनः, शिष्टजनः, कुलीनपुरुषः.

Digress, *v. i.* प्रस्तुतं न अनुसंधा 3 U, अप्रस्तुतं वद्-भण् 1 P or वच् 2 P, प्रकृतं-कथायोगं त्यज् 1 P; 'you are d. ing' न त्वया प्रस्तुतमनुसंधीयते. **2** उत्क्रम् 1 U, 4 P, विचल् 1 P, प्रच्यु 1 A, भ्रंश् 1 A, 4 P; *See* **Deviate. -ion,** *s.* प्रकृतत्यागः, अप्रस्तुतानुसंधानं; प्रसंगः, प्रासंगिकं वचनं; 'enough of d.' अलं प्रासंगिकेन or प्रसंगेन, प्रकृतमेवानुसंधीयतां. **2** उत्क्रमः, विचलनं, भ्रंशः, च्युति *f.*, त्यागः. **-ive,** *a.* अनन्वित, अप्रस्तुत, अप्रकृत, असंगत, असंबद्ध.

Dike, *s.* सेतुः, सेतुबंधः, पिंडलः, धरणः, कूलकः-क. **2** कुल्या, परिखा, खातं, प्रणालः-ली.

Dilacerate, *See* **Tear.**

Dilapidate, *v. i.* जॄ 4 P, विनश् 4 P, क्षि-उच्छिद्-pass., अवसद् 1 P. *-v. t.* उच्छिद् 7 P, अवसद् c., प्रध्वंस् c. क्षि c., विनश् c.; *See* **Destroy. -ion,** *s.* क्षयः, ध्वंसः, नाशः, उच्छेदः, अवसादः.

Dilate, *v. t.* विस्तृ c., वितन् 8 U, प्र-वि-सृ c., दीर्घीकृ 8 U. **2** (upon) प्रपंचयति (D.), सविस्तरं विवृ 5 U, or व्याचक्ष् 2 A, अति-विवृ. *-v. i.* वितन्-विस्तृ-विवृ pass., आयतीभू, दीर्घीभू. **-ed,** *a.* वितत, व्यायत; उत्फुल्ल, विकसित. **-ion,** *s.* विस्तारः, विततिं *f.*, विस्तरणं, विवृति *f.*; विकासः-सनं. उत्फुल्लता.

Dilatory, *a.* दीर्घसूत्रिन्, दीर्घसूत्र, विलंबिन्, मंद, मंथर, चिरक्रिय, अक्षिप्रकारिन्. **-ly,** *adv.* सविलंबं, मंदंमंदं, कालक्षेपेण. **-ness,** *s.* दीर्घसूत्रता, विलंबः, कालक्षेपः, मांद्यं, कार्यजडता.

Dilemma, *s.* उभयसंभवः, विकल्पः.

Flay, *v. t.* चर्म अपनी or निर्ह् 1 P or उल्लिख् 6 P or निष्कृष् 1 P, निस्त्वचयति (D.), निस्त्वचीकृ 8 U, त्वक्ष् 1 P. **-er,** *s.* त्वग्विदारकः, चर्मनिष्कर्षकः. **-ing,** *s.* चर्मनिष्कर्षणं, निश्चर्मकरण.

Flea, *s.* मक्षिका, मत्कुणः, देहिका, तल्पकीटः. **-***v. t.* देहिकाः अपनी 1 P.

Fleck, *s.* रे(ले)खा, बिंदु *m.*

Fledged, *a.* संजातपक्ष, गरुत्मत्, सपक्ष, पक्षयुक्त.

Flee, *v. i.* पलाय् 1 A, अपक्रम् 1 U, 4 P, वि-प्र-द्र 1 P, परा-इ 2 P, अपधाव् 1 P, अप-निर्-गम् 1 P, अप-सृ-सृप् 1 P. **2** त्यज् 1 P, परिहृ 1 P, वृज् 10.

Fleece, *s.* मेषलो(रो)मन् *n.* **-***v. t.* (लोम) छिद् 7 P or लू 9 U. **2** अपह 1 P; 'f. ed' हृतसर्वस्व. **-cy,** *a.* बहुलोमन्, लोमश, लोमावृत.

Fleer, *v. t.* अव-उप-हस् 1 P, तिरस्कृ 8 U, अवमन् 4 A, अव-ज्ञा 9 U; *See* **Contemn.** **-***s.* उप-अव-हासः; तिरस्कारः, अवहेलना, अवज्ञा.

Fleet, *s.* नौसमाजः-साधनं, पोतावलि *f.*, युद्धनौसमूहः. **-***v. i.* द्रुतं-शीघ्रं-प्रसृप् 1 P or गम् 1 P, वेगेन चल् 1 P, त्वर् 1 A. **-***a.* वेगवत्, शीघ्र-त्वरित-लघु-गति, प्रजविन्, अतिरंहस्, जवन (नी *f.*), शीघ्रगामिन्, महाजव; 'f. as the wind' वायुगति, वायुवेग; 'f. as thought' मनोजव. **-ing,** *a.* क्षणिक, क्षणभंगुर, अध्रुव, क्षणस्थायिन्; *See* **Fickle.** **-ly,** *adv.* द्रुतं, शीघ्रं, लघु, सत्वरं, जवेन, वेगेन, रंहसा. **-ness,** *s.* वेगः, प्र-, जवः, रंहस् *n.*, त्वरितगति *f.*

Flesh, *s.* मांसं, आमिषं, पिशितं, क्रव्यं, तरसं, पललं; 'dried f.' वल्लूरं-रा, उत्तसं, शुष्कं मांसं. **2** शरीरं, विषयसेवा, विषयासक्ति *f.*; 'f. diet or meat' मांसाहारः; 'f.-colour' मांसवर्णः-रागः-लोहितः; 'f.-monger' मांसविक्रयिन् *m.* **-less,** *a.* अमांस, अपुष्ट, मांसहीन. **-ly,** *a.* शारीरिक-दैहिक (की *f.*), विषयिन्, सांसारिक-ऐहिक (की *f.*). **-y,** *a.* मांसल, पुष्ट, पीन, पीवर, मेदस्विन्; *See* **Fat.**

Flexible, *a.* आ-, नम्य, कुंचनीय, नमन-कुंचनशील, कोमल, मृदु, आयम्य. **2** अनुनेय.

Flexion, Flexture, *s.* आ-, नति *f.*-नमनं; भंगः, आ-अव-कुंचनं, वक्रता, वक्रिमन् *m.*

Flexuous, *a.* वक्र, कुटिल, जिह्म, भंगुर.

Flick, *v. t.* आहन् 2 P, प्रहृ 1 P, आस्फाल 10. **-***s.* *See* **Flip.**

Flicker, *v. i.* चल् 1 P, चंचलतया ज्वल् 1 P, लोलशिखया ज्वल्, चंचलीभू 1 P. **2** पक्षौ आ-स्फल् c. **-ing,** *a.* चल, चंचल, अस्थिर, लोल. **-***s.* चंचलशिखा, चलनं, चांचल्यं.

Flimsy, *a.* असार, फल्गु, सारहीन, निर्बल, निःसत्त्व, अल्पबल, क्षीणशक्ति. **-ness,** *s.* असारता.

Flinch, *v. i.* विमुखी-पराङ्मुखी-भू 1 P, विचल् 1 P, नि-परा-वृत् 1 A, (abl.); पलाय् 1 A, त्यज् 1 P, त्यक्त्वा निर्गम् 1 P or अपसृप् 1 P मुखं परा-वृत् c. **-ing,** *s.* निवर्तनं, विमुखता, विचलनं, विमुखीभवनं.

Fling, *v. t.* (सहसा-बलेन) क्षिप् 6 P, अस् 4 P, मुच् 6 P, वि-सृज् 6 P, पत् c., ईर् c.; 'f. away or off' अप-क्षिप्, निरा-कृ, अपास्, अप-हा 3 P; 'f. open' सहसा or बलाद् अपावृ 5 U. **-***s.* क्षेपः-पणं, पातः-तनं; प्रक्षेपः.

Flint, *s.* अरणिः, अग्निग्रावन् *m.*, अग्निप्रस्तरः. **-y,** *a.* अग्निप्रस्तरमय (यी *f.*). **2** कठिणहृदय, पाषाणहृदय.

Flip, *s.* आघातः, प्रहारः, आस्फालनं.

Flippant, *a.* वाचाल, वावदूक, निःसार, वाक्चंचल. **2** चपल, अस्थिर, लोल, चंचल. **-ly,** *adv.* वाक्चापल्येन. **-Flippancy,** *s.* वाक्चापल्यं, वावदूकता; निः-सारता. **2** प्रगल्भता, लौल्यं, चापल्यं.

Flirt, *v. t.* सहसा क्षिप् 6 P. **-***v. i.* अव-हस् 1 P, अधिक्षिप् 6 P. **2** वि-भ्रम् 1, 4 P, विलस् 1 P, विलासं-विभ्रमं-दृश् c. **3** चल *a.* भू 1 P, स्पंद् 1 A, कंप् 1 A, स्फुर् 6 P. **-***s.*

आकस्मिकक्षेपः. **2** विलासिनी, लीलावती, चपला, प्रगल्भा. **-ation**. *s.* लीला, हेला, विभ्रमः, विलासः, हावः, खेला, प्रेमलीला. **2** स्पंदनं, स्फुरणं; हृदयकंपः.

Flit, *v. i.* लघु चल् 1 P, द्रुतं वि-प्र-सृप् 1 P, स्थानात्स्थानं गम् or चल् 1 P, इतस्ततो भ्रम् 1, 4 P. **2** प्र-उत्-डी 1, 4 A, व्योम्नि विसृप्, चपलीभू. **-ting,** *s.* भ्रमणं, चलनं, लघु सर्पणं.

Flitch, *s.* वल्लूरं, शूकरोत्तसं.

Flitter *s.* चीरं, कर्पटः, वस्त्रखंडः-डं.

Flittermouse, *s.* जतुका, अजिनपत्रा.

Float, *v. i.* प्लु 1 A; तृ 1 P. **2** भास् 1 A. **-***v. t.* प्लु c., वह् c. **-***s.* प्लवः, उडुपः, कोलः, वाहित्रं, तरणः-णी, तरीः.

Flocculent, *a.* सांद्र, घनीभूत, श्यान.

Flock, *s.* यूथं, संघः, निवहः, समूहः, कुलं, गणः; *See* **Multitude**; 'f. of cattle' पाशवं, पशुकुलं, गो-वृंद-कुलं, 'f. of sheep' अविकुलं, आविकं; 'f. of sheep and goats' अजाविकं; 'in f.s' गणशः, संघशः. **-***v. i.* (Together) संघशः-गणशः-समागम् 1 P or मिल् 6 P or संनि-पत् 1 P, एकत्र मिल्, एकीभू.

Flog, *v. t.* कशया-वेत्रेण-तड् 10 or आ-हन् 2 U or दंड् 10 or प्र-हृ 1 P. **-ging,** *s.* कशाघातः, कशाप्रहारः; 'deserving f.' कश्य.

Flood, *s.* पूरः, ओघः; स्रोतस् *n.*, प्रवाहः, रयः. **2** आप्लावः, संप्लवः, तोयविप्लवः, जलप्रलयः, जलोपप्लवः; 'universal f.' महाप्रलयः, भूतसंप्लवः, संवर्तः. **3** प्राचुर्यं, बाहुल्यं, पूरः, ओघः; 'f. of tears' बाष्पपूरः-ओघः-वर्षः, अश्रुपातः-वर्षः, 'f.-gate' द्वारं, निर्गममार्गः, परि(री)-वाहः, जलद्वारं, जलनिर्गमः. **-***v. t.* प्लु c., आ-सं-परि°-, परिवह् c.; 'with her eyes f.-ed with tears' अश्रुपरिप्लुतेक्षणा; 'a f.-ed river' आप्लुतोदका-परिवाहिणी-नदी.

Flook, *s.* हलदंतः.

Floor, *s.* भूमि *f.*, भूपृष्ठं, तलं, भूतलं, गृहभू-भूमि *f.*, गृहपोटः, वास्तु *m. n.*, गृहमूलं, वेश्मभूः. **2** (Story) भूमिः, कोष्ठः; 'a palace havaing 7 f.s' सप्तभूमिकः प्रासादः; 'the upper f.' उपरिभूमिः. **3** फलकास्तरणं, फलकसंस्तरः, फलकः-कं. **-***v. t.* फलकैः आ-स्तृ 9 U or आच्छद् 10. **2** नि-पत् c., भूमौ क्षिप् 6 P.

Flop, *v. t.* आ-स्फल् c.

Flora, *s.* ओषधिजातं.

Floral, *a.* कौसुम (मी *f.*), पुष्प in comp.

Florid, *a.* रक्त, रक्त-अरुण-वर्ण. **2** अलंकृत, उज्ज्वल, अलंकारशोभित, सालंकार. **-ity, -ness,** *s.* (कपोल)-रागः, अरुणिमन्-रक्तिमन् *m.* **2** वागलंकारः, सालंकारत्वं, अलंकारशोभा.

Floriferous, *a.* पुष्पोत्पादक, पुष्पप्रद.

Florilege, *s.* पुष्पचयः-संगः.

Florist, *s.* मालाकारः, पुष्पविद्याज्ञः.

Flota, *See* **Fleet.**

Flotilla, *s.* लघुनौसमूहः,

Flounce, *v. i.* अंगानि विक्षिप् 6 P or इतस्ततः चल् c. **-***s.* आकस्मिकः अंगविक्षेपः.

Flounder, *v. i.* इतस्ततः क्षिप् pass., लुठ् 1 A, 6 P, वि-प्लु 1 A. **2** वि परि-भ्रम् 1, 4 P.

Flour, *s.* गोधूमचूर्णं, चूर्णं, क्षोदः, पिष्टं, गुंडिका, सक्तवः (pl.).

Flourish, *v. i.* सं-जन् 4 A, सं-भू 1 P; 'when Pa*n*ini f. ed' यदा पाणिनिः समजायत. **2** वृद्धिं-उन्नतिं-गम् 1 P, सं-ऋध् 4, 5 P, एध् 1 A, सं-वि-वृध् 1 A, प्र-उप-चि pass., स्फाय् 1 A **-***v. t* वृध् c. **2** चित्र् 10, पुष्पादिना अलंकृ 8 U or शुभ् c. or रंज् c. **3** भ्रम् c. (भ्रमयति), घूर्ण् c. **-***s.* आडंबरः, शोभा, अलंकारः, मंडनं. **2** निः-,स्वनः (of trumpets). **3** दर्पवाक्यं, गर्वोक्ति *f.* **4** भ्रमणं, उद्गमः. **-ing,** *a.* समृद्ध, सुस्थित, सुस्थ, वर्धिष्णु, उदयिन्, उपचीयमान.

Flout, *See* **Contemn.**

Flow, *v. i.* प्र-,स्रु 1 P; प्र-नि-अभि-स्यंद् 1 A, क्षर् 1 P, गल् 1 P, सृ 1 P; प्रवह् 1 P, री 4 A, द्रु 1 P; 'f. ing with tears' बाष्पजलनिस्यंदिन्; 'f. ing with nectar' सुधास्यंदिन्, अमृतस्रुत्; प्र-,स्नु 2 P; 'f. ing (of milk)' प्रस्रवः. **2** प्र-सृप् 1 P, प्र-सृ, प्रवृत् 1 A, प्र-गम्-चल् 1 P, प्र-या 2 P. **3** जन् 4 A, उत्पद् 4 A, उत्-प्र-सं-भू 1 P, प्रवृत्. **4** स्रंस् 1 A, शिथिलीभू, श्लथ-वितत-गलित *a.* भू. **-***s.* स्रवः, स्रवणं, स्रुति *f.*, स्रावः, क्षरणं, गलनं, प्रवृत्ति *f.*, अभि-नि-स्यं(ष्यं)-दः-दनं. **2** प्रवाहः, स्रोतस् *n.*, ओघः, प्रस्रवः, वेगः, रयः, धारः-रा; वेला, पद्धति *f.* **3** समुद्रवेला, वेला; 'f. of tears' अश्रुपातः-प्रवाहः, बाष्पवर्षः, धाराश्रु *n.*; 'f. of words' वागोघः. अप्रतिहता वाक्सरणिः-पद्धतिः. **-ing,** *a.* प्रस्रुत, स्यंदिन्, विसारिन्, स्रवत् **2** अप्रतिहत, अस्खलित; 'a f. delivery' अस्खलितभाषणपद्धतिः. **-ingly,** *adv.* अस्खलितवाक्येन, अप्रतिहतं, द्रुतं, अविलंबितं.

Flower, *s.* पुष्पं, कुसुमं, प्रसूनं, सुमं, सूनं, सुमनस् *f.* (pl.) **2** अवतंसः, ललामभूतः, अलंकारः, तिलकभूतः; 'Rāma is the f. of his class' स्ववर्गललामभूतो रामः. **2** सारः, उत्कृष्ट-श्रेष्ठ-भागः, उत्तमांशः, सारांशः; 'f. of age' यौवनं; 'f. of youth' नवयौवनं; 'being in the f. of youth' आरूढयौवनारंभ, प्रौढयौवन. **-***v. i.* फुल्ल् 1 P, विकस् 1 P, स्फुट् 6 P, भिद् pass. **2** मंडायते-फेनायते (D.). **-***v. t.* पुष्पादिना अलंकृ 8 U or

क्षुभ् c. -ed, *a.* कुसुमित, पुष्पित, कुसुमसनाथ. 2 विकसित, फुल्ल, स्फुटित. -ing, *a.* पुष्पवत्, कुसुमवत्, कुसुमित, प्रफुल्ल, स्फुटितपुष्प. 2 पुष्पद्. -less, *a.* अकुसुम, कुसुमहीन. -y, *a.* पुष्प-कुसुम-मय (यी *f.*), सपुष्प, सकुसुम, पुष्पशालिन्; gen. ex. by (*s.*) in comp., 'f. arrows' कुसुमशराः. 2 सालंकार, अलंकृत, अलंकारयुक्त, मंडित.

Fluctuate, *v. i.* इतस्ततः चल् 1 P or घूर्ण् 1 A, लुल् 1, 6 P, विलुठ् 1 A, 6 P. 2 दोलायते (D.), विकल्प् 1 A, संदिह् 2 U; विचल्, अस्थिर-चंचल -*a.* भू 1 P. -ing, *a.* दोलायमान, अस्थिर, चंचल, अनवस्थित, लोल, तरल, चल. -ion, *s.* अस्थैर्य, चलता, अप्रतिष्ठा, चांचल्यं, विकल्पः, संदेहः, अनवस्थिति *f.*, आंदोलनं.

Flue, *s.* धूममार्गः-पथः.

Fluent, *a.* अस्खलितवाच्, अस्खलद्वाक्य, वाक्पटु, द्रुत-त्वरित-वाच् (of persons): अनर्गल, अप्रतिहतौघ, अविश्रांत, अस्खलित, द्रुत, अप्रतिहत, अनवरत. -ly, *adv.* अस्खलितवाचा, द्रुतवाक्येन, अस्खलितं, द्रुतं, अप्रतिहतं, वाग्विभवेन. -Fluency, *s.* वाक्पटुत्वं, वाक्चापल्यं, वाग्विभवः, ओघः, अनर्गलता, अप्रतिहतत्वं.

Fluid, *s.* द्रवः, रसः, द्रववस्तु *n.* -*a.* द्रव, विलीन, द्रुत; *See* **Liquid.** -ity, *s.* द्रवता, विलयः.

Flummery, *s.* मिथ्याप्रशंसा-स्तुति *f.*

Flunky, *s.* दासः, चेटः, नीचकर्मकरः.

Flurry, *See* **Agitate.** -*s.* संभ्रमः, व्यग्रता, मोहः.

Flush, *v. t.* अरुणीकृ 8 U, अरुणयति (D.), रंज् c., रक्तीकृ; 'with her face f. ed with anger' कोपारुणिताननां. 2 उत्सिच् c., दृप् c., दर्पेण आ-ध्मा 1 P, उद्धतीकृ. -*v. i.* अरुणीभू, रक्तीभू, लोहितायते (D.), रंज् pass.; अरुणवदन-लोहिताननः -*a.* भू. -*s.* अरुणिमन् *m.*, रक्तिमन् *m.*, रक्तता, रागः, कपोल-वदन-रागः. 2 प्रफुल्लता, बाहुल्यं, समृद्धि, *f.* -*a.* सतेजस्क, प्रौढ, तेजस्विन्. 2 समृद्ध, धनसंपन्न. 3 मुक्तहस्त, अतिव्ययपर. -ed, *a.* अरुणित, रक्त, लोहित. 2 उद्धत, दृप्त, दर्पाध्मात, उत्सिक्त, गर्वित, सावलेप.

Fluster, *v. t.* पानादिना मद् c. or मुह् c. -*s.* चित्तभ्रमः; उन्मादः, मोहः, व्याकुलता.

Flute, *s.* वेणुः, मुरली, वंशः. -*v. i.* 'Blow a f.' (वेणुं) मुखमारुतेन पूर् 10 or वद् c., ध्मा 1 P; 'f.-player' वैणविकः, वेणुध्माः, वांशिकः.

Flutter, -*v. i.* पक्षौ वि-धू 5, 9 U, 6 P or आस्फल् c. or उत्क्षिप् 6 P or विचल् c. 2 इतस्ततः चल् 1 P or धाव् 1 P or प्र-सृ 1 P. 3 कंप् 1 A, स्फुर् 6 P, उद्वस् 2 P, स्पंद् 1 A, क्षुभ् 4 P. -*v. t.* संक्षुभ् c., आकुलीकृ 8 U, स्पंद् c., कंप् c., स्फुर् c. -*s.* विधुवनं, आस्फालनं, उत्क्षेपणं. 2 विकंपः, स्फुरणं, स्पंदनं, उद्वसनं. 3 सं-,क्षोभः, संभ्रमः, सं-आ-वेगः, चित्रवेगः- भ्रमः. -ing, *s.* पक्षास्फालनं, पक्षचालनं. -*a.* विचल, कंपमान; 'f. in the breeze' अनिलोद्धत, पवनाक्षिप्त, पवनाधूत.

Fluvial, *a* नदीसंबंधिन्.

Flux, *s.* (Fluxion) प्रवाहः, प्र-,स्रवः, क्षरणं, गलनं, स्पंदनं. -*v. t.* वि-द्र c., वि-ली c. -ible, *a.* द्राव्य, गलनीय.

Fly, *s.* मक्षिका, वर्वणा, नीला; 'f.-flap' अवचूलकः, रोमगुच्छः, 'f. leaf' मलपृष्ठं. -*v. i.* उड्-,डी 1, 4 A, उत्-पत् 1 P, खे विसृप् 1 P, आकाशेन या 2 P or गम् 1 P. 2 अप-या 2 P, वि-प्र-द्रु 1 P, पलाय् 1 A; *See* **Flee.** 3 त्वरितं-शीघ्रं गम् or चल् 1 P or विसृप् or अतिक्रम् 1 U, 4 P. -*v. t.* त्यज् 1 P, परिह् 1 P, वृज् 10. 2 आकाशे निक्षिप् 6 P or विसृप् c. or विसृ c.; 'f. at' आ-अभि-पत्, आ-अभि-द्रु, आ-अभि-प्र-धाव् 1 P; 'let f.' मुच् 6 P, उत्पत् c., विसृज् 6 P. -ing, *s.* डयनं, विसर्पणं, उत्पतनं; 'f. up and down' डीनावडीनं. -*a.* खविसर्पिन्, आकाशगति, आकाशगामिन्, डयमान, नभोगति; f. bridge' चलसेतुः, जंगमसेतुः, -Flight, *s.* पलायनं, विद्रावः, अपयानं, अपक्रमः-मणं, अपगमः; 'to put to f.' विद्रु c.; 'put to f.' विद्रुत, विद्रावित, कांदिशीक. 2 (Of birds) डयनं, डीनं, उड्डयनं, उत्पतनं, उद्गमनं; 'downward f.' अवडीनं. 3 पक्षि-माला-श्रेणी. 4 मति-बुद्धि-विलासः; 'f. of steps' सोपानपंक्ति-श्रेणि-णी *f.*, सोपानपरंपरा; 'f. of an arrow' शरपातः. -y, *a.* चलबुद्धि, भ्रांत-लोल-मति; अस्थिर, लोल; *See* **Fickle.**

Foal, *s.* किशोरः, अश्वशावः-वकः, बालघोटकः, अंबरीषः.

Foam, *s.* फेनः-णः. 2 मंडः, उत्सेकः; 'snowy f.' हिमधवलं, फेनपटलं. -*v. i.* फेनायते-मंडायते (D.), फेनं उत्पद् c. or निर्गम् c. (गमयति), उत्सिच्-उत्पीड्-pass. -y, *a.* फेनिल, फेनल, फेनयुक्त, फेनिन्.

Fob, *s.* घटीपिधानं-कोशः. -*v. t.* **Cheat,** q. v.

Focus, *s.* केंद्रं. -*v. t.* एकत्रीकृ 8 U.

Fodder, *s.* घासः, यवसं, पशुभोजनं, तृणादि *n.*

Foe, *s.* शत्रुः, अरिः, रिपुः; *See* **Enemy.**

Foetus, *See* **Fetus.**

Fog, *s.* कुहेडिका, कूहा, धूमि(पि-लि)का, कुज्झटिका, कुज्झटि-टी *f.* -gy, *a.* कूहावृत, धूमल, सधूमिक, कूज्झटिकाच्छन्न, धूमिकावृतमय (यी *f.*).

Foible, *s.* छिद्रं, दोषः, अपराधः, न्यूनता, हीनता, वैकल्यं, अगुणः.

Foil, *v. t.* परा-भू 1 P, परा-जि 1 A; भंज् 7 P, व्या-प्रति-हन् 2 P, खंड् 10, परास् 4 U, मोघी-विफली-कृ 8 U. **2 Blunt,** q. v. **-***s.* भंगः; व्याघातः; पराभवः. **2** मिथ्याखड्गः, निर्धार खड्गः. **3** पत्रं; 'golden f.' स्वर्णपत्रं. **4** प्रभा-वर्धकं, कांति-शोभा-वर्धकं. **-ed,** *a.* (Of persons) भग्नोद्यम, खंडिताश, हताश, अकृतार्थ; *See* **Disappointed.** 2 (Of efforts &c.) भग्न, प्रतिहत, मोघीभूत, खंडित.

Foin, *s.* यष्टि-खड्ग-आघातः. **-***v. t.* यष्टिना प्रह 1 P or तड् 10.

Foist, *v. t.* कपटेन लिख् 6 P or निविश् c, मिथ्या क्लृप् c., कृत्रिम *a.* कृ 8 U.

Foistiness, *s.* पूतिगंधिता.

Fold, *v. t.* पुटी-गुणी-कृ 8 U, व्यावृत् c., संपीड् 10, पुटयति (D.); 'f. ed thrice' त्रिगुणीकृत; 'f. ing his hands together' हस्तौ समानीय (R. II. 64), अंजलिं बद्ध्वा, कृतांजलिः, सां(प्रां)जलिः. **2** संवृ 5 U, पि-धा 3 U, आ-वेष्ट् c, आच्छद् 10. **3 Embrace,** q. v.; 'f. ing her in his arms' भुजाभ्यां तामापीड्य. **4** व्रजे निरुध् 7 U or निविश् c. **-***s.* पुटः-टं, भंगः, व्यावृत्ति *f.* व्यावर्तनं; चूणः, वस्त्रभंगः-पुटः, ऊर्मि *f.* **2** व्रजः, अवरोधः, शाला, गोष्ठं; 'cattle-f.' गोव्रजः; 'sheep-f.' मेषगोष्ठः -गोस्थानं, व्रजाजिरं. **3** (In comp.) ex. by गुण; 'eight-f.' अष्टगुण; 'f. ing doors' द्विपक्षद्वारं.

Foliage, *s.* पल्लवः-वं, किसलयः-यं, पर्णं, दलं, पत्रं (gen. used in pl.); पल्लवगुच्छः-चयः.

Foliate, *a.* पर्णावृत, सदल.

Folio, *s.* पुस्तकपत्रं, पृथु-विशाल-पत्रं.

Folk, *s.* जनः, जनसमूहः, जनता, लोकः; 'old f.' वृद्धजनः, वृद्धाः.

Follow, *v. t.* अनु-गम्-व्रज्-सृ 1 P, अनुबंध् 9 P, अनु-इ-या 2 P, अनुचर् 1 P, अनुक्रम् 1 U, 4 P. **3** सेव् 1 A, अनुष्ठा 1 P, आ-स्था 1 A; अनुवृत् 1 A, आश्रि 1 U, पुरस्कृ 8 U, अनुवि-धा 3 U, अनुरुध् 4 A, अनुसृ; 'f. (in) the footsteps of the great' महतां पदमनुविधेयं; 'f. ing the path' पदवीं प्रतिपद्य; 'f. ing a middle course' पुरस्कृतमध्यमक्रमः (R. VIII. 9); 'one misfortune f. s another' दुःखं दुःखानुबंधि (V. 4), विपद्विपदमनुबध्नाति (Ka. 73.) **3** उपास् 2 A, भज् 1 U, आश्रि, परिचर्; श्रु desid, (शुश्रूषते). **-***v. i.* उत्पद् 4 A, प्राप्-आपद्-सिध्-अनुमा-pass.; परिच्छिन्नस्तावज्जीव इति प्रामोति (S. B. 651) it f. s' therefore &c.'; 'what f. ed is understood' परस्तादवगम्यते (S. 1); (in conversations) ततस्ततः; 'what f. ed next'; 'as f. s' तद्यथा, तद्यथानुश्रूयते; or merely एवं, इति, उक्तप्रकारेण, इत्थं. **-er,** *s.* अनुयायिन्-गामिन्-वर्तिन्-सारिन् *m.* **2** परिजनः, सेवकः, अनु-उप-जीविन् *m.*, अनुगः, अनुचरः, अनुयातृकः, अनुगतिकः, परिवारः, सहचरः, सहायः. **3** आश्रितः, भक्तः, अनुषंगिन् *m.* **-ing,** *a.* इदं-एतद् *pron. a.*; 'the f. story' एषा-इयं-कथा; पश्चात् कीर्त्यमान, अनुग, अनुयायिन्. **-***s.* अनुसरणं-यानं-गमनं-वृत्ति *f.*-रोधः-वर्तनं.

Folly, *s.* *See* under **Fool.**

Foment, *v. t.* (उष्णोदकादिना) सं-सिच् 6 P, लिप् 6 P, अंज् 7 P, दिह् 2 U; स्विद् c. **2** उद्दीप् c., प्र-सं-वृध् c., उत्तिज् c., प्रोत्सह् c., उत्तप् c., प्रकुप् c., प्रवृत् c.; 'f. disputes' उप-जप् 1 P, भेद वृध् c., भेद-बीजं वप् 1 P. **-ation,** *s.* प्र-,स्वेदनं, घर्मानुलेपनं, द्रवस्वेदः. **2** उद्दीपनं, संवर्धनं, उत्तेजनं, प्रवर्तनं. **-er,** *s.* उपजापकः, भेदकरः.

Fond, *a.* वत्सल, अनुरागवत्, सानुराग, अनुरक्त, प्रणयिन्, अनुरागिन्. **2** सेविन्, अभिलाषिन्, आसक्त, रक्त, रत, पर, तत्पर, gen. in comp. **3** मूढ, मुग्ध, अत्यनुरक्त; 'f. of' ex. by शील, लालस, काम, प्रिय, in comp.; oft. by ईह् 1 A, कांक्ष् 1 U, अभिलष् 1, 4 P, भज् 1 U, सेव्-रुच् 1 A; 'f. of sport' क्रीडा-प्रिय; 'f. of chase' मृगयाशील; 'f. of change' अवस्थांतरमीहमान; 'f. of drinking' पानासक्त, पानव्यसनिन्. **-ly,** *adv.* सानुरागं, सप्रेम-मं; अतिस्नेहेन, अति-वात्सल्येन. **-ness,** *s.* अनुरागः, आसक्ति *f.*, रति *f.*, प्रीति *f.*, प्रणयः, स्नेहः; 'ingenious f. for the mate' कांतानुवृत्तिचातुर्यं; प्रेमन् *m.*, *n.*, वात्सल्यं; अभिरुचि *f.*, कामः, इच्छा, ईहा.

Fondle, *v. t.* उप-लल् 10, अंके-पा c. (पालयति), क्रोडीकृ 8 U, आलिंग् 1 P, परिष्वंज् 1 A, आ-सं-पीड् 10; 'f. ed too much' दुर्ललित. **-ing,** *s.* उप-,लालनं, आलिंगनं, भुजापीडनं, परिष्वंगः. **2** प्रेम-स्नेह-पात्रं-भाजनं, स्नेहभूमि *f.*

Food, *s.* अन्नं, आहारः, भोजनं, भोज्यं, भक्ष्यं, खाद्यं, खादनं, भक्षणं, अभ्यवहार्यं; भक्तं, विघसः, ग्रासः, अशनं, अंधस् *n.*; cooked f.' ओदनः-नं; 'f. and raiment' ग्रासाच्छादनं, अन्नवस्त्रं; 'forbidden f.' अभक्ष्य.

Fool, *s.* मूर्खः, मूढः, निर्बुद्धिः, अज्ञः, जडः, मंदः, अबुधः, अप्राज्ञः, प्रज्ञाहीनः, स्थूल-जड-धीः, अल्प-धीः-मतिः, मंद-धीः-मतिः, अनात्मज्ञ., वर्वरः; 'make a f. of' उपहासास्पदं कृ 8 U, विडंब् 10, (एवं प्रार्थयिता विडंब्यते S. 2). **-***v. t.* मुह् c., वि-प्र-लुभ् c., वंच् 10; *See* **Cheat;** 'f.-hardy' अतिसाहसिक, व्यामूढ, अविमृश्यकारिन्, अविमृश्य प्रगल्भ, प्रमत्तवीर, प्रमत्त. **-ery,** *s.* प्रहसनं,

विडंबना. 2 बालिश्यं, मूर्खक्रिया, बालिशता, मूर्खता, व्यामोहः. -ish, *a.* मूर्ख, मूढ, बालिश, अनात्मज्ञ, दुर्मति, दुर्मेधस्, वैधेय, बालिशमति, निर्बुद्धि, जड, स्थूलधी, प्रज्ञा-बुद्धि-हीन; *See* (*s.*). 2 निरर्थक, अविमृश्यकृत-दत्त. -ishly, *adv.* मूढतया, अज्ञानेन, मूर्खवत्, मूढवत् मौर्ख्येण. -ishness, -Folly, *s.* मौर्ख्यं, जाड्यं, मोहः, मंदमतिता, मूर्खता, मूढता, बालिश्यं, बालिशता, दुर्बुद्धिता, अज्ञानं, निर्बुद्धित्वं, ज्ञानाभावः, अनात्मज्ञत्वं.

Foot, *s.* पादः, पदं, चरणः-णं, अंघ्रिः. 2 तलं, अधोभागः, मूलं; उपस्थः. 3 (In metre) चरणः, पदं. 4 पत्ति-पदाति-समूहः-गणः. -*v. t.* पादेन ग्रह् 1 P or तड् 10 or आहन् 2 U; 'f. of a mountain' उपत्यका, पादः; 'set one's f. in' पदं कृ 8 U (lit. and fig.); आश्रमे पदं करिष्यासि (S. 4), कुतूहलेन मृगाशया हृदि पदं कृतं (Ka. 133); 'walk on f.' पद्भ्यां चर्-व्रज् 1 P, पादचारी भू; 'walking on f.' पादगः, पादचारः; पदातिः; 'water for the feet' पाद्यं; पादोदकं; 'set on f.' प्रवृत् c., उपक्रम् 1 A; प्रारभ् 1 A; 'f.-board' चरणफलकः, 'f.-boy' चेटः, भृत्यः, बालसेवकः, युवप्रेष्यः; 'f. bridge' संक्रमः, संक्रमसेतुः; 'f.-fall' चरणपातः, पादन्यासः, स्खलनं; 'f.-fight' पदातिपादग-युद्धं; 'f.-licker' पीठमर्दः, चरणसेवक, 'f.-man' चेटः, सेवकः, प्रेष्यः, परिचरः, किंकरः, 'f.-mark-print' पाद-पद-चिह्नं, पदपंक्ति *f.*, पदवी, पद्धति *f.*; पादमुद्रा; f.-pace' पादन्यासः, चरणक्रमः-पातः; 'f-path' संसरणं, चरणवीथि *f.*, पथिकमार्गः, पद्या, 'f.-soldier' पदातिः, पत्तिः, पादातिः तिकः, प(पा)दातः, पादचारः, प(पा)दगः, पदाजिः, पद्गः, पदिकः; 'f.-step' पादन्यासः, पद-चरण-निक्षेपः-पातः, पदं, पदपंक्ति *f.* (f.-print); पद्धतिः, मार्गः, वर्त्मन् *n.*, पदवि-वी *f.*, लक्षणं; 'f.-stool' पाद-पीठं, चरणपीठं, पादासनं. -ing, *s.* पदं, स्थानं, भूमि *f.*, स्थलं, आस्पदं, पदवि-वी, सरणि *f.* 2 वास्तु *m.*, *n.*, मूल, उपष्टंभः. 3 आश्रयः, अवलंबनं, आधारः. 4 स्थिति *f.*, वृत्ति *f.*, अवस्था, भावः, दशा; 'f. of equality' समता, तुल्यभावः. -less, *a.* पादहीन, अचरण.

Fop, *s.* दर्शनीयमानिन् *m.*, वेषाभिमानिन् *m.*, दंभिन् *m.*, सुवेशमानिन् *m.* छेकः, रूपगर्वितः. -pish, *a.* दंभिन्.

For, *prep.* (On account of) ex. by instr. or abl.; अर्थे-र्थं, हेतुना, हेतोः, कृते, कारणात्, निमित्तात्, निमित्तं, in comp.; 'for his deliverance' मोक्षनिमित्तं, मुक्तिहेतोः, &c. 2 (Purpose) by dat. or by अर्थे-अर्थं in comp. 3 (For the sake of) अर्थं, कृते (with gen.) or by dat. 4 (In exchange for) प्रति, स्थाने, विनिमयेन; तिलेभ्यः प्रतियच्छति माषान्, or तिलविनिमयेन &c. 5 (Considering) अपेक्ष्य, प्रतीक्ष्य, आलोच्य, इति कृत्वा, अपेक्षया in comp. 6 (Towards) प्रति, उद्दिश्य, (with acc.); संमुखं, अभिमुखं, in comp. 7 (Regarding) तावत्, उद्दिश्य; कृते; 'f. myself, rest secure' मद्विषये तावद्वीतचिंतो भव, मामुद्दिश्य न चिंता कार्या. 8 (Showing price) by instr.; त्रिरूपकेण क्रीतः 'bought f. 3 Rs.' 9 (Duration) by acc.; 'for 10 days' दशादिवसं; 'f. how many years' कियंति वर्षाणि; oft. by यावत् or पर्यंतं, आ with abl.; 'f. life' यावज्जीवं, आजीवितांतात्. 10 (on the side of) पक्षे; 'they are f. war' विग्रहमनुमोदंते, विग्रहमुपदिशंति. 11 (As if) वत् or इव. 12 (According to) यथा, अनुरूपं, अनुसारेण, in comp.; 'f. all' ex. by अनादृत्य (with acc.) or loc. abs. 'f. all his wealth' विद्यमानेपि महाकोशे, महाकोशमनादृत्य; 'f. a long time' चिरं, चिरकालं, चिराय; 'out of love f. me' मदृतप्रीत्या; 'f. the most part' भूयिष्ठ in comp., प्रायः, प्रायेण; 'f. once' सकृदेव. -*conj.* हि (not at beginning of assertions); यतः, यस्मात्कारणात्, यत्, यस्मात्, इति हेतोः, अनेन हेतुना.

Forage, *s.* यवसं, घासः, तृणादि. 2 पाथेयं, भोजनसंभारः, खाद्यसामग्री. 3 खाद्यान्वेषणं, खाद्यार्थं परिभ्रमणं; प्रसरणं. -*v. i.* बलात् खाद्यद्रव्यं आ-हृ 1 P, भोजनार्थं परिभ्रम् 1, 4 P. -ing, *s.* भोजनान्वेषणार्थं परिभ्रमणं-प्रसरणं.

Foray, *s.* उपद्रवः, अवस्कंदः, विप्लवः.

Forbear, *v.* विरम् 1 P; निवृत् 1 A, (with abl.), परिहृ 1 P, वृज् 10, त्यज् 1 P. 2 विलंब् 1 A. 3 सह् 1 A, क्षम् 1 A, मृष् 4 P, 10, तिज् desid. (तितिक्षते). 4 सं-नि-यम् 1 P, निग्रह् 9 P, आ-वृ 5 U; निरुध् 7 U; 'he could not f. expressing his joy, or laughter' संतोषं-हासं-निग्रहीतुं न पारयामास. -ance, *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहनं, सहिष्णुता, मर्षणं, सहनशीलता. 2 निवृत्ति *f.*, विरामः, विरति *f.*, वर्जनं, त्यागः, परिहारः. 3 संयमः, दमः, यमः, निग्रहः. -ing, *s.* तितिक्षु, सहिष्णु, सहनशील, क्षमिन्, सहन, क्षंतृ, क्षमितृ.

Forbid, *v. t.* प्रति-नि षिध् 1 P or c., प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, निरा-अपा-कृ 8 U. 2 निरुध् 7 U, नि-वृ c. or वार् 10; 'God f.' शांतं पापं or (इति) शांतं, प्रतिहतं अमंगलं. -ding, -dance, *s.* नि-प्रतिषेधः, प्रत्याख्यानं, प्रत्यादेशः [illegible] वारणं, निरोधः. -ding, *a.* घृणावह, [illegible], अनिष्ट.

Force, *s.* बलं, शक्ति *f.*, सामर्थ्यं (fig. also); 'the f. of this word' अस्य शब्दस्य शक्तिः &c. **2** प्रभावः; वीर्यं, शौर्यं, वि-परा-क्रमः, ऊर्जस् *n.*, प्रतापः, प्राबल्यं, गौरवं. **3** बलात्कारः, प्रसभः, साहसं, बलं, प्रमाथः, आवेशः; f. of passion' रागावेशः. **4** आवेगः, आपातः, अभिभवः. **5** सिद्धि *f.*, फलं, निष्पत्ति *f.*; 'put or bring into f.' प्रवृत् c. **6** सैन्यं, बलं, सेना, अनीकः-कं, पृतना, अनीकिनी, चमूः, वाहिनी, ध्वजिनी, चक्रं, वरूथिनी. **-***v. t.* Ex. by causal of verbs, with बलात् or बलेन, or प्रवृत् c.; *See* **Compel;** 'he was f. ed to admit that &c.' इति अभ्युपगमनं अवश्यकं मेन. **2** प्रेर् c., प्रणुद् 6 P, समाकृष् 1 P, प्रचुद् 10, प्रोत्सह् c., **3** धृष् c., बलाद् अभिगम् 1 P, बलात्कारं कृ 8 U; 'f. an entrance' बलेन प्रविश् 6 P; 'f. a town' पुरं लंघ् 1 A, 10 or भंज् 7 P or बलात् प्रविश्. **-ed,** *a.* यत्नकृत, यत्नपूर्व, असहज, कृत्रिम, क्लिष्ट (as meaning). **-Forcible,** *a.* प्रबल, समर्थ, क्षम, शक्तिमत्, बलवत्, सप्रभाव; अमोघ, अनिष्फल, प्रभविष्णु. **2** गौरवेण उक्त or प्रतिपादित, दृढ, तीक्ष्ण. **3** बलेन कृत, बलात्कृत, साहसिक (की *f.*), बल in comp.; 'f. consent' बलानुमोदनं. **-Forcibly,** *adv.* (by force) बलेन, बलात्, प्रसभं, प्रसह्य, बलात्कारेण, हठात्. **2** सगौरवं, दृढतया.

Force-meat, *s.* मिष्टान्नं, उपस्करः, व्यंजनं.

Forceps, *s.* सदंशकं-शिका.

Ford, *s.* तीर्थं, तरणस्थानं-स्थलं, घट्टः. **-***v. t.* पद्भ्यां तृ 1 P or पारं गम् 1 P. **-able,** *a.* अल्पजल, सुतर, सुप्रतर; 'the rivers having become f.' सुखोत्तारतामापन्नास्वापगासु (Ka. 326).

Fore, *a.* अग्र, पूर्व, अग्रगामिन्; gen. ex. by अग्र, पूर्व in comp.; 'f.-fathers' पूर्वजाः, पितरः, पूर्वे-पूर्वाः, वृद्धाः; 'f.-finger' प्रदेशिनी, तर्जनी; 'f.-foot' अग्रपादः; 'f.-head' ललाटं, भालं, ललाट-भाल-पट्टं, अलि-(ली)कं, गोधिः; 'f.-land' अंतरीपः-पं, उदग्रभूः-भूमिः; 'fore leg' *s.* पूर्व-अग्र-पादः; 'f.-lock' ललाटकेशः-रुहः; 'f.-man' अध्यक्षः, अधिष्ठातृ *m.*, अधीशः; 'f.-mentioned-named-said-spoken' प्रागुक्त, पूर्वोक्त, पूर्वकथित; 'f. mast' अग्रकूपकः; f.-most' प्रधान, उत्कृष्ट, परम; 'f.-noon' पूर्वाह्णः,-कालः; 'f.-part' अग्रभागः, पूर्व-आदि-प्रथम-भागः; 'f.-rank' अग्र-प्रधान-पदं; 'f.-tooth' अग्रदंतः, राजदंतः, 'f.-ward' सेनामुखं, रणशिरस् *n.*; 'foreward', *s.* *See* **Preface.**

Forearm, *s.* प्रकोष्ठः, अग्रभुजः-हस्तः-बाहुः. **-***v. t.* पूर्वं सन्नह् 4 P or c. or सज्जीकृ 8 U.

Forebode, *v. t.* आ-,सूच् 10, प्राक् आ-विद् c., पूर्वं कथ् 10; (अनिष्टं) पूर्वं ज्ञा 9 U or अव-गम् 1 P, अनु-मा 3 A; *See* **Bode;** 'the tawny lightning f. s a hurricane' वाताय कपिला विद्युत् (S. K.). **-er,** *s.* अनिष्टावेदकः, अनिष्टसूचकः. **-ing,** *s.* अनिष्टसूचनं-ज्ञानं-दर्शनं.

Forecast, *v. t.* पूर्वं-अग्रे चिंत् 10 or निरूप् 10 or निर्दिश् 6 P or अनुसं-धा 3 U. **-***s.* पूर्वकल्पना-विवेकः, अग्रनिरूपणं, पूर्वचिंतनं, दीर्घदृष्टि *f.*

Foreclose, *v. t.* प्रतिबंध् 9 P, प्रति-नि-षिध् 1 P. **-ure,** *s.* प्रतिबंधः, प्रतिषेधः.

Fore-determine, *v. t.* अग्रे-पूर्वं-निर्णी 1 P or निश्चि 5 U.

Foredoom, *v. t.* पूर्वं निर्दिश् 6 P or वि-चर् c.

Fore-fend, *See* **Forbid.**

Forego, *v. t.* त्यज् 1 P, हा 3 P, उत्-वि-सृज् 6 P; 'I shall f. my name' स्वनामत्यागं करोमि (P. 1); 'a foregone conclusion' पूर्वनिर्णितः-प्रागेवसिद्धः-सिद्धांतः.

Foreign, *a.* विदेशीय, वैदेशिक-पारदेशिक (की *f.*), विदेशज, विदेशिन्, अन्य-भिन्न-देशज-देशीय-देशोद्भव, पारदेश्य, विदेशादागत, बहिर्देशोद्भव; 'a f. country' विदेशः, परदेशः, देशांतरं. 2 बाह्य, बहिर्भव, अप्रस्तुत, अप्रकृत; 'this is f. to our present inquiry' अप्रकृतमेतदस्मिन् विषये. **-er,** *s.* वैदेशिकः, पारदेशिकः, अन्यदेशीयः-देशजः; *See* (*a.*). **-ness,** *s.* बाह्यता, भिन्नता; अप्रकृतता, असंबंधः.

Fore-imagine, *v. t.* पूर्वं-अग्रे-चिंत् 10 or मन् 4 A.

Fore-judge, *v. t.* पूर्वं अवेक्ष् 1 A, विचर् c. or निर्णी 1 P.

Fore-know, *v. t.* पूर्वं ज्ञा 9 U or बुध् 1 P, or विद् 2 P; **Know,** q. v.; प्रदृश् 1 P, अग्रे निरूप् 10. **-ledge,** *s.* अग्र-पूर्व-ज्ञानं, भविष्यज्ज्ञानं, अग्रनिरूपणं, अग्र-पूर्व-दृष्टि *f.*

Forensic, *a.* व्यावहारिक (की *f.*), व्यवहारानुबद्ध.

Fore ordain, *v. t.* अग्रे-पूर्वं-निर्दिश् 6 P or नियुज् 7 A, 10 or वि-धा 3 U.

Forerun, *v. i.* पूर्वं-पुरः-अग्रे-सृ or धाव् or गम् 1 P or वृत् 1 A or या-इ 2 P. **-ner,** *s.* अग्रेसरः, पुरो-गः-गामिन् *m*, अग्र-गः-गामिन् *m.*, अग्रवर्तिन् *m.*, अग्रगतः, पूर्वपुरुषः.

Fore-say,-speak, प्राक्-पूर्वं-वद् 1 P, or कथ् 10.

Foresee, *v. t.* पूर्वं-दृश् 1 P or ज्ञा 9 U; भावि-अनागतं-दृश् or अवेक्ष् 1 A, अग्रे निरूप् 10; gen. ex. by भाविन्; 'I f. my ruin' जानामि भाविनं नाशं. **-Foresight,** *s.* दूरदर्शित्वं-ता, दूर-दीर्घ-दृष्टि *f.*, अग्र-निरूपणं, दूरदर्शनं.

Foreshow, *See* **Forebode.**

Forest, *s.* वनं, अरण्यं, काननं, विपिनं, अटवि-वी *f.*, गहनं, कांतारः-रं; 'a large f.' अरण्यानी; 'growiug in f.' वन्य, आरण्य,-क,वनोद्भव, अरण्यज-जात, वन or अरण्य in comp. **-er,** *s.* वनेचरः, वनवासिन् *m.*, आरण्यकः, आटविकः, वनस्थः, वनचारिन् *m.*, वनचरः- वर्तिन् *m.*, वनौकस् *m.*, अरण्यसद् *m.*, **2** अरण्यरक्षकः, वनपालकः.

Forestall, *v. t.* पूर्वं ग्रह् 9 P or आदा 3 A, पूर्वग्रहणेन मोघीकृ 8 U; *See* **Anticipate.** **2** पूर्वं क्री 9 U.

Foretaste, *v. t.* पूर्वं अनुभू 1 P or आस्वाद् 1 A or भुज् 7 A. **-***s.* पूर्वानुभवः, पूर्व-अग्र-ज्ञानं, पूर्वास्वादः, पूर्व-अग्र-भुक्ति *f.*

Foretell, *v. t.* पूर्वं कथ् 10, भावि-भविष्यद् वद् 1 P or वच् 2 P; प्रदृश् c.,अनागतं निविद् c.; *See* **Predict.** **-er,** *s.* भविष्यद्वादिन् *m.*, भाविदर्शकः, अनागतनिवेदकः, दैवज्ञः.

Forethink, *v. t.* पूर्वं चिंत् 10 or विमृश् 6 P. **-Forethought,** *s.* अग्र-पूर्व-चिंता, पूर्वविमर्शः-विवेकः, प्रसमीक्षा-क्षणं, दूर-दीर्घ-दृष्टि *f.*, पूर्वविचारणं-णा.

Foretoken, *v. t.* पूर्वं सूच् 10. **-***s.* पूर्वलक्षणं-चिह्नं-लिंगं, भाविलक्षणं.

Forewarn, *v. t.* पूर्वं सूच् 10 or प्रबुध् c., अग्रे उपादिश् 6 P or ज्ञा c. (ज्ञापयति); 'to be f. ed is to be fore-armed' पूर्वप्रबोधनं पूर्वसन्नाहतुल्यं. **-ing,** *s.* पूर्वप्रबोधः-धनं, पूर्वोपदेशः.

Forfeit, *v. t.* दंड् pass., भ्रंश् 1 A, 4 P,च्यु 1 A, परि-हा pass., (with abl.); 'f. s his kingdom' राज्यात्परिभ्रंशते; 'f. s his right' स्वत्वं तस्मान्निवर्तते; oft. ex. by हीन-हृत in comp.; 'you will f. all your wealth' हृतसर्वस्वो भवेः, सर्वस्वं दंड्येथाः. **-***s.* दंडः, धन-अर्थ-दंडः. **-ed,** *a.* दंडित, भ्रष्ट, च्युत, हीन; 'who has f. ed his right' स्वत्वभ्रष्टः, च्युताधिकारः; हृतसर्वस्वः, &c. **-ure,** *s.* हानि *f.*, च्युति *f.*, भ्रंशः, अपहारः, अपवर्तनं, नाशः, दंडदानं.

Forge, *v. t.* घट् c. (घटयति), रच् 10, निर्मा 3 A, वि-धा 3 U, कल्प् c. **2** मिथ्या-कूटेन-कृ 8 U, कपटकूट in comp.; 'f. s a letter' कूट-कपट-लेखं प्रयुंक्ते; *See* **Counterfeit.** **-***s.* निर्माणस्थानं; अग्निकुंडं, उध्मानं. **-er,** *s.* कूट-कारः-कृत् *m.*, कपट-लेखकारिन् *m.* **-ry,** *s.* कूट-कपट-लेख-करणं, कूट-कपट-करणं, कूटरचना.**-ing,** *s.* घटना, घटनं, रचना-नं; कूटनिर्माण, &c.

Forget, *v. t.* विस्मृ 1 P, नौ स्मृ; स्मृतेः-स्मरणाद्भ्रंश् 1 A, 4 P or अप-इ 2 P, (of what is forgotten). **-ful,** *a.* विस्मरणशील, लुप्त-नष्ट-स्मृति; अनवहित, प्रमत्त. **-fulness,** *s.* विस्मृति *f.*, विस्मरणं, स्मृति-लोपः, स्मृतिनाशः-भ्रंशः-हानि *f.*, विस्मरणशीलता, अनवधानं.

Forgive, *v. t.* क्षम् 1 A, (with acc. of person also), मृष् 4 P, 10, सह् 1 A, तिज् desid. (तितिक्षते). (with acc. of fault). **2** मुच् 6 P, अव-सृज् 6 P, त्यज् 1 P, (as a debt). **-ness,** *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहिष्णुता, मर्षणं; 'f. of sin' पाप-दोष-मुक्ति *f.* -मार्जनं. **-ing,** *a.* क्षमिन्, सहिष्णु, क्षमावत्, क्षमाशील, तितिक्षु, क्षमायुक्त, क्षंतृ, क्षमितृ.

Fork, *s.* कंटकः, शूलं. **-***v. i.* विभिद् pass., द्विशिखीभू 1 P, द्विधा भिद् pass. **-ed,-y,** *a.* द्विशिख, द्व्यग्र; 'having a f. tongue' द्विजिह्व; 'f. lightning' विद्युल्लता.

Forlorn, *a.* त्यक्त, दीन, विधुर, अनाथ, अनाश्रय, गति-शरण-हीन, अ-निः-शरण, अ-निः-सहाय, निरवलंब, निराधार, निराश्रय, अगतिक.

Form, *s.* रूपं, आकारः, आकृति *f.*; संस्थानं; वपुस् *n.*, मूर्ति *f.*, (**Body,** q. v.) **2** तंत्रं, मार्गः, पद्धति *f.*, प्रकारः, रीति *f.*, विधा-धः, विधिः, भेदः; 'f. of government' राज्य-तंत्रं-पद्धतिः. **3** विधिः; नियमः, स्थिति *f.*, व्यवस्था, आचारः, क्रमः, मर्यादा, व्यवहारः, संस्कारः; 'in due f.' यथाविधि, विध्यनुसारेण, विधिवत्. **4** रचना-नं, विन्यासः. **5** सहाध्यायिवर्गः, छात्रपंक्ति *f.*, गणः. **6** दीर्घ-पीठं-आसनं. **-***v. t.* निर्मा 2 P, 3 A, रच् 10, कृ 8 U, वि-धा 3 U, उत्पद् c., घट् c (घटयति), कल्प् c.; 'f. plans' उपायान् चिंत् 10 or मनसा कल्प् c.; 'the cords that f. ed the net' याभिः रज्जुभिर्जालं निर्मितं. **-al,** *a.* अत्याचारसेविन्, नियमनिष्ठ, अत्यादरयुक्त, सभ्याचारविशिष्ट. **2** नैयमिक-वैधिक (की *f.*), नियमानुसारिन्, व्यवहारानुरूप, आचारानुगत, आचारानुसारिन्, विध्यनुरूप; आचार in comp.; 'just perform the f. salutation' आचारं तावत्प्रतिपद्यस्व. **3** यथार्थ, विशिष्ट. **-alist,** *s.* नियममात्रसेविन् *m.* **-ality,** *s.* आचारः, उपचारः, यथाविधि वर्तनं; अत्यादरः; 'a title of f.' उपचार-पदं; 'enough of f.' अलमत्यादरेण. **-ally,** *adv.* सोपचारं, अत्यादरेण, सभ्याचारपूर्वं, अत्यादरपूर्वं. **2** यथाविधि, विधिवत्, नियमानुसारेण. **-ation,** *s.* घटना-नं, निर्माणं, विधानं, रचना, कल्पना-नं, उत्पादनं, उद्भवः; सृष्टि *f.* **-ed,** *a.* घटित, निर्मित, कृत, रचित, कल्पित, मय in comp.; 'f. of gold' हेम-घटित, सुवर्णमय, &c.; *See* **Composed.** **2** रूप-आकार-आकृति in comp.; 'f. like a conch' शंखाकृति; 'well-f.' सुरूप. **-less,** *a.* निराकार, अरूप.

Former, *a.* पूर्व, प्रथम, अग्रिम, आद्य, आदिम, पूर्वकालीन, प्राक्कालीन, प्राचीन, गतकालीन, पुराण, पुरातन. **-ly,** *adv.* प्राक्, प्राक्काले, भूत-गत-काले, पुरा, पूर्वं, पुराकल्पे, पूर्वकाले; 'as f.' यथापूर्वं, पूर्ववत्; 'f. stated' प्रागुक्त, पूर्वोक्त; 'f. heard' श्रुतपूर्व.

Formic, *a.* पिपीलिका-पुत्तिका-संबंधिन्.

Formidable, *a.* दारुण, भयावह, भीषण, भयानक, भयजनक, भयप्रद, भैरव (वी *f.*), घोर, उग्र, प्रतिभय, रौद्र (द्री *f.*). **2** (Great) प्रबल, महत्, अतिघोर. **-ness,** *a.* भयानकत्वं, भीषणता, भैरवं.

Formula, *s.* सूत्रं, विधिः, नियमः, व्यवस्था, स्थिति *f.* **-Formulate,** *v. t.* विधि-सूत्ररूपेण रच् 10, or व्यव-स्था c. (स्थापयति).

Fornicate, *v. i.* व्यभि-चर् 1 P, वेश्यां सेव् 1 A or अभिगम् 1 P. **-ion,** *s.* व्यभिचारः, जारकर्मन् *n.*, वेश्यागमनं-सेवा, वेश्यासंभोगः. **-or,** *s.* व्यभिचारिन् *m.*, जारः. **-Fornicatress,** *s.* **Harlot,** q. v.

Forsake, *v. t.* त्यज् 1 P, हा 3 P, उत्-वि-अप-सृज् 6 P, उज्झ् 6 P, रह् 10 (रहयति). **-er,** *s.* त्यागिन् *m.*, त्यक्त *m.* **-ing,** *s.* त्यागः, उत्सर्गः.

Forsooth, *adv.* नूनं, नाम, किल, खलु, यत्सत्यं, सत्यमेव.

Forswear, *v. t.* सशपथं त्यज् 1 P or प्रत्या-ख्या 2 P, or अप-नि-ह्नु 2 A. **-***v. i.* मिथ्या-शप् 1 U, कूटं-मिथ्या-शप्. **-er,** *s.* असत्यशपथः, मिथ्याशपथकारिन् *m.*

Fort, Fortress, *s.* दुर्गं, कोटः, कोटि *f.*; 'governor of a f.' दुर्गाध्यक्षः, कोटिपालः.

Forte, *s.* विशिष्ट-श्रेष्ठ-गुणः, प्रधानगुणः.

Forth, *adv.* बहिः, अग्रे, पुरतः; with verbs, ex. by निर्, उत्, प्र pr. **2** प्रभृति, आरभ्य; 'from this time f.' अद्य-अतः-प्रभृति, अद्यारभ्य; 'f.-coming' आगामिन्, आसन्न, उपस्थित. **-Forthwith,** *adv.* सपदि, झटिति, द्रागेव, सद्यः, अचिरात्-रेण, आशु, अविलंबितं, तत्क्षणात्.

Fortify, *v. t.* दृढीकृ, स्थिरीकृ 8 U, द्रढयति (D.), सं-स्तंभ् 9 P or c. **2** सुगुप्त-सुरक्षित-*a.* कृ, परिखया आ-परि-वृ 5U or परिवेष्ट् c. **-ication,** *s.* गुप्ति *f.*, परिखा, प्राचीरं, दुर्गं, कूटः, कोटः, प्राकारपरिखादि.

Fortitude, *s.* धैर्यं, सत्त्वं, धीरता, मनःस्थैर्यं. **2** वीर्यं, शौर्यं, विक्रमः, साहसं, पौरुषं.

Fortnight, *s.* पक्षः, मासार्धं, अर्धमासः.

Fortuity, *s.* दैवयोगः-घटना, दैवं, समापत्ति *f.* **-ous,** *a.* दैवायत्त, दैवाधीन, अचिंतित, अतर्कितोपनत, आकस्मिक (की *f.*). **-ously,** *adv.* **Accidentally,** q. v.

Fortune, *s.* दैवं, भाग्यं, भागधेयं, विधिः, अदृष्टं, भवितव्यता; *See* **Fate. 9** ऋद्धि *f.*, श्रीः, लक्ष्मीः, ऐश्वर्यं, संपद् *f.*, संपत्ति *f.*, धनं. **3** शुभं, कल्याणं, भद्रं, शिवं, सौभाग्यं, मंगलं, पुण्योदयः; 'bad f.' दुर्दैवं, दुर्-मंद-भाग्यं, दैवदुर्विपाकः; 'tell f.' शुभाशुभं कथ् 10 or चिंत् 10 or निरूप् 10 or आलोच् 10; 'f.-teller' दैवज्ञः; गणकः, कार्तांतिकः, दैवचिंतकः; 'a female f.-teller' विप्रश्निका, ईक्षणिका, दैवज्ञा; 'f.-telling' शुभाशुभदर्शनं. **-ate,** *a.* भाग्यवत्, महाभाग, सुभाग्य, सुभग, सौभाग्यवत्, दैवशालिन्, धन्य, पुण्यवत्, कृतिन्, श्रीमत्, पुण्यभाज्. **3** शुभ, कल्याण, शिव, मंगल, भद्र. **-ately,** *adv.* दैवात्, दैवभोगात्, दिष्ट्या, सौभाग्येन, भाग्य-दैव-वशात्.

Forty, *a.* चत्वारिंशत् *f.* **-Fortieth,** *a.* चत्वारिंश (शी *f.*)-शत्तम (मी *f.*).

Forward, *a.* अग्रिम, आदिम, अग्रस्थ, पुरोगामिन्. **2** अपूर्णकाल, आकालिक (की *f.*). **3** धृष्ट, प्रगल्भ, निर्लज्ज, प्रतिभानवत्, सप्रतिभ, अविनीत. **4** उद्यत, व्यग्र, उद्युक्त, प्रत्युत्पन्न, अविलंबित. **-***v. t.* सं-प्र-वृध् c., उपकृ 8 U, पुरस्कृ, प्र-वृत् c., समुद्युज् 10, साहाय्यं कृ, उन्नतिं नी 1 P, अनुग्रह् 9 P. **2** प्रेर् c., प्रचुद् 10, प्र-हि 5 P. **3** **Accelerate,** q. v. **-***adv.* (f. s) अग्रतः, पुरतः; पुरः, अग्रे, पुरस्तात्, सं-अभि-मुखं; 'this day f.' अद्य प्रभृति; 'to go backward and f.' गतागतं कृ; *See* **Forth. -ness,** *s.* उत्साहः, अविलंबः, उद्योगः. **2** प्रागल्भ्यं, निर्लज्जता, धार्ष्ट्यं, अतिप्रसंगः, अविनयः, प्रतिभानं.

Fosse, *s.* खातं, परिखा.

Fossick, *v. t.* लाभाय, अन्विष् 4 P.

Fossil, *a.* शिलाजात. **-***s.* धातुः; शिलाभवं, धातुद्रव्यं; उत्खातद्रव्यं. **-ist,** *s.* धातुविद्याज्ञः.

Foster, *v. t.* पुष् 1, 9 P; पा c. (पालयति), प्र-सं-वृध् c., भृ 3 U, लल् 10. **2** (Love, hatred, &c.) धृ 10, वह् 1 P, बंध् 9 P; 'f.-brother' धात्रेयः, धात्रीपुत्रः; 'f.-child' पोष्यपुत्रः (त्री *f.*), पराचितः; परिस्कं(ष्कं)दः, परिस्क(ष्क)न्नः; परजातः, परैधितः; 'f. father' पालकपितृ *m.*, प्रतिपालकः, धर्मतातः; 'f.-mothe' धात्री, उपमातृ *f.*, प्रतिपालिका; अंकपालिका, मातृका, धात्रेयी.

Foul, *a.* मलिन, समल, अशुचि, कलुष, मलदूषित, मलीमस, आविल, अशुद्ध, अपवित्र, अमेध्य, पंकिल. **2** कुत्सित, कश्मल, गर्ह्य, निंद्य, दुष्ट. **3** अवाच्य, अशिष्ट, अश्लील (language). **4** कूट, कपट, पाप, in comp.; 'f. means' कपटप्रबंधः; 'even by f. means' दुरितैरपि (R. VIII. 2); 'f. play' दुरितं, पापं; 'f. weather' दुर्दिनं; 'f. quality' रजोगुणः; 'f. smell' पूतिगंधः, दुर्गंधः; 'fall f. of' उपरि पत् 1 P, परस्परं आ-हन् 2 U or संघट्ट 1 A; 'f.-mouthed' दुर्मुख, वाग्दुष्ट, कटुवाच, मुखर, परिवादिन्. **-***v. t.* मलिनयति-कलुषयति-आ-

विलयति (D.); दुष् c. (दूषयति.) **-ly,** *adv.* अतिदुष्टं, घोरं, मलिनं. **-ness,** *s.* मालिन्यं, गर्ह्यता, &c.

Found, *v. t.* स्था c.(स्थापयति), प्रति-सं-अव-रुह् c. (रोपयति), निर्मा 3 A or c. (मापयति), बंध् 9 P, प्रवृत् c., आरभ् 1 A; मूल, निबंधन, निष्ठा, in comp.; 'attachment f. ed on love' प्रेममूला-भावनिबंधना-रतिः; 'f. ed on ignorance' अज्ञानज, अज्ञान-मूल-लक, अविद्याकल्पित. **-ation,** *s.* प्रतिष्ठापनं, संस्थापनं; निर्माणं. **2** वास्तु *m.*, *n.*, पोटः, ग्रहप्रतिष्ठा, गृहमूलं, भित्तिमूलं, वेश्मभूः. **3** (Fig.) मूलं, आधारः, उपष्टंभः. **-er,** *s.* संस्थापकः, प्रवर्तकः, आरंभकः, आदिकर्तृ *m.*, प्रतिष्ठापकः, कर्तृ *m.* प्रयोजकः. **-***v. i.* जलमज्जनेन नश् 4 P, जले मस्ज् 6 P. **-ling,** *s.* अपविद्धबालकः, उत्सृष्टापत्यं.

Foundery, *s.* संधानी, कुप्यशाला.

Fount, Fountain, *s.* निर्झरः, उत्सः, प्रस्रवणं, वारिप्रवाहः. **2** मूलं, योनि *f.*, प्रभवः, हेतुः, आदिहेतुः. **3** धारायंत्रं (artificial f.).

Four, *a.* चतुर्, चतुष्टय; 'f. times' चतुः; 'in f. ways' चतुर्धा; 'f.-cornered' चतुरस्र-श्र; 'f.-fold' चतुर्गुण; 'f.-footed' चतुष्पाद्, चतुष्पाद; 'f. score' अशीति *f.* **-Fourth,** *a.* चतुर्थ (र्थी *f.*), तुर्य, तुरीय. **-***s.* चतुर्थभागः, पादः, चतुर्थांशः; तुरीयः, तुर्यः, तुर्यांशः; 'a rupee and one f.' सपादरूपकः. **-ly,** *adv.* चतुर्थस्थाने. **-Fourteen,** *a.* चतुर्दशन्. **-th,** *a.* चतुर्दश (शी *f.*).

Fowl, *s.* खगः, पक्षिन् *m.*, शकुनः; *See* **Bird. 2** कुक्कुटः, ताम्रचूडः, चरणायुधः. **-***v. i.* पक्षिणो ग्रह् or बंध् 9 P or धृ 1 P. **-er,** *s.* शाकुनिकः, व्याधः. शकुनिलुब्धः, जालिकः, लुब्धकः, पक्षिग्राहकः, जीवांतकः. **-ing,** *s.* पक्षिग्रहणं-वधः-घातः.

Fox, *s.* शृगालः, कि(खि)खिः, खिंकिरः, भूरिमायः, गोमायुः; *See* **Jackal;** 'f.-hunt' शृगालानुसरणं; 'f.-like' विदग्ध, धूर्त, बहुमाय.

Fracas, *s* कलहः.

Fraction, *s.* भिन्नं, भागः, अपूर्णांकः, राशि-भागः. **-al,** *a.* अपूर्ण, भागिक (की *f.*), भागिन्.

Fractious, *a.* कलहकारिन्, शीघ्रकोप; वामशील.

Fracture, *s.* भंगः, भेदः, विदारणं, त्रोटनं, विभंगः, विभेदः. **-***v. t.* भंज् 7 P, भिद् 7 P, विदृ 10; *See* **Break.**

Fragile, *a.* भंगुर, भंगशील, भिदुर, भिदेलिम, सुखभेद्य, सुभंग; विनश्वर, क्षयिन्. **-ity,** *s.* भंगुरता, क्षयिता, भिदुरता

Fragment, *s.* खंडः-डं, शकलः-लं, भागः, अंशः, दलं, भिन्नं; 'in a thousand f. s' सहस्रधा. **-ary,** *a.* अपूर्ण, भागिन्, खंडयुक्त.

Fragrant, *a.* सुरभि, सुगंधि, सुवास, आमोद-परिमल-वत्, सुवासिक, सामोद, परिमलोद्गारिन्, गंधयुक्त, गंधवत्; तिक्त, कषाय. **-ly,** *adv.* सवासं, सामोदं, सगंधं. **-Fragrance,** *s.* आमोदः, परिमलः, सौरभं, सौरभ्यं; गंधः, वासः, सुवासः, सुगंधः.

Frail, *a.* भंगुर, नश्वर, ध्वंसिन्, अनित्य, अस्थायिन्, क्षयिन्, सद्यःपातिन्, क्षण-भंगुर-विध्वंसिन्. **-ness,-ty,** *s.* भंगुरता, नश्वरत्वं, क्षयिता, &c. **2** दोषः, स्खलितं, प्रमादः.

Frame, *v. t.* वि-,रच् 10, वि-धा 3 U, क्लृप् c., कृ 8 U, घट् c. (घटयति), संवि-धा, समा-धा, निर्मा 2 P, 3 A. **2** निबंध् 9 P. **3** सदृशीकृ; 'f. in the mind' मनसा चिंत् 10 or कल्प् c., चित्ते कृ. **-***s.* निर्माणं, रचनं-ना, घटनं-ना. **2** आधारः, उपष्टंभः; आवरणं, कोशः, आवेष्टनं. **3** शरीरं, देहः, गात्रं, वपुस् *n.*, कायः, अंगं; 'f. of body' देहबंधः; 'of a hardy f.' वज्रदेहिन्, सिंहसंहनन. **4** भावः, वृत्ति *f.*, स्थिति *f.*, दशा, अवस्था; 'joyous f. of mind' आनंदवृत्तिः. **5** आकारः, रूपं, आकृति *f.*, रीति *f.*, संस्थानं.

Franchise, *s.* पौरजनाधिकारः. **2** मुक्ति *f.*, मोचनं, स्वाधीनता. **-***v. t.* मुच् 6 P.

Frangible, *See* **Fragile.**

Frank, *a.* निष्कपट, सरल, ऋजुमति-बुद्धि, उदार, निर्व्याज, स्पष्ट-स्फुट-वादिन्, असंवृत, अवक्र, अमाय, निर्व्यलीक, दक्षिण, अगूढभाव; अकपट, अव्याज, अमायिन्; 'f.-hearted' विमलात्मन्, उदारधी; शुद्धांतःकरण. **-ly,** *adv.* निर्व्याजं, निष्कपटं, अमायया, सरलं. **-ness,** *s.* अमाया, ऋजुता, निष्कापट्यं, औदार्यं, दाक्षिण्यं, सारल्यं, अकापट्यं, &c.

Frank-incense, *s.* कुंदुरः-रुः, कुंदुः-दः, सुकुंदः, पालंकी.

Frantic, *a.* उन्मत्त, मदविक्षिप्त, व्यस्तचित्त, संरब्ध; 'f with rage' क्रोधोन्मत्त, कोपोन्मादिन्. **-ally,** *adv.* उन्मत्तवत्, सोन्मादं, ससंरंभं. **-ness,** *s.* उन्मादः, व्यामोहः, चित्तविप्लवः, उन्मत्तता, वातुलता, चित्त-विभ्रमः.

Frater, *s.* परिव्राज् *m.* यति *m.*, **2** बंधु *m.*, बांधवः.

Fraternal, *a.* भ्रात्रीय, भ्रातृसंनिभ, भ्रात्रनुरूप. **-ly,** *adv.* भ्रातृवत्, सोदरवत्.

Fraternity, *s.* भ्रातृत्वं, सौभ्रात्रं. **2** समाजः, संसर्गः, साहित्यं, बंधुता. **-Fraternize,** *v. i.* भ्रातृवत् संमिल् 6 P or संयुज् pass. or एकीभू or सन्निपत् 1 P.

Fratricide, *s.* भ्रातृघातकः, भ्रातृघातिन् *m.* **2** भ्रातृवधः-हत्या-घातः.

Fraud, *s.* कपटः-टं, छलं, कैतवं, माया, व्याजः, कूटं, वंचनं-ना, उपधिः, प्रतारणं-णा, विप्रलंभः, छद्मन् *n.*, दंभः, कुसृति *f.*, निकृति *f.* **-Fraudulent,** *a.* कपटिन्, सव्याज, शठ, धूर्त, मायिन्, वंचक, प्रतारक, विप्रलंभक, कापटिक-छाद्मिक (की *f.*), कपट in comp.; 'a f. plan' कपटप्रबंधः. **-ly,** *adv.* छलेन, सकपटं, सव्याजं, मायया, धूर्तवत्, समायं, सकैतवं.

Fraught, *a.* धुर्य, धुरीण, भाराक्रांत. **2** आ-सं-परिपूर्ण, आकीर्ण, आ-सं-कुल, गर्भ-आवह- in comp.; 'f. with danger' अनर्थावह.

Fray, *s.* कलहः, कलिः, युद्धं, द्वंद्वं.

Freak, *s.* कामचारः, चापल्यं-लं, मनोलौल्यं, छंदः-दस् *n.*, लहरी; तरंगः, विलासः; विभ्रमः, लीला, स्वैरिता. **-***v. t.* चित्रीकृ 8 U, चित्र् 10 **-ish,** *a.* चपल, लोल, चलचित्त, लोलमति, स्वैरिन्, कामचारिन्.

Freckle, *s.* जडुलः, कालकः, पिप्लुः.

Free, *a.* अमर्याद, मर्यादातिक्रांत, विनय-हीन-शून्य, प्रगल्भ, धृष्ट, अविनीत. **2** आत्म-स्वतंत्र, स्वाधीन, अनधीन, अनायत्त, अपराधीन, स्वेच्छाचारिन्, स्वच्छंद, स्वैरिन्, निरवग्रह, अपावृत, अ-वि-वश. **3** मुक्त, विमुक्त, निर्मुक्त, विमोचित. **4** निर्यंत्रण, अबद्ध, अनिरुद्ध, वि-उत्-शृंखल, अनर्गल, निरर्गल. **5** निर्विघ्न, निष्प्रत्यूह, अप्रतिहत, निरवरोध, असंबाध. **6** निश्चिंत, वीतचिंत, विशद, स्वस्थ. **7** मुक्तहस्त, त्यागशील, व्ययपर. **8** अयतवाच्, असंवृत, अनियंत्रितकथ. **9** मूल्यं विना. **10** सर्वसाधारण-सामान्य; 'f. from' ex. by निर्-अ in comp. or by गत, वीत, हीन, रहित, वर्जित, शून्य, मुक्त, mostly in comp.; 'f. from pride' निरवलेप; अनृण, वीतस्पृह, चिंताहीन, &c., 'f. choice' स्वेच्छा, स्वरुचि *f.*; 'f. course' प्रसरः. **-***v. t.* मुच् 6 P or c., वि-निर्°, वि- सृज् 6 P or c., मोक्ष् 10; gen. ex. by निर् or अ pr. to nouns; 'f. from obstacle' विघ्नान् अपनी or हृ 1 P, निर्विघ्नीकृ 8 U; 'f. from debt' अनृण *a.* कृ, ऋणं अपाकृ or निस्तृ c.; 'I f. ed him from doubt' तं निर्मुक्तसंदेहमकरवं, तस्य संदेहमपानयम्, 'f.-agency,' 'f.will' स्वेच्छा, यदृच्छा, स्वातंत्र्यं, स्वाच्छंद्यं, स्वैरता, स्वकामः; 'f.-booter' दस्युः, साहसिकः, प्रसह्यचौरः; 'f.-booting' प्रसभं अपहारः, साहसं; 'f.-born' जात-जन्म-स्वतंत्र, जात्या स्वायत्त, जन्मनैव अपरायत्त, कुलीन-जाति, अदासज; 'f.-hearted, -minded' *See* **Frank**; 'f.-hold' निष्करभूमि *f.*, स्वाधीना भूः; 'f.-holder' स्वाधीनक्षेत्रस्वामिन् *m.*; 'f. liver' कुक्षिंभरिः, औदरिकः; 'f.-man' स्वतंत्रः, अपरायत्तः, स्वाधीनः, अदासः; 'f.-spoken' स्फुटवादिन्, स्पष्टवाच्, अगूढभाव; 'f.-thinker' नास्तिकः, अनीश्वरवादिन् *m.*; 'f.-woman' स्वाधीना, स्वैरिणी, स्वैरचारिणी. **-dom,** *s.* स्वतंत्रता, अवशता, स्वातंत्र्यं. **2** मोक्षः-क्षणं, वि-,मुक्ति *f.*, मोचनं. **3** निर्यंत्रणं-णता, निर्विघ्नता. **4** अविनयः, मर्यादातिक्रमः, प्रागल्भ्यं. **5** विरहः, अभावः, राहित्यं, हानि *f.*, मुक्ति *f.*; 'f. of will or thought' स्वेच्छा, स्वरुच्यनुवर्तनं, कामचारः, स्वाच्छंद्यं. **-ly,** *adv.* स्वेच्छया, स्वैरं, स्वच्छंदतः; कामतः अयाचितं. **2** बहुशः, बाहुल्येन, मुक्तहस्तं, भूयसा. **3** यथेच्छं, नि-प्र कामं, पर्याप्तं, यथेप्सितं, आतृप्ति. **4** निर्विघ्नं, निर्यंत्रणं, अनिवारितं. **5** मूल्यं विना. **-ness,** *s.* निर्विघ्नता, निष्कापट्यं, वाग्यतत्वं, त्यागशीलता, &c.

Freeze, *v. i.* शिलीभू 1 P, घनीभू, संहन् pass., श्यै 1 A, संहतीभू, श्यानीभू, पिंडं बंध् 9 P. **-***v. t.* शिली-घनी-कृ 8 U, संहन् 2 P, जडयति (D.), जडीकृ, श्यै c., शिलीकृ; 'a frozen mass of ice' शिलीभूतं हिमं, हिमपिंडः.

Freight, *s.* नौभांडं, नौभारः, पोतद्रव्याणि, नाविकं. **2** तरः, आतरः, तरपण्यं, तारिकं, तार्यं. **-***v. i.* (द्रव्याणि) नावि निविश् c. or नि-धा 3 U, द्रव्यैः पूर् 10.

Frenetic, *See* **Frantic.**

Frenzy, *s.* उन्मादः, चित्तविभ्रमः-विप्लवः, उन्मत्तता, आवेशः. **-ed,** *a.* उन्मत्त, भ्रांतचित्त, आविष्ट.

Frequent, *a.* नित्य, अनवरत, सतत, अभीक्ष्ण, बहुशः घटमान or वर्तमान; better ex by 'f.-ly.' **-***v. t.* सेव् 1 A, नित्यं आश्रि 1 U, सततं भज् 1 U or अभिगम् 1 P, जुष् 6 A; सततं गम् &c.; *See* below. **-ative,** *s.* यङ्लुगंतं, यङंतं. **-ly,** *adv.* पुनः पुनः, मुहुर्मुहुः, भूयोभूयः, नित्यं, असकृत्, वारंवारं, अभीक्ष्णं, सततं, बहुशः, अनेकशः, बहुवारं, प्रायः, प्रायेण, प्रायशः, शश्वत्. **-Frequence, -cy,** *s.* पौनः पुन्यं, सातत्यं, अभीक्ष्णता, नित्यता, अविरामः, समभिहारः, अविच्छेदः.

Fresco, *s.* शीतता. **2** मंडोदकचित्रं.

Fresh, *a.* नव, अभिनव, नूतन, नवीन; प्रत्यग्र, अविशीर्ण, अम्लान, अशुष्क (of flowers only); 'f. age' नवं-प्रथमं-वयः; 'f. wound' आर्द्रक्षतं. **2** पेय, आस्वाद्य, अलवण. **3** शीतल, शिव, सुख (of breezes). **4** सरस, अश्रांत, अक्षतवीर्य, अक्लांत, अक्षीणतेजस्; 'a f. man' नवशिष्यः-छात्रः, प्राथमकल्पिकः, शैक्षः (just initiated). **-en,** *v. t.* नवीकृ 8 U, सरसीकृ, (पुनर्नवीकृताः स्मः S. 5). **-ly,** *adv.* सद्यः, नवं, प्रत्यग्रं. **2** शीतलं, सुखं. **-ness,** *s.* नवता, नूतनता, अम्लानता, अक्षीणता. **2** तेजस् *n.*, वीर्यं, सरसत्वं, अक्लांति-अश्रांति- *f.* **3** अलवणता. **4** नवरक्तवर्णः.

Fret, *v. i.* क्षुभ् 4 P, पीड् pass., व्यथ् 1 A, दुर्मनायते (D.), अंतः सं-परि-आ-तप् 4 A, शुच् 1 P, क्लिश् pass., उद्विज् 6 A, आत्मानं तप् c. or क्षुभ c. 2 घर्षणेन क्षि pass., संघृष् pass. -*v. t.* संतप् c., क्षुभ् c.; व्यथ् c. (व्यथयति), पीड् 10, बाध् 1 A, क्लिश् 9 P. 2 घृष् 1 P, घर्षणेन तप् c. -*s.* (Of sea) क्षोभः, वीचिपलोठनं. 2 (F.-fulness) चित्तव्यथा, आत्मपीडाक्लेशः, उद्वेगः, मनस्तापः, मनःक्षोभः, अशांति *f.*, दुर्मनायितं. 3 प्रतीपता, वक्रभावः. 4 जालं. **-ful,** *a.* आत्मतापिन्, शीघ्रकोपिन्, दुर्मनस्, चंड, शीघ्रक्षुब्ध-संतप्त. 2 वक्रप्रकृति, प्रतीप, वक्रभाव, दुष्प्रकृति, वामशील, जिह्मस्वभाव. **-fully,** *adv.* सचित्तक्षोभं, मनस्तापेन.

Fretty, *a.* व्यत्यस्तरेखारूपेण तष्ट.

Friable, *See* **Fragile.**

Friar, *s.* योगिन् *m.*, मुनिः, यतिः, संन्यासिन् *n.* तपस्विन् *m.* **-y,** *s.* मठः, आश्रमः, विहारः.

Fribble, *v. i. See* **Trifle.**

Friction, *s.* घर्षणं, संघर्षः, आ-अभि-घर्षः-र्षणं, आ-वि-घट्टनं, परस्परघर्षणं-मर्दनं.

Friday, *s.* शुक्र-भृगु-वारः-वासरः.

Friend, *s.* मित्रं, सखि *m.*, सुहृद् *m.*, स्निग्धः, प्रणयिन् *m.*, हितः, सहायः, सजुस् *m.*, संगिन् *m.* वयस्यः, बंधुः; (term of address) भद्रः-द्रा; ' an old f.' चिरमित्रं; 'a true f.' सन्मित्रं. -*v. t.* उपकृ 8 U, अनुग्रह् 9 P. **-less,** *a.* मित्र-बंधु-हीन, असहाय, अनाथ, अशरण; *See* **Forlorn. -ship,** *s.* सख्यं, मित्रत्वं; मैत्री, मैत्र्यं, बंधुता, सौहृदं, सौहार्दं, स्नेहः, प्रणयः, प्रीति *f.*, प्रेमन् *m.*, *n.*, अनुरागः. 2 साहाय्यं. **-Friendly,** *a.* स्निग्ध, सदय, हितकाम, हितैषिन्, स्नेहशील, सानुराग, सुहृदय, सप्रणय. 2 हित, अनुकूल, अनुग्राहिन्, उपकारक, हितकर; सुखावह, कल्याणकर (री *f.*); ' on f. terms ' स्नेहवृत्त्या, मित्रभावेन; ' f. disposed ' हितबुद्धि; ' f. dispute ' प्रणयकलहः, प्रीतिकलहः. -*adv.* मित्रवत्, हितवत्, स्निग्धं, प्रियं. **-ness,** *s.* हितेच्छा, हितकामता, हितबुद्धि *f.*, अनुकूलता, मित्रत्वं, प्रणयः, स्नेहशीलता.

Frieze, *s.* स्थूलपट्ट-शाटकः, वराशिः.

Frigate, *s.* महायुद्धनौका.

Fright, *s.* भयं, त्रासः, संत्रासः, शंका, साध्वसं, भीति *f.*, उद्वेगः, दरः; ' take f. ' सं-उत्-त्रस् 1, 4 P, उत्त्रस्त-चकित-*a.* भू. -*v. t.*, **-en,** *v. t.* भी c. (भापयते-भीषयते), सं-उत्-त्रस् c., उद्विज् c. **-ed,** *a.* भीत, त्रस्त, भयार्त; भयाकुल, चकित, ससाध्वस, जातशंक, शंकित, भयाविष्ट. **-ful,** *a.* भीम, विकट, कराल, दारुण, भीषण, घोर, भैरव (वी *f.*), रौद्र (द्री *f.*), भयानक, भयावह, उग्र, भयंकर; ' f. in appearance ' करालवदन, भीमरौद्र-दर्शन, उग्रदर्शन. **-fully,** *adv.* दारुणं, घोरं, उग्रं.

Frigid, *a.* शीत, शिशिर, हिम, जड. 2 निरुत्साह, निःस्नेह; *See* **Cold. -ity,** *s.* हिमं, शैत्यं, जडता. 2 विरागः, स्नेहाभावः. **-ly,** *adv.* शीतलं, शिशिरं, निःस्नेहं.

Fringe, *s.* अंचलः-लं, दशाः (*f.* pl.), वस्तयः (*m. f.*); ' like a f. rent from the robe of heaven ' छिन्ना इवांबरपटस्य दशाः (Mr. 5). -*v. t.* प्रांतयति (D.); 'f.-ed with gold ' सुवर्णमंडितप्रांतं (वस्त्रं).

Frippery, *s.* चीराणि (pl.), जीर्ण-चीरवस्त्रं, वस्त्रखंडाः, कर्पटाः. 2 निष्प्रयोजनद्रव्यं, उच्छिष्टं.

Frisk, *v. i.* क्रीड् 1 U, इतस्ततः रम् 1 A or नृत् 4 P or प्लु 1 A, खेल् 1 P. वि-हृ 1 P. **-y,** *a.* हृष्ट, प्रहृष्ट, प्रफुल्ल, सानंद.

Frith, *s.* संकटं, संभेदः.

Fritter, *v. t.* खंडशः कृत् 6 P; खंड् 10, शकलीकृ 8 U; ' f. away ' खंडशः-अल्पशः-न्यूनीकृ or क्षीणीकृ or क्षै c. (क्षपयति); ' f. away time ' अल्पशः (मुधा) वेलां क्षै c. -*s.* खंडः-डं, शकलः-लं.

Frivol, *v. i. See* **Trifle.**

Frivolous, *a.* लघु, अगुरु, अनर्थक, तुच्छ, यत्किंचन, चपल, चपल-लघु-वृत्ति, लघुकर्मन्. **-ness, -Frivolity,** *s.* लाघवं, लघुवृत्तितात्वं, लघुता, यत्किंचनकारिता, चापलं, चपलं कर्म, निरर्थकव्यापारः.

Friz, Frizzle, *v. t.* कुंच् c., व्यावृत् c.

Fro, *adv.* (In ' to and f. ') इतस्ततः; ' going to and f.' गमनागमनं.

Frock, *s.* उत्तरीयं, कंचुकः.

Frog, *s.* भेकः, दर्दुरः, मंडूकः, वर्षाभूः, शा(सा)लूरः, प्लवः, प्लवगः, प्लवंगमः, वर्षाघोषः; ' she-f. ' मंडूकी.

Frolic, *v. i.* क्रीड् 1 U, विलस् 1 P, विहृ 1 P, खेल् 1 P, रम् 1 A, विभ्रम् 1, 4 P. -*s.* केलि *f.*, विलासः, क्रीडा, विहारः, वि-भ्रमः, लीला, खेला, क्रीडाकौतुकं. **-some,** *a.* केलि-विलास-प्रिय, विलासिन्, क्रीडा-खेला-पर, उल्लासिन्, विहारिन्, केलिकर; परिहासशील.

From, *prep.* Gen. ex. by abl., when denoting source or place. 2 (Of cause) by abl. or instr., (only by instr., the noun being *f.*); ' f. curiosity 'कुतूहलात्-लेन; ' f. its fragrance ' सुरभितया. 3 (Of persons) by abl., or सकाशात् with gen.; रामस्य सकाशात् ' f. Râma ' 4 (Of time) by आ with abl. or in comp. ; ' f. the beginning ' आमूलात्; आजन्मनः, आजन्म ; gen. by आरभ्य or प्रभृति, with abl.; तद्दर्शनादारभ्य or प्रभृति ; ' f. this day ' अद्यप्रभृति, अद्यारभ्य; ' f. above ' उपरिष्टात्, ऊर्ध्वात् ' f. day to day ' दिनेदिने, दिनाद्दिनं ; ' f. below' अधस्तात्, अधोभागात्; अधःस्थानात्;

'f. behind' पश्चादेत्य, पृष्ठतः, पृष्ठत आगत्य; f. hence' अतः, इतः; 'f. afar' दूरतः, दूरात्; 'f. without' बहिर्देशात्; 'f. within' अभ्यंतरात्, अंतःप्रदेशात्.

Front, *s.* अग्रं, अग्रभागः-देशः, मुखं, मूर्धन् *m.*; 'f. door or gate' मुखं, निःसरणं. **2** वदनं, आस्यं, मुखं, आननं. **3** शिरस् *n.*, ललाटं; 'in f. of.' पुरः, पुरतः, अग्रे, अग्रतः, पुरस्तात्, प्रत्यक्षं, समक्षं, साक्षात्, अभि-सं-मुखं-खे, (with gen.); 'f. of war' रणधुरा, रणशिरस् *n.*, मूर्धन् *m.n.*, 'f. of army' सेनामुखं, सेनाग्रं, अग्रानीकं (f. ranks); 'in the f.' अग्रे, मूर्ध्नि, धुरि, शिरसि; 'to place in the f.' पुरस्कृ, अग्रणीकृ, अग्रेसरीकृ. **-***v.* संमुखं-खे स्था 1 P or वृत् 1 A, संमुखी-अभिमुखी-भू; oft. by मुख or अभिमुख in comp.; 'a house f. ing the east' प्राङ्मुखं-प्राच्यभिमुखं-गृहं. **-age,** *s.* अग्र-पूर्व-भागः, मुखं. **-al,** *a.* लालाटिक (की *f.*), ललाट in comp. **-***s.* ललाटपट्टं; 'f. of an elephant' कुंभः, गंडः. **-less,** *a.* धृष्ट, निर्लज्ज, निष्त्रप. **-let,** *s.* ललाटपट्टं.

Frontier, *s.* सीमा-मन् *f.*, उपांत, पर्यंतः, प्रांतः, समंतः, सामंतः-तं. **-***a.* 'Dwelling on the f.' सामंत (ती *f.*), सीमावर्तिन्, पर्यंतस्थ, प्रांतनिवासिन्; *See* **Border.**

Frontispiece, *s.* मुखप्रतिमा-चित्रं; 'f. of a house' गृहमुखं, गृहाग्रभागः.

Frost, *s.* तुषारः, तुहिनं, हिमं, अवश्यायः, नीहारः, प्रालेयं, मिहिका; 'f.-bitten' हिमासिक्त, तुषार-शीत-उपहत. **-y,** *a.* हिम, तुषार, हिम-तुषार-वत्.

Froth, *s.* फेनः-णः, मंडः-डं, उत्सेचनं; *See* **Ferment.** **-***v. i.* फेनायते-मंडायते (D.), उत्सिच् pass. **-y,** *a.* फेनिल, फेनमय (यी *f.*), फेनिन्. **2** असार, लघु, निःसार, निःसत्व, अंतःशून्य.

Frouzy, *a.* पूतिगंधि, उग्रगंध.

Froward, *a.* अदम्य, अविनेय, अतिलालित, दुर्ललित, उच्छृंखल, दुर्दांत. **2** प्रतीप, प्रतिकूल, वक्रस्वभाव, विलोम, वामशील, प्रतीपाचार. **-ly,** *adv* वक्रभावेन, प्रतिकूलं. **-ness,** *s.* प्रतीपता, वामता, वक्रभावः, अदम्यता.

Frown, *s.* भ्रूभंगः, भ्रू(भ्रु)कुटि-टी *f.*, भ्रूभेदः-क्षेपः-संकोचः. **-***v. i.* भ्रूकुटिं बंध् 9 P or रचू 10 or कृ 8 U, भ्रूभंगेन दृश् 1 P, भ्रूवौ संकुच् 1 P; 'Oh he just f. s at myself' अये मय्येव भ्रूकुटीधरः संवृत्तः (U. 5). **-ing,** *a.* नत-आकुंचित-भ्रू, सभ्रूभंग. **-ingly,** *adv.* सभ्रूभंगं, भ्रूक्षेपेण, भ्रूकुटिं बद्ध्वा, सभ्रूक्षेपं.

Fructify, *v. t.* बहुफलदीकृ 8 U, सफलीकृ, स्फीतीकृ, सफलयति (D.). **-Fructuous, -Fructiferous,** *a.* (बहु) फलद, फलिन्, फलदायिन्.

Frugal, *a.* मित-अल्प-व्यय-व्ययिन्, स्वल्प-परिमित-व्यय, अमुक्तहस्त, कृपण, व्ययविमुख. **-ity,** *s.* मितव्ययिता, मित-स्वल्प-व्ययः, अमुक्तहस्तत्वं, कृपणत्वं. **-ly,** *adv.* अमुक्तहस्तं; मित-स्वल्प-व्ययेन, अल्पव्ययपूर्वं, कृपणं.

Fruit, *s.* फलं (lit. and fig.); श(स)स्यं, प्रसवः, उत्पन्नं. **2** परिणामः, उत्तरफलं, कर्मफलं. **3** (Progeny) अपत्यं, संतानः-नं, संतति *f.*, प्रजा, प्रसूति *f.*; फलं. **4** अर्थः, लाभः, फलागमः, फलप्राप्ति *f.*, 'dry f.' वानं; 'unripe f.' शलाटु; 'bear f.' फल् 1 P, फलं बंध् 9 P or दा 3 U, सफलीभू, पच् pass., (सद्य एव सुकृतां हि पच्यते कांक्षितं R. xi. 50) 'f.-bearer' फलदातृ *m.*, फलदः; 'f.-bearing' फलद, फलग्राहि, फलभृत्, फलदायिन्, फलिन्, फलशालिन्; 'f.-garden' फलवाटः-टिका; 'f.-season or time' फलकालः-समयः, फलावचयकालः; 'f.-stalk or stem' शस्यमंजरी, प्रसवबंधनं, वृंतं; 'f.-tree' फलदः वृक्षः or वनस्पतिः, फलग्राहिन् *m.* **-age,** *s.* फलोच्चयः, फलभारः-गुच्छः, फलागमः. **-erer,** *s.* फलविक्रयिन् *m.* **-ery,** *s.* फलानि (pl.). **2** फलस्थानं. **-ful,** *a.* फलवत्, फलद, फलिन्, सफल, फलित, अवंध्य, अमोघ, बहुफलद, फलिन, फलग्राहि. **2** बहुप्रज, प्रजनिष्णु, बह्वपत्य, बहुप्रजोपेत. **3** उत्पादक, जनक; आवह-प्रभवः-मूलं-कारणं in comp. **-less,** *a.* निष्फल, वि-अ-फल, निरर्थक, व्यर्थ, मोघ, वंध्य, अनर्थक, निष्प्रयोजन, निर्गुण, अनुपयुक्त, फलहीन, अवकेशिन्. **-lessly,** *adv.* व्यर्थं, निरर्थकं, मुधा, वृथा, मोघं, निष्फलं. **-lessness,** *s.* वैयर्थ्यं, अनुपयोगः, व्यर्थता, वैफल्यं. **-Fruition,** *s.* उप-,भोगः, भुक्ति *f.*, अनुभवः, आस्वादः; सुखोपभोगः, फलास्वादः, सुखानुभवः, सुखास्वादः.

Frumentaceous, *a.* गोधूममय (यी *f.*)

Frump, *s.* कर्कशा, कैकेयी

Frustrate, *v. t.* विफली-निष्फली-मोघी-कृ 8 U, प्रति-व्या-हन् 2 P, भंज् 7 P, खंड् 10, वृथा-मुधा-कृ; *See* **Baffle.** **-***a.* **Fruitless,** q. v. **-ed,** *a.* प्रति-व्या-हत, मोघीकृत, वृथाभूत; 'f. in attempts or hopes' भग्नोद्यम, व्यर्थप्रयत्न, भग्नसंकल्प; भग्नाश, अकृतार्थ, मोघाश, खंडिताश, प्रतिहत, प्रतिबद्ध. **-ion,** *s.* भंगः, व्याघातः, विफलीकरणं, खंडनं. **-ive, -ory,** *a.* व्याघातिन्, भंजक, वृथाकारिन्.

Frutescent, *a.* गुल्मावृत.

Fry, *s.* क्षुद्रमत्स्यसंघः, मत्स्यसंघातः, पोताधानं. **2** मीनांडं. **-***a. t.* भ्रस्ज् 6 P or c. (भर्जयति), पच् 1 P, भृज्ज् 1 A. **-ing,** *s.* भर्जनं, पचनं; 'f.-pan' पिठरः-रं, भृज्जनं, भ्राष्ट्रः, भर्जनपात्रं, अंबरीषं; ऋजीषं, पिष्टपचनं; (for liquor) स्वेदनी, कंदु-दू *m.-f.* **-ed,** *a.* भ्रष्ट, भर्जित, कंदुपक्व; 'f. grain' धानाः (*f.*, pl.), भ्रष्टयवाः, लाजाः (*m.* pl.).

Fuddle, *v. t.* मद् c., मदेन मुह् c. -*v. i.* मद् 4 P. **-er,** *s.* पानासक्तः, पानरतः.

Fudge, *s.* अनर्थकं, असंबद्धं. -*v. i.* असंबद्धं जल्प् 1 P.

Fuel, *s.* इंधनं, एधस् *n.*, एधः, इध्मं, समिध् *f.*, समिंधनं; 'add f. to the flames' क्षते क्षारं प्रक्षिप् 6 P.

Fugacious, *a.* पलायनशील, पलायनपर; अस्थिर, चपल, लोल.

Fugitive, *s.* कृतपलायनः, पलायिन् *m.*, कांदिशीकः. -*a.* पलायिन्, पलायनपर-शील. **2** चपल, तरल, चंचल, अस्थिर.

Fulcrum, *s.* आधारः, उपस्तं(ष्टं)भः, आलंबः, आश्रयः.

Fulfil, *v. t.* सं-परि-पूर् 10, साध् 5 P or c., निर्वह् c., निः-सं-पद् c., समाप् c., निर्वृत् c., सफलीकृ 8 U, निस्तृ c., तीर् 10; 'f. a promise' प्रतिज्ञां निर्वह् c. or तीर् or शुध् c. or पा c. (पालयति) or अप-वृज् 10; gen. in pass. constr. ex. by पूर्ण, कृत, आप्त, लब्ध, in comp.; 'whose desires are f. ed' समवाप्त-लब्ध-मनोरथः-कामः, कृतार्थः, पूर्णमनोरथः-कामः, कृतिन् *m.*; 'who has f.ed his promise' पूर्णप्रतिज्ञः, पालित-संगरः, सत्यप्रतिज्ञः, सत्यव्रतः-संधः. **-ler,** *s.* निर्वाहकः, साधकः, पूरयितृ *m.* **-ment,** *s.* पूरणं, सिद्धि *f.*, निष्पत्ति *f.*, साधनं, निर्वाहः; 'f. of desires' कृतार्थता, कामसिद्धिः, इच्छापूरणं, इष्टावाप्तिः.

Fulgent, *a.* उज्ज्वल, दीप्ति-द्युति-मत्; *See* **Bright. -Fulgency,** *s.* तेजस् *n.*, प्रभा, कांति-दीप्ति-द्युति *f.*

Fulgurate, *v. i.* विद्युत् 1 A; स्फुर् 6 P.

Full, *a.* (of) सं-परि-पूर्ण, आ-सं-कीर्ण, आ-सं-कुल, संभृत, व्याप्त, निर्भर, पूरित, मय (यी *f.*) in comp. **2** अशेष, अन्यून, सकल, निखिल, कृत्स्न, समग्र, अविकल, अखंड, संपूर्ण; 'f. year' पूर्णं वर्षं; 'f. speed' पूर्णवेगः; 'f.8 months old' पूर्णाष्टमास. **3** परिणत, परिपक्व, पक्व, कठोर, प्रौढ, संपन्न. -*s.* पूर्णता, साकल्यं; 'in f.' सविस्तरं, साकल्येन. -*adv.* कृत्स्नशः, सर्वथा, साकल्येन, अशेषतः-षेण, पूर्णं; 'f.-blown' प्रफुल्ल, विकच, विकसित, प्रस्फुट, प्रस्फुटित 'f.-bodied' स्थूलकाय, सन्नद्धांग, पुष्टदेह; 'f.-bosomed' पीनस्तन (नी *f.*), पीन-कुचकुड्मल; 'f.-fed,' पुष्टांग, हृष्टपुष्ट; 'f.-grown' प्रवृद्ध, प्रौढ, कठोर, परिणत, प्ररूढ; गतशैशव, प्राप्तयौवन, यौवनारूढ, समारूढयौवनारंभ (of men); 'f.-growth' प्रौढि *f.*, प्रौढता, प्रवृद्धि *f.*; 'f.-laden' पूर्णभार, सुभाराक्रांत; 'f. moon' पूर्णेन्दुः, सकलेंदुः; 'f. moon day' पौर्णिमा, पूर्णिमा, राका. -*v. t.* वस्त्रं निर्णिज् 3 U. **2** घनीकृ 8 U. **-er,** *s.* रजकः, निर्णेजकः. **-y,** *adv.* अशेषेण, सविस्तरं, अशेषतः, सर्वशः-था, साकल्येन, कृत्स्नशः, निरवशेषं, विस्तरेण-रशः, पूर्णतया. **-ness,** *s.* पूर्णता, निर्भरता, पूर्ति *f.*, संभारः. **2** बाहुल्यं, प्राचुर्यं. **3** परिणामः, परिपाकः, सिद्धि *f.*, प्रौढि *f.*, संपद् *f.*

Fulminate, *v. i.* विकटं रस् or स्तन् 1 P, स्फुर्ज् 1 P. -*v. t.* वज्रनिर्घोषेण इव प्रेर् c. or उदीर् c. **-ion,** *s.* स्फूर्जनं, वज्र-मेघ-निर्घोषः, स्तनितं.

Fulsome, *a.* गर्हित, कुत्सित, गर्ह्य, बीभत्स-जनक, विरस. **-ness,** *s.* विरसता, गर्ह्यता.

Fulvous, *a.* आपीत, पिंगल, कपिल.

Fumble, *v. i.* परामृश् 6 P, समालभ् 1 A, अदक्षं कार्यं वि-धा 3 U. **-ing,** *a.* संभ्रांतं परामृशत्, अदक्षतया कार्यविधायिन्. -*s.* अदक्षं कार्यविधानं

Fume, *s.* धूमः-मिका, बाष्पः, धूपः. **2** धूमोद्गारः. **3** क्रोधः, संरंभः. -*v. t.* धूमयति (D.), धूप् 1 P (धूपायति). **-Fumigate,** *v. t.* धूप् 10, धूप् 1 P (धूपायति), धूपेन वास् 10 or भू c.; 'a thing f. ed' वासितं, भावितं. -*v. i.* धूमायते (D.), बाष्पं उद्गृ 6 P. **2** Angry, (to be) q. v. **-ion,** *s.* वासनं, भावनं, अविवासनं. **-Fumy,** *a.* सधूम, सधूप.

Fun, *s.* परि(री)हासः, नर्मन् *n.*, क्रीडा, खेला, केलि *f.*, प्रहसनं, क्रीडाकौतुकं; 'said in f.' नर्मभाषितं, नर्मालापः. **-Funny,** *a.* हासजनक, विनोदनशील, रसिक, कौतुक-कारिन्, नर्म-परिहास- in comp. **2** उपहास्य, अपरूप.

Funambulist, *s.* रज्जु-चारिन् *m.*--नर्तकः.

Function, *s.* व्यापारः, कर्मन् *n.*, कार्यं, कृत्यं, चेष्टा, क्रिया, चेष्टितं, व्यवसायः, व्यवहारः, वृत्ति *f.*, प्रवृत्ति *f.* **2** नियोगः, अधिकारः, पदं. **3** आचरणं, अनुष्ठानं, करणं. **4** गुणः, धर्मः, स्वभावः. **5** इंद्रियं, शक्ति *f.*, कर्मेंद्रियं. **-ary,** *s.* नियोगिन् *m.*, अधिकारिन् *m.* कार्यनिर्वाहकः, नियुक्तः, आधिकृतः.

Fund, *s.* संचयः, पुंजः, राशिः, समुदायः, निचयः, संयोगः, संनिपातः; *See* **Collection. 2** मूलधनं, नीवि-वी *f.* -*v. t.* सं-चि 5 U, संग्रह् 9 P, पुंजीकृ 8 U, राशीकृ.

Fundament, *s.* गुदं, मायुः, अपानं, मलद्वारं. **2** अधोभागः, तलं.

Fundamental, *a.* प्रधान, सार, सारभूत, गुर्वर्थ, मौलिक, मूल in comp.; 'f. cause' मूलकारणं; 'f. principle' मूलतत्वं. -*s.* प्रधान-मूल-तत्वं, मूलं, तत्त्वं, सारः.

Funeral, *s.* और्ध्वदेहिकक्रिया, अंत्येष्टि *f.*, प्रेतकार्य-कृत्यं, प्रेतनिर्हारः, अंत्यक्रिया, उत्तर-क्रिया-कर्मन् *n.*, और्ध्वदेहिकं, श्राद्धादि कर्म. -*a.* और्ध्वदेहिक, और्ध्वदेहिक(की *f.*), better by (*s.*); 'f. pile' चिता, चिति-ती *f.*, चित्या.

Fungus, *s.* विड्जं, गोमयजं, शिलीध्रं, शा-(सा)लेयः, शीतशिवः, छत्रा, मधुरिका, मिसि-शि-सी-शी- *f.*, मिश्रेया.

Funicle, *s.* क्षुद्ररज्जु *f*, क्षुद्रगुणः, सूत्रं.

Funk, *s.* महद्भयं, संत्रासः. **-y,** *a.* भीत, संत्रस्त.

Funnel, *s.* धूममार्गः-पथः-द्वारं. **2** नाली, प्रणाली-लिका, नाडि-डी *f.*

Fur, *s.* रो(लो)मन् *n.*, तनुरुहः-हं, पशु-लोमन् *n.*; 'f. on the tongue' कुलुकं, मलं. **-red,** *a.* लोमावृत, लोमान्वित. **2** समल.

Furbish, *v. t.* तिज् c., निः-तप् c., प्रमृज् 2 P or c., धाव् 10, परिष्कृ 8 U. **-ed,** *a.* निर्धौत, प्रमृष्ट, निष्टप्त. **-er,** *s.* तेजकः, मार्जकः, निर्णेजकः; 'f. of weapons' शस्त्रमार्जः, असिधावकः. **-ing,** *s.* धावनं, परिष्कारः, तेजनं.

Furcated, *a.* द्व्यग्र.

Furl, *v. t.* सं-वेष्ट् c., सं-वृ 5 U, संपुटीकृ 8 U, सं-हृ 1 P.

Furlong, *s.* नल्वः.

Furlough, *s.* कर्मत्याग-कर्मविराम-अनुज्ञा. **2** कर्मनिवृत्ति *f.*

Furmenty, *s.* क्षीरान्नं, परमान्नं, पायसं.

Furnace, *s.* अग्निकुंडं, अधिश्रयणी, अंति(दि)का, उध्मानं; 'a portable f.' *See* **Hearth.**

Furnish, *v. t.* (उपकरणैः) संयुज् 10 or सनाथीकृ 8 U; (उपस्करं) उप-कृप् c., उप-पद् c., सं-भृ 3 U, वि-धा 3 U; gen. ex. by स or सनाथ in comp.; 'f. ed with arrows' सशरं (धनुः); मणिशिलापट्ट-सनाथं लतागृहं (V. 2) 'f. ed with a marble slab'; 'to f. with arms' शस्त्रास्त्रैः संनह् 4 P or सज्जीकृ. **-ed,** *a.* सं-,युक्त, समन्वित, उपेत, उप-परि-कृत, सनाथ, संभृत, स in comp. **2** सोपस्कर, सोपकरण, उप-स्करादियुक्त. **3** सन्नद्ध, सज्जीकृत. **-Furniture,** *s.* उपस्करः, उपकरणं, परि-च्छदः, सामग्री, सज्जा, संभारः, उपचारः, परिबर्हः; 'on sofas with all f.' उपचार-वत्सु मंचेषु (R. VI. 1.); परिबर्हवंति वे-श्मानि (R. XIV. 15); 'household. f.' गृहोपस्करः, पारिणाह्यं.

Furor, *s. See* **Fury.**

Furore, *s* अत्याश्चर्यं, महद्विस्मयः,

Furrow, *s.* सीता, हलिः, लांगलमार्गः-पद्धति *f.*, हलरेखा. **2** रे(ले)खा, सुषिरं. **3** वदन-रेखा, वलि-ली *f.* **-***v. t.* (हलेन) कृष् 1 P, (लांगलेन) लिख् 6 P or रेखाः कृ 8 U. **-ed,** *a.* सीत्य, कृष्ट हल्यवत

Further, *a.* दूरतर, दूरस्थ, द्वीयस्. **2** अधिक, अपर, अधिकतर, पर. **-***adv* दूरतरं, अधिक-दूरं, अग्रे-ग्रतः, पुरतः, अग्रेतरां, पुरस्तात्; 'a little f. on' स्तोकांतरं, अग्रतः, किंचि-दग्रे; 'f. and f.' अधिकाधिकं, उत्तरोत्तरं. **2** अपरं, अन्यच्च, अपरं च, किं च, अपि च, अपरं तु. **-***v. t.* प्र-सं-वृध् c., अनुग्रह् 9 P, उपकृ 8 U, त्वर् c., (त्वरयति), पुरस्कृ, प्रवृत् c., साहाय्यं दा 3 U, उत्कृष् 1 P, उन्नतिं-उत्कर्षं-नी 1 P. **-ance,** *s.* सं-प्र-वर्धनं, प्रवर्तनं, अभि-प्र-वृद्धि *f.*, अनुग्रहः, उपकारः, साहाय्यं, उत्कर्षः. **-er,** *s.* उपकारकः, प्रवर्धकः. **-more,** *See* (*adv.*).

Furthest, *a.* दविष्ठ, दूरतम. **-***adv.* सुदूरं, दविष्ठं.

Furtive, *a.* चौर्येण गृहीत, अपहृत, छलापहृत, निभृतं कृत. **-ly,** *adv.* चौरवत्, उपांशु, रहसि, निभृतं, छलेन.

Fury, *s.* मत्तता, उन्मत्तता, चंडता, उग्रता, औत्कटत्वं. **2** संरंभः, कोपः, क्रोधः, रोषः, आवेशः, अमर्षः. **3** महावेगः, अत्यंतवेगः-जवः, बलं, आ[illegible]. **4** चंडी, दुर्गा. **-Furious,** *a* प्र-,चंड, तीव्र, उग्र, प्रबल, महावेगवत्. **2** उन्मत्त, मत्त, मदोत्कट, मदकल, समद, उद्दाम मद, उन्मादसंरब्ध, उत्कट. **3** कोपाकुल. संरब्ध, क्रोधाविष्ट, कोपपरीत, रोषण, इद्ध-कोप, जातामर्ष. **-ly,** *adv.* उग्रं, चंडं महावेगेन, संरंभेण. **-ness,** *s* संरंभः, उग्रता उन्मादः, कोपाकुलत्व.

Fuscous, *a.* आकृष्ण, आनलि.

Fuse, *v. t.* वि-द्रु c., विली c., जलसात् कृ 8 U. **2** एकरूप *a.* कृ, संमिश्र् 10, सायुज्यं कृ, संयुज् 10, सदृशीकृ. **-***v. i.* वि-द्र 1 P, वि-ली 4 A, द्रवीभू, गलू-क्षर् 1 P. **2** सदृशीभू, सायुज्यं प्राप् 5 P, एकरूप *a.* भू. **-ible,** *a.* द्राव्य, विलयनीय, द्रवशील, क्षरण-शील. **-ion,** *s.* द्रावः, विलयनं, विलयः, द्रवत्वं, क्षरणं. **2** एकरूपता, सदृशीभावः, एकभावः, संमिश्रणं, संकरः, संयोगः.

Fuss, *s.* आडंबरः, तुमुलं, कोलाहलः, संभ्रमः. **-y,** *a.* संभ्रमकारिन्.

Fust, *s.* स्तंभः, स्तंभदंडः. **2** उग्र-पूति-गंधः, दुर्गंधः. **-Fusty,** *a.* पूति, पूतिगंधि, उग्रगंध. **-ness,** *s.* पूति *f.*, दुर्गंधः.

Fustian, *s.* स्थूलशाटकः, वराशिः, स्थूलपट्ट-वस्त्रं-कार्पासं. **2** अतिशयोक्ति *f.*, गर्वोक्तिः, दर्पवचनं, सदर्पावाच्-उक्ति *f.* **-***a.* स्थूल-कार्पासिक (की *f.*). **2** अतिगर्वित, दर्पाध्मात, सगर्व.

Futile, *a.* निरर्थक, मोघ, व्यर्थ, निर्गुण. **2** असार, लघ्वर्थ, निःसार, निःसत्त्व, फल्गु, तृणप्राय, तुच्छ. **-ity,** *s.* मोघता, लाघवं, असारता, &c.

Future, *a.* भविष्यत्, उत्तर, अनागत, आगा-मिन्, भाविन्, उत्तरकालीन, श्वस्तन (नी *f.*); 'f. time' अनागतवेला, उत्तरकालः, आगति

f. 2 पारलौकिक-पारत्रिक- आमुष्मिक (की *f.*), अमुत्रत्य, परलोकगत. **-s.**, **-ity**, *s.* भावि-उत्तर-कालः, भविष्यत्-आगामि-कालः, भाविन् *n.*, अनागतं, अनागतकालः, आयति *f.*, उदर्कः; 'past, present and f.' समतीतं च भवच्च भावि च (R. VIII. 78); 'ignorant of the f.' अश्वस्तनाविद्, उदर्कानभिज्ञ.

G.

Gaberdine, *s.* वराशिः, स्थूलशाटकः.
Gabble,-er, *See* **Babble,-er.**
Gabel, *s.* करः, राजस्वं, शुल्कः-ल्कं, बलिः.
Gable, *s.* गृह-प्रासाद-शिखरं.
Gad, *s.* बाणाग्रं, शूलाग्रं; अग्रं, कर्णः. **2** कीलः, लोहकीलः. **-v. i.** अट् 1 P, परिभ्रम् 1, 4 P. **-ding**, *s.* परि-, अटनं-भ्रमणं.
Gad-fly, *s.* दंशकः, गोमक्षिका, दंशः-शी, वनमक्षिका.
Gaffer, *s.* वृद्धजनः; अशिष्टाचारः.
Gag, *s.* मुखबंधनी-पिधानं, रोधनं. **-v. t.** मुखं बंध् 9 P or निरुध् 7 U or पि-धा 3 U.
Gage, *s.* पणः, आधिः, परिपणनं. **2** मानं, प्र-परि-माणं. **3** मापनयंत्रं. **4** आह्वानं. **-v. i.** पण् 1 A, प्रति-ज्ञा 9 U, अंगीकृ 8 U, प्रति-पद् 4 A, सशपथं प्रतिज्ञा.
Gaggle, *v. i.* कलं रु 2 P; कूज् 1 P.
Gain, *v. i.* लभ् 1 A, अर्ज् 1 P or c., आप् 5 P, आ-समा-सद् c.; *See* **Get**; 'g. ground' उप-चि pass., प्रवृध् 1 A; प्ररुह् 1 P; 'g. over' साध् c., वशं नी 1 P (धनदानादिना); अनुरंज् c., ग्रह् 9 U; 'g. over to one's side' स्वपक्षं ग्रह् c.; 'g. a battle' युद्धे जयं लभ्; 'g. the day' जयं प्राप्, विजयिन् *a.* भू; 'g. upon one's steps' समासद् c.; *See* **Overtake.** **-v. t.** क्रमशः प्रसृप् or प्रगम् 1 P. **-s.** लाभः, प्राप्ति *f.*, फलं, आयः, अर्थः, उत्पन्नं, फलोदयः, अर्जनं. **-er**, *s.* अर्जकः; प्राप्तलाभः; फलप्रापकः. **-ful**, *a.* फलद; लाभजनक, अर्थोत्पादक. **-ly**, *adv.* दक्षं, चतुरं, सपाटवं.
Gainsay, *v. t.* विरुध् 7 U; नि-प्रति-षिध् 1 P, प्रत्या ख्या 2 P, प्रत्यादिश् 6 P, अपवद् 1 U, अपलप् 1 P, अधरीकृ 8 U, निरा-कृ, बाध् 1 A, निरस् 4 U. **-er**, *s.* अपवादकः, निषेधकः.
Gairish, *a.* अतिशोभन, रूपगर्वित. **-ness**, *s.* अतिशोभा, रूपगर्वः, दंभः.
Gait, *s.* गति *f.* गमनं, गतं, चारः; 'graceful in g.' हंसगति, चारुगामिन्.
Gala, *s.* उत्सवः, उत्सवादिवसः, पर्वदिनं.
Galaxy, *s.* सुरनदी, आकाशगंगा, स्वर्गंगा, वियद्गंगा. **2** सुवस्तुमंडलं.
Gale, *s.* वातः, वायुः, पवनः; 'strong g.' वात्या, वातालीं, चंडवातः, जवानिलः, वेगानिलः, प्रकंपनः, व्राजि *f.*
Gall, *s.* क्षतं, विषं; दंशः; (fig.) पीडा, दुष्टभावः, संबाधा. **2** पित्तं, मायुः. **3** कटुता, तिग्मता, कठोरता, अरुंतुदत्वं. **-v. t.** चर्म घृष् 1 P or कृष् 1 P. **2** सं-परि-तप् c., पीड् 10, बाध् 1 A, क्लिश् 9 P, अर्द् 1 P, मर्माणि कृत् 6 P or भिद् 7 P. **-v. i.** आत्मानं तप् c. **-ing**, *a.* परुष, मर्माच्छिद्-भिद्, अरुंतुद.
Gallant, *a.* शोभन, सुभगदर्शन; सभ्य, सभ्याचार, सुशील; दक्षिण; रुयुपचारपर-दक्ष. **2** वीर, शूर, विक्रांत, महावीर्य; *See* **Brave.** **-s.** वल्लभः, रमणः, कामुकः, कामिजनः, कामिन् *m.*, नायकः, दयितः. **2** जारः, विटः, उपपत्तिः. **3** सभ्याचारः, सुजनः; रुयुपचारशीलः-परः. **-ry**, *s.* दाक्षिण्यं; कामचेष्टा, शृंगारविलसितं, रुयुपासना, रुयुपचारः. **2** वीर्यं, शौर्यं, धामन् *n.*, विक्रमः, पौरुषं. **3** उदारता, माहात्म्यं. **-ly**, *adv.* सविक्रमं, सवीर्यं, शूरवीर-वत्. **2** रमणवत्.
Gallery, *s.* मंचाः (pl.), मंचसनाथः कोष्ठः. **2** छन्नपथः-मार्गः. **3** अलिंदः-दकः.
Gallinaceous (fowl), *s.* कुक्कुटः, ताम्रचूडः, चरणायुधः.
Gallinule, *s.* दात्यूहः, कालकंठकः.
Gallop, *v. i.* वल्ग् 1 P, प्लुतगत्या चल् or धाव् 1 A, प्लु 1 A. **-s.** प्लुतं, वल्गितं, प्लवनं.
Gallows, *s.* वधस्तंभः, वध्यशिला-काष्ठं; वधघातस्थानं, वध्यस्थलं. 'met his death on the g.' शूलमारोपितः.
Galoche, *s.* काष्ठपादुका, पादुका.
Galvanize, *v. t.* विद्युच्छक्त्या आकृष् 1 P or उपहन् 2 P.
Gamble, *v. i.* दिव् 4 P (अक्षैः अक्षान् वा); अक्षैःक्रीड् 1 P. **-er**, *s.* द्यूतकारः, देवितृ *m.*, द्यूतकृत् *m.*, धूर्तः, अक्षदेविन् *m.*, कितवः, अक्षधूर्तः. **-ing**, *s.* द्यूतं, दुरोदरं, पणः, अक्षवती, अक्षक्रीडा-द्यूतं, कैतवं, देवनं, द्यूतसेवा, 'g.-house' द्यूतशाला-सभा; 'he who keeps a g.-house' सभिकः, द्यूतकारकः.
Gambol, *v. i.* क्रीड् 1 P, नृत् 4 P, इतस्ततः. वल्ग् 1 P, प्लु 1 A. **-s.** नृत्यं, क्रीडा, लास्यं लीला, केलि *f.*, खेला.
Game, *s.* क्रीडा, खेला, केलि *f.*, लीला, विलासः, परि(री)हासः. **2** वन्यपक्ष्यादि, जांगलः, वन्यपक्षिन् *m.* **3** मृगया. **4** संकल्पः, व्यवसायः, कल्पना, संदिग्धव्यवसायः. **-v. i.** क्रीड् 1 P, दिव् 4 P; 'G.-cock' चरणायुधः, योधकुक्कुटः; 'g.-keeper' वन्यपक्षिपालकः; 'g.-leg' पंगुपादः. **-ing**, *s.* द्यूतं. **-ster**, *s.* धूर्तः; *See* under **Gamble.**

-some, *a.* क्रीडा-लीला-पर, विलासशील, विलासिन्, परिहासशील, उल्लासिन्, परिहासिन्, विनोदिन्, नर्मालापिन्.

Gammer, *s.* वृद्धा स्त्री.

Gammon, *s.* वल्लूरं, उत्तप्तं, सूकरशुष्कमांसं. **2** चर्मपट्ट-शारि-क्रीडा. **3 Deceit,** q. v. *-v. t.* सूकरमांसं लवणीकृ 8 U. **2 Cheat,** q. v.

Gamut, *s.* ग्रामः.

Gander, *s.* हंसः, चक्रांगः, चक्रवाकः, चक्रः; श्वेतगरुत् *m.*, मानसौकस् *m.*, राजहंसः (white).

Ganesh, *s.* गणेशः, गणपतिः, विनायकः, विघ्नेशः, विघ्नराजः, द्वैमातुरः, गणाधिपः, एकदंतः, हेरंबः, लंबोदरः, गजाननः, गजास्यः, गजदंतः.

Gang, *s.* गणः, संघः, निवहः; *See* **Collection.**

Ganges, *s.* गंगा, मंदाकिनी, वियद्गंगा, स्वर्णदी, सुरदीर्घिका, जाह्नवी, जह्नुतनया-कन्या, भागीरथी, अमरापगा, सुरनदी, त्रिस्रोतस् *f.*, त्रिपथगा.

Ganglion, *s.* शिरास्फोटः.

Gangrene, *s.* पूतिमांसं; मांसपाकः; कोथः. *-v. i.* कोथीभू 1 P, पूतीभू.

Gangway, *s.* आरोहावरोहपथः.

Gaol,-er, *See* **Jail,-er.**

Gap, *s.* छिद्रं, भंगः, विच्छेदः, भेदः, रंध्रं, छेदः, विवरं, गर्तः-र्ता.

Gape, *v. i.* वि-प्र-जृंभ् 1 A; जभ्-जंभ् 1 A, मुखं व्यादा 3 A. **2** वि-,दल् 1 P, स्फुड् 1 P. *-s.*, **-ing,** *s.* जृंभः-भा, जृंभणं, जृंभिका, जृंभितं, हर्मन् *n.*, हाफिका, मुखव्यादानं. **-ing,** *a.* जृंभिन्, जृंभित, व्यात्तमुख.

Garb, *s.* वेशः-षः, वस्त्रं, वसनं, वाससं *n.*, परिधानं, प्रसाधनं; 'putting on the g. of virtue' धर्मकंचुकप्रवेशिनः (S. 5).

Garbage, *s.* उच्छिष्टं, मलं.

Garble, *v. t.* साचीकृ 8 U; सत्यं गुह् 1 U, विकृ, वक्रीकृ.

Garden, *s.* उद्यानं, उपवनं; 'g. near a house' गृहारामः, निष्कुटः, गृहवाटिका; 'pleasure-g.' क्रीडोपवनं, आरामः, प्रमदवनं, आक्रीडः; 'flower-g.' पुष्पवनं-वाटः-वाटिका, कुसुमाकरः; 'fruit-g.' फलवृक्षवाटिका; 'vegetable g.' शाकवाटिका, शाकशाकटं, शाकशाकिनं; 'g.-wall' उद्यानपरिसरः-प्राकारः. **-er,** *s.* उद्यानपालकः-रक्षकः, मालाकारः, मालिकः, मालिन् *m.* **-ing,** *s.* उद्यानकर्मन् *n.*, उद्यानसेवनं-कर्षणं, फलोत्पत्तिकर्मन् *n.*

Gargle, *v. i.* (जलं) आचम् 1 P, उप-स्पृश् 6 P, जलेन मुखं मृज् 2 P or धाव् 1 P. *-s.* आचमनीयं, आचाम्यं.

Garish, *a.* *See* **Gairish.**

Garland, *s.* माला, स्रज् *f.*, माल्यं, आपीडः; शेखरः, हारः; 'g. worn in the hair' गर्भकः; 'g. hanging from the crest' प्रभ्रष्टकं, शिखालंबि माल्यं; 'g. worn straight' प्रालंबः-बिका; 'g. worn sideways' वैकक्षिकं; 'g. of pearls' हारः, मुक्तावली, मौक्तिकसरः.

Garlic, *s.* ल(र)शुनं, रसोनः-नकः, महौषधं, गृंजनं, अरिष्टः, महाकंदः, सोनहः.

Garment, *s.* वस्त्रं, वाससं *n.*, वसनं, पटः, परिधानं, परिच्छदः, अंबरं, प्रच्छादनं; वेशः-षः; 'under or lower g.' अंतरीयं, अधोंशुकं, उपसंव्यानं, परिधानं, अधोवाससं *n.*-वस्त्रं; 'upper g.' उत्तरीयं, प्रावा(व)रः, उत्तरासंगः, बृहतिका, संव्यानं; 'g. as a protection from wind and cold' नीशारः.

Garner, *s.* कुशू(सू)लः, धान्यागारं, धान्य, कोष्ठः, कंडोलः-लकः; पिटः. *-v. t.* कंडोले निविश् c. or नि-धा 3 U.

Garnet, *s.* रक्तमणि *m.*

Garnish, *v. t.* भूष् 10, मंड् 10, अलंकृ 8 U, परिष्कृ, शुभ् c. *-s.*, **-ment,-Garniture,** *s.* प्रसाधनं, भूषणं, अलंकारः, मंडनं, आभरणं; उपकरणानि (pl.), सज्जा.

Garret, *s.* शिरोगृहं, चंद्रशाला, अट्टः, अट्टालः.

Garrison, *s.* दुर्गरक्षकाः (pl.); दुर्गसैन्यं-बलं; रक्षिणः-रक्षकाः (pl.); रक्षिवर्गः. *-v. t.* रक्षा; पुरुषैः युज् 10, (दुर्गे) रक्षिणः निविश् c. or स्था c. (स्थापयति).

Garrulous, *a.* अतिवक्तृ, वावदूक; बहुभाषिन्-वादिन्, वाचाल, वाजाट, जल्पाक, मुखर. **-ness,Garrulity,** *s.* वाचालता, वावदूकता, अतिवादः, बहुभाषित्वं, अतिजल्पनं.

Garter, *s.* पादावरणबंधनी, जंघाबंधनी.

Garth, *s.* अंगणं, प्रांगणं. **2** उपवनं. **3** धरणः.

Garuda, *s.* गरुडः, गरुत्मत् *m.*, तार्क्ष्यः, वैनतेयः, खगेश्वरः, नागांतकः, विष्णुरथः, सुपर्णः, पन्नगाशनः, भुजगदारणः, भुजगरिपुः.

Gas, *s.* वायुः. **-eous,** *a.* वायुरूप.

Gash, *s.* दीर्घच्छेदः, दीर्घ-गंभीर-क्षतं.

Gasometer, *s.* वायुमापनयंत्रं.

Gasp, *v. i.* कृच्छ्रेण श्वस् or अन् 2 P, दुःखेन श्वस्, स्थूलस्थूलं निश्वस्. *-s.* उच्छ्वासः, निश्वासः, कृच्छ्रोच्छ्वासः, कष्टश्वासः.

Gastric, *a.* जाठर (री *f.*), उदरीय, जठरीय; उदर-जठर in comp.; 'g. juice' जठराग्निः.

Gastronome, *s.* औदरिकः, उदरंभरिः, कुक्षिंभरिः, उदरपरायणः; *See* **Glutton.** **-Gastronomy,** *s.* उदरपरायणता, उदरसेवा.

Gate, *s.* द्वारं, प्रतिहारः, द्वार् *f.*; 'g.-way' तोरणः-णं, गोपुरं; निर्गमः, द्वारपथः; for other comps.; *See* **Door.**

Gather, *v. t.* चि 5 U, सं-अव-प्र-आ-°; समाहृ 1 P, समा-नी 1 P, संग्रह् 9 P, सं-भृ 1, 3 U, एकीकृ 8 U; *See* **Collect**; 'g. flowers' पुष्पाणि चि or लू 9 U. **2** ज्ञा 9 U, अनु-मा 3 A, 2 P, ऊह् 1 A, अवगम् 1 P. **3** उद्-वृ 5 U, उद्धृ 1 P. **-***v. i.* संगम् 1 A, सं-इ 2 P, संमिल् 6 P, सन्नि-पत् 1 P, एकत्र मिल्, एकस्थ *a.* भू 1 P, एकीभू **2** उपचि pass., प्र-वि-वृध् 1 A, एध् 1A. **3** पूयं बंध् 9 P, पूय् 1 A. **-***s.* पुटः, चूणः. **-er,** *s.* अवचायिन् *m.*, संग्राहकः; 'g. of taxes' शौल्किकः, करग्राहकः. **-ing,** *s.* चयः, अव-सं-चयः, संग्रहणं. **2** समूहः, गणः, संघः, समागमः, निवहः, संघातः; जनसमूहः, लोक-निवहः-संघः.

Gaud, *s.* बाह्यशोभा. **-y,** *a.* उज्ज्वल, शोभन, नानावर्ण, चित्र; 'having a g. dress' उज्ज्वलवेशधारिन्, आर्य-उदार-नेपथ्यभृत् **-***s.* **Festival,** q. v. **-ness,** *s.* अतिशोभा, औज्ज्वल्यं, चित्रता, नानावर्णता.

Gauge, *See* **Measure.**

Gaunt, *a.* क्षाम, कृश, क्षीण, शुष्कमांस, क्षुत्क्षाम, कृश-क्षीण-देह.

Gauntlet, *s.* हस्तत्राणं; 'throw down the g.' युद्धार्थं आह्वे 1 A; 'take up the g.' युद्धाह्वानं स्वीकृ or उरीकृ 8 U.

Gawk, *s* मूर्खः; *See* **Fool. 2 Cuckoo,** q. v.

Gawky, *a.* स्थूल-दीर्घ-देह, स्थूल.

Gay, *a.* प्रमोदिन्, प्रहृष्ट, आनंदित, उल्लासित, प्रमुदित, सानंद, प्रफुल्ल, अनुत्सुक, सोल्लास. **2** विलासिन्, परिहासशील, विनोदन-शील-पर, केलिपर. **3 Gaudy,** q. v. **-Gaiety,** *s.* प्रमोदः, उल्लासः, प्रहर्षः, आनंदः, आह्लादः. **2** उत्सवः; *See* **Festival. -Gaily,** *adv.* सहर्षं, सोल्लासं, सानंद, प्रफुल्लतया. **2** उज्ज्वलं, शोभनं.

Gaze, *v. i.* निर्-ईक्ष् 1 A, निर्वर्ण् 10, निध्यै 1 P, बद्ध-स्थिर-दृष्ट्या दृश् 1 P or आलोक् 1 A, 10; दृष्टिं or लक्षं बंध् 9 P. (loc.); 'g. ing up to heaven' नभोदत्तदृष्टिः; 'g. ing in all directions दिक्षु दृष्टिं क्षिप्त्वा. *s.* निरीक्षणं, निर्वर्णनं, आ-अव-लोकनं; दृष्टि *f.*, प्रेक्षणं, दर्शनं; बद्ध-स्थिर-अनिमेष-दृष्टिः; 'with a fixed g.' अनिमेषनयन, बद्ध-दृष्टि *a.*

Gazelle, *s.* मृगः, हरिणः.

Gazette, *s* वार्ताहरः, वार्तापत्रं.

Gear, *s.* उपकरणं, सामग्री, सज्जा, प्रसाधनं. **2** कार्यं, व्यापारः; 'out of g.' विलग्न, असंगत, असंबद्ध.

Gelatinous, *a.* सांद्र, श्लीन, श्यान, संलग्नशील.

Geld, *v. t.* वृषणौ छिद् 7 P or कृत् 6 P or उत्पद् 10. **-ing,** *s.* छिन्नमुष्कः (अश्वः).

Gelid, *a.* अतिशीत, हिम, शिशिर.

Gem, *s.* रत्नं, मणि *m. f.* **2 Bud,** q. v. **-***v. t.* रत्नैः शुभ् c. **-med,** *a.* रत्नखचित, मणिभूषित, रत्नानुविद्ध. **-my,** *a.* मणिमय (यी *f.*), रत्नभासिन्, रत्नोज्ज्वल.

Gemmate, *a.* मुकुलित, बद्धपल्लव.

Gemini, *s.* मिथुनं, द्वंद्वं, युगं, युगुलं, युग्मं, द्वयं, यमकं-लं; यमौ, यमजौ- लौ. **-Geminate, -Geminous,** *a.* द्विगुण, द्विरावृत्त, द्विक; यम, यमज-ल.

Gender, *s* लिंगं, प्रकृति *f.* **-***v. t.* **Beget,** q. v. **-***v. i.* **Copulate,** q. v.

Geneology, *s.* वंशावलि-ली *f.*, वंशक्रमः, वंश-श्रेणी-परंपरा-वृक्षः; oft. ex. by वंशः, अन्वयः. **-ical,** *a.* (*s.*) in comp. **-ist,** *s.* अन्वयज्ञः, वंशक्रमज्ञः, वंशावलिरचकः.

General, *a.* सामान्य, साधारण, सर्वजनीय-न, सार्वत्रिक-सार्वलौकिक-औत्सर्गिक- (की *f.*), सर्व-बहु-सामान्य, व्यापक, सर्वव्यापिन्, अविशेषक, प्रायिक, सर्वत्र प्रचलित; 'a g. rule' उत्सर्गः; 'a g practice' लोकाचारः, जनरूढि *f.*, जनव्यवहारः, लोकः; 'against g. practice' लोकविरुद्धं; 'g. opinion' बहुमतं; 'g. reader' चुंबकः. **-***s.* सेनापतिः, सेनाध्यक्षः, चमूपतिः, सेनानीः, बलाध्यक्षः-नायकः. **-ity,** *s.* बहुतरभागः, मुख्यांशः, प्रधानभागः; better by 'g. ly' 'the g. of beasts' प्रायः सर्वे पशवः. **2** सामान्यता, साधारण्यं. **-ize,** *v. t.* जातीः निर्दिश् 6 P, जातिशः गणीकृ 8 U, साधारणधर्मं प्रदृश् c., वर्गीकृ. **2** सामान्यतः वद् 1 P, उत्सर्गरूपेण कथ् or निरूप् 10. **-ization,** *s.* जातिनिर्देशः, गणीकरणं, सामान्यधर्मकथनं, सामान्यवादः. **-ly,** *adv.* 'in g.' प्रायः, प्रायेण, प्रायशः, सामान्यतः, बहुशः, भूयसा, भूयिष्ठं, साधारण्येन; oft. ex. by हि. **-ness,** *s.* व्यापकत्वं, सामान्यता. **-ship,** *s.* सैनापत्यं, सेनाध्यक्षत्वं. **2** रणकौशलं, युद्धनैपुण्यं, बलविन्यासकौशलं.

Generate, *v. t.* उत्पद् c, प्र-सू 2, 4 A, आवह् 1 P, सं-उद्-भू c., जन् c. (जनयति); *See* **Cause** also. **-ion,** *s.* उत्पादनं, प्रसवः, जननं, जन्मन् *n.*, उत्पत्ति *f.*, प्रसूति *f.*, संभवः, उद्भवः. **2** अन्वयः, कुलं, वंशः, जाति *f*, संतानः, संतति *f.* **3** पुरुषाः, पुरुषपरंपरा, वंशश्रेणी; 'former g. s' पूर्वे पुरुषाः; 'a pair, one g. removed from the creator' स्रष्टुरेकांतरं द्वंद्व (S. 7). **4** समकालीनपुरुषाः. **-ive,** *a.* उत्पादक, जनक; 'g. órgan' उपस्थः योनि *f.* **-or,** *s.* जनयितृ *m.*, जनकः-उत्पादकः, जन्मप्रदः-दातृ *m.*

Generic,-al, *a.* जातिगत, सामान्य, साधारण, व्यापक, वर्गीय; 'g. property' जातिधर्मः,

-लक्षणं-स्वभावः, जातित्वं, सामान्यधर्मः-लक्षणं. **-ally,** *adv.* जातिमुद्दिश्य, सामान्यतः.

Generous, *a.* उदार, वदा(द)न्य, त्यागशील, अवदात, दानशील, दानरत, दानशौंड, स्थूललक्ष्य, बहुप्रद. **2** महात्मन्, उदारधी-चेतस्, महामनस्, उदारचरित, महेच्छ, महाशय. **3** कुलीन, महाकुल, अभिजात. **-ness, -Generosity,** *s.* औदार्यं, त्यागिता, त्यागः, दानशीलं, वदान्यता. **2** उदारात्मता, महात्मता, माहात्म्यं.

Genesis, *s.* उत्पत्ति *f.*, आदि *m.*

Genial, *a.* सुखप्रद, आनंदद, सुखावह, रम्य, रमणीय, मनोहर-रम, रुचिर, प्रसन्न, सुखकर (री *f.*), उत्साहवर्धक, जीवद. **2** प्रसवकारिन्, जनक. **3** प्रसन्नचित्त, सोल्लास, उदार. **-ly,** *adv.* प्रसन्नं, सानंदं, सहर्षं, सोल्लासं, प्रफुल्लं. **-ness,** *s.* रम्यता, उल्लासः, प्रसादः, प्रसन्नता.

Geniculated, *a.* ग्रंथिल.

Genie, *s.* भूतः, पिशाचः.

Genital, *a.* जननसंबंधिन्, जनन in comp.; 'g. organ' जननेंद्रियं, उपस्थः, योनि *f.*, शिस्नं.

Genitive, *s.* षष्ठी विभक्तिः.

Genitor, *See* **Generator.**

Genius, *s.* धीशक्ति *f.*, मति *f.*, बुद्धि *f.*, धीः, मति-बुद्धि-प्रभावः-सामर्थ्यं, मतिप्रकर्षः. **2** धीसंपन्नः, धीमत् *m.*, धीशक्तियुतः, गुणवत् *m.* **3** कल्पना-निर्माण-शक्तिः. **4** प्रकृति *f.*, स्वभावः, शीलं. **5** लक्षणं, विशेषचिह्नं, वृत्ति *f.*, स्वधर्मः. **6** भूतः, पिशाचः, वेतालः; *See* **Demon;** 'dramatic g' नाट्यशक्तिः-कल्पना; 'good g.' सुदैवं; 'evil g.' दुर्दैवं.

Genteel, *a.* विनीत, दक्षिण, सभ्य, सुजन, सुशील, आर्य, आर्य-साधु-वृत्त, शिष्टाचार, आर्यचरित, सदाचार. **2** कुलीन, अभिजात, कुलोत्पन्न. **3** चारु, ललित, सुभग. **-ly,** *adv.* आर्यवत्, सुजनवत्. **-ness, -Gentility,** *s.* विनयः, दाक्षिण्यं, आर्यता, सौजन्यं, सुशीलता, सभ्यता, साधुता. **2** आभिजात्यं, कुलोत्कर्षः. **3** ललित्यं, चारुता.

Gentian, *s.* किरातः, चिर(रा)तिक्तः, भूनिंबः, हिमकः, किराततिक्तः, अनार्यतिक्तः.

Gentile, *a., s.* अन्य-भिन्न-देशीय, देवार्चक. **2** सगोत्र, गोत्रज, ज्ञातीय.

Gentle, *a.* भद्र, कल्याण (णी *f.*), शिव, सुख. **2** कोमल, मृदु, मसृण, अपरुष, सुकुमार, अचंड, मृदुल, मंद, सौम्य; 'a g. laugh' मंदस्मितं, ईषद्धासः; 'g. breeze' मंदानिलः, मृदुपवनः; 'g. means' सामोपचारः, सामन् *n.*, मृदूपायः; 'g. words' प्रिय-मृदु-वचनं. **3** महाकुल, कुलीन, अभिजात, सुजन्मन्, साधु-आर्य-वंशज, कुल in comp.; 'a girl of g. blood' कुलकन्यका कुलप्रसूता. **4** (In addressing) अयि, भद्र, सौम्य, आर्य; 'g. lightning' अयि विद्युत्; 'g. folk' आर्यमिश्राः, आर्याः, साधुजनाः. **5** शांत, दांत. **-ness,** *s.* मृदुता, कोमलता, सौम्यता, सौकुमार्यं, मंदता; 'g. of manners' आचारसौजन्यं, आर्यवृत्तिः. **-Gently,** *adv.* मृदु, सदयं, अजातव्यथं, यथासुखं; 'shall rub g. यथासुखं संवाहयामि (S. 3). **2** मंदं मंदं, शनैः शनैः, शनैः, अपरुषं, अचंडं. **3** निभृतं, अलक्षितं, मंदं. **-Gentleman,** *s.* आर्यः, सुजनः, साधुजनः, आर्यवृत्तः, कुलीनः; सुविनीतः, महाजनः, आर्य-कुलीन-जनः, भद्रः, महानुभावः; oft. by श्री in comp. **-like, -ly,** *a.* सभ्य, विनीत, शिष्ट, सुशील, आर्य; 'g. manner' आर्यवृत्तिः, सौजन्यं; 'in a g. manner' नागरिकवृत्त्या (S. 5).

Gentry, *s.* विशिष्टजनाः, आर्याः, आर्यलोकाः-जनाः, कुलीनवर्गः-जनाः, सुजनता.

Genuflect, *v. t.* जानुं नम् c. **-ion,** *s.* जानुभ्यां आनतिः *f.*, जानुनतिः.

Genuine, *a.* अकृतक, अकृत्रिम, अकाल्पित, निर्व्याज, निर्व्यलीक, अकपट, निष्कपट, अवितथ, सत्य, यथार्थ. **-ly,** *adv.* सत्यं, निष्कपटं, निर्व्याजं. **-ness,** *s.* सत्यता, यथार्थता, निर्व्याजत्वं, अकृत्रिमता.

Genus, *s.* जाति *f.*, गणः, वर्गः.

Geography, *s.* भूगोलविद्या-शास्त्रं, भूपृष्ठविद्या. **-er,** *s.* भूगोलशास्त्रज्ञः, भूपृष्ठविद्याज्ञः. **-ical,** *a.* भूगोलशास्त्रविषयक.

Geology, *s.* भूतत्त्वं, भूगर्भशास्त्रं, भूतत्त्वविद्या. **-ical,** *a.* भूतत्त्वविषयक. **-ist,** *s.* भूतत्त्वज्ञः.

Geometry, *s.* ज्यामिति *f.*, रेखागणना-गणितं, भूमितिः. **-ic, -ical,** *a.* (*s.*) in comp.; 'g. proof' रेखागणितेन उपपत्तिः. **-ician,** *s.* भूमितिज्ञः.

Georgic, *s.* कृषि-काव्यं-गीतं.

Germ, *s.* अंकुरः, अभिनवोद्भिद् *m.* **2** बीजं, मूलं, योनि *f.*, आदिः, प्रभवः बीजकारणं. **-Germinate,** *v. i.* उद्भिद् pass., प्ररुह् 1 P, स्फुट् 6 P, विकस् 1 P. **-ing,** *a.* उद्भिद्-द्-ज्ज, अंकुरित. **-ion,** *s.* उद्भेदः, स्फुटनं.

Germane, *a.* सनाभि, संपर्किन्, संपृक्त.

Gestation, *s.* गर्भ-धारणं-वहनं-पोषणं; गर्भिणीभावः.

Gesticulate, *v. i.* अंगानि विक्षिप् 6 P or संचल् c. **-** *v. t.* अभि-नी 1 P, नि-,रूप् 10, सूच् 10, नट् 10; *See* **Act. -ion,** *s.* अभिनयः; अंगविक्षेपः, चेष्टा, सूचना, अंगहारः, हावः, संकेतसूचनं. **-or,** *s.* अंगविक्षेपकः.

Gesture, *s* चेष्टा, व्यापारः, इंगितं, भावः, अभिनयः, विलासः, विभ्रमः, अंगविक्षेपः, हावः; हस्तादिचालनं

Get, *v. t.* लभ् 1 A, आप् 5 P, अर्ज् 1 P or c., आ-समा-सद् c., विद् 6 U, प्रति-आ-पद् 4 A, अश् 5 A, अधिगम् 1 P, ग्रह् 9 U, आ-दा 3 A. **2** (To be produced) जन् 4 A, उत्पद् 4 A, सं-उद्-भू 1 P, प्र-सू 2, 4 A, (with genitive of person); ' I have got a pain in my teeth ' दंतपीडा मे उत्पन्ना-जाता. **3** धृ 1 P, 10, भृ 3 U; धा 3 U; ' I have got that book with me ' तत्पुस्तकं मत्सकाशे वर्तते; *See* **Bear** also. **4** (Cause) ex. by causal; ' g. it done by him ', तं तत्कारय; oft. by अनुनी 1 P, प्रोत्सह् c., प्रवृत् c.; ' g. ahead ' अग्रेसरीभू; ' g. clear of ' मुच् pass.; ' g. rid of' आत्मानं मुच् c., (with abl.) by निर् in comp. ; ' g. abroad ' प्रसृ-प्रसृप् 1 P, बहुलीभू 1 P: *See* under **Abroad.** **-among,** मध्ये प्रविश् 6 P or गम्. **-at,** प्राप्, आगम्, आ-या 2 P, उप-स्था 1 U. **-away,** अपसृ 1 P, अप-इ 2 P, अपक्रम् 1 U, 4 P; चल् 1 P, अप-या गम्; ' g. away, you fool ' अपेहि रे मूर्ख. **-back,** प्रतिलभ्, प्रत्या-दा, &c. **-beyond,** तृ 1 P, अति-इ, अतिक्रम्. **-down,** अवतृ, अवरुह् 1 P, अधो गम्, नि-अव-पत् 1 P; (*v. t.*) अवतृ c., अवरुह् c., &c. **-in,** प्रविश् 6 P. **-into,** पत्; संकटे पतितः ' got into troubles' ; आरुह् 1 P (a car &c.); ' he got into debt' ऋणग्रस्तो बभूव; 'g. ing into deep mud ' पंकपूरमासाद्य. **-off,** (*v. i.*) निः-सृ, निर्गम्, अप-या, अप-क्रम्, निस्तृ. **2** अवतृ, अवरुह्; (*v. t.*) निरस् 4 U, अप-नी 1 P. **-on,** प्रवृत् 1 A, प्रचल्, प्र-सृ; ' they long got on well ' चिरं ते सुखेन अवर्तत or कालं निन्युः. **-out,** निर्गम्, अप-इ, निः-सृ. **2** त्यज् 1 P, मुच् 6 P; ' g. out of bed now ' अधुना मुंच शय्यां. **-over, -through,** संतृ; पारं-अंतं-गम्, अतिक्रम्, निस्तृ, तीर् 10; आरुह्. **2** समाप् c.; *See* **Complete.** **-together,** संचि 5 U; सम्-नी, संग्रह्; *See* **Collect.** **-up,** उत्-स्था; प्रबुध् 4 A, शयनं त्यज् 1 P or मुच्; (*v. t.*) सज्जीकृ 8 U, विरच् 10; उपक्लृप् c. **-upon,** अधि-आ-रुह्. **-ter,** *s.* प्रापकः, लब्धृ *m.*, अर्जकः. **-ting,** *s.* लाभः, अवाप्ति *f.*, अर्जनं, अधिगमः-मनं, आगमः, आसादनं.

Gewgaw, *s.* क्रीडनकं, अल्पमूल्यं द्रव्यं or आभरणं. **-***a.* निःसार, बहिरेव मनोहर.

Geyser, *s.* उष्णोदक-निर्झरः-स्रोतस् *n.*

Ghastly, *a.* प्रेत-शव-तुल्य, विवर्ण, शवसरूप-सवर्ण. **2** कराल, विकट, भीम, उग्र, दारुण, भयानक, भीमदर्शन, करालवदन, घोराकृति. **-ness,** *s.* प्रेतसारूप्यं, वैवर्ण्यं; विकटत्वं, दारुणत्वं.

Ghee, *s.* घृतं, आज्यं, हविस् *n.*, सर्पिस् *n.*, तनूनपं.

Ghost, *s.* भूतः, पिशाचः, वेतालः, निशाचरः, प्रेतनरः. **2** आत्मन् *m.*; ' give up the g. ' मृ 6 A; *See* **Die.** **-like,** *a.* प्रेत-भूत-सरूप, प्रेततुल्य. **-ly,** *a.* भूतविषयक-संबंधिन्. **2** पारत्रिक (की *f.*), आत्मविषय, पारमार्थिक (की *f.*).

Giant, *s.* महापुरुषः, विकटविग्रहः, बृहच्छरीरः, भीमविग्रहः, बृहत्कायः, अतिशक्त्युपेतः, राक्षसः. **2** दैत्यः, दानवः; *See* **Demon.** **-***a.*, **-like,** *a.* अतिस्थूल, प्रकांडदेह, स्थूल-प्रमाण, अतिमहत्, बृहत्काय, महाशरीर, विकट. **-ess,** *s.* राक्षसी, बृहच्छरीरा. **-Gigantic,** *a.* अतिमानुष (षी *f.*), राक्षस-परिमाण, भीमविग्रह, अतिमहत्-बृहत्, स्थूलकाय, विकट.

Gibber, *v. i.* *See* **Babble.** **-ish,** *s.* असंबद्धवचनं, प्रलापः, प्रजल्पितं, मृषार्थक वाक्यं. **-***a.* मृषार्थकं, अनर्थकं.

Gibbet, *s.* वध्यकाष्ठं-शिला, वध-घात-स्थानं. **-***v. t.* वधं आदिश् 6 P, उद्-बंध् 9 P.

Gibbous, *a.* न्युब्ज, वक्र, आभोगवत्, बिंबाकार.

Gibe, *See* **Abuse.**

Giddy, *a.* भ्रमिन्, भ्रामररोगिन्, विभ्रांत, भ्रमणशील; better ex. by भ्रम् 1, 4 P. **2** भ्रमकारिन्, मत्त, उन्मादिन्. **3** (Fig.) चपल, चचल, लोल, अस्थिर; *See* **Fickle.** **4** उद्धत, उन्मत्त, उत्सिक्त, गर्वित. **-ly,** *adv.* अविचार्य, लौल्यात्, चापल्येन. **-ness,** *s.* भ्र(भ्रा)मरं, भ्रमः-मि *f.*, घूर्णनं, घूर्णि *f.* **2** चापल्यं, लौल्यं, अस्थैर्यं, &c.

Gift, *See* under **Give.**

Gig, *s.* भ्रमरं. **2** लघुयानं-रथः. **3** क्षुद्र-लघु-नौका.

Giggle, *v. i.* मूर्खवत् हस् 1 P.

Gild, *v. t.* स्वर्णेन रंज् c., हेमरसेन-द्रवेण लिप् 6 P, सुवर्णयति (D.); बाह्यतेजसा रंज् c. **2** प्रकाश् c., विद्युत् c., विराज् c. **-ing,** *s.* स्वर्णरंजनं, स्वर्णच्छदः.
-ed,-Gilt, *a.* सुवर्णित, हेमरसखचित, स्वर्ण-मंडित, स्वर्णप्रतिबद्ध. **2** रंजित, विराजित.

Gill, *s.* श्वासेंद्रियं, अधोगंडः.

Gimcrack, *s.* क्रीडनकं, क्रीडावस्तु *n.*

Gimlet, *s.* वेधनिका, आस्फोटनी.

Gin, *s.* **Liquor,** q. v. **2** पाशः, उन्माथः, कूटयंत्रं, बंधनं, वागुरा.

Ginger, *s.* आर्द्रकं, शृंगवेरं, गुल्ममूलं; 'dry g.' शुंठि-ठी *f.*, विश्वं-श्वा *f.*, नागरं, विश्वभेषजं, महौषधं; ' g. beer or wine ' आर्द्रकासवं-आर्द्रकमद्यं-पानं; ' g.-bread ' आर्द्रकापिष्टक

Gingerly, *adv.* असहसा, सावधानं, शनैः.
Gingle, *See* **Jingle.**
Gipsy, *s.* यक्षिणी, विप्रश्निका, ईक्षणिका.
Giraffe, *s.* चित्रोष्ट्रः.
Gird, *v. t.* परि-अधि-वेष्ट c., परि-वृ 5 U or c. **2** आ-बंध् 9 P, परि-धा 3 U, सं-पि-नह् 4 P; 'g. round the body' शरीरं प्रावृ or आ-च्छद् 10, परि-बंध् or परि-धा; 'g. up one's loins' परिकरं बंध्; 'girt by the (golden) lightning, as by a yellow garb' विद्युत्प्रभाराचितपीतपटोत्तरीयः(Mr. 5). **-s.** *See* **Cramp. -ed, -Girt,** *a.* बद्ध, आनद्ध, परिवेष्टित, परिवृत; वलय-मेखला-रसना in comp.; 'sea-g. earth' समुद्र-रसना-उदधिवलया-पृथ्वी.
Girdle, *s.* मेखला, रश(स)ना, कांचि-ची *f.*, सस्की, सारसनं (of women); कटिसूत्रं, कटिवलयं, कक्ष्या-क्षा, परिकरः, कटिबंधनी, शृंखलः-ला-लं (of men). **2** वेष्टनं, परि-आ-वेष्टनं, मंडलं, वलयः-यं, चक्रवालं., **3** राशिचक्रं. **-***v. t.* परि-वेष्ट c., परि-वृ 5 U, मेखलया बंध् 9 P; *See* **Gird.**
Girl, *s.* कन्या, बाला, बालिका, कुमारी, दारिका, बालः, *See* **Daughter** also; one born from a g.' कानीनः, कन्यकाजातः. **-hood,** *s.* बालभावः, बाल्यं, कुमारीत्वं. **-ish,** *s.* कन्यानुरूप, बालेय.
Girth, *s.* वरत्रा, नध्री, वध्री; दू(चू)ष्या, कक्षा-क्ष्या.
Gist, *s.* फलितार्थः, निष्कर्षः, भावः, फलितं, परमार्थः, पिंडितार्थः.
Give, *v. t.* दा 1 P, 3 U, ऋ c. (अर्पयति), प्रतिपद् c., दद् 1 A, विश्रण् 10, उत्-वि-सृज् 6 P, (with dat. of person); निक्षिप् 6 P, संक्रम् c. (with loc.); त्यज् 1 P, दिश् 6 P. **2** (Produce) ex by भू 1 P, संपद् 4 A, जन् 4 A; '3 repeated 2 times g. s 6' द्विरावृत्तास्त्रयः षड् भवंति-संपद्यंते 'g. chase' अनुसृ-अनुधाव् 1 P; 'g. ear' अव-धा 3 U, कर्णे दा, श्रु 5 P; 'g. ground' अपक्रम् 1 U, 4 P; अपसृ, परा-नि-वृत् 1 A; त्यक्त्वा गम् 1 P; 'g. one's self up to' सेव् 1 A, भज् 1 A; आसंज् pass., आसक्त-निरत-निविष्ट-*a.* भू, (with loc.); 'g. offence' अपराध् 4, 5 P, विप्रिय-प्रतिकूलं-कृ 8 U or आचर् 1 P; 'g. utterance' उदीर् 10, उच्चर् c., उदाहृ 1 P **-away,** (in marriage) प्रतिपद् c., उत्सृज्, प्र-दा. **2** विश्रण्, दानेन क्षै c. (क्षपयति). **-back,** प्रतिदा, प्रति-ऋ c., निर्यत् 10. **-forth,** प्रथ् 10, प्रकाश् c., निविद् c., ख्या c. (ख्यापयति). **-in,** अनुमन् 4 A, अनुमुद् 1 A; स्वाग्रहं त्यज्. **-off, Abandon,** q. v. **-out,** निविद् c., प्रकाश् c, घुष् 10, प्रख्या c. **2** मुच् 6 P, विसृज्, उद्वम् 1 P उद्-गृ 6 P, निःसृ c. **-over,** त्यज्, उत्सृज्, निवृत् 1 A, विरम् 1 P, (with abl.). **2** असाध्य *a.* इति मत्वा त्यज्; आशां त्यज्; (*v. i.*) शम् 4 P, पत् 1 P; 'when the winds g. over' शांते पवने. **-up,** त्यज्, हा 3 P, उत्-वि-सृज्. **2** निवृत्, विरम्; 'g. up for lost' नष्टप्राय *a.* मन् 4 A. **-way,** शम् 4 P, निवृत्, विरम्, शिथिलीभू. **2** भंज् pass., अवसद् 1 P; 'the cord gave way' रज्जुर्भग्ना; 'the wall gave way' भित्तिरवसन्ना. **3** अव(प)सृ, अप-इ, मार्गं दा or त्यज्, अपक्रम्, अप-या. **4** वशं गम्-इ-या, अधीन-वश-आयत्त *a.* भू; 'do not g. way to grief' शुचो वशं मा गमः, शोकाधीनो मा भूः, वैक्लव्यं मावलंबस्व. **-er,** *s.* दातृ *m.*, त्यागिन् *m.*; gen. ex. by दायक, द, प्रद, दायिन्, in comp.; 'g. of milk' पयोदायिनी, दुग्धप्रदा, &c. **-ing,** *s.* दानं, विसर्जनं, उत्सर्गः, त्यागः, वितरणं, अर्पणं, प्रतिपादनं, विश्राणनं. **-Gift,** *s.* दानं, प्रतिपादनं; *See* above. **2** दानं, उपहारः, उपायनं, उपदा, प्रीतिदानं, प्राभृतं, प्रदेशनं, उपग्राह्यं; 'one deserving a g.' दक्षिणीय, दक्षिणार्ह, दक्षिण्य; 'marriage-g.' यौतकं, सुदायः. **3** गुणः, शक्ति *f.* **-ed,** *a.* उपेत, सं-उप-पन्न, विशिष्ट, युक्त, अन्वित, शालिन् in comp. **2** गुणोपेत, गुणसंपन्न, गुणिन्, गुणवत्.
Glacial, *a.* हिमरूप, हैम (मी *f.*), हिम.
Glacier, *s.* हिमानी, हिमसंहति *f.*
Glacis, *s.* प्रवण-निम्न-भूमि *f.*
Glad, *a.* प्र-,सं-,हृष्ट, आनंदित, प्रीत, सानंद, प्रमुदित, तृप्त, सोल्लास, उल्लसित, प्रसन्न. **2** हर्षजनक, हर्ष-आनंद-कर (री *f.*); नंदक, रमणीय, प्रमोदिन्; 'I am g.' हंत, दिष्ट्या. **-den,** *v. t.* आ-,नंद् c., प्री 9 P, 10; *See* **Delight. -dening,** *a.* हर्षद, प्रीतिप्रद, हर्षकर, प्रमोदिन्. **-ly,** *adv.* सहर्ष, सानंदं, सप्रमोदं, हृष्टमनसा, संतोषेण, प्रीत्या, साह्लादं. **-ness,** *s.* हर्षः, प्रमोदः, आह्लादः, संतोषः, प्रीति *f.*, उल्लासः, चित्तप्रसादः, तुष्टि *f.* **-some,** *See* (*a.*).
Glade, *s.* वन-गुल्मः-पथः-मार्गः, तरुगहनमार्गः.
Gladiator, *s.* असिक्रीडकः, आसिकः, मल्लः. **-Gladiature,** असिक्रीडा-युद्धं.
Glair, *s.* अंडशुक्लं.
Glamour, *a.* *See* 'Enchantment.'
Glance, *s.* दृष्टिपातः, ईक्षणं, वीक्षित, नयनपातः-विक्षेपः, दृक्पातः, आलोकितं; 'side-long g.' नयनोपांतविलोकितं, साचिविलोकितं, अपांग-दर्शनं-दृष्टि *f.*, कटाक्षः; 'at the very first g.' सकृद्दृष्टिपातेन, प्रथममेव; good at the first g.' आपाततो रमणीय, आपातरमणीय. **2** अर्धवीक्षणं,

ईषद्दृष्टिः. 3 स्फुरितं, स्फुरणं, द्युति *f.* -*v. i.* दृष्टिं क्षिप् 6 P, चक्षुः-दृष्टिं *f.*-दा 3U or पत् c. (with loc.); ' g.-ing at the antelope' कृष्णसारे ददच्चक्षुः (S. 1). 2 लघु निर्घृष् 1 P, लघु हत्वा अति-इ 2 P. 3 (जवेन) परिस्फुर् 6 P or विलस् 1 P. **-ingly,** *adv.* लघु, ईषत्, अल्पमात्रं, स्तोकं. 2 दृक्पातेन, तिर्यक्, साचि, कटाक्षेण.

Gland, *s* अधिमांसं, मांसपिंडः, पिंडः.

Glanders, *s.* क्षयथुः.

Glare, *s.* तेजस् *n.*, दीप्ति *f.*, द्युति *f.*, प्रखर-अति-तेजः, अतिप्रभा-द्युतिः-दीप्तिः, नेत्रप्रतिघातिनी प्रभा. 2 उग्रदृष्टि *f.*, क्रोधोद्धदृष्टिः. -*v. i.* संदीप् 4 A, प्रद्युत् 1 A, उज्ज्वल् 1 P, अतितेजसा स्फुर् 6 P or दृष्टिं प्रतिहन् 2 P or संतप् c.; दीप् freq. (देदीप्यते). 2 उग्रदृष्टिं पत् c., कोपेन दृश् 1 P or ईक्ष् 1 A. **-ing,** *a.* संदीप्त, उज्ज्वल, अतिभास्वत्, देदीप्यमान. 2 सुस्पष्ट. सुप्रकाश, प्रत्यक्ष, पुरःस्फुरत्. **-ingly,** *adv.* सुस्पष्टं, सुप्रकाशं.

Glass, *s.* काचः, स्फटिकः, क्षारः. 2 (Cup) चषकः-कं, काचपात्रं-भाजनं. 3 आदर्शः, दर्पणः, मुकुरः. -*a.* काचमय (यी *f.*), काचनिर्मित, काच in comp.; ' g.-blower ' काचधमकः; 'g.-grinder' काचपरिष्कारकः; ' g. house, ' काचनिर्माणशाला-स्थानं; ' g.-man ' काचविक्रयिन् *m.*; ' g.-work ' काचनिर्माणं-कर्मन् *n.* **-like,** *a.* काचोपम, काचतुल्य. **-y,** *a.* स्फटिकोपम, काचवत्स्वच्छ, काचविमल, स्फटिकप्रभ, स्फाटिक (की *f.*), सुप्रसन्न. 2 श्लक्ष्ण, स्निग्ध. **-Glaze,** *v. t.* काचयति (D.), काचेन आच्छद् 10. 2 श्लक्ष्णीकृ 8 U, स्निग्धीकृ, श्लक्ष्णयति (D.), -*s.* स्निग्धता, श्लक्ष्णता, **-Glazier,** *a* काचसंधातृ *m.*, काचबंधकः.

Glaucous, *a.* घनश्याम, मेघनील, समुद्रवर्ण.

Glaze, *v. t. See* under **Glass.**

Gleam, *v. i* परि-,स्फुर् 6 P, विलस् 1 P, क्षणमात्रं प्रकाश् 1 A or उज्ज्वल् 1 P; *See* **Shine** also. -*s.* प्रभा, कांति *f.*, तेजस् *n.*, औज्ज्वल्यं. 2 स्फुरणं, स्फुरितं, क्षणप्रभा-कांतिः, अचिरप्रभा, क्षणज्योतिस् *n.* 3 रश्मिः, करः, किरणः, अंशुः; "not a g. of hope ' न आशालवोपि. **-y,** *a.* क्षण-अचिर-प्रभ, चलद्युति, कंपितप्रभ, क्षणद्योतिन्.

Glean, *v. t.* (bits &c.) उंछ् 6 P, शिल् 6 P, उद्-ध्रस् 9 P or c., अवशेषं चि 5 U or संग्रह् 9 P. 2 संकल् 10 संग्रह्, उद्धृ 1 P. -*s.* धान्यशेषः, शेषधान्यसंचयः. **-er,** *s.* उंछशीलः-वृत्तिः, उंछनकृत् *m.* 2 संग्रहीतृ *m.* **-ing,** *s.* उंछः, शिलं, उंछाशिलं, ऋतं. 2 संग्रहः, संकलनं, उद्धारः.

Glebe, *s.* मृद् *f.*, मृत्तिका; स्थलं-ली, भूमि *f.*

Glee, *See* **Delight.**

Gleet, *s.* इक्षु-मधु-मेहः, मेहविकारः.

Glen, *s.* दरी, कंदरः-रा; अद्रिद्रोणी, उपत्यका.

Glib, *a.* वाक्चपल, त्वरित-द्रुत-वाच्; चपल, लोल. 2 पिच्छिल, मसृण, स्निग्ध, श्लक्ष्ण, चिक्कण. -*v. t* **Castrate,** q. v. 2 श्लक्ष्णीकृ 8 U. **-ly,** *adv* चपलतया, वाक्चापल्येन. 2 श्लक्ष्णं. **-ness,** *s.* वाक्चापल्यं, चापल्यं. 2 श्लक्ष्णता, मसृणता.

Glide, *v. t.* सृप् 1 P, सं-वि-प्र°, प्र-वि-सृ 1 P; मंदं इ-या 2 P or गम् 1 P, शनैः प्रसृ or चल् 1 P: अलक्षितं-निभृतं गम् or या or अति-इ; *See* **Steal.** 2 वह् 1 P, स्रु 1 P; स्यंद् 1 A, री 4 A. **-ing,** *s.* संसर्पः-र्पणं, स्रवणं, निस्यंदः-दनं.

Glimmer, *v. i.* मंदं मंदं ज्वल् 1 P or दीप् 4 A; मंदप्रभया-अचिरप्रभया प्रकाश् 1 A or द्युत् 1 A or स्फुर् 6 P. -*s.*, **Glim,** *s.* मंदप्रभा-तेजस् *n.*, मंद-अचिर-द्युति *f.*, -दीप्ति *f.*, स्फुरणं, स्फुरितं. **-ing,** *a.* मंदप्रभ द्युति, तेजस्, ईषत्स्फुरित, पांडुद्युति-किरण, मंदच्छाय. 2 मंद, असुप्रकाश, अव्यक्त, अस्पष्ट.

Glimpse, *s.* क्षण-मुहूर्त-दर्शनं; ईषद्दृष्टि *f.*, अर्धवीक्षणं, अल्पो दृक्पातः. 2 क्षण-अचिर-प्रभा; *See* **Gleam.**

Glint, *v. i.* प्रकाश् 1 A. -*v. t.* द्युत् c.

Glisten, Glister, *v. i.* स्फुर् 6 P, प्रकाश् 1 A, द्युत् 1 A. **-ing,** *a.* मसृण, चिक्कण, श्लक्ष्ण, स्निग्ध.

Glitter, *v. i.* द्युत्-प्रकाश् 1 A; भास् 1 A, भा 2 P; स्फुर् 6 P; *See* **Shine.** -*s.* दीप्ति-द्युति-रुचि-कांति *f.*, प्रभा, तेजस् *n.*; ज्योतिस् *n.*, वर्चस् *n.*, आभा. **-ing,** *a.* प्रभावत्, उज्ज्वल, भासमान, विद्योतिन्, भासुर.

Gloaming, *s.* संध्या; संध्यासमयः.

Gloat, *v, i.* संतृप् 4 P, संतुष् 4 P; आत्मानं संतृप् c. or संतुष् c., लोभाद् निरीक्ष् 1 A or निर्वर्ण् 10.

Globe, *s.* गोलः-लं; वर्तुलः-लं; मंडलं; चक्रं. 2 भूमंडलं, भूगोलः, क्षितिमंडलं-तलं. **-Globate, -Globular,** *a.* वर्तुल, गोलाकार, गोलाकृति, वृत्त, निस्तल, मंडलाकार, गोल. **-ly,** *adv.* मंडलरूपेण, मंडलवत्, गोलाकारेण. **-Globule,** *s.* बिंदुः, लघुगोलः, गोलकः.

Glomerate, *v. t.* मंडलीकृ 8 U, गोलीकृ, पिंडीकृ.

Gloom, *s.* अंधकारः, तमस् *n.*, तमिस्रं-स्रा, तिमिरं, ध्वांतं; अवतमसं, ईषत्तमः (partial g). 2 निष्प्रभत्वं, विषादः, छाया. -*v. t.* **Darken,** q. v. **-Gloomy,** *a.* सतिमिर, तमोवृत, सांधकार, तिमिरावगुंठित. 2 दुर्दर्शन, मलिनप्रभ, अप्रभ, निष्प्रभ, निरालोक, मलिन. 3 विषण्ण, दीन, अवसन्न, सविषाद, निरानंद, म्लान, खिन्न, उद्विग्न. **-ly** *adv.* निष्प्रभं, सांधकारं. 2 सविषादं, सखेदं, सोद्वेगं. **-ness,** *s.* निष्प्रभत्वं, &c. 2 विषादः, दैन्यं, अवसादः, चित्तोद्वेगः, खेदः, म्लानता, उद्वेगः.

Glory, *s.* कीर्ति *f.*, यशस् *n.*, ख्याति *f.*, विश्रुति *f.* महिमन् *m.*, प्रतापः, ओजस्विता. **2** श्रीः, तेजस् *n.* शोभा, द्युति *f.*; 'g. of youth' यौवनश्रीः. **3** माहात्म्यं, गौरवं, प्रतिष्ठा, पूजा, मानः. **4** प्रशंसा, स्तुति *f.*, श्लाघा, स्तवः, स्तुतिवाक्यं **5** रत्नं, अवतंसः तिलकः, ललामं. **6 Absolution,** q. v.; 'vain g' अहंकारः, विकत्थनं-ना, दर्पः, गर्वः, आत्मश्लाघा; 'g. to you, Oh king' जयतु जयतु देवः; 'g. of victory' जयोदाहरणं. **-v.** *i.* अत्यंतं प्रमुद् 1 A or आनंद् 1 P, उल्लस् 1 P; 'you g. in disobeying your father' पितुरवज्ञानं आत्मगौरवं मन्यसे. **2** विकत्थ् 1 A, दृप् 4 P, आत्मानं श्लाघ् 1 A; 'I do g. in that name' तन्नामधारी कृतिनमात्मानं मन्ये खलु. **-Glorify,** *v. t.* उत्-सं-कृत् 10, प्रशंस् 1 P, श्लाघ्, स्तु 2 U; गुणान् वर्ण् 10 or कृत् or प्रकाश् c., कीर्तिं गै 1 P. **2** स्वर्गं आरुह् c., परमपदं प्राप् c. **-ication,** *s.* गुणवर्णनं-ना, प्रशंसा, स्तुतिवादः, गुणकीर्तनं, यशःख्यापनं. **-Glorious,** *a.* यशस्वत्, कीर्तिमत्, महायशस्, प्रथित, विश्रुत, ख्यात, यशस्विन्, उदग्रयशस्. **2** कीर्तिकर-यशस्कर (री *f.*), श्लाघावह, प्रशस्य. **3** तेजस्विन्, महत्, महोज्ज्वल, श्रीमत्, प्रतापवत्, महोदय, अतिशोभन, ओजस्विन्, सुप्रभ, वर्चस्विन्. **4** विशिष्ट, परम, उत्तम, उत्कृष्ट, प्रशस्ततम, श्रेष्ठ. **-ly,** *adv.* सप्रतापं, कीर्तियुक्तं, परमं, उत्कृष्टं.

Gloss, *s.* टीका, टिप्पनी भाष्यं, व्याख्यानं, वृत्ति *f.*, विवरण. **2** बाह्यशोभा-कांति-रुचि *f.*, बहिराभा, कृत्रिमच्छवि *f.*, कल्पितशोभा. **-v.** *t.* टीकया व्या-ख्या 2 P or वि-वृ 5 U; भाष्यं लिख् 6 P. **2** बाह्यतः शुभ् c.; स्निग्धी-मसृणी-कृ 8 U; बाह्यशोभां दा 3 U or उत्पद् c. **-y,** *a.* स्निग्ध, चिक्कण, श्लक्ष्ण, मसृण. **2** बाह्यप्रभ, बाह्यतः शोभित, आपातरुचिर, बहीरमणीय.

Glossary, *s.* कोशः-षः. शब्दसंग्रहः-कोशः, निघंटुः, अभिधानं, समाम्नायः; पशुसमाम्नायः 'g. of words relating to beasts.' **-ist,** *s.* कोशलेखकः; संकलयितृ *m.*

Glottis, *s.* प्रति-अलि-उप-जिह्वा.

Glove, *s* करच्छदः, हस्तत्राणं-परिधानं, हस्ताच्छादनं.

Glow, *s.* तापः, आतपः, दाहः, उष्मन् *m.*, दीप्ति-द्युति *f*, तेजस् *n.*, उत्तापः. **2** रक्तता, रक्तिमन् *m.*, रागः, अरुणिमन् *m.* **-v.** *i.* दीप् 4 A, प्रकाश् 1 A, ज्वल् 1 P, तप् 1 P, 4 A, दह् pass.; अरुणीभू 1 P, रंज् pass., रक्तीभू; 'g. ing with rage' क्रोधेद्ध, रोषसंतप्त, प्रदीप्तक्रोध; ज्वलन्निव ब्रह्ममयेन तेजसा (K. v. 30) 'as if g. ing with Brahmanic lustre.' **-ing,** *a.* सं-,प्र-, दीप्त, ज्वलित, उत्तप्त, देदीप्यमान, उज्ज्वल, चंड; रक्त अरुण; 'in g. colours' उज्ज्वलरूपेण, हृदयहारितया, हृदयंगम, मनोरम; 'with g. eyes' दीप्ताक्ष *a.* **-ingly,** *adv* तेजसा, उत्तापेन, चंडं, दीप्त्या. **-worm** *s.* खद्योतः, ज्योतिरिंगणः, प्रभाकीटः

Glower, *v. t.* सभ्रूभंगं प्रेक्ष् 1 A.

Gloze, *See* **Flatter.**

Glue, *s.* संश्लेषणद्रव्यं, लेपः. **-v.** *t.* सं-धा 3 U, संश्लिष् c., संयुज् 7 U, 10, संलग्नीकृ 8 U. **-y,** *a.* श्यान, सांद्र, चिक्कण.

Glum, *a.* प्रतीप-वाम-वक्र-शील.

Glut, *v. t.* भक्ष् 10, ग्रस् 1 A, निगृ 6 P, अतिमात्रं तृप् c, अत्यंतं पूर् 10, सौहित्यं जन् c. (जनयति). **-s.** अतितृप्ति *f.*, अतिसौहित्यं, निर्वेदः. **2** अतिरेकः, उद्रेकः, अतिबाहुल्यं, प्राचुर्यं.

Glutinate, *v. t.* लेपेन संश्लिष् c or संयुज् 7 U, 10.

Glutinous, *a.* श्यान, सांद्र, चिक्कण, स्निग्ध, संलग्नशील.

Glutton, *s.* औदरिकः, उदरंभरिः, घस्मरः, आद्यूनः, कुक्षिंभरिः, अत्याहारिन् *m.*: *See* below. **-ous,-ish,** *a.* औदरिक (की *f.*), अत्याहारिन्, बहुभोजिन्, अत्याहारशील, भक्षक, घस्मर, अग्नर, आद्यून, कुक्षिंभरि, उदरंभरि, गृध्नु, लोलुप-भ, अतिलुब्ध, अतृप्त. **-ously,** *adv.* अत्याहारेण, लोलुपतया. **-y,** *s.* अत्याहारः, घस्मरता, गृध्नुता, जिह्वालौल्यं, अतृप्ति *f.*, औदरिकता.

Gnarl, *v. i.* गर्ज् 1 P.

Gnarled, *a.* ग्रंथिल, ग्रंथि-पर्व-विशिष्ट.

Gnash, *v. t.* (The teeth) दंतैर्दंतान् निष्पीड् 10 or विघट्ट c. or घृष् 1 P, निष्पिष् 7 P, or सं-दंश् 1 P, क्ष्विड् 1 P. **-ing,** *s.* दंतनिष्पेषः-घर्षणं, क्ष्वेडनं.

Gnat, *s.* मशकः, दंशः, प्राचिका, वनमक्षिका.

Gnaw, *v. t.* दंश् 1 P, चर्व् 1 P or c., अल्पशः भक्ष् 10 or खाद् 1 P; चर्वणेन कृत् 6 P. **-ing,** *s.* चर्वणं, दंशनं.

Gnome, *s.* सूक्तिः. **2** भूतः, पिशाचः

Gnomon, *s.* शंकुः; कीलः-लकः.

Go, *v. i.* गम् 1 P, या- इ 2 P, व्रज् 1 P, चल्-चर् 1 P, पद् 4 A, ऋ 1, 3 P; सृ 1, 3 P; क्रम् 1 U, 4 P; (as water) वह् 1 P, स्रु 1 P, स्यंद् 1 A. **2** (Fare) वृत् 1 A, स्था 1 P; 'how g. es it with her' कस्तस्या वृत्तांतः. **3** (As prospective future) ex. by fut. part., मनः or काम with inf. or desid. forms; *See* **About;** 'g. astray' भ्रम् 1, 4 P; उत्पथं या, सन्मार्गात् च्यु 1 A or भ्रंश् 1 A, 4 P; उत्क्रम्, अति-व्यभि-चर्; 'g. on foot' पद्भ्यां व्रज्; 'g. on horse-back' अश्वेन संचर्; 'as the story g. es' किल,

'g. for nothing' (go to dogs) विफलीभू; 'g. to bed' शय्यां भज्-सेव् 1 A; 'she is far gone in love' दूरगतमन्मथा सा (S. 3), अतिभूमिं गतोस्या अनुरागः; 'g.- between' मध्यस्थः, मध्यपुरुषः; (female g.) शंभली, कुट्टिनी; सुरतदूती; 'g. by' निर्गमः, पलायनं, व्यपदेशः; 'g.-cart' क्रीडाशकटः. **-about.** परिगम्-इ &c. **2** यत् 1 A, उद्यम् 1 A, व्यव-सो 4 P, आरभ् 1 A, उपक्रम् 1 A. **3** अनुष्ठा, वि- धा 3 U, *See* **Execute.** **-away,** अप-इ-सृ-क्रम्-गम्-या-सृप्, प्र-इ, स्था 1 A. **-between,** मध्ये स्था or वृत्, अंतः-इ. **-by,** अति-इ, समीपतः गम्. **2** अनुगम्, अनुवृत्, अनुरुध् 4 A, अनु-सृ; 'he g.-es by the name of' इति ख्यातः or ज्ञातः; उमाख्यां सुमुखी जगाम (K. I. 26) 'went by the name of' &c. **-down,** अधो गम्. **2** अस्तं गम्-या; (fig.) नाशं-क्षयं-या; प्र-ली 4 A, ध्वंस् 1 A. **-forth,-forward,** निर्गम्, निःसृ-क्रम्, प्र-सृ, प्र-स्था, प्र-या. **-in,** प्र-आविश् 6 P, अंतर्गम्-या. **2** (for) संमन् 4 A, उरी-अंगी-कृ 8 U, प्रति-पद् 4 A. **-off,** अपगम् &c. **2** प्र-इ, सृ 6 A; परलोकं या. **-on,** प्र-वृत्, प्रगम्-या-सृप्. **2** प्र-स्तु 2 U, प्रारभ् 1 A; 'g. on with your study' प्रवर्ततां-प्रस्तूयतां-अध्ययनं. **-out,** निर्गम्, निःसृ, &c., बहिर्गम्. **2** (Of light) निर्वा 2 P or c. pass.; शम् 4 P. **-over,** वच् c., अधि-इ 2 A; (to one's self) अनुवच् c. **2** परि-ईक्ष् 1 A. **3** आक्रम्, लंघ् 1 A, 10. **4** अन्यपक्षं सं-आ-श्रि 1 U: स्वपक्षाद् भ्रंश् 1 A, 4 P. **-round,** परि-इ गम्; प्रदक्षिणीकृ. **-through,** अनुभू, उपागम्, वि-धा, अनु-ष्ठा, कृ, निर्वह् c.; सेव् 1 A, आचर्. **2** पारं गम्, समाप् c.; अव-सो 4 P. **3** प्र-निर्-विश्, निर्भिद् 7 P; भित्त्वा निर्गम्; व्यध् 4 P. **-to, up to,** उप-सृ-इ-गम्-या, उप-स्था, प्रति-पद् &c. **2** (*Interj.*) धिक्, अपेहि, अपसर. **-up,** उद्-इ, उत्पद्, ऊर्ध्वं गम्. **-er,** *s.* गामिन्-गंतृ *m.*, चरः, यायिन् *m.* in comp. **-ing,** *s.* गमनं, यानं, सरणं, चलनं, व्रजनं, गति *f.*, अयनं, &c.

Goad, *s.* अंकुशः, सृ(शृ)णि *f.* **-***v. t.* अंकुशेन तुद् 6 P or प्रचुद् 10. **2** प्रचुद्, प्रणुद् c., प्रोत्सह् c., प्रेर् c., प्रवृत् c., उद्युज् 10, उत्तिज् c.

Goal, *s.* अंतः, अंतस्थानं, अवधिः, अवसानभूमि *f.*; 'g. of ambition' आशावधिः. **2** आशयः, अभिप्रायः, उद्देशः.

Goat, *s.* अजः, छागः, छगलकः, बस्तः, शुभः; 'she-g.' अजा, छागी; 'g.-herd' अजाजीवः, जाबालः, अजपालः-लकः, छागपोषकः; 'a flock of g. s' आजकं. **-ish,** *a.* अजगंध.

Gobbet, *s.* कवलः, ग्रासः.

Gobble, *v. t.* सत्वरं ग्रस् 1 A or भक्ष् 10.

Goblet, *s.* चषकः-कं, पानपात्रं-भाजनं, कंसः-सं.

Goblin, *s.* भूतः, वेतालः, पिशाचः, राक्षसः, निशाचरः, रात्रि(त्रिं)चरः.

God, *s.* देवः, सुरः, अमरः, निर्जरः, विबुधः, सुपर्वन् *m.*, सुमनस् *m.* त्रिदिवेशः, दिवौकस् *m.*, आदितेयः, दिविषद् *m.*, लेखः, अदितिनंदनः, आदित्यः, ऋभुः, अस्वमः, अमर्त्यः, अमृतांधस् *m.* बर्हिर्मुखः, क्रतुभुक् *m.*, गीर्वाणः, दानवारिः, वृंदारकः, दैवतः-तं; 'great g.' परमेश्वरः, परमात्मन्; *m.* 'god-dess' देवी, भगवती, सुरांगना, देवपत्नी; in comp. words ex. by धर्म; 'g.-father' धर्मपितृ *m.*, so धर्ममातृ *f.* धर्मपुत्रः-त्री, धर्मकन्यासुता, &c **-less,** *a.* निरीश्वर, नास्तिक, अनीश्वरवादिन्. **-lessness,** *s.* मिथ्यादृष्टि *f.*, नास्तिकता. **-like,** *a.* देवतुल्य-रूप, देवोपम, दिव्य. **-ly,** *a.* धार्मिक (की *f.*), धर्मनिष्ठ-परायण, पुण्यशील, पुण्यात्मन्, ईश्वरभक्त-पूजक. **-liness,** *s.* धर्मसेवा, पुण्यशीलता, ईश्वरभक्ति *f.*, श्रद्धा, &c. **-ship,** *s.* देवत्वं, देवभावः. **-Godsend,** *s.* ईश्वरप्रेरित *a.* इव, ईश्वरप्रसादः, सौभाग्यं, लक्ष्मीदत्तं.

Goggle, *v. i.* नयने विक्षिप् 6 P or लुल् c.; 'g. eye' लोलनयनं; 'g.-eyed' लोलनयन, वक्र-तिर्यक्-दृष्टि.

Goitre, *s.* गडुः.

Gold, *s.* सुवर्णं, स्वर्णं, कनकं, कांचन, हेमन् *n.*, चामीकरं, जातरूपं, हिरण्यं, हाटकं, तपनीयं, शातकुंभं, गांगेयं, भर्मन् *n.*, कर्बुरं, महारजतं, रुक्मं, कार्तस्वरं, जांबूनदं, अष्टापदः-दं; 'g. for ornaments' शृंगिः, शृंगीकनकं; 'g.-beater or drawer' सुवर्णोद्वर्तनकृत् *m.*; 'g.-dust' कांचनभूः, कनकरागः; 'g.-smith' स्वर्ण-सुवर्ण-कारः, कलादः, नाडिंधमः, रुक्मकारकः; 'g.-thread' कनकसूत्रं. **-***a.*, **-en,** *a.* हैम (मी *f.*), सौवर्ण (र्णी *f.*), (*s.*) in comp., or by मय (यी *f.*) affixed to (*s.*).

Golf, *s.* कंदुकक्रीडा-लीला.

Gong, *s.* घनं, कांस्यं.

Gonorrhœa, *s.* शुक्रदोषः.

Good, *a.* भद्र, साधु, प्रशस्त, प्रशस्य, शुभ, कल्याण (णी *f.*), सत्, वर, शोभन, गुणवत्, निर्दोष; oft. by सु or सत् in comp. **2** धर्मशील, साधु-आर्य-वृत्त, सदाचार, सच्चरित, सुकृतिन्, पुण्य, पुण्यात्मन्, पुण्यशील, धार्मिक (की *f.*). **3** योग्य, उचित, युक्त, उपयुक्त, हित; gen. ex. by pot. pass. part. **4** सुजन, हितकाम, प्रियकारिन्, उपकारक, हित, प्रियकर. **5** अन्यून, अदूषित, अक्षत, संपूर्ण. **6** बहु, प्रचुर, महत्, अनल्प, भूरि, सु or अति pr.; 'a g. fellow' भद्रः, सौम्यः; 'my g. sir,' भद्र, सौम्य; 'g. quality' गुणः, स-

गुणः; 'g. wishes' आशिस् *f.*, आशीर्वादः-वचनं; 'g. and bad' शुभाशुभ; 'so g. as' अनुग्रह-पूर्वकं, कृपया; 'for g.' अत्यंतं, असन्निवृत्त्यै; 'a g. deal' भृशं, अतीव, सु or अति pr.; 'g. morning to you' शुभस्ते प्रभातकालः; 'it will be g. for you' तव कल्याणाय भवेत्, कल्याणमावहेत्; 'is g. unto weariness' आयासजनकमेव, श्रममात्रदायकं; g. for nothing' निरुपयोग, निर्गुण, निष्फल; 'as g. as' समं. **-s.** उपकारः, उपकृति *f.* **2** हितं, भूति *f.*, भद्रं, शुभं, कल्याणं, कुशलं, श्रेयस् *n.*, क्षेमं; oft. by अर्थ; 'for the g. of the people' प्रजार्थं, लोकहिताय, प्रजाभूतये, &c. **3** उपयोगः, लाभः, फलं; oft. ex. by किं, अर्थ, अलं, with inst.; 'what is the g. of seeing her' किं तया दृष्ट्या (S. 2), कोर्थस्तस्या दर्शनेन; 'what g. do you get by weeping' अलं परिदेवनेन. **4** सुकृतं, पुण्यं, धर्मः, सुचरितं, साधुवृत्तं, सदाचारः; 'to do g.' उपकृ 8 U; हितं-कल्याणं-कृ; क्षेमं आवह् 1 P; 'g. and evil (bad)' शुभाशुभं, हिताहितं. **-*interj.*** साधु, सुष्ठु, सम्यक्, बाढं, कामं, भवतु, तथास्तु, तथेति; युज्यते, अनुमतं मम (V. 2). 'G.-breeding' साधुता, सौजन्यं, विनयः, सभ्यता, 'possessed of g.-breeding' सुशील, सुविनीत, सुजन, अभिजात; 'g.-conditioned' सुस्थ, सुस्थित; 'g. fortune or luck' *See* **Fortune**; 'g.-humour' सद्भावः, उल्लासः, चित्तप्रसादः, उल्लासवृत्ति *f.*, आनंदः, प्रमोदः; 'g.-nature' सद्भावः, सुस्वभावः, सौजन्यं, सुशीलता; सुप्रकृति *f.*; 'g.-humoured or g.-natured' हृष्टचित्त, प्रसन्नचित्त, सोल्लस, सानंद, सुस्वभाव, सुशील, सुप्रकृति, सुजन, सद्भाववत्, साधुशील, धर्मात्मन्, पुण्यात्मन्, सुहृदय; 'g.-looking' दर्शनीय, सुरूप, सुदर्शन, सुभग, प्रियदर्शन, प्रेक्षणीय, रम्याकार, सुवदन; 'g.-manners' विनयः, विनीतता, मर्यादा, सुनीति-रीति *f.*; सभ्यता, शिष्टाचारः, सुशीलता, सौजन्यं, सुसत्-चरित्रं, सदाचारः, साधुवृत्तं; 'g.-sense' विवेकः, ज्ञानं, प्रज्ञता, प्रबुद्धता, प्रबोधः, सौजन्यं, सद्भावः, सुशीलता; 'g.-will' हितेच्छा, हितकाम्या, प्रीति *f.*, प्रियता, अनुकूलता, भक्ति *f.*, अनुरागः. **-ly,** *a.* चारु, सुंदर (री *f.*), सुरूप, सुदृश्य, प्रेक्षणीय, लावण्यवत्, रम्य, रमणीय, मनोरम-हर, रुचिर. **2** अनल्प, महत्, प्रचुर, बहु, अल्पेतर. **-ness,** *s.* साधुता, प्रशस्तता, गुणवत्ता, श्रेष्ठता, विशिष्टता. **2** साधुशीलता, सदाचारता, धार्मिकत्वं. **3** सुशीलता, दया, कृपालुत्वं, सद्भावः, सौजन्यं, सुजनता; 'tendency to g.' सत्वगुणः.

Goods, *s.* द्रव्यं, द्रव्यराशिः, विभवः, सामग्री, वस्तुजातं, द्रव्याणि-वस्तूनि (pl.). **2** भांडकं, भांडसमुदायः, पण्यं, भांडानि (pl.); 'household g.' गृहोपस्करः, गृहोपकरणानि.

Goose, *s.* हंसः (सी *f.*), चक्रांगः (गी *f.*), वरटः-टा; कलहंसः (सी *f.*); *See* **Gander**; 'ruddy g.' चक्रवाकः (की *f.*), चक्रः रथांगः, कोकः, द्वंद्वचरः. **2 Fool,** q. v.

Gorbellied, *a.* महोदर, बृहत्कुक्षि, तुंदिन्, स्थूलोदर; *See* **Corpulent.**

Gore, *s.* रक्तं, शोणितं, रुधिरं, असृज् *n.*, लोहितं. **2** रक्तगुल्मः, रक्तपिंडः. **3** संधितवस्त्रखंडः. **-*v. t.*** व्यध् 4 P, निर्भिद् 7 P, छिद् 7 P, वि-दृ 10, क्षण् 5 P, उल्लिख् 6 P. **-ed,** *a.* छिन्नत्वच्, क्षतवर्मन्. **-y,** *a.* रक्ताक्त, असृग्दिग्ध. **2** रुधिरप्रिय, मारात्मक.

Gorge, *s.* कंठः, गलः. **2** रंध्रं, दुर्गमार्गः, संकट-संबाध-पथः, संचारः, संकटं, गिरिकंदरः. **-*v. t.*** उद्-ग्रस् 1 A, गृ 6 P. **2** (One's self) कुक्षिं पूर् 10, अत्यंतं तृप् c., अन्नादिना परिपृ 3 P.

Gorgeous, *a.* शोभन, उज्ज्वल, अतिशोभन, विभ्राजमान, तेजस्विन्, सुप्रभ, एकांतरमणीय-चारु, महाप्रभ-दीप्ति, विचित्र. **-ly,** *adv.* अतितेजसा, उज्ज्वलं. **-ness,** *s.* औज्ज्वल्यं, अति-प्रभा-तेजस् *n.*, सुप्रभा.

Gorget, *s.* ग्रीवा-गल-त्राणं.

Gormand, *See* **Glutton. -ize,** *v. i.* अत्याहारं or अतिभोजनं कृ 8 U. **-izer,** *s.* *See* **Glutton.**

Gosling, *s.* हंसशिशुः-शावकः.

Gospel, *s.* सुवार्ता, शुभवार्ता.

Gossamer, *s.* ऊर्णनाभजालतंतु *m.*

Gossip, *s.* वावदूकः, प्रलापिन् *m.*, जल्पकः. **2** पानमित्रं, सहपायिन् *m.* **3** वार्ता, जनप्रवादः, जल्पः, जल्पितं, प्रलापः, प्रजल्पः, वृथाकथा-संलापः. **-*v. i.*** प्रजल्प् 1 P, प्रलप् 1 P.

Gouge, *v. t.* (नयनं) उत्पट् 10, उद्धृ 1 P.

Gourd, *s.* अ(आ)लाबु-बू *f.*, तुंबि-बी *f.*, लाबु-बू *f.*, तुंबा. **2** (Vessel of g.) कमंडलुः; 'bitter g.' इक्ष्वाकु *f.*, कटुतुंबी.

Gourmand, *See* **Gormand.**

Gourmet. *s.* आस्वादपरायणः.

Gout, *s.* वातरक्तं, वातशोणितं. **-y,** *a.* वातग्रस्त, वातरोगोपहत, वातरोगिन्, वातकिन्.

Govern, *v. t.* प्र-शास् 2 P, परि-पा c. (पालयति), ईश् 2 A (with gen.); गुप् 1 P, तंत्र् 10 A, नियम् 1 P; *See* **Rule. 2** वि-धा 3 U, वि-नी 1 P, निग्रह् 9 P, सं-नि-यम्, आ-वृ 5 U, वशीकृ 8 U, दम् c. (दमयति), सं-हृ 1 P, नि-यंत्र् 10; *See* **Control. 3** (In grammar) अनु-इ 2 P, वि-धा; 'g.-ed by another' परायत्त, पराधीन, परतंत्र, विधेय. **-ment,** *s.* नियमनं, सं-नि-यमः, निग्रहः. **2** शासनं, परिपालनं; 'during the g. of Rama' रामे महीं शासति. **3** प्रभुत्वं,

ईशत्वं, ऐश्वर्यं, आधिपत्यं, स्वामित्वं. 4 राज्यं. 5 (Rulers) राजन् *m.*, प्रभुः, ईशः, राजमंत्रिणः-सचिवाः; 'g. affairs' राज्यकार्याणि; 'form of g.' राज्यरीति-पद्धति *f.* **-or,** *s.* शासितृ *m.*, शासकः, ईशः, अधिपतिः, अधिष्ठातृ *m.*, अधिपः, अधिकृतः. 2 (Of a province) भोगपतिः. **-orship,** *s.* आधिपत्यं, प्रभुत्वं.

Gown, *s.* शाटः-टी, शाटकः, कटिवस्त्रं; 'girl's g.' अर्धोरुकं, चंडातकः-कं

Grab, *s.* ग्रहः, धरणं, संग्रहः. **-***v. See.* **Snatch.**

Grabble, *v.* स्पृश्-परामृश् 6 P. 2 भूमौ देहं क्षिप् 6 P.

Grace, *s.* प्रसादः, अनुग्रहः, दया, कृपा, अनुकंपा, आनुकूल्यं. 2 सौंदर्यं, श्रीः, चारुता, शोभा, लावण्यं; *See* **Beauty.** 3 गुणः, भूषणं. 4 क्षमा, पापमार्जनं-निष्कृति *f.* 5 (As a title) देवः-वी, अत्र-तत्र-भवान्-भवती. **-***v. t.* अलंकृ 8 U, शुभ् c., भूष् 10, उद्-द्युत् c. (जाते पुनरप्युद्द्योतयोत्संगं U. 4); संमन् c. सं-भू c.; 'g. the ceremony with your presence' संनिधानेन इमं विधिं संमानयतु-अलंकरोतु-भवान्. **-ful,** *a.* ललित, चारु, सुंदर (री *f.*), सुभग, लावण्यवत्, मुग्ध, सविलास; 'g. movement' मुग्धचेष्टा, विलासः, विभ्रमः, ललितं, हेला, लीला, हावः, विब्बोकः, शृंगारचेष्टा-क्रिया; 'g. speech' वाग्विलासः; 'g. gait' खेलगति *f.*, विलासगतं. **-fully,** *adv.* सविलासं, ललितं, सुंदरं, चारुतया. **-fulness,** *s.* लावण्यं, श्रीः, शोभा, लालित्यं, मुग्धता; *See* **Beauty.** **-less,** *a* रूपहीन. 2 निर्लज्ज, दुराचार, दुर्वृत्त, अतिदुष्ट, दुष्टभाव. **-Gracious,** *a.* प्रसन्न, सदय, दयाशील, अनुकूल, अनुकंपिन्, दयालु, अनुकंपाशील, अनुग्राहिन्, कृपालु, सानुक्रोश, हितबुद्धि, सानुकंप; 'to be g.' प्रसद् 1 P, अनु-कंप् 1 A. **-ly,** *adv.* सानुग्रहं, सदयं, सानुकंपं, दयया, कृपया, प्रसन्नतया, सप्रसादं. **-ness,** *s.* प्रसादः, अनुकंपा, दयालुत्वं, अनुग्रहः, दया, कृपा &c.

Gradation, *s.* क्रमः, आनुपूर्व्यं, पर्यायः, अनुक्रमः, परंपरा, समन्वयः, परिपाटि-टी *f.*, 'in regular g.' यथाक्रमं, क्रमशः, अनुपूर्वशः, पर्यायेण.

Grade, *s.* श्रेणि-णी *f.*, प्रकारः, वर्गः, परिपाटि-टी *f.*, क्रमः, परंपरा, आनुपूर्व्यं. 2 पदं, अवस्था, आस्पदं, पदवि-वी *f.*, कोटि *f.*, काष्ठा (highest g.). **-Gradual,** *a.* क्रमिक, आनुक्रमिक, अनुपूर्व, उत्तरोत्तर; better ex. dy 'g. ly.' **-ly.** *adv.* क्रमशः, शनैः शनैः, क्रमतः, क्रमेण, यथाक्रमं, अनुक्रमं, अल्पाल्पशः, उत्तरोत्तरं, प्रति-अनु-पदं, पदे पदे, अनुपूर्वशः, आनुपूर्व्येण. **-Graduate,** *v. t.* क्रमचिह्नैः अंक् 10. 2 उपपदं प्राप् 5 P. **-***s.* उपपद-उपाधि-पद-युक्तः. **-ion,** *s.* क्रमचिह्नांकनं. 2 **Gradation,** q. v.

Graft, *v. t.* (fig.) निविश् c., नि-धा 3 U.

Grain, *s.* धान्यं, शस्यं, व्रीहिः, स्तंबकरिः, बीजरुहः, जीवसाधनं. 2 बीजं. 3 कणः-णिका, लवः, लेशः, अणुः. 4 काष्ठरेखा-शिरा, 'fried g.' लाजाः, भ्रष्टयवाः; पृथुकः, चिपिटकः; 'against the g.' प्रतिलोमं, विरुद्धं, विप्रतीपं, निरुत्साहं, कथमपि; 'with the g.' अनुलोमं; 'chaffless g.' धान्यास्थि *n.* **-y,** *a.* धान्य-शस्य-मय (यी *f.*).

Gram, *s.* चणकः.

Gramarie (y) (ye), *s.* माया, इंद्रजालं.

Gramineous, *a.* तृणमय (यी *f.*), शाद्वल.

Graminivorous, *a.* तृण-शष्प-भोजिन्, तृणभुज्.

Grammar, *s* व्याकरणं, व्याकरणशास्त्रं-विद्या, शब्दशास्त्रं. **-ian,** *s.* वैयाकरणः, व्याकरणज्ञः, शब्दशास्त्रविद् *m.* **-Grammatical,** *a.* व्याकरणविषय, व्याकरणानुसारिन्, gen. (*s.*) in comp.

Granary, *s.* कुशूलः, धान्यकोष्ठः; धान्यागारं, कंडोलः, पिटः.

Grand, *a.* महत्, बृहत्, गुरु. 2 उत्तम, प्रधान, मुख्य, अग्र, अग्र्य, विशिष्ट. 3 सुप्रभ, भव्य, प्रतापवत्, तेजस्विन्, उज्ज्वल; 'g.-child' पौत्रः-त्री; 'g.-daughter' पौत्री, पुत्रसुता, दौहित्री; 'great g.-daughter' प्रपौत्री; g.father' पितामहः, मातामहः (maternal); 'great g.-father' प्रपितामहः, प्रमातामहः; 'g.-mother,' पितामही, मातामही; वृद्धा, स्थविरा; 'g.-nephew' भ्रातृपौत्रः, स्वसृपौत्रः (त्री *f.*); 'g.-son' पौत्रः, पुत्रसुतः, नप्तृ *m.*, दौहित्रः, पुत्रिकासुतः; 'great g.-son' प्रपौत्रः, &c.; 'great great g.-son' परप्रपौत्रः. **-ly,** *adv.* वैभवेन, तेजसा; ऐश्वर्येण, महाप्रतापेन, उज्ज्वलं, सुप्रभं, उत्कृष्टं, परमं, श्रेष्ठतया **-ness,-Grandeur,** *s.* महत्त्वं, महिमन् *m.* 2 माहात्म्यं, औदार्यं, उत्कर्षः; श्रेष्ठता, प्राधान्यं. 3 वैभवं, तेजस् *n.*, विभूति *f.*, प्रतापः, शोभा, उज्ज्वलता, प्रभावः, ऐश्वर्यं, संपद् *f.* **-Grandee,** *s.* कुलीनः, कुलीनजनः, अभिजनः, महाजनः.

Grandiloquent, *a.* गर्वितवाच्, सदर्पवादिन्. **-Grandiloquence,** *s.* अतिशयोक्ति *f.*, दर्पवाक्यं, सालंकारं वचनं, दर्पाध्मातं वचनं.

Grange, *s.* क्षेत्रं, क्षेत्रभूमि *f.*

Granivorous, *a.* शस्याद, शस्यभक्षक.

Grant, *v. t.* वितृ 1 P, दा 3 U, 1 P, प्रतिपद् c.; *See* **Give.** 2 अनुमन् 4 A, अनु-ज्ञा 9 U, अनु-मुद् 1 A. 3 ग्रह् 9 U, अंगीकृ 8 U, उरीकृ, स्वीकृ, प्रतिपद् 4 A, अभ्युपगम् 1 P, अभ्युप-इ 2 P; 'I g.,' 'g. ed' gen. ex. by कामं followed by तु, तथापि or पुनः; or by imp.; 'well it is g. ed' भवतु,

एवमस्तु, गृहीतमिदं. -*s.* प्रदानं, दानं, उत्सर्गः, दायः, विहापितं, उपायनं; *See* **Gift**; 'g. of property' निबंधः; 'royal g.' (gifts of land, &c.) शासनं, पट्टः, शासनपत्रं, 'a written g.' लेखपत्रं. **-ee,** *s.* प्रतिग्रहीतृ *m.*, दानभोगिन् *m.*, आदातृ *m.* **-or,** *s.* दातृ *m.*

Granule, *s.* कणिका, लवः; बीजकं, अणुः. **-Granular,** *a.* बीजाकार, बीजमय (यी *f.*), कणमय. **-Granulate,** *v. t.* घनीकृ 8 U, संहतीकृ; सूक्ष्मकणान् बंध् 9 P, **-ion,** *s.* पोथकी.

Grape, *s.* द्राक्षा, मृद्वीका, गोस्तना-नी, स्वाद्वी, मधुरसा; (fruit) द्राक्षाफलं, &c.; 'g.-stone' द्राक्षाबीजं, अष्ठीला, अष्टि *f.* **-Grapery,** *s.* द्राक्षावाटिका.

Graphic, *a.* स्पष्ट, अर्थवत्, सुलिखित, सुचित्रित, सुनिर्दिष्ट.

Grapnel, *s.* क्षुद्रलंगरः. **2** आकर्षणी.

Grapple, *v. t.* धृ 1 P, 10, संग्रह् 9 P, आकृष् 1 P; नि-सं-बंध् 9 P, संश्लिष् c. -*v. i.* युध् 4 A, संघट्ट् 1 A, बाहुबाहवि or हस्ताहस्ति युध्; अभिसं-पत् 1 P. -*s.* संग्राहः-धरणं **2** बाहुयुद्धं. **3** आकर्षणी.

Grasp, *v. t.* ग्रह् 9 U, धृ 1 P, 10, (fig. also), आकल् 10, आकृष् 1 P, मुष्टिना ग्रह्; अवलंब् 1 A, परामृश्-स्पृश्-6 P. **2** ग्रस् 1 A, आक्रम् 1 U, 4 P; आ-घ्रा 1 P, आ-अवलिह् 2 U; 'g.-ed by death' कालग्रस्त; 'g., ed by a tiger' व्याघ्राघात, &c.; 'he quickly g. ed what I meant' मदाशयं झटिति गृहीतवान् **3** (at) ग्रह् desid. (जिघृक्षति), हृ desid. (जिहीर्षति); आप् desid. (ईप्सति), लंघ् 1 A, 10, *See* **Aspire.** -*s.* ग्रहः-हणं, धरणं, परामर्शः मुष्टिग्राहः, संग्राहः, हस्तग्राहः, आक्रमः, ग्रसनं; gen. ex. by गोचरः, वशः, विषयः, मुखं:, 'is within the g. of death' मृत्योर्मुखे वर्तते, कालालीढः, मृत्युगोचरं गतः, &c.; 'and this g. over every (kind of) learning' इदं च अशेषविद्याग्रहणसामर्थ्यं (Ka. 96); 'firmness of g.' दृढमुष्टिता, निबिडमुष्टिः.

Grass, *s.* तृणं, शस्यं, शादः; 'young g.' शष्पं, बालतृणं, घासः; 'meadow g.' य(ज)वसः; 'sacrificial g.' दर्भः, कुशः-शं; 'g.-green' शादहरित, शाद्वल; 'g.-hopper' शल(र)भः; 'g.-plot' शाद्वलं, तृणभूमि *f.* **-y,** *a.* तृणावृत, बहुतृण, तृणपूर्ण, सतृण, बहुघास, शाद्वल, घास-तृण-मय (यी *f.*). **2** हरित, शादहरित.

Grate, *s.* चुल्लि-ल्ली *f.*, अधिश्रयणी; *See* **Fireplace.** **2** लोहजालं. -*v. t.* घृष् 1 P, निष्पिष् 7 P, मृद् 9 P, संघट्ट् c. **2** बाध् 1 A, पीड् 10, व्यथ् c. (व्यथयति), संतप् c.; मर्माणि छिद् 7 P or स्पृश्-तुद् 6 P. **3** घर्षणेन चूर्ण् 10, पिष्, क्षुद् 7 P. **4** लोहजालेन युज् 10; 'g. the teeth' दंतैर्दंतान् निष्पीड् or घृष्. **-ing,** *a.* कर्कश, परुष, निष्ठुर, खर, कटु, मर्मस्पृश्-छिद्, अरुंतुद; 'g. to the ear' श्रवणकटु. -*s.* अन्योन्यघर्षणं, कर्कशध्वनिः. **2** लोहजालं, लोहशलाकासनाथः गवाक्षः. **-ingly,** *adv.* कर्कशं, निष्ठुरं, कटु.

Grateful, *a.* सुखकर (री *f.*), रम्य, रमणीय, आनंदावह, सुखावह, हृद्य, सुभग, मनोरम. **2** कृतज्ञ, कृतवेदिन्, उपकृतिज्ञ, कृतविद्, उपकारज्ञ. **-ly,** *adv.* कृतज्ञतया. **2** सुभगं, रम्यतया. **-ness,-Gratitude,** *s.* कृतज्ञता, उपकारस्मरणं, उपकृतज्ञता, कृतवेदित्वं.

Grater, *s.* घर्षणी, घर्षणयंत्रं.

Gratify, *v. t.* तुष् c., सं-परि°, आनंद् c., प्री 10, तृप् c., प्रमुद् c., हृष् c., रम् c., आह्लाद् c.; *See* **Delight** also. **2** अनु-वृत् 1 A, अनुरुध् 4 A, लल् 10, प्र-सद् c., आराध् c., अनुरंज् c., सांत्व् 10. **3** शम् c. (शमयति), पू c., or पूर् 10, साध् c., निर्वृत् c.; 'having all desires g. ed' पूर्णकाम, कृतार्थ, कृतिन्, सिद्धार्थ, निवृत्तकाम; 'g. ed at heart' प्रीत-हृष्ट-चित्त. **-ication,** *s.* सं-, परि-, तोषः, आनंदः, तृप्ति *f.*, तुष्टि *f.*, प्रीति *f.*, सुखं, हर्षः, आह्लादः, प्रमोदः. **2** आराधनं, अनुरोधः, अनुवर्तनं, प्रसादनं, तर्पणं, तोषणं. **3** शांति *f.*, शमनं, सिद्धि *f.*, साधनं, पूरणं, निर्वर्तनं; 'g. of desire' मनोरथसिद्धिः, इष्टसाधनं; 'g. of another's whim' छंदोनुवृत्ति *f.*, वर्तनं. **-ing,** *a.* संपरितोषक, तुष्टि-प्रीति-द, सुखावह, आनंदप्रद, सुख-प्रीति-कर (री *f.*).

Gratis, *adv.* विना मूल्येन, धर्मार्थं, निर्मूल्यं.

Gratuitous, *a.* अमूल्यवत्, निर्मूल्य, मूल्यं विना दत्त, कामतः दत्त. **2** अमूलक, निष्कारण, निर्निमित्त, अहेतुक. **-ly,** *adv.* निर्मूल्यं.

Gratuity, *s.* प्रदानं, उपायनं; *See* **Gift.**

Gratulate, *See* **Congratulate.**

Gravamen, *s.* पीडा, दुःखं.

Grave, *a.* गुरु, महत्, अलघु. **2** ग(गं)भीर, धीर, अचपल. **3** (Sound) मंद, घन, गंभीर, धीर, मंद्र, मंथर; 'g. matter' गुर्वर्थः. -*s.* प्रेत-शव-स्थानं; समाधिः, श्मशानं, अवटः; 'g. clothes' प्रेतवासस् *n.*, शववस्त्रं; 'g.-stone' चित्यं, चैत्यं, समाधिप्रस्तरः. -*v. t.* तक्ष् 1, 5 P, त्वक्ष् 1 P. **-ly,** *adv.* गंभीरतया, धीरं, सगौरवं, गांभीर्येण. **2** मंद्रं, धीरं, गंभीरं. **-ness,** *s.* गुरुता-त्वं, गौरवं, महत्त्वं. **-Gravity,** *s.* गुरुत्वं, भारः. **2** गौरवं, गुरुत्वता, महिमन् *m.*, गांभीर्यं; अलाघवं, धीरता, मंद्रता. **3** आकर्षणशीलता, आकर्षणशक्ति *f.* **-Gravitate,** *v. i.* आकृष् pass., अधः गम् or पत् 1 P. **-ion,** *s.* आकर्षणं, अधःपतनशीलता.

Gravel, *s.* शर्करा, वालुका, शिला-पाषाण-खंडः-चूर्णं. **2** (Disease) अश्मरी, मूत्रकृच्छ्रं, मूत्र-शर्करा. **-***v. t.* शर्करावृत *a.* कृ 8 U. **2** मुह् c., सं-वि-भ्रम् c. (भ्रमयति). **-ly,** *a.* सशर्कर, शर्करित, शर्करावृत, शर्करावत्, शार्करीय.

Graveolent, *a.* दुर्गंध, पूतिगंधि.

Gravid, *See* **Pregnant.**

Gravy, *s.* मांससारः, मांसजूषं.

Gray, *a.* आपांडु, धूसर, पांशुवर्ण, आशुक्ल. **2** शुक्ल, धवल, श्वेत, पक्व, पलित (hair); 'g. beard' जीर्णकूर्चं; 'g. head' पलितं शिरः; 'g.-haired' पलित, धवल-शुक्ल-केश; 'g.-headed' पलिताशिरस्. **3** जीर्ण, परिणत, पक्व, वृद्ध. **-***s.* धूसरः, धूसर-पांशु-वर्णः. **-ish,** *a.* आपांडु, पांडुर, आधूसर; 'g. with dust' धूलिधूसर. **-ness,** *s.* धूसरता, पलितता, केश-धावल्यं, पक्वता, जीर्णता.

Graze, *v. t.* चर् c., तृणं भुज् c. or खाद् c. **2** निर्घृष् 1 P, लघु तड् 10, लघुप्रहारेण अति-इ 2 P. **-***v. i.* चर् 1 P, तृणं खाद् 1 P or भक्ष् 10 or भुज् 7 A; 'a place g. ed by cattle' आशितंगवीनं **-er,** *s.* तृणभक्षकः. **-ing,** *s.* चरणं; 'g. ground' गोचरः, गो-प्रचारः. **-Grazier,** *s.* गोचारकः, पशुपालः, गोपालकः.

Grease, *s.* वसा, मेदस् *n.*, वपा, मांससेहः-सारः. **2** स्नेहः, तैलं, घृतं. **-***v. t.* वसया-स्नेहेन लिप् 6 P or अंज् 7 P or दिह् 2 U. **-y,** *a.* मेदस्विन्, वसामय (यी *f.*), चिक्कण, प्र-,स्निग्ध, वसाक्त, स्नेहाभ्यक्त, सस्नेह, वसा-स्नेह-युक्त.

Great, *a.* महत्, गुरु, बृहत्, विशाल, विपुल, वि-स्तीर्ण, उरु, पृथु, स्थूल, महाप्रमाण. **2** (In number) बहु, भूरि, प्रचुर, बहुल, बहुसं-ख्याक. **3** उत्कृष्ट, उत्तम, परम, विशिष्ट, वि-श्रुत, श्रेष्ठ, लब्धप्रतिष्ठ, प्रसिद्ध, महायशस्क. **4** महेच्छ, महाशय, महात्मन्, उदार, उदारचित्त. **5** प्रधान, मुख्य, परम, अग्र्य, गुरु. **6** अत्यंत, अतिमात्र, गाढ, अधिक, भृश, परम, एकांत, नितांत, अतिरिक्त; oft. by महत्, सु, अति, in comp.; 'to a g. distance,' सुदूरं, अतिदूरं; 'to a g. degree' भृशं, अतिमात्रं, अत्यंतं, निर्भरं, गाढं. **-ly,** *adv.* भृशं, अत्यंतं, सातिशयं, सु-नि-तरां, एकांततः, परं, बलवत्, गाढं, परमं, सु-अति-अतिशय in comp.; *See* **Exceedingly;** oft. ex. by कोटि *f.*, काष्ठा; 'he was g. delighted' आनंदस्य परां कोटिं-काष्ठां-अधिगतवान्. **-ness,** *s.* महत्त्वं, माहात्म्यं, महिमन् *m.*, गुरुत्वं; विपुलता, विशालता, &c. **2** विस्तारः, परिमाणं. **3** विश्रुति *f.*, उत्कर्षः, विशिष्टता, परमता, आ-धिक्यं, प्रतिष्ठा, गौरवं. **4** वैभवं, शोभा, ऐश्वर्यं; *See* **Grandeur;** 'g. of mind' औदार्यं, माहात्म्यं; 'g. of rank' कुलीनता, अभिजात्य, कुलोत्कर्षः.

Greaves, *s.* जंघा-ऊरु-त्राणं, मंक्षुक्षणं.

Greed, *s.* लोभः, गृध्नुता, अतिस्पृहा, लौल्यं, लुब्धता, अत्यभिलाषः, अतिलिप्सा, अत्या-कांक्षा, लोलुपत्वं, अतृप्ति *f.*, अपरितोषः. **2** (Cf food) अत्याहारः, घस्मरता, अग्ररता, उदरंभरित्वं. **-Greedy,** *a.* लुब्ध, लोलुप, लोलुभ, गृध्नु, लोभाविष्ट, अत्यभिलाषिन्, अत्याकांक्षिन्, सतृष्ण, अतितृष्णाकुल, अति-लोभिन्. **2** आहारलुब्ध, अत्याहारप्रिय, घ-स्मर, अग्ररं, अतिभोजिन्, बहुभुज्, औदरिक, उदरंभरि, कुक्षिंभरि, बहुभक्षक; 'to be g.' गृध् 4 P, लुभ् 4 P. **-ly,** *adv.* अतिलोभेन, सलोभं, सतृष्णं, लोलुपतया, जिह्वालौल्यात्, अत्यभिलाषेण, अतिस्पृहया. **-ness,** *s.* लोभः; *See* (*s.*).

Green, *a.* हरित, हरित्, हरिद्वर्ण; प(पा)-लाश. **2** नव, प्रत्यग्र, अभिनव. **3** अपरिपक्व, अपरिणत; 'g.-headed' अपरिणतप्रज्ञ, अ-पक्वधी. **-***s.* हरिद्वर्णः, हरितः, हरित् *m.*, पालाशवर्णः. **2** हरितस्थानं, शाद्वलं, शाद्वल-स्थली, तृणावृता भूमिः; 'g.-leaved' हरित्पर्णः; 'g.-room' नेपथ्यशाला; 'g.-sward' हरितभूमिः, तृणावृतं स्थानं, हरितकं, शाकादि. **-ish,** *a.* ईषद्धरित, हरिदाभ, ईषत्पलाश. **-ness,** *s.* हरितत्वं, पलाशत्वं. **2** अपरिणतत्वं, अपरिपाकः, अपक्वता.

Greet, *v. t.* अभिनंद् 1 P or c., सभाज् 10, वंद् 1 A, अभिवद् c. (A), अर्च् 1 P, 10, सं-भू c., सत्कृ 8 U, पूज् 10; नमस्कृ, प्रणम् 1 P; 'g. in return' प्रतिनंद्, प्रत्यभि-वद् c. **-ing,** *s.* प्रणामः, प्रणति *f.*, अभिवंदनं, अभिनंदनं, नमस्कारः, अभिवादः-वादनं, कुशलवादः-प्रश्नः.

Gregarious, *a.* यूथचारिन्, संघचारिन्.

Grey, *See* **Gray.**

Grice, *s.* शूकरशावकः-शिशुः.

Gridelin, *s.* श्वेतारुणः.

Grieve, *v. t.* दु 5 P, पीड् 10, बाध् 1 A, क्लिश् 9 P, व्यथ् c. (व्यथयति), उप-सं-परि-तप् c., आयस् c., उद्विज् c., दुःखयति (D.), शुच् c., खिद् c., 'it g. s me to see you in this condition' एतदवस्थं त्वां वीक्ष्य दुःखितोस्मि. **-***v. i.* शुच् 1 P, व्यथ् 1 A, दुर्मनायते (D.), उत्तम् 4 P, उत्कंठ् 1 A, पीड्-खिद्-क्लिश्-दु-तप्-pass., दुःखायते (D.), उद्विज् 6 A, उत्सुक-उत्क-*a.* भू. **-ance,** *s.* दुःखं, क्लेशः, कष्टं, बाधा, पीडा, पीडाहेतुः, दुःखमूलं-बीजं-कारणं. **-ed,** *a.* दुःखित, दून, पीडित, व्यथित, संतप्त, शोकार्त, दुःखाकुल, शोकातुर, खेदित, क्लिष्ट, उद्विग्न, आतुर, आर्त, कष्टापन्न, उत्सुक, उत्क. **-ingly,** *adv.* सशोकं, सोद्वेगं, सदुःखं. **-ous,** *a.* दुःखकर-व्यथाकर-कष्टकर (री *f.*), पीडावह, क्लेशप्रद, पीडाजनक, शोच्य, शोच-नीय, दुस् pr. **2** घोर, उग्र, दारुण, महत्,

गुरु. **-ously,** *adv.* घोरं, दारुणं, सशोकं; 'g. hurt' बलवत् पीडित, घोरक्षत, &c. **-Grief,** *s.* शोकः, दुःखं, शुच् *f.*, क्लेशः, खेदः, सं-परि-तापः, व्यथा, मन्युः, पीडा, अ-आर्ति *f.*, उद्वेगः, आधिः, वेदना, मनस्तापः, चित्तव्यथा, औत्सुक्यं, उत्कंठा.

Grill, *See* **Fry.**

Grim, *a.* उग्र, दारुण, घोर, भयानक, रौद्र (द्री *f.*), विकृत, विकट. **2** (In appearance) उग्रदर्शन, घोराकृति, रौद्ररूप, कद्राकार, दुर्दर्शन, कु-अप-रूप. **-ly,** *adv.* उग्रं, घोरं, विकटं. **-ness,** *s.* घोरता, रौद्रता, &c.

Grimace, *s.* वदनविकारः-विकृति *f.*; मुखवक्त्र-भंगः, मुखविरूपता, वक्रमुखं, विकृतास्यं.

Grime, *s.* मलः-लं; *See* **Dirt.** **-***v. t.* मलिनयति (D.), दुष् c. (दूषयति).

Grin, *v. i.* सस्मितं दतान् दृश् c.; कु-स्मि 1 A or हस् 1 P, विकृतं-मुखविकारेण हस् or स्मि. **-***s.* कुस्मितं, कुहासः, विकृतहासः-स्मितं, दंतदर्शनं. **-ner,** *s.* कु-विकृत-हासिन् *m.*, विकृतहासः.

Grind, *v, t.* पिष् 7 P, क्षुद् 7 P, मृद् 9 P, चूर्ण् 10, चूर्णीकृ 8 U; चूर्णयेषं पिनष्टि; 'g. s to powder'. **2** (As a gem) उल्लिख् 6 P, उल्लिह् 2 U; संस्कारोल्लिखितः-शाणोल्लाढः-मणिः 'a gem ground on a polishing or touch-stone'; घर्षणेन नि-शो 4 P or उत्तिज् c. **3** घृष् 1 P; 'g. ing the teeth in rage' रोषाद् दंतैर्दंतान्निष्पिष्य. **4** उप-ह्रु 1 A, बाध् 1 A, पीड् 10, अर्द् 1 P or c.; 'ground by heavy taxes' करभारेण चूर्णित-पीडित, &c. **-er,** *s.* पेषकः. **2** (g. stone) पेषण-णी, पेषणयंत्रं. **3** चर्वणदंतः, दंष्ट्रा. **-ing,** *s.* पेषणं, चूर्णीकरणं, संमर्दनं, घर्षणं, उल्लिखनं; 'g. stone' पेषण-णी, पेषणशिला, शाणः, निकषशिला.

Grip, *s.* दृढग्रहः. **-***v. t.* दृढं ग्रह् 9 U.

Gripe, *v. t.* ग्रह् 9 U, मुष्टिना ग्रह् or धृ 1 P; *See* **Grasp.** **2** पीड् 10, सं-नि°. **3** मुष्टिं बंध् 9 P. **-***s.* मुष्टिग्राहः, हस्तग्रहः, संग्राहः, दृढग्रहः, मुष्टिबंधः, मुष्टि *m.*, *f.* **2** निपीडनं. **3** (g. s) अंत्रशूलं, वेदना, उदरशूलं-व्यथा. **-er,** *s.* ग्राहकः. **2** पीडकः, बाधकः.

Grisly, *a.* उग्रदर्शन, करालवदन, विकटाकार, घोराकृति, भीमविग्रह, उग्र, घोर, दारुण, भयानक, क्रूर, कराल, भयावह.

Grist, *s.* गोधूमचूर्णं, पिष्टधान्यं.

Gristle, *s.* तरुणास्थि *n.*, कोमलास्थि.

Grit, *s.* **Gravel,** q. v. **-Gritty,** *a.* सशर्कर, शर्करिल, शर्करामय (यी *f.*).

Grizzle, *s.* धूसर-पांशु-वर्णः. **-Grizzly,** *a.* ईषद्धूसर, आपांडुवर्ण.

Groan, *v. i.* दुःखवशात् क्वण्-स्वन् 1 P or नद् 1 P or रु 2 P or आक्रुश् 1 P, सशब्दं निश्वस् 2 P, आर्तरवं-दीर्घनादं-कृ 8 U. **-***s.* दीर्घनिश्वासः, आर्तरवः-नादः, सनिश्वासं क्वणितं, सीत्कारः, ससीत्कारं परिदेवनं.

Grocer, *s.* वणिज् *m*, नैगमः; *See* **Merchant.** **-y,** *s.* वाणिज्यं, वणिक्कर्मन् *n.*

Grog, *See* **Liquor.**

Groin, *s.* ऊरुसंधिः.

Groom, *s.* परिचारकः, भृत्यः, किंकरः; (strictly) अश्वपालः-रक्षकः-सेवकः.

Groove, *s.* रेखा, प्रणाली. **2** सुषिरं, दीर्घसुषिरं.

Grope, *v. i.* अंधकारे परा-मृश् 6 P, तमसि निरूप् 10 or अन्विष् 4 P or परीक्ष् 1 A.

Gross, *a.* स्थूलकाय, बृहत्, पीन, पीवर, मेदस्विन्. **2** घन, स्थूल, असूक्ष्म; 'g. measurement' स्थूलमानं. **3** गाढ, निबिड, निरंतर, अविरल, सांद्र. **4** अश्लील, ग्राम्य, नीच, अवाच्य, अशिष्ट, असभ्य, गर्ह्य, निंद्य, अशुद्ध, कुत्सित, नि-अप-कृष्ट, अपवित्र, मलीमस, अमेध्य, अयशस्कर (री *f.*). **5** जड, मूढ, मंद. **6** अविनीत, अमर्याद. **7** अत्यंत, अतिमात्र, महत्, सु-अति pr.; 'g. fault' महापराधः; 'g. body' स्थूल-जड-देहः; 'g. darkness' संतमसं, अंधं तमः. **-***s.* स्थूलांशः, प्रधानभागः, प्रधानांशः, साकल्यं, सामग्र्यं, समासः; 'in the g.' स्थूलमानेन, साकल्येन. **-ly,** *adv.* स्थूलं, घनं, असभ्यं, गर्ह्यतया, नीचं; अत्यंतं, अतिमात्रं, अति-सु pr.; 'g. corrupted' अतिदुष्ट. **-ness,** *s.* स्थूलता, पीनता; निबिडता, अशिष्टता, ग्राम्यत्वं, अविनयः, अमर्यादा, अत्यंतता, अतिरेकः, गाढता, आधिक्यं.

Grot, Grotto, *s.* कुहरं, गह्वरं, गुहा, कंदरः, शैलविवरं; 'natural g.' देवखातं, देवखातबिलं; 'artificial g.' क्रीडाकुटीरः, कृत्रिमकंदरः.

Grotesque, *a.* वि-अप-रूप, विलक्षण, हास्यरूप, कदाकार, असंगताकार; हास्य, असंगत, असंबद्ध, विषम. **-ly,** *adv.* असंगतं, विलक्षणतया, हास्यरूपेण.

Ground, *s.* भूमि *f.*, भूः, क्षिति *f.*, मही, धरणी, पृथ्वी; *See* **Earth.** **2** भूतलं-पृष्ठं-पीठं. **3** स्थलं, स्थली. **4** उपष्टंभः, वास्तु *m. n.*, गृहभूमिः-प्रतिष्ठा. **5** आधारः, मूल, कारणं, निमित्तं, हेतुः, निदानं, प्रयोजनं. **6** मृत्तिका, मृद् *f.*, क्षेत्रं; 'gain g.' उप-चि pass., प्र-वृध् 1 A, एध् 1 A, वृद्धिं गम् 1 P; 'lose g.' क्षि-अपचि- pass., ऋद्धा गम्; शनैः परा-नि-वृत् 1 A. **-***v. t.* मूलं न्यस् 4 P or प्रतिष्ठा c. (प्रतिष्ठापयति); oft. by मूल in comp.; 'devotion g. ed on faith' श्रद्धामूला भक्तिः. **2** आरंभं-उपक्रमं शिक्ष् c. or अधि-इ c. (अध्यापयति); 'well g. ed in grammar' स्वधीतव्याकरणः; 'g.-floor' गृहतलं, कुट्टिमं, अधःकोष्ठः; 'g.-work' मूलकर्मन् *n.*, प्रारंभः, उपक्रमः, मूलं. **-less,**

a. निर्मूल, निष्कारण, अहेतुक, अनिमित्त, निराधार, अमूलक; मिथ्या in comp. **-lessly,** *adv.* निष्कारणं, मिथ्या. **-lessness,** *s.* अकारणं, निर्मूलत्वं.

Grounds, (pl.) *See* **Dregs.**

Ground-sil, *s.* देहली, गृहावग्रहणी.

Group, *s.* संघः, निवहः, समुदायः; गणः; *See* **Multitude;** 'in g. s.' गणशः, संघशः. **-***v. t.* एकीकृ 8 U, वर्गी-गणी-कृ, सं-चि 5 U; **Collect,** q. v.

Grove, *s.* उपवनं, वनराजि-जी *f.*, वृक्षवाटिका' वनांतः; *See* **Forest** also.

Grovel, *v. i.* नीचतया भूमौ पत् 1 P or सृप् 1 P, अधमवत् आचर् 1 P, धूलिं स्पृश् 6 P. **-ing,** *a.* नीच, अपकृष्ट, अधम, तुच्छ, अतिक्षुद्र.

Grow, *v. i.* स्फुर् 6 P, विकस् 1 P, फुल्ल् 1 P, उद्भिद् pass. (generally of plants). **2** रुह् 1 P, ऋध् 4, 5 P, एध् 1 A; पुष् 4 P, वृध् 1 A, उपचि pass., स्फाय् 1 A, प्यै 1 A, वृद्धिं या-इ 2 P. **3** सं-,जन्, 4 A, भू 1 P. 'the beard having begun to g.' उद्भिद्यमानश्मश्रुराजितया (Ka. 29). **4** जन्, उत्पद् 4 A; उद्-इ 2 P, भू, उत्-सं-प्र°. **5** विस्तृ pass., व्याप् 5 P; 'g. up' संवृध्, एध्, प्रौढीभू; 'bad boys g. to be bad men' कुबालाः कुनराएव निष्पद्यंते-भवंति; 'he was grown up', 'he grew up to man's estate (majority)' यौवन-पदवीमारूढः, समारूढयौवनारंभः, प्रौढः, प्राप्त-यौवनः, यौवनदशामापेदे, अतीत-गत-शैशवः; 'g. old' जॄ 4 P. **-***v. t.* वृध् c., रुह् c. **-ing,** *a.* वर्धमान, उपचीयमान, वर्धिष्णु **2** रोहिन्, रुह, रुह्, भव, उद्भव, प्रभव, ज, जात, उत्थ, समुत्थ, भू, in comp.; 'g.-ing in size' प्र-उप-चीयमान-अवयव. **-Growth,** *s.* वृद्धि, आगमः, वर्धनं, उपचयः, ऋद्धि *f.*, स्फीति *f.*, अभ्युदयः, विस्तारः. **2** उत्पत्ति *f.*, सं-प्र-भवः, जननं, जन्मन् *n.* **3** प्रौढि *f.*, प्रवृद्धता.

Growl, *v. i.* भष् 1 P, गर्ज् 1 P, रै 1 P, घुर्घुररवं कृ 8 U. **-***s.* भषणं, गर्जितं, घुर्घुररवः.

Grub, *See* **Dig.** **-***s.* कीटः, कृमिः, कोशस्थः. **2** वामनः, खर्वः, ह्रस्वः.

Grudge, *v.* ईर्ष्य् 1 P, द्रुह् 4 P, असूयति (D.), (with dat.); न सह् 1 A, न मृष् 4 P, 10; *See* **Envy. 2** अकामतः-अनुत्साहं-अनिच्छया-कृ 8 U or दा 3 U or ग्रह् 9 U. **3** परि-देव् 1 A, परिदिव् 10 A, विलप् 1 P; *See* **Complain.** **-***s.* असूया, मत्सरः, मात्सर्यं, ईर्ष्या. **2** वैरं, वैरभावः, विद्वेषः, चिर-दीर्घ-द्वेषः-वैरं. **-ingly,** *adv.* असूयया, साभ्यसूयं-सेर्ष्यं. **2** अकामतः, अनिच्छया, अनुत्साहं, कृच्छ्रेण, दुःखेन.

Gruel, *s.* यवागूः, उष्णिका, श्राणा, विलेपी, तरला; 'sour g.' आरनालकं, सौवीरं, कुल्माषाभिषुतं, अवंतीसोमं, धान्याम्लं, कुंजलं, कांजिकं.

Gruesome, *a.* भीषण **2** खेदकर.

Gruff, *a.* कर्कश, परुष, निष्ठुर, रूक्ष, कठोर, कटु, कर्कशस्वभाव. **2** (Voice) गंभीर, मंद्र.

Grumble, *v. i.* खिद् pass., असंतोषाद् विलप् 1 P or परिदेव् 1 A or परिदिव् 10 A, विषण्ण-*a.* भू 1 P, न तुष् 4 P, विषद् 1 P. **2** गर्ज् 1 P, स्तन् 1 P. **-ing,** *s.* विलापः, विलपनं, परिदेवनं-देवितं, असंतोषोद्गारः, विषादः. **2** गर्जनं, स्तनितं, गंभीरनादः-ध्वनिः-शब्दः.

Grume, *See* **Clot.**

Grumpy, *a.* दुःशील, उदासीन, उद्विग्न, विषण्ण, अंतःकुपित.

Grunt, *v. i.* गर्ज् 1 P. **-***s.* **-ing,** *s.* गर्जितं, शूकरनादः-गर्जितं. **-ling,** *s.* बालशूकरः, शूकरशावकः.

Guarantee, *s.* प्रत्ययः, विश्वासः, प्रातिभाव्यं. **2** प्रतिभूः, लग्नकः, बंधकः. **-***v. t.* Ex. by (*s.*); प्रातिभाव्यं दा 3 U, प्रतिभूः स्था 1 P; 'I g. you the security of your property' त्वद्वित्तरक्षणेहं प्रतिभूस्तिष्ठामि.

Guard, *v. t.* सं-,परि-,रक्ष् 1 P; पा 2 P; पा c. (पालयति), त्रै 1 A, अव् 1 P, गुप् 1 P; *See* **Protect. 2** वृ c., वार् 10, नि°; 'g. against' अव-धा 3 U; सावधान-अवहित-*a.* भू; *See* **Beware.** **-***s.* रक्षा, रक्षणं, गुप्ति *f.*, गोपनं पालनं, त्राणं. **2** रक्षकः, रक्षिन् *m.*, रक्षिवर्गः, रक्षाधिकृतः, सैनिकः, परिचरः; वारणं, त्राणं, त्रं, in comp.; 'finger-g.' अंगुलित्रं, तनुत्राणं, &c., 'arm-g. in shooting' गोधा, तलं, ज्याघातवारणं; 'on one's g.' सावधान-अप्रमत्त-अवहित-*a.*; 'off one's g.' प्रमत्त *a.*; 'g.-room' रक्षकनिवासः, उद्घाटः. **-ed,** *a.* रक्षित, त्राण-त्त, &c. **2** (g.-ful) अवहित, सावधान, स्ववहित, समीक्ष्यकारिन्, समीक्ष्यकृत्. **-edly,** *adv.* सावधानं, विमृश्य, अवधानेन, स्ववहितं. **-er,** *s.* पालकः, रक्षकः, गोप्तृ *m.*, त्रातृ *m.*, पालः-लकः in comp. **-ian,** *s.* रक्षकः, रक्षितृ *m.*, गोप्तृ *m*, नाथः; 'orphan's g.' पितृस्थानीयः; 'g. deity' लोकपालः, दिक्पालः. **-ianship,** *s.* पालकपदं, रक्षा, रक्षणं.

Guerdon, *See* **Reward.**

Guess, *v. t.* ऊह् 1 A; अनु-मा 3 A, 2 P; आशंक् 1 A, तर्क् 10. **-***s.* वि-,तर्कः, ऊहा, अभ्यूहः-हनं; अनुमानं, अनुमिति *f.*, शंका; 'your g. is plain' प्रसन्नस्ते तर्कः.

Guest, *s.* अतिथिः, अभ्यागतः, प्राघूर्णकः, प्राघुणकः, आगंतुः, आवेशिकः, गृहागतः, आगंतुकः; 'friendly to g.s' आतिथेय (यी *f.*).

Guide, *v. t.* नी 1 P, पंथानं-मार्गं (way, q. v.) दृश् c. or आ-उप-दिश् 6 P. **2** प्र-अनुशास् 2 P, निर्-उप-दिश्, विनि-यम् 1 P, प्र-णी 1 P, वि-धा 3 U; अधिष्ठा 1 P. **-s.** अध्वदर्शिन् *m.*, पुरोगः, मुखरः, मार्गोपदेशकः, नेतृ *m.*, नायकः, मार्गदर्शकः, उपदेशकः, निर्देशकः. **2** शास्तृ *m*, अध्यक्षः, अधिष्ठातृ *m.* **-ance,** *s.* नयः, नीति *f.*, मार्गदर्शनं, अध्वोपदेशः. **2** अनुसरणं, अनुवर्तनं.

Guild, *s.* श्रेणि-णी *f.*, निगमः, वणिक्समाजः-संसर्गः. **2** संघातः, समाजः, गणः.

Guile, *s.* माया, कपटः-टं, छलं, व्याजः, कैतवं, शाठ्यं, छद्मन् *n.*; *See* **Fraud. -ful,** *a.* मायिन्, वंचनशील, शठ, धूर्त, कापटिक (की *f.*), सव्याज, वंचक, मायान्वित, कितव. **-fully,** *adv.* सव्याजं, सकपटं, छद्मना, मायया. **-less,** *a.* निष्कपट, अकपट, अव्याज, अनुपधि, सरल, निर्व्यलीक, विमलात्मन्; *See* **Frank. -lessly,** *adv.* अमायया; निष्कपटं, निर्व्याजं, &c.

Guillotine, *s.* शिरश्छेदनयंत्रं.

Guilt, *s.* अपराधः, दोषः, पापं, पातकं, अघं, एनस् *n.*, पापकर्मन् *n.*, दुष्कृति *f.*, आगस् *n.*, दुरितं. **2** सदोषता, पापत्वं, अपराधिता. **-less,** *a.* निरपराध, अनपराधिन्, अनागस्, अपाप, निष्पाप; अकृतदोष, निर्दोष, अनघ, शुद्ध, पाप-दोष-हीन. **-lessly,** *adv.* निरपराधं, पापं-दोषं-विना. **-y,** *a.* पापिन्, अपराधिन्, सापराध, अपराद्ध, सपाप, पापकर्मन्, सदोष, कृतागस्, कृतापराध, दोष-पाप-वत्, पातकिन्, दुष्कृतिन्, पापात्मन्, पाप.

Guinea-worm, *s.* स्नायुकः.

Guise, *s.* वेशः-षः, वस्त्रं, परिधानं, रूपं, आकारः, छद्मन् *n.*; *See* **Disguise.**

Guitar, *s.* वीणा, वल्लकी, विपंची; सारंगी, पिनाकी; 'seven-stringed g.' परिवादिनी.

Gulf, *s.* अखातं, समुद्रवंकः, पुटभेदः. **2** अगाधं-अतल-स्पर्श-खातं, रंध्रं. **3 Whirlpool,** q. v.

Gull, *v. i.* वंच् 10, प्रतृ c.; *See* **Cheat. -s.** सुप्रतार्यः, सुखं वंचनीयः. **2** जलकुक्कुटः, विश्वका; 'g.-catcher' वंचकः, प्रतारकः. **-ery,** *s.* प्रतारणा, वंचनं-ना, छलं, कपटं.

Gullet, *s.* गलः, गलस्रोतस् *n.*, निगरणः.

Gully, *s.* प्रणालः-ली, कुल्या, जलमार्गः, परि(री)वाहः.

Gulosity, *s.* अतिभोजनं, घस्मरता, अत्याहारः.

Gulp, *v. t.* नि-गृ 6 P, ग्रस् 1 A. **2** उद्-गृ, उत्क्षिप् 6 P. **-s.** निगरणं, ग्रसनं. **2** उद्गिरणं, उद्गमः-मनं.

Gum, *s.* निर्यासः, रसः. **2** (Of teeth) दंतमांसं, दंतमूलं. **3** श्यान-सांद्र-द्रव्यं; 'g.-boil' दंतव्रणः-विस्फोटः. **-my,** *a.* श्यान, सांद्र, निर्यासमय (यी *f.*).

Gumption, *s.* चातुर्यं, बुद्धि *f.*, ज्ञानं.

Gun, *s.* लोहसुषि *f.*, गुलि-गुलिका-प्रक्षेपिणी लोहनाडिः-डी *f.*, अग्न्यस्त्रं; 'g.-powder आग्नेयचूर्णं.

Gunny, *s.* शाणं.

Gurge, *See* **Whirlpool.**

Gurgle, *v. i.* घर्घररवं कृ 8 U, गद्गदं नद् 1 P, (कुहरेषु गद्गदनदद्गोदावरीवारयः U. 2).

Gush, *v. i.* निष्पत् 1 P; बहुशः स्रु 1 P or नि-स्यंद् 1 A or क्षर् 1 P; वेगात् निः-सृ 1 P or प्रवृत् 1 A; तस्यास्तु मद्दर्शनादेव आबद्धधारमश्रु प्रावर्तत (D. K. II. 3) 'tears g. ed forth from her eyes in torrents &c.', उद्बाष्पे नयने जाते. **-s.** जलप्रपातः, उत्पीडः, वेगेन निःसरणं, प्रवृत्ति *f.*

Gust, *s.* चंडवातः, वात्या, प्रकंपनः, जवानिलः, वायुवेगः, तीव्र-प्रबल-वातः-वायुः. **2** रुचि *f.*, आस्वादः, रसः. **-ful,** *a.* सरस, रुचिर. **-less,** *a.* विरस, अस्वादु. **-y,** *a.* पवनक्षिप्त, वातुल, वातमय (यी *f.*).

Gut, *s.* अंत्रं, पुरीतत् *n.*; शिरा, अंतर्नाडी. **2** उदरं, जठरः-रं. **-***v. t.* अंत्राणि बहिष्कृ 8 U or निष्कृष् 1 P. **2** सर्वस्वं अपहृ 1 P.

Gutter, *s.* जलमार्गः, परि(री)वाहः, प्रणालः-ली.

Guttler, *See* **Glutton.**

Guttural, *a.* कंठ्य, कंठस्थ-स्थानीय.

Guzzle, *v. t* अतिमात्रं पा 1 P or ग्रस् 1 A or नि-गृ 6 P.

Gymnasium, *s.* व्यायामभूमि *f.* -शाला. **-Gymnastic,** *a.* व्यायामशील-पर-सेविन्. **2** व्यायामसंबंधिन्; 'g. s' व्यायामः, व्यायामविद्या, मल्लक्रीडा.

Gynæ(e)cology, *s.* स्त्रीरोग-विज्ञानं-शास्त्रं

Gyrate, *See* **Revolve.**

Gyre, *s.* मंडलं, आवृत्ति *f.*, चक्रगति *f.*

Gyves, *s.* निगडः-डं, शृंखला-लं, पाशः, बंधनं.

H.

Ha, *interj.* हा, अहो, अयि, बत, हंत.

Haberdasher, *s.* क्षुद्रपण्यविक्रयिन् *m.*

Habergeon, *s.* वक्षस्त्राणं, उरश्छदः.

Habiliment, *See* **Dress.**

Habit, *s.* **Dress,** q. v. **2** शीलं, भावः, प्रकृति *f.*, स्थिति *f.*, वृत्ति *f.*, अवस्था, दशा, स्वभावः. **3** अभ्यासः, नित्यप्रवृत्ति *f.*, आचारः, नित्यक्रिया, व्यवहारः, रीति *f.*, प्रचारः, क्रमः, आवृत्ति *f.*, अनुशीलनं; 'in the h. of' शील or वृत्ति in comp.; 'in the h. of stealing' चौर्यवृत्ति; मृगयाशील, &c.; 'bad h.' व्यसनं, दुर्गुणः; 'having bad h.s.' दुर्वृत्त, दुराचार, पापवृत्ति, भ्रष्टचरित्र. **-v. t. Dress,** q. v. **-a ble,** *a.*, वासक्षम, वसतियोग्य. **-ation,** *s.* वासः, धामन् *n.*, वसति *f.*, आलयः, गृहं, गेहं, आगारं; *See* **House. -ual,** *a* अभ्यासज, नित्य, सतत, अनुशीलित, आभ्यासिक-व्यावहारिक-स्वाभाविक (की *f*); 'a h. drunkard' नित्यपानासक्तः; 'a h. worker' क्रियावान्, कर्मसु उद्यतः कार्मः, कर्मशीलः. **-ually,** *adv.* नित्यं, सततं, यथाभ्यासं, यथारीति, यथाव्यवहारं. **-uate,** *v. t.* अभ्यस् 4 U, अनुशील् 10, शिक्ष् c., परिचि c., अभ्यस्त-परिचित *-a.* कृ. 8 U; 'h. ed to distress' ज्ञातदुःख, परिचितक्लेश; दुःखशील, दुःखाभिज्ञ.

Hack, *v. t.* खंडशः कृत् 6 P or छिद् 7 P, बहुलवशः व्रश्च् 6 P or विदृ 10, व्यवच्छिद्. **-s.** प्रहारः, छेदः, आघातः. **2** पण्याश्वः, कदश्वः, जीर्णः अश्वः, सर्वप्रयोज्यः-सर्वसाधारणः-अश्वः. **3** हीनवृत्तिः, नीचकर्मकारिन् *m.* व्रातीनः, सर्वप्रयोज्यः, पण्यः.

Hackle, *s.* उमामार्जनी-शोधनी.

Hackney, *s. See* **Hack** (*s.*). **2** पण्यस्त्री, सर्वोपभोज्या. **-v. t.** हीनकर्मणि नियुज् 7 A, 10; 'h.-coach' पण्यवाहनं, पण्य-साधारण-रथः. **-ed,** *a.* जीर्ण, साधारण, बहुप्रयुक्त, सर्वसाधारण.

Hades, *s.* पाताललोकः, पातालं, अधोलोकः-भुवनं.

Hæ(e)morrhage, *s.* रक्तस्रावः.

Haft, *See* **Handle.**

Hag, *s.* जरती, स्थविरा, कुरूपिणी. **-Haggard,** *a.* परिकृश, क्षाम, क्षीण, क्षाम-शुष्क-वदन, रूक्ष, उग्रदर्शन. **2** जरठ, स्थविर.

Haggle, *v. i.* क्रयविक्रयकाले विलंब् 1 A or विवद् 1 A.

Hagiology, सिद्धचरित्रलेखः.

Hail, *interj.* नमः, स्वस्ति, (with dat.); oft. ex. by जि 1 P; जयत जयतु देवः 'h. to Your Majesty'; कुशलं भूयात्, अभिवादये. **-s.** शिलावृष्टि *f.*, करकानिपातः;' h.-,stone' करका वर्षोपलः, वर्षशिला, पयोघनः, घन-मेघ-कफः; 'h.-storm' करकासारः, शिलावर्षः. **-v. i.** उपलान् वृष् 1 P or निपत् c., करकासारं पत् c. **-v. t.** वंद् 1 A, अभिवद् 10 A, संबुध् c., आमंत्र् 10 A, आ-अभि-भाष् 1 A, आ-ह्वे 1 P. **2** (fig.) प्रीत्या-मुदा-अंगीकृ 8 U; अभिनंद् 1 P.

Hair, *s.* केशः, कचः, बालः, चिकुरः, कुंतलः; 'h. on the head' शिरोरुहः, मूर्धजः, शिरसिजः. **2** (Of the body gen.) रो(लो)-मन *n.*, तनूरुहः-हं, तनुजः; 'quantity of h.' कैश्यं, कैशिक. **3** केश(स)रः; 'whole collection of h.' केशकलापः-पक्षः-हस्तः-पाशः; 'h. hanging on the forehead' भ्रमरकाः; 'lock of h.' काकपक्षः, शिखंडकः; 'matted h.' जटा, सटा; 'a braid of h.' कबरी, केशवेशः; 'curled h.' अलकः, चूर्णकुंतलः; 'braided h.' वेणि-णी *f.*, धम्मिल्लः; 'crest-h.' शिखा, चूडा, केशपाशी; 'clean h.' शीर्षण्यः, शिरस्यः, 'h.-broom or brush' केशमार्जनी-शोधनी; 'h.-dressing' केशरचना-संस्कारः; 'even a h.'s breadth, रेखामात्रमपि; 'a h.-breadth escape' कथमपि लब्धा मुक्तिः. **-less,** *a.* अकेश, केशहीन, विकेश. **-y** *a.* लोमश, लोमावृत प्रचुर-बहु-लोमन्, लोममय (यी *f.*), लोमवत्, लोमपूर्ण, केशव, कोशिन्, केशिक.

Halberdier, *s.* प्रासिकः, शाक्तीकः.

Halcyon, *s.* मत्स्यरंगः. **-a.** शांत, निरुद्वेग, निराकुल, प्रसन्न, अक्षुब्ध, निर्वात.

Hale, *a.* सुस्थ, नीरोग, कल्य, निरामय, नीरुज्-ज, आधिव्याधिरहित. **-v. t.** आकृष् 1 P; *See* **Pull.**

Half, *a.* अर्ध, सामि in comp.; 'h. done' सामिकृतं. **-s.** अर्धः-र्धं, अर्धभागः, अर्धांशः; in comp. ex. by अर्ध; अर्धांगं, पूर्वार्धः, &c.; 'a year and a h.' सार्धवत्सरः; 'h. eaten' अर्धभुक्त; अर्धविवृत, अर्धच्छिन्न, &c.; 'h.-brother' वैमात्रेयः, सापत्नः, अन्योदर्यः, वैमात्रः; h.-blood' भिन्नोदर, भिन्नगर्भ, अन्योदर्य; 'h. dead' मृतकल्प-प्राय, मरणोन्मुख, आसन्नमृत्यु, मुमूर्षु, कंठगतप्राण; h.-hearted' निरुत्साह, उत्साहहीन, आस्थारहित; 'h. moon' अर्धेंदुः, चंद्रार्धः; 'h.-sister' वैमात्रेयी, वैमात्री, अन्योदर्या; 'h. starved' क्षुधावसन्नप्राय, क्षुत्क्षामकल्प; 'h. way' अर्धमार्गे-पथे, मध्यमार्गे; 'h. year' अर्धवर्षं; 'h. yearly' षाण्मासिक-आर्धवार्षिक (की *f.*); 'h. a bread is better than no loaf' सर्वनाशे समुत्पन्ने अर्धं त्यजति पंडितः or अर्धेन कुरुते कार्यं.

Hall, *s.* कक्षा, मंडपः, बाह्यकोष्ठः.

Halloo, *interj.* हंहो, अहो, अरे, अये, भोभोः. **-v. t.** उच्चैः शब्दायते (D.), दूराद् उत्कुश्-आह्वे, 1 P or उद्-घुष् 10.

Hallow, *v. t.* पवित्रीकृ 8 U, पूज् 10, मह् 1 P, 10, अर्च् 1 P, 10. **2** संस्कृ, प्रोक्ष् 1 P, अभिषिच् 6 P.

Hallucination, *s.* मतिविभ्रमः; माया, मोहः, भ्रमः, व्यामोहः, वंचना, इंद्रजालं.

Halm, *s.* पलालः-लं, तृणं.

Halo, *s.* प्रभा-तेजो-मंडलं, परिवेषः-शः, परिधिः, द्युति or दीप्ति-मंडलं-चक्रं-माला; 'h. crown of silver light' रजतधवलप्रभामंडलं; 'with a h. of brilliant lustre' स्फुरत्प्रभामंडल *a.*

Halser, *s.* नौगुणः-रज्जु *f.*

Halt, *v. i.* निविश् 6 P. अव-स्था 1 A, प्रयाणभंगं कृ 8 U, अध्वमध्ये स्था. **2** विरम् 1 P, विश्रम् 4 P. **3** लंग् 1 P. -*a.* पंगु, गतिविकल, श्रोण. -*s.* निवेशः, अवस्थिति *f.*, अवस्थानं, प्रयाणभंगः, याननिवृत्ति-विरति *f.*; विश्रामः; 'h. ing place' निवेशस्थानं. **2** लंगनं.

Halter, *s.* पाशः, गुणः, रज्जु *f.*, कंठपाशः. -*v. t.* कंठपाशेन बंध् 9 P or संयम् 1 P.

Ham, *s.* जंघा, प्रसृता. **2** वल्लूरं-रः. **3** मंदिरः.

Hamadryad, *s.* वन-तरु-देवता.

Hamlet, *s.* ग्रामः, क्षुद्रग्रामः, कुग्रामः, पल्लि-ल्ली *f.*

Hammer, *s.* मुद्गरः, घनः, अयोघनः, द्रुघणः-नः. -*v. t.* बलेन-ताडनेन-प्रविश् c. **2** मुद्गरेण तड् 10 or प्र-हृ 1 P. -*v. i.* सोद्योगं यत् 1 A or परिश्रम् 4 P. **-ing,** *s.* मुद्गराघातः.

Hammock, *s.* प्रेंख, दोला, प्रेंखोलनं.

Hamper, *s.* पेटिका, पेटकः, करंडः, पिटः, कंडोलः. -*v. t.* प्रति-नि-वि-रुध् 7 U, प्रति-वि-हन् 2 P, कुंद् 10, बाध् 1 A, विघ्नयति (D.), स्तंभ् 9 P, प्रतिबंध् 9 P. **-ed,** *a.* कुंठित-निरुद्ध-गति, प्रतिहत, निरुद्ध, बाधित, कुंठित, प्रतिबद्ध.

Hamstring, *s.* मंदिराशिरा.

Hand, *s.* हस्तः, पाणिः, करः, शयः, पंचशाखः, भुजादलः. **2** पार्श्वः, भागः, पक्षः. **3** करणं, विधानं, चेष्टा, क्रिया, व्यापारः. **4** वशः-शं, अधिकारः, शक्ति *f.*, प्रभुत्वं. **5** कर्तृ *m.*, कारः-कारकः in comp.; कर्मकरः. **6** प्रदेशिनी, सूचिनी; कीलः; सूचि *f.* **7** लिपि *f.*, लिबि *f.*, अक्षरसंस्थानं, लिखितं; 'h. to hand' हस्ताहस्ति, बाहुबाहवि, मुष्टीमुष्टि; 'h. to h. fight' नियुद्धं, बाहुयुद्धं; 'on the one h.-on the other h.' एकतः-अन्यतः, इतः-इतः, एकंच-अपरंच; oft. by च-च; 'on the other h.' विपर्यये, प्रत्युत, तु, तावत्; 'if on the other h.' अथ, यदि; 'on all h. s' सर्वथा, सर्वत्र; 'at h.' प्रत्यासन्न, समीपवर्तिन्, आसन्न, संनिहित, समीपं-पे; 'in h.' हस्ते, हस्तगत, हस्तवर्तिन्, करतलगत; 'subject in h.' प्रकृतं, प्रस्तुतं; 'h. in h.' एकत्र, समवायसंबंधेन; सह, सहितं, समं, संभूय; 'to give a helping h.' हस्तावलंबं दा 3 U; 'given a helping h.' दत्तहस्तावलंब, 'living from h. to mouth' उत्पन्नभोजिन्; दुर्गत, कृच्छ्रगत; 'on h.' अनुपयुक्त, अव्यापृत; (of books &c.) अविक्रीत; 'sword in h.' खड्गहस्त, कृपाणपाणि; 'off-h.' आशु, अविचार्य, अविलंबं; आकस्मिक-प्रत्युत्पन्न-अचिंतितपूर्व- *a.* 'out of h.' सपदि, तत्क्षणात्; 'to take in h.' आरभ् 1 A, प्रस्तु 2 U, उपक्रम् 1 A; lend a h. उपकृ 8 U, अनुग्रह् 9 P, साहाय्यं कृ; 'lay h. s on' धृ 1 P, ग्रह्, आधृष् c., परामृश्-स्पृश् 6 P, 'to have a h. in' सहकारिन् *a.* भू, सहायः भू; 'have or get the upper h.' अभि-भू, प्र-भू, अतिरिच् pass; 'under-h.' निंद्य, छलेन, सकपट; 'clap the h. s' करतालं वद् c.; 'to support with the h.' करेण अव-आ-लंब् 1 A, हस्तावलंबं दा; 'the open or extended h.' चपेटः, चर्पटः, प्रहस्तः, प्रतलः; 'hollow of the h.' करपुटं, हस्तकोषः; 'two open h.-s joined together' संहततलः, प्रतलः; 'folded h,' प्रसृतिः; 'folded h. s joined' अंजलिः; 'clenched h.' मुष्टि *m. f.*; 'h. with the fist clenched' रत्निः. -*v. i.* हस्ते-करे-निक्षिप् 6 P or दा 3 U or ऋ c. (अर्पयति); 'h. down' परंपरया-क्रमेण-संचर् c. or संक्रम् c.; 'to be h. ed down' परंपरया आगम् 1 P; उप-, संक्रम् 1 U, 4 P, (यानि भगवतःकृशाश्वात्कौशिकमृषिमुपसंक्रांतानि U. 1;); (in sacred texts) आ-समा-म्ना pass.; 'h.-book' हस्तनेयं पुस्तकं; लघुग्रंथः; 'h.-cuff' हस्तपाशः-निगडः, करबंधनं; (*v. t.*) पाशेन हस्तौ बंध् 9 P or संयम् 1 P or यंत्र् 10; 'h.-kerchief' करवस्त्रं; 'h.-maid' चेटी, दासी, परिचारिका; 'h.-mill' हस्तचालिता पेषणी; 'h.-weapon' हस्तायुधं, करशस्त्रं; 'h.-writing' लिखितं, लिपिबि *f.*, अक्षरसंस्थानं; 'one's own h.-writing' हस्तलेखः, स्वहस्ताक्षरं. **-ful,** *s.* मुष्टि *m. f.*; 'a h. of grass' तृणमुष्टिः. **2** अल्पस्तोक-संख्या, oft. by अल्प-स्तोक-*a.* **-Handicraft,** *s.* शिल्पं, हस्तलाघवं, हस्तशिल्पं-कर्मन् *n.* शिल्पविद्या; 'h. s-man' शिल्पिन् *m.*, शिल्पकारः, कर्मकरः. **-Handiwork,** *s.* हस्तकृतं कर्म. **-Handy,** *a.* दक्ष, लघुहस्त, करदक्ष, सुप्रयोगवत्, कुशल, निपुण, चतुर, पटु, क्षिप्रकारिन्. **2** सुखनेय, लघुभार, अदुर्वह. **3** आसन्न, निकट, प्रत्युत्पन्न. **-ly,** *adv.* हस्तलाघवेन, दक्षतया, सपाटवं, युक्त्या, चतुरं, दाक्ष्येण. **-ness,** *s.* दक्षता, हस्तलाघवं, करदक्षता, कौशलं, चातुर्यं, नैपुण्यं.

Handle, *s* मुष्टि *m. f.*, दंडः, कर्णः, वारंगः, तलः-लं. **2** (Of swords) त्सरुः, सरुः. **3** (Of ploughs) ईषादंडः; 'to give h.' अवसरं-अवकाशं-दा 3 U; 'serve as a h.'

उपकरणीभू 1 P. -*v. t.* (A subject) वि-चर् c., विमृश् 6 P, निरूप् 10, परीक्ष् 1 A, पर्यालोच् 10; *See* **Examine.** **2** प्रयुज् 7 A, 10; वृत् 1 A, व्यव-हृ 1 P, आचर् 1 P (with loc.). **3** प्र-णी 1 P, वि-धा 3 U, निर्वह् c. **4** हस्तेन स्पृश्-परामृश् 6 P or आ-समा-लभ् 1 A.

Handsel, *s.* प्रथमव्यवहारः-विक्रयः.

Handsome, *a.* कांतिमत्, सुंदर (री *f.*), रूपवत्, सुरूप, चारु, शुभ, शोभन, कांत, वाम, सुगात्र (त्री *f.*), सुदृश्य, सु in comp.; *See* **Beautiful,** **2** विपुल, यथेष्ट, प्रचुर. **3** उदार, वदान्य, स्थूललक्ष्य; 'h. is that h. does' आचारसौष्ठवमेव परमार्थतः सौष्ठवमित्युच्यते. **-ly,** *adv.* चारुतया, शोभनं, सु pr. **-ness,** *s.* कांति *f.*, रूपं, लावण्यं, शोभा.

Hang, *v. t.* बंध् 9 P, नि-धा 3 U, अनु-वि-संज् (षंज्) 1 P, आ-अव-लंब् c., आंदोलयति (D.); 'hung by a loop' काचित, शिक्यित. **2** उद्-बंध्, उद्बध्य व्या-पद् c. or हन् c. (घातयति). **3** आ- अव-नम् c. (नमयति), नम् c., नम्रीकृ 8 U, नम्रतां नी 1 P; *See* **Bend;** 'with his lotuslike face hung down' अवनतमुखपुंडरीकः; 'h.-ing the head' अवनतमुख-शिरस्, नतमूर्धन्. **4** आच्छद् 10, वि- भूष् 10, प्र-साध् c., मंड् 10, अलंकृ 8 U, परिष्कृ. -*v. i.* प्र-अव-लंब् 1 A, लुल् 1 P, लुठ् 6 P, 1 A, चंच् 1 P, दोलायते (D.), प्रेंख् 1 P, उद्-बंध् pass.; 'h. between' त्रिशंकुरिवांतरा तिष्ठ (S. 2). **2** (Stick) आसंज् pass., लग् 1 P, अनुबंध् pass., संलग्नीभू 1 P. **3** (On, upon) अव-लंब्, आ-श्रि 1 U, उप-अनु-जीव् 1 P; *See* **Depend;** 'thereby h. s a tale' तदनुविद्धा काचिदाख्यायिका वर्तते; 'h. over' उन्नम् 1 P, उप-स्था 1 U, प्रत्यासद् 1 P. **-er,** *s.* उद्बंधकः; 'h. on' आश्रितः, पादसेविन् *m.*, पीठमर्दः, अनु-उप-जीविन् *m.*, पराधीनः, परापिंडादः. **-ing,** *s.* उद्बंधनं. **2** परिच्छदः, वसनं; जवनिका, प्रच्छदपटः, चित्रयवनिका. **-Hangman,** *s.* घातकः, दंडपाशिकः, वध्यापुरुषः.

Hank, *s.* काष्ठवलयः. **2 Cheat,** q. v.

Hanker, *v. i.* अभिलष् 1, 4 P, स्पृह् 10, वांछ् 1 P, उत्कंठ् 1 A; लुभ् 4 P; *See* **Long;** oft. by उत्क, उत्सुक, पर्युत्सुक, पर, तत्पर, परायण, in comp. **-ing,** *s.* अतिस्पृहा, उत्कंठा, औत्सुक्यं, अत्यभिलाषः.

Hap, *s.* दैवं, दैवयोगः-घटना, यदृच्छा. **-less,** *a.* अधन्य, मंदभाग्य, दुर्दैव. **-ly,** *adv.* दैवात्, दैवयोगात्, दैववशात्.

Haphazard, *a.* असमीक्ष्य, अविचार्य; दैवायत्त, दैवाधीन.

Happen, *v. i.* वृत् 1 A, भू 1 P. घट् 1 A; संवृत्, सं-भू, सं-समा-पद् 4 A. स्था 1 P, आ-सं-पत् 1 P, प्रसंज् pass. **2** अकस्मात्, यदृच्छया, दैवात्, दैववशात् with verbs; *See* **Chance.**

Happy, *a.* सुखिन्, प्रीत, हृष्ट, सानंद, सुखित, सुखभाज्, प्रमुदित, आह्लन्न, निर्वृत, निश्चिंत, तृप्त, संतुष्ट. **2** भाग्यवत्, शुभान्वित, शुभंयु, समृद्ध, श्रीमत्, निरापद्, कुशलिन् निर्वृतिमत्, क्षेम; धन्य, कृतिन्, कृतार्थ; 'h. is it for me that &c.' इदमेव तावन्मम परमभाग्यं मन्ये. **3** शुभ, शिव, कल्याण (णी *f.*), मंगल, पुण्य, भद्र, भव्य, आनंदप्रद, भावुक, प्रशस्त; 'a h. result' सुफलं, कल्याणोदर्कः. **-ly,** *adv.* सुखेन, सुखं, निर्विघ्नं, स्वास्थ्येन, यथासुखं. **2** दिष्ट्या, दैवात्, अकस्मात्, यदृच्छया, दैववशात्, सौभाग्येन, पुण्योदयात्. **-ness,** *s.* सुखं, सौख्यं, आनंदः, धन्यता, हर्षः, कृतार्थता शर्मन् *n.*, संतोषः, निर्वृति *f.*, श्रीः, संपद् *f.*, पुण्योदयः. **2** कल्याणं, भद्रं, क्षेमः-मं, शिवं, स्वास्थ्यं, कुशलं.

Harangue, *s.* उच्चैः वचस् *n.*, तारस्वरेण भाषणं, सालंकारं वचनं. -*v. i.* सालंकारं-सदर्प-वद् 1 P or भाष् 1 A. **-er,** *s.* वागीशः, प्रवचनपटुः, वाक्पटुः.

Harass, *v. t.* अर्द् 1 P or c., व्यथ् c. (व्यथयति), पीड् 10, क्लिश् 9 P, दु 5 P, सं-परितप् c., उपहन् 2 P, विप्र-कृ 8 U, नि-कृ, उपप्लु 1 A, बाध् 1 A, प्रतिरुध् 7 U. **2** खिद् c., श्रम् c., क्लम् , c. आयस् c., ग्लै c. (ग्लग्ला-पयति). **-er,** *s.* पीडकः, उपप्लावकः, खेदकः, आयासकः. **-ing,** *a.* दुःख-क्लेश-कर (री *f.*), पीडाप्रद, क्लेशावह.

Harbinger, *s.* अग्रे(ग्र)सरः, अग्रदूतः. अग्रपुरोगः-गामिन् *m.* वार्ताहरः, संदेशहरः (of news); 'h. of spring' वसंताग्रदूतः; 'antecedent good omens are the h. s of the coming happiness' आवेदयंति प्रत्यासन्नमानंदं अग्रजातानि शुभानि निमित्तानि (Ka. 65).

Harbour, *s.* खातं, क्रोडः, नौकाशयः. **2** शरणं, गति *f.*, आश्रयः, संश्रयः, अवकाशः, वासस्थानं. -*v. t.* वस् c., आश्रयं-वासस्थानं-दा 3 U, सत्कृ 8 U. **2** धृ 1 P, 10, मनसि कृ or उपलभ् 1 A or ग्रह् 9 U or नि-धा 3 U. **3** आश्रि 1 U, निवस् 1 P. **-age,** *s.* आश्रयः; *See* (*s.*). **-less,** *a.* निराश्रय, अगतिक, अशरण.

Hard, *a.* दृढ, घन, संहत, कठिन, दृढसंधि, कठोर, कर्कश, कीकस; 'becoming h. (solid)' कठिनतामापद्यमान. **2** उग्र, दारुण; निर्घृण, निर्दय, क्रूर, नृशंस, निष्ठुर, कठोर; 'oh h. fate' अहो दारुणो दैवदुर्विपाकः, अहो वामता-वक्रता-विधेः, अहो वक्रं विधेः क्रीडितं. **3** (Lesson) दुर्बोध, असुगम, दुर्ज्ञेय, गहन. **4** क्लेशावह, दुःखद,

व्यथा-पीडा-कर (री *f.*), क्लेशिन्. **5** (Sound) कर्कश, कठोर, रूक्ष, परुष. **6** अननुकूल, वाम, विरुद्ध, प्रतिकूल, प्रतीप, वक्र. **7** असुकर, दुष्कर, कष्ट, दुःसाध्य, कठिण, दुर्-दुःख-कष्ट in comp.; *See* **Difficult.** **8** शुक्त, अम्ल. **-***adv.* प्रयत्नतः, आयासेन, सोद्योगं, बलेन, बलवत्, सोत्साहं, प्रसभं, तीक्ष्णं, सप्रयत्नं, सोद्यमं. **2** दुःखेन, कष्टेन, कृच्छ्रेण, प्रयासेन, दुर् pr. **3** त्वरितं, शीघ्रं; 'h.-pressed by hunger' क्षुधया नितरां-बलवत्-पीडित, प्रबलक्षुधावसन्न; 'h. by' समीपे-पं, अनतिदूरं-रे, निकटं-टे, उपांते, आरात्; 'h.-drinker' पानरतः, अतिपानासक्तः; 'h.-earned' कष्टोपार्जित, श्रमेण लब्ध; 'h.-featured' दुर्मुख. कदाकार; 'h.-fisted' दृढ-बद्ध-मुष्टि, असुक्तहस्त, व्ययपराङ्मुख; 'h.-hearted' कठोर, नृशंस, क्रूर, निर्दय, निर्घृण, कठोर-कठिण-हृदय, पाषाण-वज्र-हृदय, अयोहृदय, वज्रमय (यी *f.*), निरनुक्रोश; 'h.-ware' लोहभांडानि (pl.). **-en,** *v. t.* कठिनीकृ 8 U, दृढीकृ, घनीकृ, कृ with (*a.*). **-ly,** *adv.* कथं कथमपि, कष्टेन, दुःखेन, कष्टं, कृच्छ्रेण, नैव. **-ness,** *s.* काठिन्यं, दृढता, कठोरता, निष्ठुरता, दुर्बोधता, दुष्करत्वं, उग्रता, &c. **-ship,** *s.* कष्टः-ष्टं, क्लेशः, दुःखं, पीडा, बाधा, काय-देह-क्लेशः; कृच्छ्रं, आयासः, खेदः. **-Hardy,** *a.* साहसिन्, प्रगल्भ, शूर, वीर, धीर, निर्भय, प्रतिभानवत्, साहसिक (की *f.*), विक्रांत, निःशंक. **2** दृढ or कठिन-देह-शरीर-काय; 'of a h. frame सिंहसंहनन; वज्रदेह. **-hood,** *s.* वीर्यं, शौर्यं, साहसिकता, प्रागल्भ्यं, साहसं; धृष्टता, प्रतिभा, निर्लज्जता. **-ness,** *s.* शौर्यं, वीर्यं, देहकाठिन्यं.

Hare, *s.* शशः, शशकः; 'h.-brained' अविमृश्यकारिन्, चपलबुद्धि, भ्रांतचित्त, साहसपर.

Harem, *s.* अवरोधः-धनं, शुद्धांतः, अंतःपुरं, अवरोधगृहं, स्त्रीगृहं; 'men of the h.' अवरोधः, परिग्रहः, अं[illegible]रं.

Hark, *interj.* ननु, [illegible], आकर्णय, अवधीयतां.

Harlequin, *s.* वैहासिकः, भंडः, विदूषकः.

Harlot, *s.* वेश्या, पण्यस्त्री, वार-स्त्री-योषित्-योषा, पण्यांगना, गणिका, वारांगना, रूपाजीवा; बंधकी, पुंश्चली, कुलटा. **-ry,** *s.* वेश्यावृत्ति *f.*, वेश्यासेवा.

Harm, *s.* क्षति *f.*, हिंसा, अपायः, नाशः, पीडा, बाधा, अपचयः, अपकृति *f.*, विरोधः, अपकारः, हानि *f.*, उपद्रवः. **2** दोषः, अपराधः, पापं, नियमव्यतिक्रमः. **-***v. t.* दु 5 P, क्लिश् 9 P, अर्द् 1 P or c., हिंस् 7 P, उपद्रु 1 P, पीड् 10, बाध् 1 A, अपकृ 8 U, उपहन् 2 P, द्रुह् 4 P (with dat.), क्षण् 1 P, वि-प्र-कृ. **-ful,** *a.* हिंस्र, अपकारिन्, उपद्रविन्, हिंसक, अपकारक, हिंसात्मक, क्षतिकारक; घातुक, शरारु, शारुक (animals). **-less,** *a.* अनपकारिन्, अहिंस्र, निरुपद्रव, अहिंसक, अघातुक. **2** निर्दोष, निरपराध, निष्पाप. **-lessness,** *s.* अहिंसा, अद्रोहः, अनपकारः, हिंसात्यागः. **2** निरपराधता.

Harmony, *s.* तालैक्यं, स्वरैक्यं, स्वरसंगः, एकतालः-नः; 'the triple h.' तौर्यत्रिकं. **2** कलता, सुश्राव्यता, स्वरमाधुर्यं, सुस्वरता. **3** संवादः, अविरोधः, ऐक्यं, एकता, संगः, संयोगः, आनुरूप्यं, सादृश्यं; 'h. of thought or mind' चित्तैक्यं, संमति *f.*, एकचित्तता, मतसंवादः. **4** स्नेहभावः, प्रीति *f.*, मैत्र्यं, स्नेहः. **-ic,-ical,** *a.* एकताल-न, सम-एकस्वर, सुस्वर. **-ize,** *v. t.* सदृशीकृ 8 U. **2** स्वरैक्यं-तालैक्यं-उत्पद् c. **-***v. i.* सदृशीभू 1 P, एकी-तुल्यी-भू, सं-वद् 1 P, न विरुध् pass. **-ous,** *a.* एकताल-न, एक-सम-स्वर, एकस्वन, संगतस्वर-स्वन, एकलय. **2** मधुरस्वर-स्वन, सुस्वर, सुखश्रव, श्रोत्राभिराम, सुश्राव्य, श्रुतिसुख, कल, श्रवणसुभगं. **3** संवादिन्, सदृश (शी *f.*), अविरुद्ध, अनुगुण, अनुरूप. **-ously,** *adv.* एकस्वरेण-स्वनेन. **2** मधुरस्वरेण-स्वनेन, कलं, मधुरं, सुस्वरं. **3** चित्तैक्येन, अविरोधेन.

Harness, *v. t.* सज्जीकृ 8 U, सन्नह् 4 P or c., सज्ज *a.* कृ. **2** (रथे) युज् 7 U, 10, नि-आ-सम्°. **-***s.* सज्जा, सन्नाहः, प्रसाधनं, परिच्छदः, आभरणं. **2** अश्वसज्जा.

Jeopardy, *s.* संशयः, संदेहः, शंका; 'j. of life' जीवितसंशयः, प्राणसंदेहः. **-Jeopard,** *v. t.* **-ize,** *v. t.* संशये पत् c., सशयस्थ-संशयित-*a.* कृ 8 U; 'one who j.-es his life' संशयितजीवितः; *See* **Danger** also.

Jerk, *v. t.* (सहसा) चल् c., वि-धू 6 P, 5, 9 U; लघु-सहसा तड् 10 or प्रह 1 P, अकस्मात्-सवेगं-क्षिप् 6 P. -*s.* चालनं, लघुप्रहारः, लघ्वाघातः, लघु-आकस्मिक-क्षेपः.

Jerkin, *s. See* **Jacket.**

Jessamine, *s. See* **Jasmine.**

Jest, *s.* परि(रि)हासः, नर्मन् *n.*, हास्यं, विनोदोक्ति *f.*, प्रहसनं, विनोदभाषणं, परिहासोक्तिः, नर्मालापः; 'truce to (fie upon) your j. s ' धिक्प्रहसनं (U. 4.), अलं परिहासेन; ' uttered in j. ' परिहासजल्पितं; 'made a j. of the matter' तमर्थं परिहासमिव मेने. **2** खेला, क्रीडा, केलि *f.*, कौतुकं; ' in j. ' परिहासेन, परिहासपूर्वं. -*v. i.* परिहस् 1 P, विनोद-परिहास-वाक्यं वद् 1 P or उदीर् c.; क्रीड् 1 P. **-er,** *s.* वैहासिकः, परिहासयितृ *m.*, परिहास-विनोद-कारिन् *m.*, भंडः, चाटुपटुः; ' king's j. ' विदूषकः, नर्मसचिवः. **-ingly,** *adv.* परिहासपूर्वं, सपरिहासं, सविनोदं.

Jet, *s.* जलोत्क्षेपः. **2** कृष्णप्रस्तरः; ' j.-black ' घनकृष्ण, अतिकृष्ण. **-ty,** *a.* कृष्णवर्ण.

Jewel, *s.* मणि *m. f.*, रत्नं; 'j. of a woman' स्त्रीरत्नं; ' j. -house ' मणिशाला, रत्नागारं; 'j.-mine' रत्नाकरः, रत्न-मणि-खनि *f.*-भूमि *f.* **-led,** *a.* रत्नवत्, मणि-रत्न-मय (यी *f.*), रत्नसनाथ, मणि-रत्न-खचित, रत्नानुविद्ध. **-ler,** *s.* रत्नाजीविन् *m.*, मणिकारः, रत्नकारः. **-Jewelry,** *s.* रत्नानि (pl.), रत्नादिकोशः-षः.

Jiffy, *s.* निमेषः, क्षणः.

Jig, *s.* नृत्यविशेषः. **2** वंचना, व्याजः, छलं.

Jilt, *s.* प्रतारिका,चपला, वंचिका, संकेतलंघिनी. -*v. i.* प्रेमसंकेतं लंघ् 1 A, 10, प्रेमविषये वंच् 10, or प्रतृ c., खंड् 10.

Jingle, *v. i.* शिंज् 2 A, 10, क्वण् 1 P, वि-रु 2 P, झणझणायते (D.), कलं स्वन् 1 P -*s.*, **-ing,** *s.* शिंजितं, शिंजा, झणत्कारः, झणझणस्वनः, क्वणितं, क्वणनं, कलरवः.

Job, *s.* कार्यं, कृत्यं, व्यापारः, क्रिया. **2** लघु-क्षुद्र-नीच-क्रिया. **3** स्वार्थपरं कार्यं, आत्मवृद्ध्यर्थं कर्मन् *n.* -*v. i.* क्षुद्रकर्माणि कृ 8 U, स्वार्थमुद्दिश्य कार्यं कृ. **2** पण् 1 A. **3** *v. t.* अपव्यध् 4 P. **-ber,** *s.* क्षुद्रकर्मकारिन् *m.*, परार्थक्रयविक्रयकारिन् *m.*, स्वार्थप्रवर्तकः, क्रयविक्रयिन् *m.* **-bing,** *s.* क्षुद्रकर्मव्यवसायः, स्वार्थप्रवृत्ति *f.*

Jockey, *s.* अश्वज्ञः, हयज्ञः, अश्वविद् *m.*, अश्वकोविदः, अश्वविद्याविशारदः. -*v. t.* अश्वज्ञ इव प्रतृ c. or वंच् 10. **-ism,** *s.* अश्वविद्या-शिक्षा.

Jocose, Jocular, *a.* हास्यकर (री *f.*), विनोदिन्, हास्यावह, विनोदात्मक, सरस, हास्यगर्भ, सकौतुक; (of persons) परिहासशील, परिहासक, विनोद-नर्मालाप-पर, कौतुकिन्. **-ly,** *a.* परिहासेन, परिहासपूर्वं, सकौतुकं, विनोदार्थं, रसिकवत्. **-ness, -ity,** *s.* परिहासशीलता, रसिकता, विनोदः, कौतुकं, उल्लासः, हर्षः, प्रमोदः.

Jocund, *a.* प्र-,हृष्ट, प्र-,मुदित, आनंदवृत्ति. **-ity,** *s.* उल्लासः, प्रहर्षः, आनंदः; *See* **Glad.**

Jog, (on) *v. i.* मंदं मंदं प्रसृप् 1 P or चल् 1 P or सृ 1 P. -*v. t.* अरत्निना तड् 10, ईषत् चल् c. -*s.* ईषदाघातः, ईषत्प्रहारः-चालनं; ' j.-trot ' व्रज-मंद-गति *f.*, मंद-प्रयाणं.

Join, *v. t.* युज् 7 U, 10, सं-आ°-,संसंज् 1 P, यु 2 P, संश्लिष् c., सं-धा 3 U, संबंध् 9 P, संहन् 2 P, एकत्र कृ 8 U, संग्रंथ् 9 P, योक्त्रयति (D·), घट् c. (घटयति), संपृच् 2 A, 7 P. **2** (Go to) समुपागम् 1 P, सं-इ 2 P, संमिल् 6 P, संगम् 1 A; pass. of roots above (with instr.); ' j. hands ' अंजलिं बंध् 9 P, प्रां(सां)जलि-*a.* भू, हस्तौ समा-नी 1 P; ' j. ed their hands in marriage ' विवाहविधिना ताभ्यां अन्योन्यपाणिग्रहणं कारयामास, वधूवरं संगममांचकार **-ed,** *a.* युक्त, युत, संयुक्त, संयुत, संश्लिष्ट, संहत, सं-समा-सक्त, लग्न, संलग्न, संबद्ध, संपृक्त, संहित, सहित, संगत, समेत, मिलित, घटित. **-er,** *s.* तक्षकः, रथकारः, सूत्रधारः, तष्टृ, *m.*, तक्षन् *m.*, काष्ठतक्ष् *m.*, वर्धकिः. **-ery,** *s.* काष्ठतक्षणं. **-ing,** *s.* सं-,योगः, संधिः, संसर्गः, संधानं, संश्लेषः, संघातः, संगमः, संसक्ति *f.* **-Joint,** *s.* संधिः, पर्वन् *n.*, ग्रंथिः, कांडः-डं, अस्थिग्रंथिः-संधिः; ' out of j. ' विलग्न, विसंधि. -*a.* संयुक्त, समवेत, एककार्यव्यापृत, सहत. **2** असंविभक्त, अविभक्त, साधारण (णी *f.*), सामान्य, सह in comp .; संघातवत्, संभूयकारिन्; ' j. proprietor' सहाधिकारिन् *m.*; ' j. family property ' संसृष्टिधनं; ' members of a j. family ' संसृष्टाः, संसृष्टिनः; ' with j. labour' संभूयश्रमेण,सर्वेषां यत्नेन; 'j.-stock company' संभूयसमुत्थानं; 'j.-heir' भागिन् *m.*, संविभागिन् *m.*, समांशहरः, समांशिन् *m.* -*v. t.* संधियुक्त-*a.* कृ; ex. by (*s.*). **-ed,** *a.* संधिविशिष्ट, ग्रंथिल, संधि-ग्रंथि-युक्त, पर्ववत्. **-ly,** *adv.* समं, सह, संभूय, संयोगेन, सहितं, समवायेन, एकीभूय, एकचित्तीभूय, युगपत्. **-Jointure,** *s.* विधवाधनं; स्त्रीधनं.

Joke,-er, *See* **Jest,-er.**

Jole, *s.* गंडः, कपोलः.

Jolly, *a.* प्र-,हृष्ट, सानंद, उल्लसित, प्रमोदिन्, हृष्ट-प्रीत-हृदय; परिहासशील, विनोदिन्, विलासिन्, विनोदशील. **-ity,** *s.* उल्लासः, आनंदः, प्र-,हर्षः, प्रमोदः, उत्सवः. **-ness,** *s.* विनोदपरता, प्रहासः,

Jolt, *v. t.* संक्षुभ् 9 P or c. -*v. i.* क्षुभ् 1 A, 4 P. -*s.*, **-ing,** *s.* संक्षोभः, उद्घातः, आकस्मिकक्षेपः.

Jolthead, *s.* स्थूलबुद्धिः, मूर्खः, मूढः; *See* **Fool.**

Jostle, *v. t.* स्कंधताडनेन निराकृ 8 U or निः-सृ c. or निर्-धू 6 P, 5, 9 U or निर्-अस् 4 U; परस्परं समाहन् 2 P or संघृष् 1 P or संमृद् 9 P, अभिसं-पत् 1 P; संघट्ट् 1 A. **-ing,** *s.* परस्परसमाघातः-घर्षणं, अन्योन्य-संमर्दः, अभिसंपातः.

Jot, *s.* कणः, लवः, अणुः, लेश-लव-कण-बिंदु-मात्रं, तिलमात्रं. **-***v. t.* (स्मरणार्थं) लिख् 6 P or अंकू 10. **-ting,** *s.* अभिलिखितं.

Journal, *s.* वार्ता-वृत्त-समाचार-पत्रं or पत्रिका. **-ist,** *s.* वृत्तपत्रप्रकाशकः-लेखकः.

Journey, *s.* प्रयाणं, प्रस्थानं, प्रवासः, यात्रा, देशभ्रमणं-पर्यटनं, अध्वन् *m.*, मार्गः, अध्व or मार्ग-गमनं or क्रमणं, 'on account of the fatigues of j.' अध्वसंजातखेदात्; उत्थाय पुनरवहत् (Ka. 299). 'resumed his j.' &c.; 'it is only a week's j.' सप्ताहगम्योऽध्वा; 'to return from a j.' प्रवासाद् उपानि-वृत् 1 A; 'may the j. be pleasant to you' शिवास्ते पंथानः संतु. **-***v. i.* प्र-या 2 P, मार्गेण गम् or व्रज् or चर् 1 P or या, पर्यट् 1 P, परिभ्रम् 1, 4 P वह् 1 P, दिवा रात्रौ चावहत् (Ka. 301); 'to j. abroad' प्रवस् 1 P. **-er,** *s.* अध्वगः, पथिकः, पांथः, यात्रिकः. **-Journeyman,** *s.* वैतनिकः, हस्तकर्मकारः.

Jovial, *a.* उल्लासिन्, सदानंदिन्.

Joy, *s.* आनंदः, हर्षः, उत्सवः.

Jubilant, *a.* जयघोषं कुर्वाण, जयध्वनिकारिन्.

Jubilate, *v. i.* जयघोषं कृ 8 U, नंद् 1 A, हृष् 1 P.

Jubilee, *s* प्रहर्षः, महोत्सवानंदः, महोत्सवः, उत्सवकालः.

Judge, *s.* प्राड्विवाकः, अ(आ)धिकरणिकः, अक्षदर्शकः, धर्माध्यक्षः, धर्माधिकारिन् *m.*, न्यायाध्यक्षः, निर्णेतृ *m.*, दंडनायकः. **2** (In general) अभिज्ञः, गुणदोषज्ञः, विवेकज्ञः, परीक्षकः, परिच्छेदकः, विवेकिन् *m.*, गुणग्राहिन् *m.*, रसज्ञः, तद्विद् *m.*, **-***v.* वि-विच् 3, 7 U, परिच्छिद् 7 P, वि-ज्ञा 9 U, विभू c., विचर् c., निर्णी 1 P, निश्चि 5 U, अव-निर्-धृ 10, अव-परि-ईक्ष् 1 A, तीर् 10. अनु-सं-धा 3 U. **2** वितर्क् 10, विमृश् 6 P, विगण् 10, विकल्प् c., मनसा विचर् or विविच्, मन् 4 A; 'it is for you to j. whether &c.' एतद्विषये भवान् प्रमाणं; 'j. me by my acts' फलेन मद्गुणदोषनिर्णयः क्रियतां; 'to j. ill or wrongly' मिथ्या कल्प् c. or संभू c. or मन्. **-ment,** *s.* विवेकः, परिच्छेदः, विचारः-रणा, विज्ञानं, विभावनं, निर्धारणा, निर्णयः, निश्चयः, संकल्पः, अवधारणं-णा. **2** (Judicial decision) निर्णयः, विचारः, निर्णयपादः, आघर्षणं; तीरणं, दंडाज्ञा. **3** अनुभवः, तर्कः, ज्ञानं, अनुमानं. **4** मति *f.*, बुद्धि *f.*, मतं, अभिप्रायः, संकल्पः, बोधः; 'according to one's j.' यथामति, यथाबुद्धि. **5** (Divine j.) ईश्वराज्ञा, ईश्वर-विधिः-नियमः-शासनं; 'j.-day' विचारादिनं; 'j.-hall' न्यायसभा, विचार-धर्म-सभा; 'j.-seat' व्यवहारासनं, न्यायासनं, धर्मासनं. **-Judicatory,** *s.* धर्म-विचार-न्याय-सभा, व्यवहारमंडपः, धर्माधिकरणं. **2** न्यायप्रणयनं. **-Judicature,** *s.* न्यायाधिकारः, व्यवहार-दर्शनाधिकारः; *See* **Judicatory** above. **-Judiciary,** *a.* विचारक, व्य(व्या)वहारिक (की *f.*). **-Judicial,** *a.* व्यवहार-विषयक, व्यवहार in comp.; 'j. proceeding' व्यवहारदर्शनं, व्यवहारः, न्यायविचारः. **-ly,** *adv.* व्यवहारानुसारेण, यथा-व्यवहारं, न्यायानुरूपं. **-Judicious,** *a.* (Act) समीक्ष्य-विमृश्य-कृत, न्याय्य, धर्म्य, समंजस, उचित, यथान्याय, सविवेक, युक्त, योग्य. **2** (Persons) विमृश्य-समीक्ष्य-कारिन्, विवेकिन्, नीतिमत्, परिच्छेदक, नयज्ञ, प्राज्ञ, विवेकदृश्वन्, विशेषज्ञ, सदसद्दर्शिन्. **-ly** *adv.* युक्तं, समंजसं, यथान्यायं, उचित, सम्यक्. **2** सविवेकं, सपरिच्छेदं, सुविमृश्य, सुविचार्य, प्राज्ञ-विज्ञ-वत्.

Jug, *s.* कुंभः, कलशः, कंसः, उदकपात्रं; *See* **Jar.**

Jugate, *a.* संयुक्त, संश्लिष्ट.

Juggle, *v.* मुह् c., छल् 10, वंच् 10, दृष्टिं मुह् c. or बंध् 9 P, मायां-कुहकं-इंद्रजालं-कृ 8 U. **-***s.*, **-ing, -ry,** *s.* माया, कुसृति *f.*, दृष्टिमोहः-बंधः, इंद्रजालं, कुहका-कं, इंद्रिय-दृष्टि-मोहः, हस्तलाघवं-चापल्यं. **2** वंचना, छलं, कूटता, प्रतारणा. **-er,** *s.* ऐंद्रजालिकः, मायिन् *m.*, मायाकारः, मायाजीविन् *m.*, कुहकजीविन् *m.*, कौसृतिकः, अ(आ)हिंतुंडिकः

Jugular, *a.* कंठस्थ, कंठ्य.

Juice, *s.* रसः, द्रवः, सारः, निर्यासः, आसवः 'j. issuing from the elephant's temples' मदः, दानं, मदवारि. **-less,** *a.* नीरस, अरस, विरस, असार, सारहीन-शून्य, शुष्क, पिंडीर. **-y,** *a.* रसमय (यी *f.*), रसपूर्ण, सरस, बहु-रस, रसाढ्य, सार-रस-वत्.

Jujube, *s.* बदरी, कर्कंधु-धू *m. f.*, कोलि *f.*, कोलाली; (fruit) बदरं, कोलं, कुवलं, फेनिलं, सौवीरं, घोंटा.

July, *s.* आषाढश्रावणं.

Jumble, *v. t.* संकृ 6 P, संमिश् 10, संक्षिप् 6 P, संकुली-संकरी-कृ 8 U. **-***v. i.* संकृ pass., संकरी-संकुली-भू 1 P. **-***s.* संकरः, सं-, मिश्रणं, संक्षोभः, संकुलता, संनिपातः.

Jump, *v. i.* प्लु 1 A, वल्ग् 1 U, स्कंद् 1 P; 'j. about' नृत् 4 P; 'j. over' लंघ् 1 A; 10; 'j. up' उत्प्लु, उत्पत् 1 P; 'j. with' **Agree,** q. v. **-***s.*, **-ing,** *s.* प्लवनं, उत्पतनं

वल्गितं, प्लुतं-ति *f.*, प्लवः, आस्कंदः, झंपः-पा. **-er,** *s.* प्लवकः, झंपिन् *m.*

Junction, *s.* स-,योगः, संगमः, संमिलनं, संगति *f.*, समागमः, संश्लेषः, संधिः, संसर्गः, संघातः, संसक्ति *f.*, संपर्कः; 'j. of rivers' संभेदः, संगमः. **2** संधिस्थानं.

Juncture, *s.* वेला, समयः; कष्टकालः-समयः, संकटवेला. **2** संधिः, ग्रंथिः.

June, *s.* ज्येष्ठाषाढकं.

Jungle, *s.* गुल्मावृतं स्थानं.

Junior, *a.* कनीयस्, अवर, अवरज, यवीयस्, अवरपदभाज्.

Junket, *s.* निभृतोत्सवः. **2** मिष्टान्नं, मोदकः.

Junta, Junto, *s.* सभा, समाजः, गूढसंसर्गः, कुसंसर्गः.

Juridical, *a.* व्य(व्या)वहारिक (की *f.*); *See* **Judicial.**

Jurisconsult, *s.* स्मृतिशास्त्रज्ञः, धर्मशास्त्रकोविदः.

Jurisdiction, *s.* अधिकारः, व्यवहारदर्शनाधिकारः, न्यायप्रभुत्वं.

Jurisprudence, *s.* धर्मशास्त्रं, स्मृतिशास्त्रं, व्यवहार or विद्या-ज्ञानं or शास्त्रं, विधिः; 'a head of j.' व्यवहारविषयः,-पदं.

Jurist, *s.* धर्मशास्त्रकोविदः, स्मृतिज्ञः.

Jury, *s.* सभ्याः; प्रमाणपुरुषगणः.

Just, *a.* (Of persons) न्यायवर्तिन्, न्यायिन्, न्यायशील-पर, साधुवृत्ति, ऋजु, विमलात्मन्, निष्कपट, निर्व्याज, शुचि, न्यायपरायण, धार्मिक-सात्त्विक (की *f.*). **2** न्याय्य, धर्म्य, यथान्याय, न्यायानुसारिन्, सत्य, तथ्य, योग्य, युक्त, यथार्थ, उचित, सम्यच्. **3** सम, समवृत्ति, निःपक्षपात, समदर्शिन्. **4** संपूर्ण, अविकल, अन्यून. **-*adv.*** अंतिकं-के, समीपं, निकटे. **2** प्रायः, प्रायशः; oft. by भूयिष्ठ, कल्प, प्राय in comp., or by desid.; *See* **About.** **3** सद्यः, अचिरादेव, नातिचिरात्, प्राक्; oft. by एव, मात्र in comp.; 'j. now' अधुनैव; 'it is j. proper' उचितमेव; 'j. dead' सद्योमृत; 'j. born' जातमात्र. **4** युक्तं, सम्यक्, यथार्थं, यथावत्. **5** तावत् 'j. come here' इतस्तावदागम्यतां; 'j. so' एवमेव, तथैव, एवमेतत्, अथ किं, युक्तं, युज्यते; 'j. as' 'j. like' इव, यद्वत्, or निर्विशेष in comp.; 'stay j. as in your own house' स्वगृहनिर्विशेषमत्र वस; 'bred j. like one's own children' स्वपुत्रनिर्विशेषं संवर्धित. कष्टेन, कृच्छ्रेण. **-ly,** *adv.* निर्व्याजं, निर्व्यलीकं, सारल्येन. **2** यथान्यायं, न्यायेन, धर्मेण, न्यायतः, धर्मतः, यथाधर्मं, न्यायानुसारेण, सम्यक्, यथावत्. **3** सत्यं, अवितथं, यथार्थं, अर्थतः, यथावत्, यथातथं, यथार्हं, उपपन्नं, यथोचितं, युक्तं, स्थाने, यथायोग्यं, अंजसा. **-ness,** *s.* न्याय्यता, यथार्थता, योग्यता, औचित्यं, युक्तता; साम्यं, पक्षपातः. **-Justice,** *s.* धर्मः, न्यायः, नयः, नीति *f.*, न्यायिता, ऋजुता, साधुता. **2** न्याय्यता, युक्तता, योग्यता, यथार्थता, सत्यता, युक्ति *f.*, याथार्थ्यं. **3** साम्यं, समदर्शित्वं, अपक्षपातः, सर्वसमता. **4** न्यायदंडः, योग्य-दंडः-शिक्षा, अपराधानुरूपो दंडः. **5** धर्माध्यक्षः; प्राड्विवाकः; *See* **Judge;** 'court of j.' न्याय-धर्म-सभा, व्यवहारमंडपः. **-ship,** *s.* धर्माधिकारः, न्यायाध्यक्षत्वं. **-Justiciary,** *s.* **Judge,** q. v. **-Justify,** *v. t.* न्याय्य-*a.* इति प्रति-पद् c. or प्रदृश् c.; शुध् c., दोषं निराकृ 8 U or निवार् 10 or शुध् c. or मृज् 2 P, दोषाद् मुच् 6 P or c. **-able,** *a.* निवार्यदोष, शोधनीय, शुद्धिक्षम. **-ication,** *s.* शुद्धि *f.*, शोधनं, दोषशुद्धिः, दोषमुक्ति *f.* -मार्जना, दोषप्रतीकारः, विमोचनहेतुः, अपव्यप-देशः. **-er,** *s.* शोधकः, दोषनिवारकः.

Justle, *v.* *See* **Jostle.**

Jut, *v. i.* प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. **-*s.*** प्रलंबनं, आभोगः, प्रालंबः.

Jute, *s.* शणं.

Juvanescent, *a.* तरुणीभवत्.

Juvenile, *a.* तरुण, अल्पवयस्क, युवन्, कौमार (री *f.*), अभिनववयस्. **-ity,** *s.* यौवनं, तारुण्यं, कौमारं, यौवनावस्था, तारुण्यभावः.

Juxtapose, *v. t.* संनि-धा c. **-ition,** *s.* सान्निध्यं, संनिधिः, संस्थिति *f.*, सन्निकर्षः, संसर्गः, नैकट्यं, उपश्लेषः.

K.

Kaw, *v. i.* कै 1 P, ध्वां(ध्वां)क्ष 1 P. **-*s.*** काकरवः-रुतं.

Keel, *s.* नौतलं.

Keen, *a.* तीक्ष्ण, शित, निशित, शात, निशात' शितधार, तीक्ष्णाग्र; तीव्र, तिग्म, प्रखर. **2** व्यग्र, उच्चंड, उत्सुक, उत्कट, कुतूहलिन्; *See* **Eager.** **3** सूक्ष्म, कुशाग्र-ग्रीय, विदग्ध. **4** उग्र, कटु, अरुंतुद, मर्मस्पृश्, तिग्म (words); 'k. words' वागिषुः, वागमिः; 'k.-eyed' 'k.-sighted' सूक्ष्ममति, तीक्ष्ण-सूक्ष्म-बुद्धि, कुशाग्रमति-बुद्धि, दूरदर्शिन्. **-ly,** *adv.* तीक्ष्णं, तीव्रं, उग्रं, प्रखरतया. **-ness,** *s.* तीक्ष्णता, तीव्रता. **2** व्यग्रता, उच्चंडता, कौतूहलं, अत्युत्साहः. **3** सूक्ष्मता, विदग्धता, कुशाग्रमतित्वं, बुद्धिसूक्ष्मता. **4** कटुता, तिग्मता, उग्रता.

Keep *v. t.* रक्ष् 1 P, पा 2 P, पा c. (पालयति), गुप् 1 P, त्रै 1 A, अव 1 P. **2** धृ 1 P, 10; धा 3 U, नि-आ-°, निविश् c., स्था c. (स्थापयति), न्यस् 4 U. **3** रुध् 7 U,

नि-अव-उप-°, धृ, बंध् 9 P, निवार् 10, प्रति-नि-षिध् 1 P, नि-सं-यम् 1P. **4** (As cattle) निरुप् 10, पा c., रक्ष्. **5** (As a secret) न प्रकाश् c. or भंज् 7 P, or भिद् 7 P गुप्, रक्ष्. **6**(Observe) आचर् 1 P, अनु-ष्ठा 1 P, वि-धा, कृ, सेव् 1 A, भज् 1 U, आश्रि 1 U, आ-स्था 1 U, आ-अव-लंब् 1 A. **7** शुष् c., निर्वह् c., अप-वृज् 10, पूर् 10, तृ 1 P, साध् 5 P or c., पा c. (पालयति) (as a promise). **8** भृ 1 P, 3 U, पुष् c., पा c.; (as servants) व्यापृ c., सेवायां नियुज् 7 A, 10, वेतनं-भृतिं-दा 3 U; ' to k. bad hours ' वेलातिक्रमेण स्वप् 2 P; 'to k. in mind हृदये-मनसि-कृ, अव-धृ; 'k. company with' संगम् 1 A, सं-इ 2 P, सह वस् or चर् 1 P, संवस्; *See* **Associate.** **-***v. i.* स्था, वृत् 1 A, आस् 2 A, न विरम् 1 P or निवृत् or विश्रम् 4 P, with pres. part. (when followed by p. p. &c.); 'he kept weeping ' रुदन्नास्त, रुदन्नोपरराम; ' k going up and down ' आरोहावरोहं कुर्वन्नास्त्व. **2** संसंज्-संश्लिष्-अनुबंध्- pass., लग् 1 P. **3** वस् 1 P. **-***s.* रक्षा-क्षणं, पालनं, गुप्ति *f.* **2** अवस्था, दशा, स्थिति *f.*, वृत्ति *f.*, भावः. **3** भृति *f.*, पोषणं. **4** दुर्ग, कोटः. **5** कारा-बंधनं, निरोधः, गुप्तिः. **-back, -from,** निग्रह् 9 P, संयम्, संह् 1 P, निवृ c.; (*v. i.*) निवृत्, विरम्. **-in,** गुह् 1 U, आच्छद् 10, अंतर्धा, संवृ 5 U. **-off,** निवार्, निवृत् c., निरुध्, प्रति-वि-हन् 2 P, प्रतिकृ, व्यप-ऊह् 1 U, परिह् 1 P; (*v. i.*) निवृत्, विरम्; *See* **Cease.** **-on,** *See* **Keep** (*v. i.*) above; प्रवृत्, प्रारब्धं सं-पद् c. **-out,** व्यावृत् c., प्रति-षिध्; *See* **Exclude.** **-to,** अनुवृत्, अनुसृ 1 P, अनुरुध् 4 A, परिरक्ष्, परिपा c. (पालयति); *See* **Keep** (*v. t.*) above. **-under,** वशीकृ, वशं नी 1 P, स्वायत्तीकृ. **-up,** प्रवृत् c., पा c.; (*v. i.*) जागृ 2 P; न दम् or श्रम् 4 P. **-er,** *s.* रक्षकः, पालकः, रक्षितृ *m.*, रक्षिन् *m.*, गोप्तृ *m.*, पः-पालः in comp. **-ing,** *s.* रक्षा, अवेक्षा, पालनं, गुप्तिः. **2** सादृश्यं, अविरोधः, संगति *f.*, आनुरूप्यं; ' in k. with' अनुरूप-संवादिन्-सदृश-योग्य-*a.*

Keep-sake, *s.* स्मृतिदानं; स्नेहाभिज्ञानं.

Keg, *s.* काष्ठभांडं.

Kelter, *s. See* **Order.**

Ken, *s.* गोचरः-रं, विषयः; नयनविषयः-पथः, बुद्धिविषयः. **-***v. t.* दूरादालोक् 1 A, 10 or ईक्ष् 1 A or दृश् 1 P. **2** परि-ज्ञा 9 U, अव-गम् 1 P.

Kennel, *s.* श्वशाला, श्वगृहं, कुक्करालयः. **2** श्वगणः. **3** जलमार्गः, प्रणालः-ली. **-***v. i.* श्वगृहे वस् 1 P.

Kerchief, *s.* आवरणं, वेष्टनं, आभरणं, 'hand-k.' हस्तप्रवारकः, नक्तकः; 'neck-k.' ग्रीवा-वेष्टनं, कंठवस्त्रं.

Kernel, *s.* बीजं, गर्भः, अष्ठि *f.*, अष्ठीला, फलबीजं-गर्भः, सारभूतं द्रव्यं. **2** मध्यः-ध्यं, गर्भः, उदरं, हृदयं, अभ्यंतरं. **-ly,** *a.* बीजाकार, बीजपूर्ण.

Kestrel, *s. See* **Castrel.**

Kettle, *s.* कटाहः, पिठरः-रं, स्थाली, उखा, कुंडं; ' k.-drum ' भेरि-री *f*, दुंदुभिः, डिंडिमः.

Key, *s.* अंकुटः, कुंचिका, तालीं, उद्घाटकः-कं. **2** व्याख्या, निर्वचनं, टीका; ' k.-hole ' कुंचिकाछिद्रं; ' k.-stone ' संधान-संयोग-प्रस्तरः.

Kibe, *s.* पादस्फोटः, विपादिका.

Kick, *v. t.* पादेन-लत्तया-प्रह् 1 P or तड् 10 or आ-हन् 2 U, लत्ताप्रहारं कृ 8 U; पादं-पार्ष्णि-खुरं-क्षिप् 6 P. **-***s.* पाद-लत्ता-प्रहारः, पादाघातः, पार्ष्णि-खुर-क्षेपः, खुराघातः.

Kid, *s.* छागशावः-शावकः, अजशिशुः, अजपोतः, छागशिशुः. **2** काष्ठभारः.

Kidnap, *v. t.* (बालकं-दासं) चुर् 10, अपह् 1 P, or बलाद् ह्. **-per,** *s.* बालस्तेयकृत् *m.* **-ping,** *s.* बालस्तेयं, बालापहारः.

Kidney, *s.* वृक्कः-क्का, गुर्दः; 'k.-bean ' क्षुद्रः, माषः, शिंबा, शिंबिकः-का.

Kill, *v. t.* हन् 2 P, व्यापद् c., मृ c., सूद् 10, निषूद्, नश् c., प्र-मी 9 U or c. (मापयति), हिंस् 7 P, तृह् 6, 7 P, वि-शस् 1 P, पंचत्वं-परलोकं गम् c. (गमयति) or नी 1 P; शद् c. (शातयति), निपत् c., नि-कृत् 6 P, अप-नी, क्षि 5 P or c. **-er,** *s.* हंतृ *m.*, घातकः, नाशकः, निषूदनः, अंतकः; gen. हन् or घातिन् in comp.; 'k. of Vritra' वृत्रहन्; 'k. of Madhu ' मधुसूदनः. **-ing** *s.* हत्या, वधः, हननं, घातः, मारणं, नाशः, निषूदनं, हिंसा-सनं, आलंभः, विशसनं, व्यापादनं, प्रमापणं, निबर्हणं, निकारणं, विशारणं, प्रवासनं, परासनं, संज्ञपनं, निर्ग्रंथनं, निस्तर्हणं, क्षणनं, परिवर्जनं, निर्वापणं, प्रमथनं, क्रथनं, उज्जासनं, पिंजः, विशरः, उन्माथः.

Kiln, *s.* पाकपुटी, आपाकः.

Kimbo, *a.* वि-अव-भुग्न, वक्र, कुटिल.

Kin, *See* **Kindred;** ' of k. ' सजातीय, सगोत्र. 'Kith and k. आप्ताः (pl.)

Kind, *a.* दयालु, सदय, कृपाकुल, कृपालु, अनुकंपिन्, सानुकंप, सकरुण, करुणात्मन्, दया-करुणा-शील, करुणार्द्र, दयार्द्र, स्निग्ध, कृपा-दया-घृणा-वत्, कारुणिक (की *f.*); प्रियकर (री *f.*), हित, प्रियैषिन्, हितैषिन्, हितकाम, हितबुद्धि, उपकार-पर-शील, उपकारिन्, सुहृदय, अनुकूल, सुशील, प्रसन्न, प्रीत. **2** मधुर, प्रिय; ' k. to the poor ' दीनानुकंपिन्, दीन-वत्सल; ' k. office ' उपकारः; ' k. act'

सुकृतं; 'k. words' प्रियवचनं; 'speaking k. words' प्रियंवद, प्रियवादिन्; 'k. present' प्रीतिदानं. -s. जाति f., गणः, वर्गः. 2 विशेषः, भेदः, प्रकारः, जातिः, रूपं, विधा, in comp.; 'of many k. s' बहुविध; 'of various k. s' विविध, नानारूपविध, नाना ind.; 'of this k.' एवंविध, एवंरूप; 'of all k. s' सर्वप्रकार; 'Jāti is a k. of flower' जातिः कुसुमविशेषः-भेदः. -ly, a. सौम्य, मृदु, कोमल, स्निग्ध, प्रिय. 2 अनुकूल; समानशील. -adv. सदयं, सकरुणं, दयया, कृपया, प्रीत्या, सस्नेहं, सानुकंपं, सानुग्रहं; प्रियं, हितेच्छया, सुशीलवत्, सुजनवत्; 'speaking k.' प्रियवादिन्; 'k. disposed' हितबुद्धि, अनुरक्त. -ness, s. प्रसादः, अनुग्रहः, कृपा, दया, अनुकंपा, करुणा, प्रीति f., स्नेहः, कृपालुता, दयालुता, हितेच्छा, कृपाशीलता, सुशीलं, सौजन्यं, प्रेमन् m. n., आनुकूल्यं. 2 उपकारः, उपकृतं-ति f., प्रियं, सुकृतं-तिः, हितं. -Kindliness, s. सौम्यता, स्निग्धता; सौजन्यं, सुशीलता.

Kindle, v. t. प्र-उत्-सं-दीप् c., इंध् 7 A, ज्वल् c., तप् 1 P or c. 2 उत्तिज् c., संधुक्ष् 10, प्रोत्सह् c.; प्रकुप् c., रुष् c.; 'with glances k. ed with anger' क्रोधेद्धैर्दृष्टिपातैः (Rat. 1). -v. i. ज्वल् 1 P, दीप् 4 A, तप् 4 A.

Kindred, a. सजातीय, सगोत्र, सनाभि, सवर्ण, सवंशीय, सकुल्य, संबंधीय. 2 समान, समतुल्य-गुण, सधर्मन्, अनुगुण. -s. बंधुता, ज्ञातित्वं, ज्ञातिभावः, सगोत्रता, सजातित्वं, संबंधः, सपिंडता. 2 (Relatives) बंधवः ज्ञातयः, बांधवाः, सगोत्राः, सकुल्याः, गोत्रजाः, संबंधिनः (pl.); बंधुजनः, बंधु-ज्ञाति-वर्गः, बंधु-बांधव-गणः.

Kine, s. pl. of **Cow,** q. v.

Kinematics, s. गतिशास्त्रं.

King, s. राजन् m., नृपः, नरपतिः, नृपतिः, भूपतिः, भूपः, भूपालः, नरेंद्रः; and comp. of ईशः, अधीशः, पतिः, इंद्रः, पः, पालः, भृत् or भुज् with 'Man' and 'Earth,' q. v. अवनिपः, क्षोणीपालः, भूभृत्, महीभुक्, क्षितिपतिः; 'supreme or great k.' महाराजः, अधिराजः, सम्राज्, अधीश्वरः, मंडलेश्वरः; 'k. of k. s.' राजराजः, राजाधिराजः, सार्वभौमः, चक्रवर्तिन् m. 'k. of beasts' मृगेंद्रः, मृगाधिपः, पशुपतिः; 'k.-craft' राजनीति f., -नयः, राज्यचातुर्यं; 'k.'s-evil' गंडमाला. -dom, s. राज्यं, राष्ट्रं, विषयः. 2 आधिपत्यं, ऐश्वर्यं, प्रभुत्वं, स्वामित्वं. 3 जाति f., वर्गः, गणः; 'animal k.' प्राणिवर्गः-जातिः. -less, a. अराजक, अनायक, राज-नृप-हीन. -like, -ly, a. राजकीय. 2 राजानुरूप, राजयोग्य, राजार्ह, राजसदृश (शी f.), नृपोचित, राज in comp. -ship, s. राजत्वं, प्रभुत्वं, ऐश्वर्यं, आधिपत्यं, नृपत्वं, राजपदं, राजाधिकारः.

Kinsfolk, See **Kindred** (s.).

Kinsman, s. बंधुः, बांधवः, ज्ञातिः, सकुल्यः, सजातिः-तीयः, सगोत्रः, सनाभिः, गोत्रजः, बंधुजनः.

Kirk, s. See **Church.**

Kismet, s. See **Fate.**

Kiss, v. t. चुंब् 1 P, निंस् 2 A; 'k. the lip' अधरं पा 1 P, अधररसं पा; 'k. on the head' शिरसि आ-समा-उपा-घ्रा 1 P. -s. चुंबनं, चुंबितं, अधरपानं. -er, s. चुंबकः.

Kit, s. उपकरणसमुदायः, उपस्करः, उपकरणसामग्री, संभारः. 2 महाकुपी. 3 लघुसारंगी.

Kitchen, s. महानसं, रसवती, सूदशाला, पाकशाला-स्थान-गृहं; 'k. garden' शाकशाकिनं, शाकशाकटं, शाकवाटिका; 'k.-maid' पाकचेटी; 'k.-work' पाककार्यं, पाकनिष्पत्ति f.; 'superintendent of the k.' पौरोगवः.

Kite, s. चिल्लः-ल्ला, आतापि(यि)न् m. 2 चिल्लाभासः, चिल्लासदृशं क्रीडनकं.

Kitten, s. मार्जारशावः-वत्सः-शिशुः.

Kittle, a. संशयस्थ, संदिग्ध. -v. t. कुतकूतयति (D.).

Kleptomania, s. चौर्यरुचि f.

Knab, v. t. दंश् 1 P, दंतैः ग्रह् 9 U or धृ 1 P.

Knack, s. कौशलं, चातुर्यं, वैदग्ध्यं, पाटवं; हस्त-कौशलं-लाघवं; See **Skill.** 2 क्रीडनकं, क्रीडावस्तु-द्रव्यं.

Knag, s. ग्रंथिः, पर्वन् n. 2 **Peg,** q. v. -ged, -gy, a. ग्रंथिल, पर्ववत्.

Knap, s. **Knob,** q. v. 2 उन्नतभूभागः, उत्सेधः. -v. i. **Snap,** q. v.

Knar, Knarl, s. काष्ठग्रंथि f.

Knave, s. धूर्तः, कितवः, जालमः, वंचकः, शठः, प्रतारकः, कूटकारः, दांभिकः. -ish, a. धूर्त, कितव, शठ, जालम, वंचक, प्रतारक, धूर्तशील, कपटिन्. -ishly, adv. सकपटं, सव्याजं, शठवत्, धूर्ततया. -ishness, ry, s. धूर्तता, शाठ्यं, कैतवं, माया, व्याजः, छलं, कपटं.

Knead, v. t. (कराभ्यां) मृद् 9 P or c., संपीड् 10, चूर्ण् 10, पिष् 7 P. -ing, s. मर्दनं, पीडनं; 'k.-trough' द्रोणि-णी f.

Knee, s. जानु n., ऊरुपर्वन् n., अष्ठीवत् m. n., ऊरुसंधिः; 'go or fall on the k. s' जानुभ्यां (अवनौ) गम् or पत् 1 P; 'k.-deep' जानुदघ्न (घ्नी f.), -द्वयस (सी f.), -मात्र (त्री f.); 'k.-pan' जानुफलकं.

Kneel, v. i. जानुभ्यां (अवनौ) गम् or पत् 1 P or नम् 1 P, (क्षितितले) जानुनी निधा 3 U or न्यस् 4 U or निविश् c. or नम् c.

Knell, s. प्रेतघंटा.

Knick-knack, s. क्रीडनकं, क्रीडाद्रव्यं-वस्तु-

Knife, *s.* कर्तरिका, छुरिका, छुरी, कृपाणी, कृपाणिका, असिपुत्री-पुत्रिका, शस्त्री, असिधेनुः-नुका.

Knight, *s.* सादिन् *m.*, योधः, भटः.

Knit, *v. t.* सं-,ग्रंथ् 9 P, सिव् 4 P, निषिव्. **2** संबंध् 9 P, सयुज् 7 U, 10, संश्लिष् c., व्यतिषंज् 1 P, संहन् 2 P; व्यतिषजति पदार्थान् (Mal. 1) 'k. s objects together'; 'k. the eyebrows' भ्रुकुटिं बंध्, भ्रुवौ संकुच् 1 P or भिद् 7 P; *See* **Frown.** **-***a.* ग्रथित, स्यूत, संश्लिष्ट, व्यतिषक्त; 'well-k.' संहत, सुसंहत, दृढसंधि. **-ting,** *s.* सूत्रश्लेषः-ग्रथनं; 'k.-needle' दीर्घसूचि-ची *f.*

Knob, *s.* पिंडः, गंडः; ग्रंथिः, पर्वन् *n.*, संधिः (in wood). **-bed, -by,** *a.* सपिंड, पिंडिन्, ग्रंथिल, सगंड.

Knock, *v. t.* समा-आ-हन् 2 U, तड् 10, प्रह 1 P; 'k. on the head' मस्तकं तड्, मस्तकाघातेन व्यापद् c.; (fig.) मोघीकृ 8 U, विफलीकृ, भंज् 7 P. **-***v. i.* द्वारं तड् or प्रह. **-***s.* आघातः, अभिघातः, प्रहारः, ताडनं, पातः, हति *f.*; 'k. with a stick' वेत्राघातः; 'k. with the fist' मुष्टिघातः- प्रहारः. **-against,** अभि-प्रति-आ-हन्, संघट्ट 1 A, अभिसं-पत् 1 P; 'k. ed her head against a rock' दृषदं शीर्षेण आजघ्ने. **-down,** नि-अव-पत् c., आघातेन-प्रहारेण-निपत् c. or भ्रंश् c. **-off,** सत्वरं-लघु-संपद् c. or साध् 5 P. **2** विरम् 1 P, निवृत् 1 A. **-out,** प्रहारेण निर्गम् c. (गमयति) or निः-सृ c. or बहिष्कृ 8 U; 'k. out the brains' मस्तिष्कं निष्पिष् 7 P. **-up,** खिद् c., आयस् c., अवसद् c., श्रम् c. or क्लम् c. (श्र-क्ल-मयति); (*v. i.*) श्रम् 4 P, क्लम् 1, 4 P, खिद् pass., अवसद् 1 P, ग्लै-म्लै 1 P; 'k. ed up by the journey' अध्वसंजातखेदः, नितांतं परिश्रांतः. **-er,** *s.* प्रहर्तृ *m.*, ताडयितृ *m.* **2** द्वारमुद्गरः, द्वारताडनी.

Knoll, *v. i.* घंटां वद् c. or तड् 10. **-***s.* क्षुद्रपर्वतः, उन्नतभूभागः, वप्रः-प्रं.

Knot, *s.* ग्रंथिः, बंधनं, ग्रंथिका, बंधः, गंडः; (of garments) नीवि- वी *f.*; (in wood) पर्वन् *n.*, संधिः. **2** संधिः, संयोगः, संश्लेषः, संबंधः. **3** मंडलं, समूहः, गणः, वर्गः, संघः, चक्रं, निवहः. **4** (Of trees) षंडः, गुच्छः, स्तबकः, गुल्मः-ल्मं, स्तंबः, कांडः. **-***v. t.* ग्रंथिं बंध् 9 P, ग्रंथ् 9 P, संश्लिष् c., 'k. ed hair' वेणीं; 'k. ed wound' रूढग्रंथिः व्रणः (U. 2). **-ted, -ty,** *a.* ग्रंथिल, ग्रंथिमत्, पर्व-संधि-मय (यी *f.*), पर्ववत्. **2** विषम, गूढ, दुर्ज्ञेय, दुर्बोध, गहन, गूढार्थ; 'k. point' ग्रंथिः, विषमपदं.

Know, *v. t.* ज्ञा 9 U, विद् 2 P, बुध् 1 P, अवगम् 1 P, अव-इ 2 P, अभि-ज्ञा, परिचित-*a.* भू 1 P. **2** अनु-भू, वि-भू c., उपलभ् 1 A, ग्रह् 9 U; 'how should a dependent k. of sincere happiness (pleasure)' परायत्तः प्रीतेः कथमिव रसं वेत्तु पुरुषः (Mu. 3). **-er,** *s.* ज्ञातृ *m.*, ज्ञानिन् *m.*, वेतृ *m.* ज्ञः-अभिज्ञः in comp. **-ing,** *a.* विज्ञ, ज्ञानिन्; gen. ex. by विद्, ज्ञ or अभिज्ञ in comp.; 'k. Dharma' धर्मविद्, धर्मज्ञः. **-ingly,** *adv.* ज्ञानपूर्वं, कामतः, बोध-मति-बुद्धि-पूर्वं, जानत्-*a.* with अपि. **-ledge,** *s.* (Act) ज्ञानं, परि-वि-ज्ञानं, बोधः-धनं, वेदनं, अवगमः, उपलंभः, उपलब्धि *f.* **2** (Learning) ज्ञानं, विद्या, विद्वत्ता, पांडित्यं, व्युत्पन्नता, वैदुष्यं. **3** अभिज्ञानं, परिचयः; 'spiritual k.' आत्मज्ञानं-विद्या, परमार्थज्ञानं, अध्यात्मविद्या, परमार्थः, ब्रह्मविद्या, परमार्थबोधः; 'acquiring k.' विद्यार्जनं, विद्यागमः, ज्ञानप्राप्ति *f.*; 'eager after k.' ज्ञानेच्छु, जिज्ञासु; 'thirst after k.' जिज्ञासा, ज्ञानलिप्सा, ज्ञानेच्छा; 'according to one's k.' यथाज्ञानं; 'for the right k. of words and their meaning' वागर्थप्रतिपत्तये (R. I. 1); 'without the k. of' अविज्ञाप्य, अनिवेद्य, अगोचरं-रेण, परोक्षं-क्षे; 'with the k. of' गोचरं-रेण, प्रत्यक्षं, साक्षात्, समक्षं; 'to come to the k. of' श्रुति-कर्ण-पथं या-इ-2 P or गम् 1 P; 'k. is power' बुद्धिर्यस्य बलं तस्य (P. I. 8). **-Known,** *a.* ज्ञात, विदित, अवगत, बोधित, उपलब्ध, अनुभूत, विभावित. **2** ख्यात, विश्रुत, प्रसिद्ध, वि-प्र-ख्यात, विज्ञात; 'to make k.' वि-ज्ञा c. (ज्ञापयति), नि-आ-विद् c., बुध् c., 'to become k.' ज्ञा-प्रति-इ pass.; 'be it k. to your honor' एवमत्रभवंतो विदांकुर्वंतु; 'be it k.' ज्ञातं-विदितं-अस्तु; 'became k. by that name' तदाख्यया (भुवि) पप्रथे (R. xv. 101), तदाख्यां जगाम.

Knuckle, *s.* अंगुलिपर्वन् *n.*-संधिः-ग्रंथिः- पर्व; संधिः, ग्रंथिः. **-***v. i.* वशीभू 1 P, वशं गम् 1 P or इ-या-2 P. **-ed,** *a.* संधि-पर्व-विशिष्ट, ग्रंथिल.

Knurl, *s.* ग्रंथिः, गंडः. **-ed,** *a.* ग्रंथिल.

Kosmos, *s.* विश्वं, जगत् *n.*

L.

Label, *s.* पत्रं, अंकपत्रं, बजिकं, लेपपत्रं. **-***v. t.* लेपपत्रं आसंज् c. or अनुबंध् 9 P.

Labial, *a.* ओष्ठ्य.

Labio-dental, *a.* दंतो(तौ)ष्ठ्य.

Labor (Labour), *s.* श्रमः, परिश्रमः, प्र-आ-यासः, क्लेशः, कष्टं, दुःखं **2** उद्यमः, उ-द्योगः, व्यापारः, व्यवसायः, चेष्टा, प्र-,यत्नः, उत्साहः. **3** प्रसूतिकालः-समयः, प्रसवकालः, प्रसवावस्था; 'pain of l.' प्रसूति-प्रसव-वेदना-यातना-व्यथा; 'bodily l.' व्रातं, देह-काय-क्लेश-आयासः-श्रमः; 'unpaid l.' विष्टि *f.*, आजूः; 'got by one's l.' स्वकष्टार्जित. **-***v. i.* परिश्रमं-आयासं-कृ 8 U, श्रम् 4 P, प्र-,यत् 1 A, व्यव-सो 4 U, चेष्ट् 1 A, उद्यम् 1 P, प्रवृत् 1 A, आयस् 1, 4 P, व्रातं कृ, शरीरायासं कृ. **2** खिद्-क्लिश्-पीड् pass., व्यथ् 1 A. **3** प्रसवावस्थायां वृत्, (आसन्न-प्रसवा or प्राप्तप्रसववेदना सा स्त्री); 'l. under' बाध्-अभिभू- आक्रम्-पीड्-उपहन्-pass., 'l. ing under hundreds of anxieties' चिंताशतैर्बाध्यमान-अभिभूत; अतिभाराक्रांत &c.; 'l. ing under a disease' रोग-पीडित, रुजार्त. **-***v. t.* महाश्रमेण-प्रयत्नेन-साध् 5 P or सं-पद् c. or कृप् c. or वि-धा 3 U or कृ or अनु-ष्ठा 1 P. **2** कृष् 6 U. **-ed,** *a.* श्रम-यत्न-कष्ट-सिद्ध, यत्न-श्रम-पूर्व, प्रयत्न-कृत. **-er,** *s.* कृतश्रमः, कर्मिन् *m.*, व्यवसायिन् *m.*, कार्मः. **2** कर्मकरः, कर्मकारः, भृतकः, वैतनिकः, भृति-भरण्य- भुज् *m.* **3** कृषकः, कृषीवलः; *See* **Farmer. -Laborious,** *a.* श्रम-आयास-कष्ट-साध्य, कष्ट-आयास-प्रद्, पीडाकर (री *f*), दुःखसाध्य, कष्ट. **2** आयासिन्, कृतश्रम, श्रम-उद्योग-कर्म-शील, उद्यमिन्, उद्योगिन्, सोद्यम, सोद्योग, सोत्साह; *See* **Industrious. -ly,** *adv.* श्रमेण, श्रम-आयास-पूर्वं, आ-प्र-यासेन, सयत्नं, सोद्योगं, सोद्यमं, सोत्साहं; कष्टेन, कृच्छ्रेण. **-ness,** *s.* श्रमसाध्यता. **2** उद्योगः, उद्यमः, व्यवसायः, उद्योगशीलता. **-Laboratory,** *s.* रसक्रियास्थानं, रससंस्कारशाला. **2** उद्योग-शिल्प-शाला-गृहं.

Labyrinth, *s.* अतिगहनः प्रदेशः, दुस्तरं or सुगहनं स्थानं, अशक्यनिर्गमः प्रदेशः, गहनं. **-ian,** *a.* गहन, सुदुस्तर.

Lac, *s.* ला(रा)क्षा, अलक्तः-क्तकः, जतु *n.*, यावः, द्रुमामयः. **2** लक्षं.

Lace, *s.* सूत्रं, तंतुः, गुणः. **2** सूत्रजालं, जाला-भरणं, जालरूपं, वस्त्राभरणं. **-***v. t.* सूत्रेण बंध् 9 P, or संयुज् 7 U, 10 or संश्लिष् c. **2** जालाभरणैः भूष् 10 or अलं-कृ 8 U.

Lacerate, *v. t.* दृ 9 P, 10, निर्भिद् 7 P, व्यवच्छिद् 7 P, वि-पट् 10, कृत् 6 P; *See* **Tear. -ion,** *s.* विदारः-रणं, निर्भेदः, विपाटनं. **2** भेदः, छिद्रं, संधिः.

Laches, *s.* कालातिपातः, कालव्ययः; उपेक्षा.

Lachrymal, *a.* अश्रुप्रवाहिन्, अश्रूत्पादिन्. **2** अश्रुसंबंधिन्. **-Lachrymatory,** *s.* अश्रुपात्रं भाजनं. **-Lachrymose,** *a.* सास्र, बाष्पाकुल.

Lack, *v.* न धा 3 U or धृ 1 P or भृ 3 U; gen. ex. by हीन, वहित, वर्जित, शून्य in comp., or अ or निर् pr.; 'l. s wisdom' निर्बुद्धिः, अज्ञानः, बुद्धिहीनः, &c. **-***s.* अभावः, हीनता, न्यूनता, विरहः, शून्यता. **2** प्रयोजनं; 'l.-lustre' निष्प्रभ, अतेजस्, मंदच्छाय, मलिनकांति; 'l.-brain' निर्बुद्धिः, मतिहीनः, मूढः, मूर्खः.

Lack-a-day, *interj.* अहो, हंत, हा, अहह, बत.

Lack-a-daisical, *a.* ध्यानपर-मग्न, चिंताकुल, उत्कंठित, विषण्ण.

Lacker, Lacquer, *v. t.* लाक्षारसेन् छद् 10, कुक्कभेन लिप् 6 P.

Lackey, *s.* चेटः, दासः, भृत्यः, पार्ष्णिग्राहः, पार्श्वानुचरः.

Laconic,-al, *a.* संक्षिप्त, लघु, अल्प-मित-शब्दक, अविस्तीर्ण, सांक्षेपिक (की *f.*); 'l. message' लघुसंदेशपदा सरस्वती. **2** अल्प-मित-भाषिन्. **-ally,** *adv.* संक्षेपेण, संक्षेपतः, अविस्तरेण, मितोक्त्या. **-ism, -Laconism,** *s.* लाघवं; लघूक्ति *f.*, संक्षेपोक्तिः; मितवाक्य-भाषणं.

Lactary, *s.* क्षीरस्थानं, गोदुग्धस्थानं.

Lactation, *s.* क्षीर-दुग्ध-दानं.

Lacteal, Lactean, Lactious, *a.* क्षीरिन्, क्षीर-दुग्ध-मय (यी *f.*), पायस (सी *f.*). **2** अन्नरसवाहिन्.

Lactiferous, *a.* दुग्ध-क्षीर-वाहिन्.

Lactometer, *s.* दुग्धमापनयंत्रं, दुग्धमापनी.

Lad, *s.* बालः-लकः, बटुः, दारकः, कुमारः-रकः, शिशुः, किशोरः, माणवकः.

Ladder, *s.* नि(निः)श्रेणि-णी *f*, निश्रयि-(य)णी, अधिरोहिणी, सोपानपथः, सोपान-परंपरा-पद्धति *f.*

Lade, *v. t. See* **Load.**

Lading, *s.* नौभारः, पोतस्थद्रव्यं.

Ladle, *s.* दर्वि-र्वी *f.*, कंचि-ची *f.*, स्रुजाका; 'wooden l.' तर्दूः, दारुहस्तकः; 'sacrificial l.' स्रुवः-वा, स्रुच् *f.*, चमसः-सी. **-ful,** *s.* कंचि-दर्वी-पूरकं-मात्रं.

Ladrone, *s.* दस्युः, जालमः, कितवः.

Lady, *s.* (As a title) देवी; 'your or her ladyship' अत्रभवती, तत्रभवती, भवती. **2** गृहिणी, स्वामिनी, भार्या. **3** आर्या, वनिता, कुलांगना, कुलस्त्री, कुलवधूः, भाविनी, कुलजा; 'l.-bird,-fly, -cow' इंद्रगोपः, शक्रगोपः, इंद्र-शक्र-कीटः; 'l.-love' प्रिया, कांता,

प्रणयिनी, कामिनी, दयिता; 'l. 's maid' प्रसाधिका, वस्त्रपरिकल्पिका. **-like,** *a.* शिष्ट, सभ्य, सुविनीत, आर्यवृत्ति. **2** पेलव, कोमल, मृदु, सुकुमार.

Lag, *v. i.* मंदायते (D.), चिर(रा)यति (D.), विलंब् 1 A, मंदं मंदं चल्-चर् 1 P. *-s.* अंत्यजाः, हीनजनाः (pl.); हीनवर्णः. *-a.*, **-Laggard,** *a.* मंद, मंदकर्मन्, विलंबिन्, चिरक्रिय, मंदायमान.

Lagoon, *s.* अनूपः, कच्छः, कच्छभूः, जलसनाथः प्रदेशः.

Laic,-al, *a. See* under **Lay.**

Laidly, *a.* अप्रिय, जुगुप्सित, बीभत्स.

Lair, *s.* (श्वापदानां) आ-नि-लयः, शयनस्थानं, वासस्थानं, गुहा, बिलं.

Laity, *s. See* under **Lay.**

Lake, *s.* सरस् *n.*, कासारः, ह्रदः, सरसी, तडागः-गं, तटाकः-कं; पद्माकरः, सरोवरः, जलाधारः, जलाशयः.

Lamb, *s.* मेषशावः-वकः, अजाशिशुः, मेषवत्सः-पोतः, अविपोतः. **-kin,** *s.* क्षुद्रमेषशिशुः, अविपोतकः.

Lambative, *a.* लेह्य. *-s.* लेह्यं, अवलेहः-ह्यं.

Lambent, *a.* इतस्ततः वेपमान, लोल, कंपमान, तरल, चंचल.

Lame, *a.* खंज, पंगु (गू *f.*), खोड-ल-र, विकलगति, व्यंग; 'l. of a leg' पादेन खंज. **2** (Fig.) दुर्बल, विकल, सच्छिद्र, न्यून. **-ly,** *adv.* खंजवत्. **2** विकलं. **-ness,** *s.* खंजता, पंगुता, गतिवैकल्यं. **2** वैकल्यं, दुर्बलता, न्यूनता, सच्छिद्रता.

Lamel, Lamella, *s.* कवचः, आवेष्टनं, पटलं.

Lament, *v.* विलप् 1 P, रुद् 2 P, आ-,क्रंद् 1 P, अनु-,शुच् 1 P, परि-देव् 1 A, परिदिव् 10 A, कुश् 1 P, वि-आ-अभि-°; 'they l. ed his departure' तद्गमनमन्वशोचन्, तद्गमनमुद्दिश्य अक्रोशन्, &c. **-able,** *a.* शोच्य, शोचनीय, शोकविषय, शोकास्पदं, शोकार्ह. **-ation,** *s.* विलापः, रोदनं, परिदेवनानं, परिदेवितं, शोकः, शुच् *f.*, विलपनं, रुदितं, आ-वि-क्रोशः, आ-,क्रंदनं, क्रंदितं,. **-ed,** *a.* शोचित; 'the l. Krishna' शोकास्पदीभूतः or स्वर्ग-परलोक-वासी कृष्णः. **-er,** *s.* शोचकः, परिदेवकः.

Lameter, Lamiter, *s.* खंजः, पंगुः.

Lamina, *s* कवचः-चं, शल्कं, पत्रं, फलकः-कं. **-Laminated,** *a.* सपत्र, फलकिन्.

Lamp, *s.* प्र-,दीपः, दीपकः, दीपिका, दशाकर्षः, दोषास्यः; 'l.-black' कज्जलं, दीपकिट्टं; 'l.-light' दीपप्रभा-प्रकाशः; 'l.-stand' दीपवृक्षः-पादपः-आधारः.

Lampoon, *s.* निंदालेखः, अवगीतं, निंदार्थो लेखः. *-v. t.* लेखैः निंद् 1 P or आक्षिप् 6 P or अव-गै 1 P. **-er,** *s.* निंदकः, अवगायकः, आक्षेपकः.

Lanate,-ed, *a.* लोमश, लोमविशिष्ट.

Lance, *s.* प्रासः, कुंतः, शूलः-लं, शल्यं, शक्ति *f.*, तोमरः. *-v. t.* प्रासेन व्यध् 4 P or निर्भिद् 7 P. **-er,** *s.* प्रासिकः, कौंतिकः, शाक्तीकः, शक्तिधरः-ग्रहः, शूलधरः. **-ing,** *s.* (gums) लेखनं.

Lancet, *s.* शलाका.

Lanch, *v. t. See* **Cast.**

Lancinate, *See* **Lacerate, Tear.**

Land, *s.* (Opposed to sea) स्थलं; 'proceeded by l.' प्रतस्थे स्थलवर्त्मना (R. IV. 60); 'the way by l.' स्थलमार्गः-वर्त्मन् *m.* **2** भूः, भूमि *f.*, प्रदेशः, विषयः, राष्ट्रं. **3** मृद् *f.*, मृत्तिका. **4** क्षेत्रं, क्षेत्रभूमिः; 'arable l.' कृष्ट-सीत्य-भूमिः; 'barren l.' मरुः, मरुस्थलं-ली, धन्वन् *m.*; 'marshy l.' कच्छभूः, अनूपभूमिः; 'waste or fallow l.' खिला-अप्रहता-भूमिः; 'gift of l.' भूमिदानं; 'l.-animal' स्थलचरजंतुः, भूमिचरजंतुः; 'l.-fight' स्थलयुद्धं; 'l.-force' स्थलसैन्यं, स्थलयोधाः; 'l.-holder' भू-क्षेत्र स्वामिन् *m.*, क्षेत्रपतिः; 'l.-lord,-lady भूक्षेत्र-स्वामी-मिनी, गृहपतिः, गृहेश्वरः-री. 'l.-locked' भूवेष्टित, भूमिपरिगत; 'l. lotus' स्थलारविंदं, स्थलकमलिनी; 'l.-mark' सीमाचिह्नं, स्थल-भूमि-सीमा, सीमालिंगं; 'l. owner' भूस्वामी, क्षेत्रपतिः-स्वामी; 'l. scape' नयनगोचरीभूतः भूप्रदेशः or भूभागः दृष्टिगत-दृष्टिगोचर-प्रदेशः; भूभागः, प्र-,देशः 'l.-tax' भू-क्षेत्र-करः; 'l. waiter' शौल्किकः. *-v. t.* (पोताद्-नावः) अवतृ c., अव-रुह् c. (रोपयति); उत्त c., स्थले निविश् c. *-v. i.* अवतृ 1P, अवरुह् 1 P, उत्तृ, निविश् 6 P. **-ed,** *a.* अवतीर्ण, नौकावरूढ, नौकोत्तीर्ण. **2** भूमिसंपन्न, क्षेत्रवत्, भूमिधन; भू in comp.; 'l. property' भूमिद्रव्यं, भूमिः, क्षेत्रं, स्थावरद्रव्यं; 'l. proprietors' भूस्वामिनः. **-ing,** *s.* उत्तरणं; l.-place' तरस्थानं, तरः, तरणस्थानं, घट्टः-ट्टी.

Lane, *s.* संकट-संबाध-पथः-मार्गः, कुपथः.

Language, *s.* भाषा, वाणी, वाच् *f.* **2** वचनं, वचस् *n.*, वाक्यं, उक्ति *f.*, व्याहारः, निगदः, भाषणं, भाषितं, आलापः, भारती. **3** भाषासरणि-पद्धति *f.*, वाग्व्यापारः; वचोविन्यासः; 'abusive l.' वाक्पारुष्यं, खलोक्तिः, आक्षेपवचः; आक्षरणं; 'dignity of l.' वचसां प्रौढता.

Languid, *a.* परि-,म्लान, क्लांत, ग्लान, लुलित, अवसन्न, शिथिल, विषण्ण, खिन्न, श्रांत, स्रस्त, विश्लथ, मुक्त; अलस, मंद, शिथिल-क्षीण-चल, श्लथांग-स्रस्तांग (गी *f.*); *See* **Droop. -ly,** *adv.* म्लान-ग्लान-वत्, सविषादं, अलसवत्, मंदं, क्लांतमनसा, मुक्तगात्रैः. **-ness, -Languor,** *s.* ग्लानि *f.*, म्लानि *f.*, अवसादः, शिथिलता,

क्लांति *f.*, ग्ला(म्ला)नता, मुक्तावयवता; मांद्यं, बलशैथिल्यं, गात्रस्रंसः, अंगश्लथः, तंद्रा-द्रि *f.*, आलस्यं, जडता, जाड्यं, कार्यविमुखता.

Languish, *v. i.* अवसद् 1 P, परि-,क्लम् 1, 4 P, परि-,म्लै-ग्लै 1 P, स्रंस् 1 A, गल् 1 P, शिथिलीभू 1 P, क्षि-विशृ-खिद्- pass.; ध्वंस् 1 A. **2** (With love) उत्तम् 4 P, उत्कंठ् 1 A, उत्सुक-*a.* भू. **-ing,** *a.* म्लायत्, क्षीयमाण, स्रंसिन्, मुक्त. **2** उत्सुक, उत्कंठित, कामालस; ' with her l. looks ' अलसेक्षणा, कामालसदृष्टिः, कामार्द्रदृष्टिः. **-ingly,** *adv.* अवसादेन, अलसवत्. **2** सोत्कंठं, सोत्सुकं; कामालसदृष्ट्या. **-ment,** *s.* अवसादः, ग्लानता; *See* **Languor. 2** औत्सुक्यं, उत्कंठा, उत्सुकता.

Laniary, *s.* घात-वध-स्थानं. **2** चर्वणदंतः, अग्रदंतः

Lanier, *s.* चर्मबंधः, वरत्रा.

Laniferous, *a.* रोमोत्पादिन्, लोमोद्भवकारिन्.

Lank, *a.* कृश, क्षाम, क्षीण, क्षीणमांस-शरीर; *See* **Lean. 2** दीर्घतनु, दीर्घदेह. **3** श्लथ, शिथिल. **-ness,** *s.* कृशता, कार्श्यं, क्षामता, &c. **-y,** *a.* कृशदीर्घ, दीर्घक्षाम.

Lantern, *s.* प्रच्छन्नदीपः, सावेष्टनो दीपः, आवृतदीपिका; दीपः, दीपिका; 'l.-jawed ' क्षीणवदन.

Lanuginous, *a.* लोमश, लोममय (यी *f.*).

Lap, *s.* उत्संगः, अंकः, क्रोडं. **2** अंचलः-लं; वस्त्रांतः, दशाः-वस्तयः (pl.); ' to place on the l. ' क्रोडीकृ 8 U. **-***v. t.* पुटीकृ, व्यावृत् c. **2** आ-परि-वेष्ट् 1 A or c.; अवगुंठ् 10, आ-परि-वृ 5 U, कोशे नि-धा 3 U. **3** लिह् 2 U, आ-अव-सं°; आ-स्वाद् 1 A; ' l.-dog' अंके पालनीयः कुक्कुरः; ' l. ful ' अंकपूरणं-कं.

Lapidarious, *a.* शिला-प्रस्तर-मय (यी *f.*).

Lapidary, *s.* मणिकारः, रत्नाजीवः. **2** रत्न-मणि-च्छिद् *m.*

Lapis Lazuli, *s.* वैडूर्यं, असितोपलः, नीलोपलः.

Lappet, *s.* *See* **Lap (2).**

Lapse, *s.* क्रमः, गति *f.*, प्रवाहः, प्रवृत्ति *f.*, अत्ययः, अतिक्रमः; ' after a l. of time ' अथ दिनेषु गच्छत्सु, कालक्रमेण, गच्छता कालेन. **2** स्खलितं, प्रमादः, भ्रमः. **3** स्खलनं, पातः, भ्रंशः, च्युति *f.*, पतनं. **-***v. i.* क्रमशः या 2 P or गम् 1 P or सृप् 1 P; शनैः शनैः अति-इ 2 P or अतिक्रम् 1 U, 4 P. **2** भ्रंश् 1 A, 4 P, च्यु 1 A, पत् 1 P, विचल् 1 P, व्युत्क्रम्. **3** स्खल् 1 P, प्रमद् 4 P, भ्रम् 1, 4 P. **4** संक्रम्, अपवृत् 1 A. **-ed,** *a.* पतित, भ्रष्ट, &c. **2** परहस्तगत, संक्रांत, अपवृत्त; ' a l. suit ' नियतवेलातीतं कार्यं.

Lapwing, *s.* टिट्टिभः-भकः, कोयष्टिकः.

Lar, *s.* कुल-गृह-देवता.

Larboard, *s.* नौवामभागः.

Larceny, *s.* चौर्यं, स्तेयं; *See* **Theft.**

Lard, *s.* शूकरवसा-मेदस् *n.* **2** शूकरमांसं, वल्लूरं. **-***v. t.* शूकरमेदसा पृ 3 U or c. **2** वि-सं-मिश्र् 10. **3** आ-प्यै c.; पुष् 1,9 P or c.

Larder, *s.* भक्ष्यमांसागारं, भोजनागारं.

Large, *a.* (In size) विशाल, पृथु, बृहत्, स्थूल, विपुल, महत्, गुरु, उरु, पृथुल, आयत, विस्तीर्ण. **2** (Of l. body) महाकाय, स्थूल-विकट-शरीर, पृथु-बृहत्-शरीर; पीन, पीवर. **3** (In number) महत्, गुरु, पुष्कल, विपुल, प्रभूत, प्रचुर, बहु, बहुल, भूरि; ' of l. soul ' महात्मन्; ' of l. nature ' उदारधी, महात्मन्, अकृपणचेतस्. **4** (In age) वृद्ध, वयोधिक; ' larger boy ' वर्षीयान् बालः; 'at l. ' अपराधीनं, स्वेच्छया, स्वेच्छाचारेण, निर्यंत्रणं, निरवग्रहं, निरवरोधं. **2** सविस्तरं, विस्तरेण, विस्तरशः. **3** पूर्णतया, साकल्येन. **-ly,** *adv.* बहु, भूरि, अतीव, विपुलं, प्राचुर्येण, सु-अति-pr. **-ness,** *s.* स्थूलता, बृहत्त्वं, वैपुल्यं, प्राचुर्यं, बहुत्वं, बाहुल्यं; महाकायता, शरीरबृहत्त्वं, पीनता, पीवरता. **2** आयामः, विस्तारः.

Largess, *s.* दानं, वितरणं, पारितोषिकं, उपायनं, उपहारः; *See* **Gift.**

Lark, *s.* भा(भ)रद्वाजः, व्याघ्राटः, भारयः.

Larum, *s.* आसन्नभयसूचना-घोषणा.

Larva, *s.* कीटः, कीटडिंभः.

Larynx, *s.* कंठनालः-ली, कृकः.

Lascar, *s.* नाविकः, पोतवाहः.

Lascivious, *a.* कामुक, कामिन्, रतार्थिन्, कामासक्त, रतिसुखासक्त, भोगासक्त, लंपट, स्त्रीलंपट, कामप्रवण; *See* **Lustful. 2** काम-हेतुक, काममूलक. **-ly,** *adv.* कामुकवत्, लंपटवत्, भोगासक्त्या. **-ness,** *s.* कामुकत्वं, भोगासक्ति *f.*, रतासक्तिः, व्यवायेच्छा, लांपट्यं.

Lash, *s.* कशा, प्रतिष्कशः-षः, चर्मरज्जु *f.*, चर्मबंधः. **2** कशाघातः-ताडनं-प्रहारः. **3** वागसिः, परुषवचनं. **-***v. t.* कशया आहन् 2 U or तड् 10 or प्रह् 1 P. **2** वि-धू 5, 9 U, 6 P, विचल् c., इतस्ततः क्षिप् 6 P or चल् c. **3** वाग्बाणैः भिद् 7 P or तड्, वागसिना प्रह्; तीक्ष्णं निंद् 1 P; ' l. ed into fury ' वाग्बाणैः उत्तेजितक्रोधः; शिलातलप्रतिघातोत्पतनफेनिलानामपां (Ka. 133); ' l. ed into foam by striking ' &c. जर्जरित-जलतरंगविततनीहारं (Mal. 9) ' so as to l. the water into snowy foam. ' **4** रज्ज्वा बंध् 9 P; ' worthy of being l. ed ' कश्य, कशार्ह.

Lass, *s.* तरुणी, कन्या, बाला, कुमारिका, दारिका.

Lassitude, *s.* खेदः, क्लमः, ग्लानि *f.*; *See* **Languidness.**

Lasso, *s.* पाशः, पाशबंधः-रज्जु *f.*

Last, *a.* अंत्य, अंतिम, अवर, अवतरम, चरम, पश्चिम; शेष-अंत-in comp. **2** गत, अतीत, चरम, पूर्व, भूत. **3** जघन्य, अधम, अपकृष्ट. **4**

परम, उत्तम, अत्यंत; 'l. night' गतायां रात्रौ; 'the l. year' गत-अतीत-संवत्सरः, परुत् *ind.*; 'l. but one' उपांत्य, उपांतिक; 'l.-born' अवरज; 'at l.' अंते, अंततः; 'l. part' शेषभागः; 'l. part of the night' उत्तररात्रः, चरमयामः; 'l. half' उत्तरार्धः, पश्चार्धः, परार्धः, 'the year before l.' परारि *ind.*; 'to the l.' शेषं यावत्. **-***adv.* अंते, शेषे, अंततः, अवरं, चरमं, अवरतः. **-***v. i.* अव-स्था 1 A, स्था 1 P; oft. by अवधिः in comp.; 'l. ing for many days' चिरस्थायिन्, एष ते जीवितावधिः प्रवादः (U. 1) 'will l. through life'; 'this will l. as food for four months' एतेन (अस्माकं) मासचतुष्टयस्य भोजनं भविष्यति; 'the bloom of youth l.s for a few days' कतिपयदिवसस्थायिनी यौवनश्रीः (Bh. II. 2). **-ing,** *a.* स्थायिन्, चिर-दीर्घ-कालस्थायिन्; अनपायिन्, नित्य, स्थिर, ध्रुव, अक्षय, शाश्वत (ती *f.*), अजर, चिरंतन (नी *f.*). **-ly,** *adv.* अंते, अंततः, चरमतः, शेषे, अवरतः.

Latch, *s.* अर्गला-लं, विष्कंभः, अर्गलाबंधः, तालकं, द्वारबंधनी; 'the postern door was on the l.' अर्गलानिरुद्धं पक्षद्वारं.

Latchet, *s.* पादुकाबंधनी.

Late, *a.* विलंबेन आगत or प्राप्त; कालातीत, वेलातीत, समयातीत, अतिक्रांतकाल, अतिकाल, अतीतकाल-समय. **2** अवसित, परिणत, अवसन्न. **3** नूतन, अचिर, प्रत्यग्र, अभिनव, आधुनिक (की *f.*), नातिपुराण, सद्यस्कालीन. **4** अतीत, गत, व्यतीत, भूत; प्राक्तन-पूर्वतन (नी *f.*), पौर्विक (की *f.*), 'at a 'l. hour of the day' परिणते दिवसे, अवसन्नप्राये अहनि; 'at a l. hour of the night' क्षीणभूयिष्ठायां क्षपायां; 'at a l. period of life' परिणते वयसि. **-***adv.* विलंबेन, विलंबात्, वेलातिक्रमेण, अतिकालं-समयं, चिरेण, चिरात्, चिरकालेन-लात्; 'to be l.' वेलातिक्रमं कृ 8 U, चिर(रा)यति (D.); 'why are you l.' किमिति चिरायित त्वया; 'l. in life' परिणतवयसि, *See* above; 'too l. in the day' अतिपराह्णे; 'too l. in the evening' अतिसाये. **2** अकाले, असमये. **-ly,** 'of late,' *adv.* इदानींतने काले, नातिचिरात्प्राक्, आधुनिकसमये; अचिरं. **-ness,** *s.* कालातीतता, कालातिक्रमः; परिणामः, परिणति *f.* **-Later,** *a.* उत्तर, अपर, पर, उत्तरकालीन, पाश्चात्य. **-***adv.* (on) उत्तरं, उत्तरोत्तरं, पश्चात्, उत्तर-पर-काले.

Latent, *a.* नि-,लीन, गूढ, छन्न, गुप्त, अदृष्ट, अप्रत्यक्ष, अप्रकाश, अप्रकट, अदृश्य, अंतर्हित, निभृत; 'a l. disease' धातुस्थः-शरीरांतर्गतः-रोगः.

Lateral, *a.* पार्श्वीय, पार्श्वस्थ, पार्श्विक (की *f.*). **-ly,** *adv.* पार्श्वभागे, पार्श्वतः, पार्श्वे.

Lath, *s.* सूक्ष्मकाष्ठं-दारु, तनुफलकः-कं.

Lathe, *s.* कुंदः-दं, भ्रमः-मि *f.*, चक्रं.

Lather, *s.* अंजनफेनः, मार्जनतैलफेनः.

Latifolious, *a.* पृथु-विशाल-पर्ण.

Latitude, *s.* अक्षः. **2** (Celestial) निक्षेपः. **3** विस्तारः, विस्तृति *f.*, प्रथिमन् *m.*, आयति *f.* **4** अनियंत्रणं, स्वातंत्र्यं, नियमोपेक्षा, नियमातिक्रमः, शैथिल्यं; 'degree of l.' अक्षांशः; 'l. of a planet' पतनं; 'parallel of l.' अक्षांशवृत्तं. **-Latitudinarian,** *a.* शिथिल, अनियंत्रण, निर्यंत्रण. **-***s.* मतस्वातंत्र्यावलंबिन् *m.*, निर्बंधहीनः. **-ism,** *s.* मतशैथिल्यं, विचारस्वातंत्र्यं, अनियंत्रणं.

Latten, *s.* रीति *f.*, पित्तलं.

Latter, *a.* उत्तर, अपर, पर, अवर, अन्य, (*pron. a.*); पश्चिम, चरम, अंतिम; उत्तरोक्त, अपरोक्त; 'former and l.' पूर्वापरं; 'in the l. part of the day' पराह्णे. **-ly,** *adv.* अर्वाक्काले, अधुनातनकाले; *See* **Lately.**

Lattice, *s.* जालमार्गः, गवाक्षः, जालं, गवाक्षजालं, वातायनं; 'l.-work' जालकर्मन् *n.*

Laud, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U, कृत् 10, गुणं वर्ण् 10. **-***s.* प्रशंसा, श्लाघा, स्तुति *f.*, गुण-वर्णना-कीर्तनं. **-able,** *a.* श्लाघ्य, स्तुत्य, प्रशस्य, श्लाघार्ह, प्रशंसार्ह, स्तवनोचित; *See* **Praise,-worthy. -ation,** *s.* प्रशंसनं, श्लाघनं. **-atory,** *a.* प्रशंसागर्भ, प्रशंसक, स्तुतिरूप, प्रशंसा-श्लाघा-स्तुति-मय (यी *f.*), प्रशंसाकर (री *f.*). **-er,** *s.* प्रशंसकः, स्तावकः.

Laugh, *v. i.* हस् 1 P, प्र-वि°; स्मि 1 A (l. gently); 'l. violently' उच्चैः हस्, अट्टहासं कृ 8 U; 'l. at' अव-उप-हस्, उपहासास्पदं मन् 4 A, अव-मन्; 'l. in the sleeves' अंतर्-निभृतं-हस्. **-***s.*, **-ing, -Laughter,** *s.* हासः, हसनं, हास्यं, हसितं, वि-प्र°; स्मितं; 'a horse-l.' अट्टहासः, उच्चैर्हासः, प्र-अति-हासः; 'an inward l.' अंतर्हासः **-able,** *a.* हासकर (री *f.*), हास्यास्पदं, हास्य. **-er,** *s.* हासकः, हासिन् *m.* **-ing,** *a.* हास्यमुख (खी *f.*), स्मेरमुख, हास्यवदन; 'l.-stock' उपहासास्पदं, हास्यपात्रं. **-ingly,** *adv.* सहासं, विहस्य, सस्मितं.

Launch, *v. t.* (नावं जले) क्षिप् 6 P, मुच् 6 P or c.; प्रविश् c.; वह् c.; 'l. thy hundred-shafted bolt' मुंच शतशोऽशनिं (M. 5). **2** सहसा विसृज् 6 P or प्रक्षिप्, प्रास् 4 U. **-***v. i.* जलं प्रविश् 6 P. **-***s.* नौमोचनं or जलप्रवेशनं.

Laundress, Launder, *s.* रजकभार्या, निर्णेजकी. **-Launderer,** *s.* रजकः, निर्णेजकः. **Laundry,** *s.* रजकगृहं, वस्त्रधावनशाला.

Laurel, *s.* नारलं (?); 'win l. s' ख्यातिं गम् 1 P, यशः अधिगम्; 'wear your l. s with modesty' लब्धेपि जये मा गर्वाध्मातो भूः; (भाग्येषु अनुत्सेकी भव S. 4).

Lava, *s.* आग्नेयोद्गारः.

Lave, *v. t.* क्षल् 10, धाव् 10; निज् 3 U; *See* **Wash.** **-atory,** *s.* धावनस्थानं. **-er,** *s.* धावन-प्रक्षालन-पात्रं, द्रोणी. **-ment,** *s.* वस्ति *m.f.*

Lavish, *a.* अतित्यागिन्, अतिव्ययिन्, व्यय-शील-पर, अपरिमितव्यय, बहुप्रद, मुक्तहस्त. **2** अमित, अपरिमित, अतिरिक्त, अत्यधिक, अति pr. **-***v. t.* अपरिमितं व्यय् 10 (व्यययति), मुक्तहस्तेन दा 3 U or विसृज् 6 P or त्यज् 1 P or वितृ 1 P or विश्रण् 10 or अप-चि 5 U or वृष् 1 P or अवा-कृ 6 P; विक्षिप् 6 P. **-er,** *s.* अतिव्ययिन् *m.*, मुक्तहस्तः, व्ययपरः. **-ly,** *adv.* अतिव्ययेन, मुक्तहस्तेन, अपरिमितं, अत्यंतं. **-ment,-ness,** *s.* अति-अपरिमित-व्ययः, महाव्ययः, अतित्यागः, अ-त्युत्सर्गः, मुक्तहस्तत्वं, बहुप्रदत्वं.

Law, *s.* धर्मः, स्मृति *f.*, व्यवहारः, आचारः; धर्म-स्मृति-व्यवहार-शास्त्रं. **2** विधिः, शासनं, व्यवस्था, नियमः, नि-आ-देशः, नियोगः, सूत्रं, राजाज्ञा, चोदना, व्यवस्था-शासन-पत्रं, मर्यादा, स्थिति *f.*, कार्याकार्यनियमः, विधिनिषेध-नियमः. **3** न्यायः, नीति *f.*, धर्मानुसारः, व्यवहारविधिः; 'a code of l. s' धर्मसंहिता, धर्म-स्मृति-शास्त्रं; 'criminal l.' दंडनीतिः-विधिः; 'matter recognizable by l.' व्यवहारविषयः-पदं; 'versed in l.' स्मृति-शास्त्रज्ञ, व्यवहारपंडित; 'common l.' स्मृतिः; 'breaking a l.' व्यवस्थातिक्रमः; 'going to l.' राजसभां-व्यवहारासनं-गत्वा विवाद-प्रशमनं-निर्णयः; 'to go to l.' विवद् 1 A, व्यव-हृ 1 P; 'against the l.' स्मृतिविरुद्धं; 'l.-breaker' व्यवस्थाभेदिन्-लंघिन्, नियमातिक्रामिन्; 'l.-giver' स्मृति-शास्त्रकारः, व्यवस्थापकः, शासितृ *m.*, विधि-न्याय-प्रवर्तकः; 'l.-suit' अर्थः, कार्यं, व्यवहारपदं; 'lay down a l.' व्यव-स्था c. (-स्थापयति). **-ful,** *a.* न्याय्य, शास्त्रविहित, शास्त्रोक्त, धर्म्य, यथान्याय, धर्मसंमत, धर्मशास्त्रानुरूप, शास्त्रसंमत, स्मृत्युक्त, व्यवहार-विधि-प्रोक्तः, विध्यनुसारिन्, अनिषिद्ध, धर्माविरोधिन्; 'l. wife' धर्मपत्नी; 'l. means' धर्मोपायः, न्यायोपायः. **-fully,** *adv.* विध्यनुसारेण, न्यायतः, धर्मेण, धर्मतः, धर्मानुसारेण, स्मृति-शास्त्रानुरूपं, यथान्यायं. **-fulness,** *s.* न्याय्यता, धर्म्यता; धर्मानुसारः, धर्माविरोधः. **-less,** *a.* विध्यपेत, स्मृति-विधि-विरुद्ध, धर्म-न्याय-विरुद्ध, अन्याय्य, अधर्म्य. **2** (Of persons) अनियंत्रण, अनियत उच्छृंखल, स्वेच्छाचारिन्, स्वैरगति, अवश, कामचार, उद्दामवृत्ति; दुराचार, निर्मर्याद, अशिष्ट, आचार-धर्म-भ्रष्ट. **-lessly,** *adv.* अवशं, उच्छृंखलं, दुराचार-वत्, धर्माविरोधेन, शास्त्रविरुद्धं. **-lessness,** *s.* कामवृत्ति *f.*, मर्यादातिक्रमः, अनाचारः, आचारभ्रष्टता, नियमातिक्रमः; स्वेच्छाचारः. **-Lawyer,** *s.* विधिज्ञः, न्यायनिपुणः, व्यवहारपंडितः, धर्मशास्त्रज्ञः, धर्मज्ञः, स्मृतिपारगः; अर्थिप्रत्यर्थिपक्षसमर्थकः.

Lawn, *s.* तृणभूमि *f.*, तृणावृता भूः, शाद्वलं स्थानं, सतृण-हरित-स्थलं. **2** क्षौमं, अंशुकं, दुकूलं.

Lax, *a.* शिथिल, श्लथ, स्रस्त, विगलित. **2** मृदु, कोमल, अतीक्ष्णदंड. **3** दुराचार, भ्रष्टचरित्र, धर्म-कर्म-भ्रष्ट; 'l. in bowels' मृदु-अबद्ध-कोष्ठ. **-***s.* अतिसारः, प्रवाहिका. **-ative,** *a.* सारक, रेचक. **-***s.* सारकं. **-ity,-ness,** *s.* शैथिल्यं, अतीक्ष्णता; अनाचारः, मर्यादातिक्रमः; इंद्रियासंयमः, &c.

Lay, *v. t.* धा 3 U, नि-आ°, न्यस् 4 U, नि-विश् c., स्था c. (स्थापयति); सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, आरुह् c. (रोपयति); दा 3 U, धृ 1 P; क्रमेण स्था c. or नि-धा; प्रकृप् c., प्रयुज् 7 A, 10 (a plot, snare, &c.). **2** आ-स्तृ-स्तृ 5, 9 U. **3** शम् c. (शमयति), प्र-उप-°; सांत्व् 10, स्थिरीकृ 8 U. **4** शी c.; निपत् c.; 'l. eggs' अंड-मोक्षं कृ; अंडानि सू 2, 4 A; 'l. siege' रुध् 7 U, वि-ष्टंभ् 9 P; *See* **Besiege;** 'l. blame on' दोषं समारुह् c. or निक्षिप्; 'l. waste' उप-हृ 1A, उपद्रु 1 P, उद्-ध्वंस् c., निर्जनीकृ; *See* **Devastate;** 'a sinful action, though done by others, is laid at his doors' पापं कर्म च यत् परैरपि कृतं तत्तस्य संभाव्यते (Mr. 1); 'l. aside' अप-निर्-अस्, त्यज् 1 P, हा 3 P, उत्सृज् 6 P, उज्झ् 6 P; 'l. it aside for a while' मुहूर्तं तत् आस्तां-तिष्ठतु तावत्; (as dress &c.) उद्-वि-मुच् 6 P, अवतृ c., अवरुह् c.; 'l. hands on' परामृश् 6 P, धृष् c.; 'laid upon him his hand' तं हस्तेन पस्पर्श or परामृशद्; 'l. hold of' धृ, ग्रह् 9 U; *See* **Catch;** 'l. the dust' धूलिं सं-सिच् 6 P or आ-हन् 2 U; 'l. open or bare' विवृ 5 U, आविष्कृ; स्फुटीकृ, वि-अंज् 7 P or c., स्पष्टी-प्रकटी-कृ, प्रकाश् c. **-before,** उपनि-अस्, उपक्षिप्, पुरो-नि-धा, प्रसू c., नि-आ-विद् c. **-by,** सं-,रक्ष् 1 P, संचि 5 U. **-down,** न्यस्, निक्षिप्, नि-धा, न्यासीकृ. **2** शी c., निविश् c. **3** विमुच्, परि-,त्यज्, वि-हा. **4** (Oneself) संविश् 6 P, शी 2 A. **5** प्र-णी 1 P, वि-धा (rules &c.); 'l. down arms' युद्धाद्विरम् 1 P, शरणं व्रज् 1 P; 'l. down life' प्राणान् त्यज्. **-in,** संग्रह्, संचि, संरक्ष्. **-on,** पत् c., प्र-युज्, सम्-ऋ c. **-out,** विनि-युज् 7A, 10, प्र-युज्,

व्यय् 10 (व्ययति). **2** परि-प्र-क्लृप् c., वि-न्यस् 4 U, विरच् 10, प्र-युज्, चिंत् 10; *See* **Contrive.** **3** प्रसृ c., विस्तृ c., दीर्घीकृ; प्रकाश् c., प्रकटीकृ 'l. oneself out'; चेष्ट् 1 A, प्रयत् 1 A, उद्यम् 1 A. **-to,** आ-रुह् c., निक्षिप्; *See* **Ascribe;** 'l. to a ship' नौगतिं रुध् or स्तंभ्. **-up,** नि-धा, रक्ष्, संचि; 'to be laid up,' शय्याग्रस्त-*a.* भू 1 P, उत्थातुं अक्षम-*a.* भू; 'laid up with fever' ज्वरेणोत्थातुमक्षमः. **-Lay,** *s.* गानं, गीतं, काव्यं. **2** आस्तरः-रणं, फलकः-कं. **-***a.* सामान्य, साधारण (णी *f.*), पुरोहितभिन्न. **-man,** *s.* गृहस्थः, सामान्य-साधारण-जनः, अदीक्षितः, प्राकृतः. **-Laical,** *a.* गृहस्थिन्, गार्हस्थिक (की *f.*), पुरोहितभिन्न, अदीक्षित. **-Laity,** *s.* गृहस्थ-सामान्य-जनवर्गः, प्राकृत-साधारण-जनाः, पुरोहितभिन्नवर्गः.

Layer, *s.* स्तरः; आस्तरः-रणं, फलकः-कं. **2** **Twig,** q. v.

Lazar, *s.* कुष्ठिन् *m.*, श्वित्रिन् *m.*, कोठोपहतः, त्वग्रोगोपहतः; ' l.-house ' कुष्ठिशाला, श्वित्र्यालयः.

Pity, *s.* दया, अनुकंपा, करुणा, घृणा, कृपा, अनुक्रोशः; 'in p. to my passion' (रागजनितं) दुःखं मे निरवेक्ष्य (Mr. 5); 'what a p. it is' अहो नु कष्टमेतत्. **-***v. t.* 'take p. on' दय् 1 A (with gen.); अनुकप् 1 A, दयां कृ 8 U (with loc.); प्रसद् 1 P. **-Piteous, Pitiable,** *a.* अनुकंप्य, करुणा-अनुकंपा-योग्य, दयाविषयः-भाजनं-पात्रं, करुण, दीन; 'in p. accents' करुणस्वनैः. **2** वराक (की *f.*), तपस्विन् (of persons). **-ly,** *adv.* करुणं, दीनं. **-ness,** *s.* अनुकंप्यता, कारुण्यं; दैन्यं. **-Pitiful, -Pitying,** *a.* करुणार्द्र, करुणामय (यी *f.*), करुणा-दया-शील, सदय, सानुकंप, दयालु, कृपालु; *See* **Kind;** 'a p. person' दयानिधिः-सागरः, दीनबंधुः-वत्सलः. **2** करुण, दीन, शोच्य. **3 Contemptible.** q. v. **-ly,** *adv.* सदयं, सानुकंपं, सकरुणं. **-ness,** *s.* दयालुता, कारुण्य, दयार्द्रता. **-Pitiless,** *a.* निर्दय, निरनुक्रोश, निर्घृण, निष्कृप, क्रूर, निष्ठुर, कठोर, अकरुण. **-ly,** *adv.* निर्दयं, क्रूरं निष्ठुरं.

Pivot, *s.* विवर्तनकीलः.

Placard, *s.* घोषणापत्रं. **-***v. t.* घोषणापत्रेण प्रकाश् c.

Placate, *v. t.* **Appease,** q. v. **-Placable,** *a.* क्षमाशील; सांत्वनीय, आराध्य, प्रसाद्य.

Place, *s.* स्थानं, स्थलं, प्र-,देशः, स्थली, भू-भूमि *f.*, धिष्ण्यं. **2** पदं, आस्पदं, विषयः. **3** पदं, पदवि-वी *f.*, अधिकारः, नियोगः, आधिकारपदं; *See* **Office.** **4** अवकाशः, अवसरः, प्रसरः; 'p. of honour' संमानपदं, गौरवपदं; 'in one p.' एकत्र; 'in many p. s' बहुत्र; 'p. of residence' निवासस्थानं; वसति *f.*; 'p. for dancing' नृत्यशाला-स्थानं; 'out of p.' अस्थाने, अनुचितं; 'in the p. of a father' पितृस्थाने-भूमौ; 'p. for fear' भयस्थानं-कारणं-हेतुः; 'in one p.-in another p.' क्वचित्-क्वचित्, इतः-इतः, एकत्र-अन्यत्र; 'in the first p.' प्रथमं, प्रथमतः, प्रथमं तावत्; 'in the next p.' अपरंच, पुनः, पुनश्च; 'to give p.' स्थानं त्यज् 1 P, व्यप-सृप् 1 P, अप-सृ 1 P; 'to take p.' *See* **Happen, Occur.** **-***v. t.* स्था c. (स्थापयति), धा 3 U, नि-आ°-, वि-,न्यस् 4 U, निक्षिप् 6 P, आ-नि-विश् c., आरुह् c. (रोपयति), धृ 10; oft. by कृ 8 U, दा 3 U, व्यापृ c., (व्या-

पारयामास करं किरीटे R. vi. 19); 'p. over' अधिकृ, अधि-ष्ठा 1 P; 'p. in an office' पदे नियुज् 7 A, 10 or आरुह् c.

Placid, *s.* शांत, प्र-उप°-, प्रसन्न, निराकुल, अनुद्विग्न, जितक्रोध, असंभ्रम, शांतात्मन्, प्रसन्नचित्त. **-ly,** *adv.* प्रसन्नं, शांत्या, शांतचेतसा, निराकुलं. **-ity, -ness,** *s.* शमः, शांति *f.*, प्रसादः, अक्रोधः, असंभ्रमः, अक्षोभः.

Plagiarism, *s.* शब्दचौर्यं, वागपहारः. **Plagiarist,** *s.* शब्द-ग्रंथ-चौरः.

Plague, *s.* मारी, महामारी, म(मा)रकः. **2** उत्पातः, अरिष्टं, अनर्थः, शल्यं, उपद्रवः, कंटकः, उपप्लवः; *See* **Pest.** **-***v. t.* मार्या ग्रस् 1 A or आक्रम् 1 U, 4 P. **2** बाध् 1 A, पीड् 10, तप् c., दु 5 P; *See* **Harass.** **-ing,** *a.* बाधक, पीडक, क्लेशद, पीडाप्रद.

Plain, *s.* समभूमि *f.*-देशः-स्थलं-ली, समभूभागः; *See* **Level.** **-***a.* सम, सपाट. **2** विनीत, निरलंकार, अभूषित, निर्भूषण. **3** स्पष्ट, व्यक्त, विशद, परि-,स्फुट, सुबोध, स्पष्टार्थ, भिन्नार्थ, प्रकाश, प्रत्यक्ष, प्रकट. **4** केवल, मात्र in comp. **5** (Style) अनलंकृत, शुद्ध, अनलंकार, अव्यंजन. **6** (Food) उपस्कर-हीन-शून्य, असंस्कृत. **7** अमाय, दाक्षिण, निष्कपट, निर्व्याज, सरल, कपट-माया-हीन, निर्व्यलीक, अकृत्रिम, ऋजु; *See* **Frank.** **8** सामान्य, साधारण (णी *f.*); मध्यमरूप, नातिसुंदर (री *f.*); 'a p. woman' 'one p. in person' सामान्यलावण्योपपन्ना, नातिसुभगा, अनतिसुंदरी; 'p. dealing' न्यायाचार, शुद्ध-सरल-मति, निर्व्यलीक, दाक्षिण, अमाय, ऋजु; (*s.*) सारल्यं, निष्कापट्यं. **-***v. t.* समीकृ 8 U. **-ly,** *adv.* स्पष्टं, व्यक्तं, स्फुटं, स्पष्टार्थं, सुबोधं, प्रकाशं, प्रकटं, प्रत्यक्षं. **2** निर्व्याजं, निर्व्यलीकं, अवक्रं, सारल्येन, अमायया, निष्कपटं. **3** विनीतं, अनलंकारं; 'p. dressed' विनीतवेष. **-ness,** *s.* समता, विनीतत्वं, भूषणाभावः, व्यक्तता, स्पष्टता, वैशद्यं, सुबोधता, प्रकाश्यं, अव्याजः, निर्व्याजता, अकापट्यं, सारल्यं, अमाया, आर्जवं, &c.

Plaint, *s.* प्रतिज्ञा, अभियोगः, भाषापादः, भाषा, पूर्वपक्षः, पक्षः. **2** विलापः, विलपनं, परिदेवनं-ना, शोकः. **-Plaintiff,** *s.* अर्थिन् *m.*, वादी, अभियोगी, कार्यार्थी, अभियोक्तृ *m.*, सूचकः. **-Plaintive,** *a.* परिदेविन्, विलापिन्. **2** शोकावह, शोकार्थक, शोकदुःख-गर्भ; करुण, दीन, सकरुण; 'in p. words' परिदेविताक्षरैः. **-ly,** *adv.* करुणं, दीनं.

Plait, *s* भंगि-गी *f.*, भगः, ऊर्मि *f.*, पुटः, चूणः. **2** वेणि-णी *f.*, कबरी, धम्मिल्लः. **-***v. t.* ग्रंथ् 9 P, व्या-वृत् c., पुटीकृ 8 U, संवे 1 P, वेणीकृ, वेणीरूपेण ग्रंथ्.

Plan, *s.* उपायः, प्रयोगः, प्र-,युक्ति *f.*, कल्पना **2** सूत्रपातः, चित्रलेखनं; आलेख्यं, स्थूलवर्णनं. **-***v. t.* प्र-सं-कल्प् c., प्र-,युज् 10, चिंत् 10, मंत्र् 10 A, अनुसंधा 3 U, आलोच् 10, मनसा विचर् c. or वि-भू c. **2** आलिख् 6 P, सूत्रपातं कृ 8 U. **-ning,** *s.* उपाय-कल्पना-योजना

Planch, *See* **Plank.**

Plane, *a.* सम, समस्थ. **-***s* समं, समक्षेत्रं, धरातलं. **2** तक्षणी, त्वक्षणी. **-***v.* समीकृ 8 U. **2** तक्ष् 1, 5 P.

Planet, *s.* ग्रहः, ज्योतिस् *n.*; 'minor p.' उपग्रहः; 'passage of a p.' संक्रमः, संक्रांति *f.*; 'aspect of a p.' ग्रहदृशा; 'influence of a p.' ग्रहावेशः. **-ary,** *a* ग्रह in comp.

Planish, *v. t.* समीकृ 8 U., तिज् c., प्र-मृज् c.

Plank, *s.* फलकः-कं; दारु-काष्ठ-फलकः. **-***v. t.* फलकैः आस्तृ 9 U or आच्छद् 10.

Plant, *s.* ओषधि *f.*, लता; तरुः, वृक्षः. **-***v. t.* (Seeds) आ-,रुह् c. **2** प्रति-,स्था c. (स्थापयति), वि-,न्यस् 4 U निविश् c., नि-खन् 1 P, नि-धा 3 U, रुह् c. **3** अधि-,वस् c. **-ation,** *s.* रोपणं. **2** क्षेत्रं, in comp., वाटः-टी, वाटिका; शाकटं-शाकिनं in comp., वृक्षवाटिका; 'sugar-p.' इक्षुशाकटं-वाटिका. **3 Colony,** q. v. **-er,** *s.* रोपयितृ *m.*, रोपकः. **2** वाटिकेश्वरः.

Plantain, *s.* कदली-लः, रंभा, वारणबुसा-षा, मोचा, अंशुमत्फला, काष्ठीला; 'p. fruit' कदलीफलं, मोचं; 'wild p.' काष्ठकदली.

Plantigrade, *a.* पादतलचारिन्.

Plash, *s.* आघातः, आस्फालनं. **2** क्षुद्रजलाशयः. **-***v. i.* जले क्रीड् 1 P, जलं आस्फल् c. **-***v. t.* अवच्छिद् 7 P, लू 9 U, कृत् 6 P. **2** संग्रंथ 9 P. **-y,** *a.* जलाढ्य.

Plaster, *s.* लेपः, सुधा, चूर्णलेपः. **2** उपनाहः उपदेहः. **-***v. t.* लिप् 6 P, वि-अनु-प्र-°, दिह् 2 U, उप-नह् 4 P. **-er,** *s.* लेपकः, पलगंडः. **-ing,** *s.* वि-प्र-लेपः-पनं.

Plastic, *a.* आकारद, कल्पक. **2** नम्य, सुखनम्य.

Plat, *s.* **Plot,** q. v. **-***v. t.* **Weave,** q. v. **2** प्र-सं-कल्प् c., चिंत् 10.

Plate, *s.* पात्रं, भाजनं. **2** कोशः-षः, हेमरूप्यं. **3** फलकः-कं, पत्रं; पट्टः-ट्टं, पट्टिका; 'copper p.' ताम्रपट्टः, ताम्रपत्रं; 'p.s of grant' शासन-नियम-पत्राणि. **-***v. t.* रजतपत्रेण आवृ 5 U or आच्छद् 10; रजतेन अलंकृ 8 U. **-ed,** *a.* रजतपत्रावृत, रूप्यनिबद्ध.

Plateau, *s.* समस्थली, अधित्यका; *See* **Level.**

Platform, *s.* वेदि *f.*, वेदिका, उन्नतस्थानं.

Platoon, *s.* गुल्मः-ल्मं.

Platter, *s.* पात्रं, भाजनं.

Plaudit, *s.* प्रशंसा, धन्यवादः, जयघोषः.

Plausible, *a.* सत्याभास, सत्यसंकाश, बाह्यतः रमणीय.

Play, *v. i.* क्रीड् 1 P, रम् 1 A, वि-हृ 1 P, विलस् 1 P, खेल् 1 P. **2** (At dice) दिव् 4 P, क्रीड्, ग्लह् 1 A; 'p. s at dice' अक्षैः -अक्षान्-दीव्यति. **3** वद् c. (instrument). **4** चेष्ट 1 A, वृत 1 A, चल् 1 P. **-***v. t.* रूप् 10, नट् 10, अभिनी 1 P, ex. by denom.; 'p. s the king' नृपायते; 'p. s the woman' स्त्रीवाचरति. **2** प्र-,चल्-र् c., प्रवृत् c., प्रसृ c. **3** वि-धा 3 U, कृ 8 U, अनु-ष्ठा 1 P. **-***s.* क्रीडा, खेला-लनं, लीला, केलि *f.*, विनोदः, विलासः, विहारः, कौतुकं, परिहासः; 'in p.' लीलया, परिहासेन. **2** नाटकं. **3** अक्षक्रीडा, द्यूतं, देवनं. **4** अभिनयः, गति *f.* **5** आचरणं, चेष्टितं; वृत्ति *f.*, व्यापारः, कृत्यं, चेष्टा; 'foul p.' दुश्चेष्टितं. **6** चलनं, सरणं. **7** प्रसरः, अवकाशः, अवसरः; 'p.-day' अनध्यायदिवसः-तिथिः, विश्रामदिवसः; 'p. house' नाटक-रंग-शाला; 'p.-thing' क्रीडनकं, क्रीडाद्रव्यं-वस्तु. **-er,** *s.* क्रीडकः; (at dice) अक्ष-,देविन् *m.*, अक्षक्रीडकः, अक्षद्यूतः. **2** नटः, कुशीलवः, नर्तकः, अभिनेतृ *m.* पात्रं. **-ful,** *a.* क्रीडासक्त, क्रीडापर-मग्न, केलि-क्रीडा-लीला-शील, लीला-खेला-पर, विलासिन्, विनोदिन्; (of things) सलील -क्रीडा-केलि in comp.; 'p. anger' प्रणयक्रीडा-कोपः, केलिकोपः. **-fully,** *adv* क्रीडापूर्वं, परिहासेन (jokingly); लीलया, सकौतुकं, सविलासं, सखेलं. **-fulness,** *s.* क्रीडासक्ति *f.*, लीलापरता, सलीलत्वं, क्रीडाशीलता.

Plea, *s.* कारणोत्तरं, उत्तरं, उत्तरपादः. **2** व्यपदेशः, छद्मन् *n.*, अपदेशः, निमित्तं, कारणं, मोचनहेतुः. **3** वादः, व्यवहारः, कार्यं. **4** प्रार्थना; 'raising a p.' ध्वजीकरणं. **-Plead,** *v.* उत्तरं दा 3 U or प्रतिपद् 4 A or वद् 1 P, निमित्तं दृश् c., वि-,अप-दिश् 6 P; 'p. guilty' अपराधी अस्मीति वद् or प्रतिपद्; 'tears shall p. in vain' अश्रुपातो निर्गुणो भवेत्. **2** विनयेन प्रार्थ् or अभ्यर्थ् 10 A, सविनयं याच् 1 A; 'p. ed for his life' जीवितदानार्थं प्रार्थयामास. **3** उप-क्षिप् 6 P, उपन्यस् 4 U. व्यपदेशार्थं पुरः क्षिप्. **4** (Cause) प्रति-पद् c., परार्थं उत्तरं वद्, परपक्षं समर्थ्; 'p. ing headache as an excuse' शिरःशूलस्पर्शं व्यपदिशन्; 'p. ing illness' अस्वास्थ्यव्याजेन-व्यपदेशेन. **-er,** *s.* अभिभाषकः, उत्तरवादिन् *m.* समर्थकः, हेतुवादिन् *m.* **-ing,** *s.* हेतु-उत्तर-वादः, व्यपदेशनं, हेतूपन्यासः.

Please, *v. t.* प्री 9 P, 10 (प्रीणयति), तृप् c., सं-परि-°, रम् c. (रमयति), प्रमुद् c., सुखयति (D.), आ-नंद् c., सं-,तुष् c., प्रसद् c., आह्लाद् c., हृष् c., आराध् c., अनुरंज् c.; oft. by इच्छा, प्रसादः, कृपा; विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया (R. VIII. 46) 'if it p. God to do so' &c.; 'he was p. ed to accept my presents' ममोपायनानि स सुप्रीतमनसा-सुप्रसन्नं-स्वीचकार; 'may it p. your ladyship' प्रसीदतु भट्टिनी (M. 4). **2** (Like) *See* below. **-***v. i.* 'to be p. ed' तुष् 4 P, तृप् 4 P; रम्-मुद् 1 A, नंद् 1 P. **2** अर्ह् 1 P or प्रसद् 1 P, with inf., or simply by Imperative; 'p. sit here' अत्रोपविशत्वार्यः; 'worthy Sir, p. to wait for 2 or 3 days' द्वित्राण्यहान्यर्हसि सोढुमर्हन् (R. v. 25) **3** रुच् 1 A, इष् 6 P; *See* **Like;** 'just as my friend p. s' यदभिरोचते वयस्याय; 'do as you p.' यथाभिलषितं क्रियतां. **-ance,** *s.* क्रीडोद्यान. **-ant,** *a.* सुखकर (री *f.*), मधुर, सुखद-प्रद, सुखावह, रम्य, रमणीय, प्रिय, मनोहर-रम, अभिराम, सुभग, अभिमत, सुख, काम्य, कांत, हर्षावह, रुचिर, हृद्य, हृदयंगम, प्रीति-तुष्टि-कर, मनोज्ञ, मंजुल, चारु; 'a p. joke' हृदयंगमः परिहासः (Mal. 3). **-antly,** *adv.* सुखं, रम्यं, मधुरं, प्रियं, रुचिरं. **-antry,** *s.* परि(री)हासः, नर्मभाषितं, विनोदः, नर्मालापः, विनोद-नर्म-उक्ति *f.* **-ing,** *a.* सुख in comp.; रम्य, कांत; *See* **Pleasant,** 'p to the ear' सुखश्रव, श्रुतिसुख, मंजुल-स्वन, सुश्राव्य; 'p. to the eye' प्रेक्षणीय, नयनाभिराम, सुदृश्य; 'p. language' चाटु *m. n.*, चाटूक्तिः. **-ingly,** *adv.* सुभगं, सुखं, सुख-चारु in comp. **-Pleasure,** *s.* सुखं, सं-परि-तोषः, आनंदः, प्रीति *f.*, सौख्यं, तुष्टि *f.*, प्र-, मोदः, आह्लादः, हर्षः, मुदा. **2** अभि-, रुचि *f.*, इच्छा, अभिलाषः, छंदः-दस् *n.*, कामः; 'at one's p.' स्वेच्छया, कामतः, यथाकामं, यदृच्छया, स्वैरं; 'wandering at p.' कामचारिन्, स्वच्छंद-गामिन्; 'sensual p.' भोगः, विषयसुखं, विषयानुरागः; 'sexual p.' रति *f.*, रति-सुखं, सु-,रतं; 'p.-boat' केलि-क्रीडा-नौका; 'p.-ground' आरामः, क्रीडा-केलि-विलास-वनं-काननं, प्रमदवनं, क्रीडोद्यानं; 'p.-mansion' केलिगृहं-भवनं, लीलागारं, विलासमंदिरं. **3** प्रसादः, अनुग्रहः. **-able,** *a.* रम्य, रमणीय, सुखद, सुख; *See* **Pleasant-ist,** *s.* विषयिन् *m.*, विषयासक्तः, भोगासक्तः, भोगपरायणः.

Plebian, *a.* प्राकृत (ती *f.*), सामान्य, साधारण (णी *f.*), अवरवर्ण, अकुलीन. **-***s.* प्राकृतः, प्राकृतजनः, पृथग्जनः; नीच-अवर-जनः.

Plectrum, *s.* कोणः, शारिका.

Pledge, *s.* न्यासः, निक्षेपः, आधिः, उपनिधिः, उपन्यासः-निक्षेपः, पणः. **2** अभिज्ञानं; 'p. of love' प्रीत्यभिज्ञानं. **3** प्रतिज्ञा, क्षणः, परिपणः-णनं; 'I have given a p.' विहित-प्रतिज्ञः-गृहीतक्षणः-अहं. **4** प्रतिभूः, लग्नकः, बंधकः. **-***v. i.* न्यस् 4 U, निक्षिप् 6 P, आ-नि-धा 3U, परि-,पण् 1 A, आधी-न्यासी-कृ 8 U. **2** (One's word) प्रति-श्रु 5 P, प्रति-ज्ञा 9 A, (with dat. of person), उरीकृ, वचनेन बंध् 9 P; ex. by (*s.*); अस्मत्सौदामिनीसमक्षमनयोर्वृत्तेयं प्रतिज्ञा (Mal. 1) 'they two p. ed their word' &c.; 'he has p. ed his virtue (honor) that he would not harm you' तव विरूपकरणे तेन सुकृतमंतरे धृतं (P. iv. 1); 'he who has p. ed his word' कृत-विहित-प्रतिज्ञः, प्रतिज्ञा-वचन-बद्धः, दत्तवचनः-प्रतिज्ञः, गृहीतक्षणः.

Pledget, *s.* पट्टः, आवेष्टनं.

Pleiades, *s.* कृत्तिकाः.

Plenary, *a.* सं-परि-पूर्ण, समग्र.

Plenipotent, *a.* पूर्णशक्तियुक्त. **-Plenipotence,** *s.* पूर्णसामर्थ्यं शक्ति *f.* **Plenipotentiary,** *s.* पूर्णशक्तियुक्तः, महादूतः.

Plenish, *v. t.* उपस्कृ 8 U, परि-ष्टृ 10.

Plenist, *s.* पूर्णतावादिन् *m.*

Plenitude, *s.* पूर्णता, प्राचुर्यं, वैपुल्यं, समृद्धि *f.*, अतिरेकः, उत्सेकः, परा कोटिः-काष्ठा.

Plenty, *s.* बाहुल्यं, प्राचुर्यं, वैपुल्यं, बहुत्वं, समृद्धि *f.*, उद्रेकः, अतिरेकः, उत्सेकः, स्फीति-वृद्धि- *f.* **-Plenteous, Plentiful,** *a.* प्रभूत, प्रचुर, विपुल, बहु, बहुल, भूरि, भूयिष्ठ, पुष्कल, समृद्ध, सं-परि-पूर्ण, उद्रिक्त, स्फीत, उत्सिक्त, उपचित. **-ly,** *adv.* बाहुल्येन, बहुशः, भूयिष्ठं, भूरि, प्रभूतं, विपुलं, अतिरिक्तं. **-ness,** *s.* बाहुल्यं, प्राचुर्यं; *See* (*s.*).

Pleonasm, *s.* अधिकपददोषः; शब्दाधिक्यं, शब्दातिशयः. **-Pleonastic,** *a.* अधिकशब्द, बहुपद.

Plethora, *s.* रक्तपित्तं. **2** बाहुल्यं, प्राचुर्यं, अतिवृद्धि *f.* **-Plethoric,** *a.* रक्तपित्तरोगिन्.

Pleurisy, पार्श्वशूलं.

Plexus, *s.* नाडी-शिरा-जालं.

Pliant, Pliable, *a.* आ-,नम्य, सुखनम्य, मृदु, शिथिल, अदृढ, आयम्य.

Pliers, *s. See* **'Pincers.'**

Plight, *s.* दशा, अवस्था, स्थिति *f.*, भावः, वृत्ति *f.*, गति *f.*; 'sorry p.' दुर्दशा, दुर्गतिः. **2 Pledge.** q. v. **-***v. t.* प्रति-ज्ञा 9 A, न्यस् 4 U; *See* **Pledge. -ed,** *a.* प्रतिज्ञात, न्यस्त; 'p. word' विहितप्रतिज्ञा, संगरः, अभिसंधिः.

Plinth, *s.* स्तंभमूलं-तलं; प्राकारमूलं.

Plod, *v. i.* अविरतं श्रम् 4 P or आयासं कृ 8 U, मंदं मंदं आयस् 1, 4 P. **-der,** *s.* मंदं मंदं निरंतरायासिन् *m.*, नित्योद्योगिन्, *m.* पिपीलिकाधार्मिन् *m.* **-ding,** *s.* अतिमांद्येन निरंतरश्रमः-नित्यायासः.

Plot, *s.* भू-भागः-प्रदेशः, क्षेत्रं, स्थलं-ली, भू-भूमि- *f.* **2** कपटप्रबंधः, कूटप्रबंधः, कपटोपायः, मंत्रणा, कु-संकल्पः-मंत्रणा-कल्पना, कूटोपायः, उपजापः; (generally) उपायः, संकल्पः, प्रयोगः. **3** कथा, वस्तु *n.*; 'arrangement of p.' वस्तुरचना-विन्यासः; 'the p. of which is composed by Kālidāsa' कालिदासग्रथितवस्तु नाटकं (S. 1.) **-***v. i.* कपटप्रबंधान् चिंत् 10 or युज् 10, उपायान् क्लृप् c. or निरूप् 10 or अनुसं-धा 3 U; 'p. against' द्रुह् 4 P (with dat.), अभिद्रुह् (with acc.); 'p. against one's life' जीवितापहरणाय कपटप्रबंधान्रचयंति. **-ter,** *s.* कुमंत्रणाकृत् *m.*, अभिद्रोग्धृ *m*

Plough, *s.* हलं, लांगलं, सी(शी)रः, हालः, गोदारणं; 'body of a p.' निसीशं-षं; कुटकं, फालः, कृषकः; 'pole of a p.' ईषा-शा, (लांगलीषा), लागलदंडः; 'handle of a p.' ईषा-दंडः; 'furrow made by a p.' सीता, लांगलपद्धति *f.*; 'p.-boy' बालकर्षकः; 'p.-gear' हलसज्जा-उपकरणं; 'p.-land' सीत्यं, हल्यं, फालकृष्टं, हल्यक्षेत्रं; 'p.-man' हालिकः, लांगलिन् *m.*, हलिन् *m.* लांगलिकः, सैरिकः, हलधरः-भृत् *m.* कृषकः, कर्षकः; 'p.-share' कुशी, फालः, कृषकः. **-***v. t.* कृष् 1 P, 6 U, भिद् 7 P, विद् 9 P or c., उत्कष् 1 P, (सद्यः सीरोत्कर्षणसुरभि Me. 16). **-***v. i.* हलं वह् c. or चल् c. **-ed,** *a.* कृष्ट, हल्य, सीत्य; 'twice, thrice, p.' द्वि-त्रि-हल्य; 'p. after sowing' बीजाकृत, उप्तकृष्ट. **-er,** *s.* कर्षकः, हालिकः. **-ing,** *s.* कर्षणं, उत्कर्षणं, भूमिदारणं.

Pluck, *v. t.* (Off) लू 9 U, निष्कृष् 1 P; 'crows with feathers p. ed off' लूनपक्षाः काकाः; (out) उत्पट् 10, सं-,उद्ध 1 P, निर्हृ; (hair) लुंच् 1 P, अव-उत्-°, उत्पट् c.; (up) उन्मूल् 10, उत्-खन् 1 P, उच्छिद् 7 P, उत्पट्, उद्धृ, कृष्. **2** (Gather) चि 5 U, अव-सं-°,लू, छिद्, आ-दा 3 A, ग्रह् 9 U. **-***s.* सत्त्वं, वीर्यं, पौरुषं, उत्साहः; *See* **Courage. -ing,** *s.* उत्पाटनं, उद्धरणं, उल्लुंचनं, अव-,चयः.

Plug, *s.* रोधनी, स्तंभनी. **-***v. t.* पि-धा 3 U, स्तंभ् 9 P.

Plum, *a.* कर्कंधूः,-फलं; *See* **Jujube.**

Plumage, *s.* पक्षाः (pl.), पिच्छकलापः, बर्हभारः, पक्षः, पर्णं, पतत्रं, गरुत् *n.*

Plumb, *s.* लंबः,-सूत्रं. **-***a.* लंब, ऋजु, लंबरूप. **-***v. t.* सूत्रेण समायुज् 7 U, 10. **2** वेधं परि-मा 3 A, 2 P. **-er,** *s.* सीसकारः.

Plume, *s.* पक्षः, पर्णं, पिच्छं; *See* **Feather.** **2** शिखा, चूडा, शेखरः. **-***v. t.* पर्णानि रच् 10. **2** पक्षान् निर्हृ 1 P or उत्पट्ट् 10. **3** (Oneself upon) आत्मानं श्लाघ् 1 A, विकत्थ् 1 A; 'p. s himself upon his learning' ज्ञानेन आत्मानं अतीव श्लाघते-विकत्थते, पंडितंमन्यः, पंडितमानी. **-less,** *a.* पक्षहीन. **-ous,-ose, -y, Plumigerous,** *a.* सपक्ष, पक्षवत्, पक्षविशिष्ट.

Plummet, *s.* लंबः, लंबसूत्रं, लंबसीसकं, सीसकसूत्रं.

Plump, *a.* पीन, पीवर, पुष्ट, स्थूल, उच्छून, आप्यान, स्फीत; *See* **Fat.** **-***adv.* अकस्मात्. **-***v. t.* आप्यै c., श्वि c., स्फाय् c. (स्फावयति). **-ly,** *adv.* व्यक्तं, स्पष्टं. **-ness,** *s.* पीनता, पुष्टि *f.*, स्फीति *f.*

Plunder, *v. t.* (धनादि) अप-,हृ 1 P, मुष् 9 P, चुर् 10, वि-,लुंट्-ठ् 1 P, 10. **-***s.* विलुंठनं, लोत्रं, लोप्त्रं, अपहारः, अपहृतं धनं. **-er,** *s.* अपहारकः, विलुंठकः, मोषकः. **-ing,** *s.* अपहारः, अपहरणं, मोषणं.

Plunge, *v. i.* मस्ज् 6 P, नि-अव-°, आप्लु 1 A, गाहू 1 A, वि-अव-°, प्रविश् 6 P. **-***v. t.* Causal of roots above. **-***s.* अवगाहः-हनं, नि-,मज्जनं, आप्लवः, प्रवेशः. **-ed,** *a.* मग्न, अवगाढ, आप्लुत, लीन, प्र-नि-विष्ट.

Plungeon, *s.* प्लवः, प्लाविन् *m.*

Plural, *a.* (Number) बहुवचनं. **2** अनेक, बहु. **-ity,** *s.* बहुत्वं, अनेकता; ex. by 'Many' q. v.

Plus, *s.* धनं; सहित, संकलित in comp.

Pluto, *s.* यमः, कालः, कृतांतः.

Plutocracy, *s.* धनवत्सत्तात्मकं राज्यं. **-Plutocrat,** *s.* धनवत्-सत्तावत् *m.* -शासितृ *m.*

Pluvial, Pluvious, *a.* वृष्टिमत्, प्रचुर-बहु-वृष्टि.

Ply, *v. t.* पत् c., धा 3 U, न्यस् 4 U, प्रयुज् 7 A, 10; पुनः पुनः प्रयुज् or व्यापृ c., सततं व्यापृ c.; 'p. thy work' कार्यव्यापृतो भव, कार्यं निर्वाहय; 'p. thy needle' सूच्या कार्यं प्रवर्तस्व. **2** (प्रयत्नेन) चल् c., संचल्-ल् c. **3** आग्रहेण उप-स्था 1 U, अनुनिर्बंध् 9 P; *See* **Importune;** 'p. with entreaties' अतिप्रार्थनया उद्विज् c. **-***v. i.* अविरतं व्यापृ 6 A or प्रवृत् 1 A or उद्यम् 1 A or चेष्ट् 1 A. **-***s.* पुटः, भंगः; *See* **Fold.**

Pneumatic, *a.* वायुरूप, वायुमय (यी *f.*), वायव (वी *f.*), वायु in comp. **-***s.* (P. s) वायुविद्या-शास्त्रं.

Pneumonia, *s.* क्लोमपाकः.

Poach, *v. t.* ईषत् पच् 1 P. **2** (Game) कूटोपायेन ग्रह् 9 U or अपह् 1 P o चुर् 10. **3** ग्रहणार्थं अनुसृ 1 P or अनुगम् 1 P; *See* **Pursue.** **-er,** *s.* मृगयाचौरः, जांगलचौरः. **-ing,** *s.* मृगया-जांगल-चौर्यं, पक्षिग्रहणं.

Pock, *s. See* **Pimple.** **-mark,** *s.* मसूरिकाक्षतं-चिन्हं.

Pocket, *s.* कोषः, आधारः. **-***v. i.* कोषे नि-धा 3 U, (छलेन) आत्मसात्कृ 8 U. **2** (Insult) सह् 1 A; *See* **Bear.** **-ed,** *a.* कोषगुप्त, कोषांतर्गत, अंतर्हित.

Pod, *s.* बीजकोशः-शुप्ति *f.*, शिंबा, शिंबि-बी *f.*, शिंबिका.

Podagrical, *a.* वातकिन्, वातरोगिन्.

Poet, *s.* कविः, सूरिः; 'a ready p.' शीघ्रकविः. **-ic,-ical,** *a.* Ex. by कविता-काव्य in comp.; 'p. genius' कवित्वशक्तिः. **2** श्लोक-कविता-रूप-बद्ध, पद्यमय (यी *f.*), छंदोबद्ध-रूप, पद्यात्मक; 'p. work' पद्यात्मको ग्रंथः. **-ically,** *adv.* पद्यरूपेण, छंदोरूपेण. **-Poetics,** *s.* काव्यशास्त्रं, पद्यशास्त्रं; साहित्यं. **-Poetry,** *s.* काव्यं, कविता. **2** पद्यं (opp. of prose). **3** काव्यरचना, कवित्वं, कविताविद्या. **-Poetaster,** *s.* कुकविः, कविदेश्यः. **-Poem,** *s.* काव्यं, काव्यप्रबंधः, काव्यबंधः, कविता; 'a p. interspersed with prose' खंडकाव्यं. **-Poesy,** कवित्वं-त्ता. **2** काव्यरचना, कविताशक्ति *f.*

Poignant, *a.* उग्र, तीक्ष्ण, तीव्र, तिग्म, अरुंतुद, मर्मस्पृश्-भिद्. **-Poignancy,** *s.* तीक्ष्णता, तीव्रता.

Point, *s.* अग्रं, अणिः-णी *f.*, धारा, कोटि *f.*, अश्रि *f.*, पालि-ली *f.*; शिखा, शिखरं. **2** (Of land) उदग्रस्थलं, भूनासिका. **3** मर्मन् *n.*, रहस्यं, रसः. **4** दिश्-शा, ककुभ्, आशा, हरित्, काष्ठा, (all *f.*). **5** बिंदुः, चिह्नं, अंकः. **6** आशयः, अभिप्रायः, उद्देशः, अर्थः, लक्ष्यं: **7** पर्यंतः, अंतः; अवधिः, परिमाणं. **8** विषयः, पदं, वस्तु *n.*, अर्थः, स्थानं, स्थलं, आस्पदं, प्रकरणं, प्रस्तावः; 'p. at issue' विवादवस्तु-विषयः. **9** लक्षणं, विशेषचिह्नं, विशेषणं, विशिष्टगुणः. **10** प्रसंगः, कालः, समयः; 'being to the p.' प्रास्ताविक (की *f.*), प्रकृत, प्रस्तुत; 'to such a p.' एतावत्, एतावत्पर्यंतं; 'come to the p.' प्रस्तुतमनुसंधीयतां; 'on the p. of' ex. by उन्मुख (खी *f.*), उद्युक्त, उद्यत, by desid. or by fut. part., आसन्न in comp.; 'on the p. of death' मरणोन्मुख, आसन्नमृत्यु, मुमूर्षु; 'on the p. of departing' निर्गंतुमुद्यत, निर्जिगमिषु; 'on the p. of delivery' प्रसवोन्मुखी, आसन्नप्रसवा; 'gain a p.' अभीष्टं साध् 5 P; 'p. of view' दृष्टि *f.*; *See* under **View.** **-***v.* नि-शो 4 P; तिज् c., तीक्ष्णीकृ 8 U. **2** उद्दिश् 6 P, सं-धा 3 U, लक्षीकृ, अभि-प्रेइ् c.; 'p. ing to it' तद्दिश्य, तदधिकृत्य. **3** (Out) प्र-उप-आ-

दिश् (as a way); (at) अंगुल्या निर्दिश् or आ-ख्या 2 P, (मामंगुलीदलविलासेनाख्यातवत्यः Mal 1); 'p. ing towards the north' उदङ्मुख, उत्तराभिमुख; 'p. blank' स्पष्ट, असंदिग्ध. **-ed,** *a.* नि-,शित, तीक्ष्णाग्र, साग्र, सधार; oft. by सूचि *f.*; 'pricked by the p. Kusa grass' कुशसूचिविद्धे (S. 4); *See* **Sharp.** **2** मार्मिक (की *f.*), अरुंतुद, मर्मस्पृश्-भिद्; सरस, रसिक, रसपूर्ण. **3** निर्दिष्ट, सूचित &c. **-edly,** *adv.* उद्दिश्य, उद्देशपूर्वं, मर्मभेदपूर्वं, स्पष्टं, भिन्नार्थं. **-er,** *s.* निर्-प्र-,देशकः, प्र-,दर्शकः, सूचकः. **2** (Of a dial) प्रदेश(शि)नी. **-ing,** *s.* निर्देशः, सूचनं, अंगुलिनिर्देशः. **-less,** *a.* धाराहीन, अनिशित, अतीक्ष्ण, निरग्र. **2** रसहीन, अरसिक, फल्गु. **3** अप्रकृत, अप्रस्तुत.

Poise, *v. t.* तुल् 10, तुल्यी-समीकृ 8 U, समभारीकृ. **-***s.* भारः, तोलः. **2** भारतुल्यता-साम्यं, समभारता, समतोलः, तुल्यता.

Poison, *s.* विषः-षं, गरलं, क्ष्वेडः, जांगुलं; 'administering p.' विषप्रयोगः-दानं; 'curing p.' विषघ्न (घ्नी *f.*), विषापह, विषहर (री *f.*); 'curer of p.' विषवैद्यः, जांगुलिकः. **-***v. t.* विषेण दिह् 2 U or अंज् 7 P or मिश्र् 10. **2** विषं दा 3 U, विषदानेन हन् 2 P or मृ c. or नश् c.; (oneself) विषं भक्ष् 10 or सेव् 1 A or भुज् 7 A. **3** कलुषीकृ 8 U, दुष् c. (दूषयति). **-ed,** *a.* विषाक्त, विषदिग्ध, विषलिप्त; 'p. arrow' विषाक्तः, दिग्धः, लिप्तकः. **2** विषनाशित. **-er,** *s.* विषघातिन् *m.*, विषदायिन् *m.* **-ous,** *a.* विषमय (यी *f.*), सविष, विषालु, सगर, विषपूर्ण, गरविशिष्ट, विष in comp.

Poke, *v. t.* (Fire) चल् c., उत्तिज् c. **2** तड् 10, आहन् 2 U; प्रह् 1 P. **3** (दंडादिना) परामृश् 6 P, अन्विष् 4 P. **-***v. i.* **Grope,** q. v. **-***s.* ताडनं, प्रहारः, आघातः. **-er,** *s.* उत्तेजनी (शलका); अंगारोत्थापकः.

Pole, *s.* यष्टि *f.*, दंडः, काष्ठं; 'raised on a p.' उद्दंड. **2** (Of a carriage) धुर् *f.*, धुरा; कूबरः, युगंधरः. **3** दंडः. **4** ध्रुवः-वकः; 'p.-axe' परशुः, कुठारः, परश्वधः; 'p.-cat' गंधमार्जारः; 'p.-star' ध्रुवः, उत्तानपादजः, नक्षत्रनेमिः, ज्योतीरथः; ध्रुवतारा. **-Polar,** *a.* ध्रुव in comp.; 'p. longitude' ध्रुवः. **-ity,** *s.* ध्रुवाभिमुखता, ध्रुवाभिसारिता. **-y,** *a.* ध्रुवाभिसारिन्, ध्रुवाभिगामिन्.

Polemics, *s.* वादानुवादः. **-Polemic,-al,** *a.* विवादात्मक, वादानुवादार्थक, वादकुशल. **-***s.* विवादकुशलः, वादानुवादशीलः.

Police, *s.* रक्षापुरुषाः; नगररक्षिणः, नगरपालाः (all pl.), रक्षिगणः-दंडः; 'rural p.' ग्रामरक्षिणः, ग्रामपालाः; 'p.-man', 'p. officer' नगररक्षिन् *m.* नागरिकः, रक्षिन् *m.* राजपुरुषः; 'p. magistrate' दंडाधिकारिन् *m.*

Policy, *s.* नीति *f.*, नयः, नीतिक्रमः-मार्गः. राजनीतिः-नयः, राज्यशासनरीतिः-मार्गः. **2** नीतिचातुर्यं, वैदग्ध्यं, राज्यशासनकौशलं, नीतिज्ञता. **3** युक्ति *f.*, प्रयोगः, उपायः, व्यवहारः, रीतिः; 'prudential p.' समीक्षा, समीक्ष्यकारित्वं; 'bad p.' कुप्रयोगः, कुयुक्तिः. **4** (a written contract) नियमपत्रं, समयलेखः. **-Politic,** *a.* नीतिज्ञ, नीतिविद्-कुशल, नयविद्-ज्ञ, नीतिचतुर-निपुण. **2** व्यवहारकुशल-दक्ष, विचक्षण, कुशल, चतुर, निपुण. **3** सुप्रयुक्त, सुघटित, सुनीत, समीक्ष्यकृत, हित, सु pr. **-al,** *a.* नीति-राज in comp.; 'p. affairs' राजकार्याणि; 'p. science' राजनीतिशास्त्रं; 'p. economy' अर्थशास्त्रं, अर्थविज्ञानं; 'he led a p. life' राजकार्यव्यापृतो जीवितमत्यवाहयत्; 'p. institutions' राज्यतंत्राणि; 'p. rights' राज्यनिर्वाहाधिकाराः. **-ian,** *s.* नीतिज्ञः, नीतिविद् *m.* -कुशलः, नयज्ञः-विद् *m.*, राजनीतिनिपुणः, राजकार्यधुरंधरः. **-Politics,** *s.* नीतिः, नयः, राजनीतिः, राज्यशासनशास्त्रं. **2** राजकार्याणि, राज्यव्यवहाराः. **-Polity,** *s.* राजनीतिः-रीतिः-व्यवस्था, दंडनीतिः; (generally) नीतिः, व्यवस्था, विधिः.

Polish, *v. t.* तिज् c., धाव् 10, निः-तप् c., प्र-,मृज् 2 P or c., परिष्कृ 8 U, श्लक्ष्णीकृ, कांतिं दा 3 U. **2** परिष्कृ, वि-नी 1 P, उपस्कृ 8 U, संस्कृ (lit. also); आदर्शं निघर्षणक्रियया संस्क्रियमाणे (S. B. 72). **-***s.* कांति *f.*, शोभा, तेजस् *n.*, स्निग्धता, श्लक्ष्णता. **2** संस्कारः, परिष्कारः, सभ्यता, शिष्टता, सौजन्यं. **-ed,** *a.* निष्टप्त, परिष्कृत, प्रमृष्ट, निर्धौत, उत्तेजित. **2** शिष्ट, संस्कृत, सभ्य, परिष्कृत, विनीत, अग्राम्य. **-er,** *s.* तेजकः, कांतिदः, मार्जकः, परिष्कारकः; *See* **Furbisher.**

Polite, *a.* दाक्षिण, सौजन्यवत्, सुजन, विनीत, शिष्ट, सभ्य, संस्कृत, सभ्यशील, शिष्टाचार, सुशील, आदरशील, प्रियंवद. **-ly,** *adv.* सौजन्येन, दाक्षिण्येन, सविनयं, शिष्टवत्. **-ness,** *s.* शिष्टता, सभ्यता, सौजन्यं, विनयः, दाक्षिण्यं, सुशीलता **2** शिष्टाचारः, सुशीलवृत्ति *f.*

Poll, *s.* शीर्ष, शिरस् *n.*; *See* **Head.** **2** नामावलि-ली *f.*; नामालिखनं, नामारोपणं. **-***v. t.* (केशान्) लू 9 U, छिद् 7 P, आवप् 1 P. **2** नामानि लिख् 6 P or निविश् c.

Pollard, *s.* लूनाग्रवृक्षः.

Pollen, *s.* रेणुः, परागः, रजस् *n.*, पांशुः, पुष्परजः-परागः.

Pollute, *v. t.* कलंकयति-मलिनयति-कलुषयति-(D.), दुष् c (दूषयति), मलिनी-कलुषी-कृ 8 U, मलेन लिप् 6 P or दिह् 2 U. **2** भ्रंश् c., दुष् c., आधृष् c., सतीत्वं भ्रंश् c.

or नश् c. **-er,** *s.* दूषकः, आधर्षकः. **-ion,** *s.* दूषणं, कलुषीकरणं. **2** मालिन्यं, अमेध्यता, कालुष्यं, मलं, कलंकः, अशौचं. **3 Emission,** q. v.

Poltroon, *s. See* **Coward.**

Polyandry, *s.* अनेकभर्तृकता. **-ist,** *s.* अनेकपतिका, बहुभर्तृका.

Polychrome, *a.* बहुवर्ण.

Polygamy, *s.* अनेकपत्नीकता, बहुभार्यत्वं. **-ist,** *s.* बहु-अनेक-भार्यः. **2** बहुपत्नीवादिन् *m.*

Polygenous, *a.* बहु-विध-प्रकार-जाति.

Polyglot, *a.* बहुभाषामय (यी *f.*).

Polygon, *n.* बहुभुजः, बह्वस्रं. **-al,** *a.* बहुकोण-भुज-अस्र

Polymathy, *s.* बहुशास्त्रज्ञानं.

Polypetalous, *a.* बहु-अनेक-पर्ण.

Polyphonous, *a.* बहुस्वर-स्वन.

Polypus, *s.* अनेकपादः, बहुमूलः.

Polysyllabic, *a.* बह्वक्षर, अनेकाच्. [शाला.

Polytechnic, *s.* बहुकला-बहुव्यवसाय-पाठ-

Polytheist, *s.* अनेकदेववादिन् *m.* **-Polytheism,** *s.* बहुदेववादः.

Pomade, Pomatum, *s. See* **Perfume.**

Pomegranate, *s.* (Fruit) दाडि(लि)-मं, दाडिमफलं; (tree) दाडि(लि)मः, डालिमः, दाडिबः, करकः.

Pommel, *s.* गुल्मः, पिंडः, गंडः. **-***v. t.* तड् 10, प्रह 1 P.

Pomp, *s.* आडंबरः, शोभा, श्रीः, प्रतापः, ऐश्वर्यं, वैभवं. **-ous,** *a.* विभ्राजमान, शोभन, सश्रीक, साडंबर, अतिशोभन, महाप्रताप. **2** दांभिक (की *f.*), साटोप, गर्वित, दर्पाध्मात; (style) सालंकार, अलंकृत. **-ously,** *adv.* साडंबरं, अतिशोभया, अतिप्रतापेन. **2** सदंभं, साटोपं, सगर्वं. **-ousness,** *s.* ऐश्वर्यं, &c. **2** दंभः, आटोपः.

Pond, *s.* तडागः-गं, जलाशयः, कासारः, जलाधारः, पद्माकरः, सरसी, सरस् *n.*; 'deep p.' ह्रदः; ' small p. ' पल्वलः-लं, वेशंतः, अल्पसरः; (for drinking water) आहावः, निपानं.

Ponder, *v.* चिंत् 10, ध्यै 1 P, विचर् c., विमृश् 6 P, मनसा क्लृप् c. or भू c. or विगण् 10; *See* **Meditate.**

Ponderous, *a.* अतिगुरु, भारवत्, अतिभारिन्, सभार. **-ly,** *adv.* अतिभारेण. **-Ponderosity,** *s.* भारवत्त्वं, अतिगुरुता.

Poniard, *s.* कृपाणिका, छुरिका, असिपुत्रिका, असिधेनुका.

Pontage, *s.* सेतुसंधानशुल्कं.

Pontiff, *s.* प्रधानधर्माध्यक्षः, मुख्यपुरोहितः. **-Pontificate,** *s.* धर्माध्यक्षाधिकारः.

Pony, *s.* अश्वशावः, क्षुद्रघोटकः.

Pool, *s.* जलाशयः, जलाधारः, कुंडं, पल्वलं. निपानं; *See* **Pond.**

Poop, *s.* नौपृष्ठं, नौपश्चाद्भागः.

Poor, *a.* दरिद्र, निर्धन, निःस्व, दीन, अधन, अकिंचन, धन-द्रव्य-अर्थ-हीन, अल्प-धन-विभव, दुर्गत, परिक्षीण, क्षीणधन; 'to be p.' दरिद्रा 2 P. **2** दीन, तपस्विन्, वराक (की *f.*), कृपण, अनुकंप्य. **3** कुत्सित, अपकृष्ट, तृणप्राय, तुच्छ, गर्हित, अधम, विगुण; oft. ex. by कु, कद्, दुर्, अप, in comp.; ' p. food ' कदन्नं; *See* **Bad, Mean;** 'p. soil' निर्गुणा-असारा-भूमिः, ईरिणा-रूक्षा-भूमिः; ' p. house ', ' p. asylum ' दरिद्रालयः, अनाथालयः, दरिद्रगृहं; ' p. -spirited ' दीन-कृपण-बुद्धि, कृपण, अल्पसत्त्व, क्षुद्रमति. **-ly,** *adv.* दरिद्रवत्, दीनं, निर्धनवत्; ' p. dressed ' दीनवेषं दधान. **2** निष्फलं, व्यर्थं, सिद्धिं विना. **-ness, Poverty,** *s.* दारिद्र्यं, दैन्यं, निर्धनता, निःस्वता. दुर्गति *f.*, दरिद्रदशा-अवस्था, अकिंचनत्वं; 'reduced to p.' नष्ट or गत-विभव or धन, दुर्गत; *See* (*a.*); 'struck with p.' दारिद्र्योपहत, दारिद्र्यग्रस्त.

Pop, *s.* आकस्मिकध्वनिः-शब्दः. **-***v. i.* अकस्मात् प्रविश् 6 P. **2** सहसा निर्गम् or निःसृ 1 P. **3** सहसा क्वण्-स्वन् 1 P. **-***v. t* Causal of roots above.

Popinjay, *s. See* **Parrot.**

Poppy, *s.* खसतिलः.

Populace, *s.* लोकः, जनः, सामान्य-प्राकृत-जनाः; *See* **People. -Popular,** लोक-जन-प्रिय, सर्वप्रिय. **2** लौकिक (की *f.*) लोक-प्रसिद्ध, लोकरूढ-संमत, जन-लोक in comp.; ' p. scandal ' लोकापवादः; ' seeking p. favor ' लोक-जन-रंजनं; ' p. usage ' रूढि *f.*, जनव्यवहारः, लोकाचारः, लोकमर्यादा-रीति *f.*; 'p. report' जनप्रवादः; लोक or जन-वार्ता or श्रुति *f.*, किंवदंती; ' p. tumult ' प्रकृतिक्षोभः; ' conformity to p opinion ' लोकानुसरणं. **3** सामान्य, साधारण (णी *f.*). **-ity,** *s.* लोकप्रियता, लोक-जन-प्रीति *f.*-अनुरागः संमानः. **-ly,** *adv.* लोके, लौकिकतया, साधारणतः, सामान्यतः, लोकरंजनार्थं. **-Populate,** *v. t.* वस् c., जनैः आकृ 6 P or पूर् 10. **-***v. i.* प्रजां उत्पद् c. प्रजन् 4 A, प्रजावृद्धिं कृ 8 U. **-ion,** *s.* प्रजा, प्रजा-लोक-संख्या, जनाः, लोकाः. **-Populous,** *a.* जनाकीर्ण, जनसंकुल-पूर्ण, बहु or प्रचुर-जन or प्रज, जनसंबाध. **-ness,** *s.* लोक-प्रजा-बाहुल्यं.

Porcelain, *s.* (चीनदेशीय) मार्तिकं, कौलालकं, मृद्भांडानि.

Porch, *s.* प्रघाणः, प्रवणः, अ(आ)लिंदः, द्वारप्रकोष्ठः.

Porcine, *a.* शूकरोपम, शूकरसंबंधिन्.

Porcupine, *s.* शल्यः-ल्यकः, श्वाविध् *m.*; 'quill of a p.' शलं, शललं-ली.

Pore, *s.* रो(लो)मरंध्रं-कूपः. **2** (सूक्ष्म) रंध्रं, कूपः. **-***v. i.* अनन्यदृष्ट्या-साभिनिवेशं-अधी 2 A or वच् c. **-ous,** *a.* बहुरंध्र, रंध्रबहुल, रंध्रपूर्ण-विशिष्ट, सरंध्र. **2** रोमकूपमय (यी *f.*), स्वेदमार्गविशिष्ट, विरलावयवक. **-ousness, Porosity,** *s.* रंध्रबाहुल्यं, रंध्रविशिष्टता.

Pork, *s.* शूकर-वराह-मांसं. **-er,** *s.* शूकरः, वराहः.

Porpoise, *s.* शिशुकः, शिशुमारः, उलूपिन् *m.*

Porridge, *s.* यूषं, जूषं.

Porringer, *s.* यूषपात्रं-भाजनं.

Port, *s.* नौकाशयः, नौकाश्रयः, उत्तरणस्थानं, आश्रयः, रक्षणस्थानं, आशयः; 'arrived at the wished-for p.' इष्टदेशं जगाम. **2** द्वारं; *See* **Door.** **-able,** *a.* वहनीय, लघुभार, सुवाह्य, लघु, सुखवाह्य, हस्तवाह्य. **-er,** *s.* द्वाःस्थः, द्वारपालः, प्रतीहारः, दौवारिकः. **2** भारवाहः, भारहरः, वोढृ *m.*, भारिकः. **-erage,** *s.* भारवहनं. **2** वहनमूल्यं. **-Portal,** *s.* द्वारं, मुखं, प्रवेशद्वारं; *See* **Door.**

Portend, *v. t.* अग्रे (अनिष्टं) सूच् 10 or निविद् c. or शंस् 1 P. **-Portent,** *s.* उत्पातः, दुर्निमित्तं, अशुभलक्षणं, अजन्यं, उपसर्गः, दुर्लक्षणं, दुश्चिह्नं, अपशकुनं, कुलक्षणं, अत्याहितं, उपप्लवः, अरिष्टं, अद्भुतं. **2** पूर्व-चिह्नं-लक्षणं. **-ous,** *a.* उत्पात-अनिष्ट-अशुभ-शंसिन्, अद्भुत; अत्याहित, औपसर्गिक-औत्पातिक-(की *f.*). **-ously,** *adv.* सोत्पातं, दुर्लक्षणपूर्वं.

Portfolio, *s.* पत्राधारः.

Porthole, *s.* नौपार्श्वमुखं.

Portico, *s.* *See* **Porch.**

Portion, *s.* अंशः, वि-,भागः, खंडः-डं, छेदः, शकलः-लं. **2** अंशः, वंटः, उद्धारः, वि-,भागः; 'p. of an estate' दायः, रिक्थभागः, उद्धारः; 'wife's p.' स्त्रीधनं, यौतकं, औद्वाहिकं. **-***v. t.* विभज् 1 U, वंट् 10, विभागशः कल्प् c. **2** शुल्कं-वृत्तिं दा 3 U. **-ing,** *s.* विभागः, भागकल्पनं, वंटनं. **-less,** *a.* अनंश, अंशहीन.

Portly, *a.* गौरवगति-वृत्ति, उदात्त, धीर, धीरदर्शन, गंभीराकृति. **2** स्थूल, बृहत्, स्थूलकाय, पृथूदर, पीन, पीवर **-iness,** *s.* स्थूलकायत्वं, शरीरगौरवं.

Portmanteau, *s.* चर्ममंजूषा-पेटकः.

Portray, *v. t.* आ-,लिख् 6 U, चित्र् 10, वर्ण् 10. **2** उप-,वर्ण्, कृत् 10. **-Portrait,** *s.* चित्रं, आलेख्यं, प्रतिकृति *f.*, प्रतिमा; *See* **Picture;** 'p.-painter' चित्रक(का)रः.

Pose, *v. t.* स्तंभ् 9 P, मुह् c., निरुत्तरीकृ 8 U, कुंठ् 10.

Posit, *v. t.* प्रतिज्ञा 9 A, उपन्यस् 4 P.

Position, *s.* प्रतिज्ञा, उक्ति *f.*, हेतुः, पक्षः, उपन्यासः; 'wrong p.' पक्षाभासः, हेत्वाभासः. **2** स्थिति *f.*, स्थानं, पदं, आस्पदं, पदवि-वी *f.* **3** प्रतिष्ठा, गौरवं. **4** अवस्था, दशा, आकारः, संस्थानं, भावः, वृत्ति *f.*; 'attain the p. of' पदं या 2 P, (यांत्येवं गृहिणीपदं युवतयः S. 4); 'holding the p. of mistress of the house' गृहिणीपदभाक्, गृहिणीपदे स्थिता; 'give the p. of' पदं ग्रह् c., भावं गम् c., (महिषीपदं ग्राहिता, देवीभावं गमिता); 'p. in life' स्थितिः, निसर्गजातिः, अवस्थानं.

Positive, *a.* स्पष्ट, असंदिग्ध, अगूढ, प्रत्यक्ष, व्यक्त, अवक्र, परिस्फुट, साक्षात् *ind.*; 'reply in the p.' भवतु-बाढं-तथा-इति वद् 1 P. **2** अवश्यक, अवैकल्पिक (की *f.*), अविशंक्य; *See* **Peremptory.** **3** सु-,नियत, निश्चित, निर्णीत, निर्दिष्ट. **4** सत्य, तथ्य, यथार्थ, वास्तविक-तात्त्विक-(की *f.*). **5** विविक्त, केवल, अनन्यसंबद्ध. **6** दृढ-कृत-निश्चय, दृढमति-संकल्प, निर्विकल्प, निःसंदेह; मताभिमानिन्, स्वमताग्रहिन्, दृढोक्ति; 'a p. quantity' धनं (opposed to ऋणं, क्षयः, व्ययः, हानिः). **-ly,** *adv.* स्पष्टं, व्यक्तं, असंदिग्धं, साक्षात्. **2** अवश्यं, निर्विकल्पं, अविचार्यं. **3** सुनिश्चितं, नियतं, नूनं, खलु. **4** वस्तुतः, तत्त्वतः, परमार्थतः, सत्यं, यथार्थतः. **5** सुनिश्चयेन, दृढनिश्चयपूर्वं. **6** मताग्रहेण, मताभिमानेन, दृढोक्त्या. **-ness,** *s.* स्पष्टता, असंदिग्धता, दृढनिश्चयः-निर्णयः, तथ्यता, याथार्थ्यं, मताग्रहः, दृढोक्ति *f.*, &c.

Possess, *v. t.* धृ 1 P, 10, धा 3 U, भृ 3 U. **2** भुज् 7 U, अधि-ष्ठा 1 P, अध्यास् 2 A, सेव् 1 A; better by वत्, मत्, इन् &c.; *See* below. **3** आप् 5 P, लभ् 1 A, अधिगम् 1 P; *See* **Get.** **4** अधिकृ 8 U, प्रभू 1 P, अधि-ष्ठा, पदं कृ. **5** आविश् 6 P, आक्रम् 1 U, 4 P, उपसृज् 6 P, बाध् 1 A, उपहन् 2 P, ग्रस् 1 A, व्याप् 5 P, oft. ex. by 'p. ed.' **-ed,** *a.* धृत, भुक्त, अधिष्ठित, अध्यासित, अधीन, हस्तगत. **2** प्राप्त, लब्ध, अधिगत. **3** आविष्ट, आक्रांत, उपसृष्ट, ग्रस्त, उपहत. **4** (By spirits) भूताविष्ट, भूतोपसृष्ट, वेतालोपहत, भूतग्रस्त. **5** (Having) युक्त, युत, उपेत, संपन्न, उपपन्न, अन्वित, सनाथ, शालिन् in comp.; by वत्, मत्, इन्, विन् affixed, or by Bah. comp. **-ion,** *s.* भोगः, भुक्ति *f.*, अधिकारः, आवेशः, आक्रमः-मणं, आत्मसात्करणं; 'to take p. of' आक्रम्, आविश्, स्वायत्तीकृ, आत्मसात्कृ; पदं कृ or वि-धा; *See* **Enter;** 'to put in p.' अधिकृ c., अधिकारं दा, नियुज् 7 A, 10; 'being in one's p.' स्वाधीन, हस्तगत, वशवर्तिन्. **2** संपन्नता, युक्तत्वं, सना-

थता; वत्त्वं, शालिता in comp.; 'p. of wealth' धनवत्त्वं, सधनता. 3 आवेशः, उपसर्गः, बाधा, पीडा; भूतावेशः, भूतपीडा-बाधा-संचारः. 4 द्रव्यं, स्वं वस्तु, स्वाधीनं द्रव्यं, (p.s) द्रव्यजातं, वस्तुजातं, द्रव्याणि, वस्तूनि; वित्तं, विभवः, द्रविणं; अर्थः, क्षेत्रादि, भूमि *f.*, (landed). **-ive,** *a.* संबंध in comp.; 'p. case' षष्ठी. **-or,** *s.* भोक्तृ *m.*, भोगिन् *m.*, स्वामिन् *m.*, अधिकारिन् *m.*, शाली-धारी-in comp.

Possible, *a.* शक्य, साध्य, संभाव्य; gen. ex. by pot. pass. part.; 'not p. to be united' दुःसंधेय; 'p. to be done' करणीय, संपाद्य, साध्य; oft. by शक् pass.; 'to be p.' संभू 1 P, (सर्वं सौदामिन्यां संभाव्यते Mal. 1), उपपद् 4 A, घट् 1 A; उभयथापि घटते (V. 3) 'it is p. in both ways' (both sides are p.); 'as far as p.' यावच्छक्यं, यथाशक्ति. **-Possibility,** *s.* संभवः, शक्यता, संभाव्यता, उपपत्ति *f.*, घटना, संगति *f.* **Possibly,** *adv.* Ex. by शक्यं or शक् pass. 2 कदाचित्, कदापि, नाम, by pot. mood; *See* **Perhaps.** 3 (In questions) इव, नाम, वा; 'who p. that is dead, is not born again' मृतः को वा न जायते (P. I. 1).

Post, *s.* स्तंभः, स्थाणुः, स्थूणा, उपस्तंभः; 'p. for securing an elephant' आलानं, बंधस्तंभः; 'p. for tethering cattle' शिवकः, कीलकः, मेधिः-थिः, खलेदारु *n.* 2 पदं, अधिकारः, नियोगः, अधिकारपदं. 3 स्थानं, स्थलं, आस्पदं, अवस्थानं, स्थिति *f.*, पदवी. 4 गुल्म-सैन्य-स्थानं. 5 पत्रवाहः, पत्रवाहनसाधनं; 'p.-boy' जवाश्वपालः; 'p.-chaise' जवरथः-वाहनं; 'p.-haste' सवेगं, अतिजवेन, जवाश्ववत्; 'p.-horse' जवाश्वः, जवतुरगः; 'p.-man' पत्र or लेख-वाहः or हारः; 'p.-master' पत्रस्थानाधिकारिन् *m.*, पत्रवाहाध्यक्षः; 'p. office' पत्रस्थानं-गृहं. **-v. t.** स्था c. (स्थापयति), सं-प्रति-°, नियुज् 7 A, 10. 2 स्तंभे बंध् 9 P. 3 पत्रस्थाने निविश् c. or क्षिप् 6 P. 4 प्रकाश् c., आ-संज् c. **-v. i.** जवेन गम् or व्रज् 1 P; 'p. up' अवबुध् c.; 'p. off' व्याक्षिप् 6 P, विलंब् c. **-age,** *s.* पत्रवाहनमूल्यं. **-er,** *s.* जवनः, जवः, जवाश्वः, प्रजविन् *m.* **-Postilion,** *s.* जवाश्वारूढः.

Post-date, *v. t.* पश्चात् तिथिं लिख् 6 P.

Post-diluvian, *a.* प्रलयोत्तरकालीन.

Posterior *a.* पश्चात्-उत्तर-कालीन, उत्तर, अपर, अवर, अर्वाच्. **-ity,** *s.* परता, उत्तरता. **-ly,** *adv.* पश्चात्, उत्तरं-रतः, परतः, परस्तात्. **-Posteriors,** *s.* नितंबः; गुदप्रदेशः.

Posterity, *s.* संतति *f.*, अपत्यं, संतानः, वंशः, प्रजा, पुत्रपौत्रादयः.

Postern, *s.* पक्षद्वारं, पक्षकः.

Posthumous, *a.* मरणादनंतरं प्रकाशित, मृत्यूत्तरजात.

Post-meridian, *a.* अपराह्णतन (नी *f.*), पराह्णकालिक (की *f.*).

Post-mortem, *a.* मरणोत्तर, मृत्यूत्तर.

Post-natal, *a.* जन्मोत्तर.

Post-nuptial, *a.* विवाहोत्तर, विवाहोर्ध्व.

Postpone, *v.t.* व्याक्षिप् 6 P. विलंब् c., (नियतकालं यावत्) त्यज् 1 P, विसृज् 6 P. **-ment,** *s.* व्याक्षेपः, विलंबः.

Post-script, *s.* अनुलेखः.

Postulate, *s.* स्वीकृतपक्षः, गृहीतपदं, परिग्रहः. **-v. t.** परिग्रह् 9 P, स्वीकृ 8 U.

Posture, *s.* सं-,स्थिति *f.*, संस्थानं, संस्था, अंगविन्यासः-स्थितिः; आसनं, बंधः; वीरासनं, कमलबंधः &c.; 'in a sitting p.' आसीन, उपविष्ट. 2 **Condition,** q. v.

Posy, *s.* कुसुमस्तबकः, पुष्पगुच्छः. 2 अंगुलीयकलेखः.

Pot, *s.* घटः, कलसः-शः, कुंभः, पात्रं, भाजनं, भांडं; 'cooking-p.' स्थाली, उखा, पिष्टपचनं, ऋजीषं, पिठरः; 'p.-bellied' तुंदिल, लंबोदर, पिचिंडिल, तुंदिन्; 'p.-belly' पिचिंडः, लंबोदरं; 'p.-companion' पानमित्रं-सुहृद्, सहपायिन् *m.* 'p.-house' शुंडा, पानं; 'p.-sherd' घटशकलं, भिन्नपात्रं. **-ter,** *s.* कुंभकारः, कुलालः, घटकारः, चक्रिन् *m.* **-tery,** *s.* कुंभ-घट-स्थानं. 2 कौलालकं, मार्तिकं, मृद्भांडानि.

Potable, *a.* पेय, पानीय, पानार्ह.

Potash, *s.* सर्जिका, क्षारः; *See* **Natron.**

Potation, *s.* पानं, सपीति *f.*, तुल्यपानं.

Potato, *s.* गोलालुः.

Potent, *a.* प्रबल, सप्रभाव, वीर्यवत्, सप्रताप, शक्तिमत्, प्रभविष्णु; *See* **Strong. -ate,** *s.* अधिपतिः, नरेश्वरः, प्रभुः; *See* **King. -ly,** *adv.* प्रबलं, सप्रतापं, बलवत्.

Potential, *a.* शक्य, उपपन्न, संभवनीय; (mood) विधिलिङ् **-ity,** *s.* शक्यता, संभाव्यता.

Pother, *See* **Bustle, Perplex.**

Potherb *s,* शाकः, हरितकं, शिग्रुः.

Potion, *s.* अगदः, पानं, पेयौषधं.

Pottage, *s.* जूषं.

Potulent, *a.* आमत्त. 2 पानयोग्य.

Pouch, *s.* स्यूतः, प्रसेवः, कोशः-षः. 2 लंबोदरं. 3 पेशि-शी, *f.*, उपजठरं. **-v. t.** कोशे निविश् c. or नि-धा 3 U.

Poulterer, *s.* वैतांसिकः, शौनिकः, पक्षिविक्रयिन् *m.*

Poultice, *s.* उपनाहः, प्र-,लेपः. **-v.t.** उपनाहं दा 3 U.

Poultry, *s.* गृहपक्षिणः; 'p.-yard' कुक्कुटादिस्थानं.

Pounce, *v. i.* अवपत्य ग्रह् 9 U, सहसा अवपत् 1 P or अवस्कंद् 1 P or आक्रम् 1 U, 4 P. *-s.* नखः, नखरः. **2** मसीशोषणचूर्ण.

Pound, *s.* (For cattle) अवरोधः, अवरोधस्थानं, व्रजः, गोष्ठं. *-v. t.* सं-, चूर्ण् 10, मृद् 9 P, पिष् 7 P, क्षुद् 7 P, खंड् 10; ' p. to dust ' चूर्णशःकृ, चूर्णपेषंपिष्, चूर्णीकृ 8 U. **2**(व्रजे) नि-अव-रुध् 7 U, or बंध् 9 P. **3** तड् 10, तुद् 6 P, प्रह् 1 P. **-age,** *s.* शुल्कं, राजस्वं. **-er,** *s.* पेष्टृ *m.*, पेषणः. **2** मुसलः-लं, अयोग्रं, मुद्गरः. **-ing.** *s.* चूर्णनं, पेषणं, मर्दनं, खंडनं.

Pour, *v. t.* पत् c., नि-,सिच् 6 P, प्र-,सु c.; ' p. water in ' जलेन पृ 3, ५ U, सिच्. **2** (Out, forth) प्र-निर्-मुच् 6 P, उत्-वि-मुच् 6 P, अवपत् c., अवतृ c., निःसृ c., उत्क्षिप् 6 P, उद्-गृ 6 P, उदीर् c., उद्वम् 1 P, वृष् 1 P, प्र-वि-कृ 6 P; निर्वृष्, निर्गल् c.; ' which has p.ed out its watery contents ' :निर्गलितांबुगर्भः, पानीयरिक्तोदरः (घनः); ' p. out the water from the pot ' पात्रं जलरिक्तं कुरु; ' p. ed forth arrows' शरवृष्टिं मुमोच; ' p. one's soul to another ' अन्यस्मै स्वमनोगतं सर्वात्मना निविद् c. *-v. i.* सु 1 P, प्र-परि-°, प्र-,स्यंद् 1 A, श्चद्यत् 1 A, जलं सु c. or प्रवह् 1 P. **2** वृष्, निर्गल् 1 P. **3** निःसृ 1 P, निर्गम् 1 P, निः-सु ' rain p. ed down in torrents ' धारासारैर्महती वृष्टिर्बभूव (H. 3); ' p. in upon ' समापत् 1 P, अभिद्रु 1 P, बहुशः आपत् or आक्रम् 1 U, 4 P. **-er,** *s.* स्रावकः, सेचकः, सेक्तृ *m.* **-ing,** *s.* सेकः, स्रावः, स्रवः, श्चद्योतः

Pout, *v. i.* (क्रोधात्) ओष्ठौ प्रसृ c. or दृश् c. **2** उन्नत-उच्छ्रित-*a.* भू 1 P. *-s.* क्रोधावेशः.

Poverty, *See* under **Poor.**

Powder, *s.* चूर्णं, पिष्टं, क्षोदः; ' gun-p. ' आग्नेयचूर्णं; ' perfumed p.' वासयोगः, पिष्टातःतकः, पटवासकः. *-v. t.* ' to reduce to p. ' चूर्ण् 10, क्षुद् 7 P, चूर्णीकृ, पिष् 7 P; *See* **Poond, 2** चूर्णेन लिप् 6 P, or भू c. or मिश्र् 10. **-y,** *a.* पांशुल, चूर्णवत्, चूर्णमय (यी *f*), सचूर्ण, सक्षोद.

Power, *s.* शक्ति *f.*, सामर्थ्यं, बलं, प्रभावः, वीर्यं, ऊर्जः, सहस्-ओजस्-*n.*, विभवः (वाग्विभवः); (martial) तेजस् *n.*, वि-पराक्रमः, शौर्यं. **2** (Ability) शक्तिः, क्षमता, धीशक्तिः; ' p. of thinking ' विचारणाशक्तिः; 'according to one's p. ' यथाशक्ति-बलं, यावच्छक्यं. **3** (Influence) प्रभुत्वं, प्रभावः, वशः-शं, बलं, गौरवं, अधिकारः; आधिपत्यं, ईशत्वं, सत्ता, ऐश्वर्यं, अधीनता. **4** अधिपः-पतिः, अधीशः, प्रभुः. **5** (Legal) अधिकारः, or by अर्ह् 1 P. **6** अधिकारिजनः, अधिकृतः. **7** घातः. **8** सेना, बलं, पृतना; ' have or exercise p. over प्रभू 1 P, ईश् 2 A (with gen.), वशीकृ आयत्तीकृ, आत्मवशं नी 1 P; in (under) the p. of' वश, अधीन, आयत्त, तंत्र in comp.; ' fallen into another's p.' पर हस्तगत; ' to be in one's p.' ex. by शक् 5 P or by (*s.*). **-ful,** *a.* बल-सामर्थ्य-वत्, शक्त, बलिन् सबल, प्रबल, ऊर्जस्वल, ओजस्विन्, शक्तिमत्, ऊर्जितसत्त्व बलाढ्य, सप्रभाव, प्रभविष्णु. **2** शूर, वीर, विक्रांत, तेजस्विन्, महाप्रताप, प्रतापवत्, धामवत्, उरुविक्रम. **3** (Medicine) वीर्यवत्, अमोघ, गुणावह, प्रबल, अलंतम. **4** दृढ, प्रतीतिकारिन्, प्रबल. **-fully,** *adv.* बलवत् प्रबलं, सप्रभावं, अत्यंतं. **-fulness,** *s.* प्राबल्यं, शक्तत्वं. **-less,** *a.* निर्बल, शक्तिहीन, अशक्त, अबल, निष्प्रभाव, असमर्थ, अक्षम **-lessness,** *s.* अशक्ति *f.*, असामर्थ्यं.

Pox, *s.* **Small-pox,** q. v. **2** उपदंशः.

Practice, *s.* प्र-आ-चारः, संप्रदायः, व्यवहारः. रीति *f.*, मार्गः, पद्धति *f.*, क्रमः, वृत्तिः *f.* **2** अभ्यासः, क्रिया-प्रबंधः-सातत्यं, नित्यवृत्तिः-चर्या-अनुष्ठानं,अनुशीलनं, निरंतरप्रवृत्तिः, आवृत्तिः;'does not require p.'नाभ्यासक्रममीक्षते. **3** क्रिया, आचारः, आचरणं, कर्मन् *n.* कृति *f.*, व्यापारः, व्यवसायः; करणं, विधानं, अनुष्ठानं; (execution) प्रवृत्तिः, प्रचारः-व्यवहारः; ' bring or put into p. प्रवृत् c., व्यवह् c.; ' has long been in p चिरप्रवृत्त. **4** (Opp. of theory) प्रयोगः. **5** छलं, व्याजः, कैतवं; *See* **Fraud;** 'ancient p.' वृद्धाचारः, वृद्धपरंपरा; ' family p. कुलसंप्रदायः, कुलधर्मः, कुलाचारः; ' local p. ' देशाचारः; ' good p. ' सदाचारः; 'following good p. s' सदाचार, सद्वृत्ति, सद्वृत्त; साधुवृत्त;'bad p.'दुराचारः, कुमार्गः, दुर्वृत्तिः; ' following bad p. s' दुर्वृत्त, दुराचार; ' p. of medicine ' वैद्यक्रिया-उपचारः, चिकित्सा, भेषजप्रयोगः, उपक्रमः; ' p. of arms ' शस्त्राभ्यासः, शस्त्रचर्या; ' p. of law ' व्यवहारः, व्यवहाराभ्यासः; ' p. in archery ' शराभ्यासः, उपासनं. **-Practise,** *v. t.* अभ्यस् 4 U, नित्यं कृ 8 U, &c. **2** आचर् 1 P, अनु-ष्ठा 1 P, कृ, वि-धा 3 U, आ-स्था 1 U. **3** प्र-उप-युज् 7 A, 10, प्रवृत् c., व्यवह् c., सेव् 1A, आश्रि 1 U, आ-अवलंब् 1 A: 'what profession do you p कां वृत्तिमुपजीवत्यार्यः (Mr. 2). *-v.* शाठ्येन आचर् or व्यवह् 1 P, छलं-कपटं-कृ. **-ed,** *a.* अभ्यस्त, आचरित, अनुष्ठित, कृत, सेवित, &c. **2** अभिज्ञ, परिचयवत्, बहुदृष्ट व्यवहारज्ञ, दृष्टकर्मन्, पक्वबुद्धि, ज्ञानवृद्ध, जाताभ्यास; also ex.by(*s.*).**-ing,** *a.* अभ्या-

सिन्, सेविन्, शालिन्, in comp.; आस्थित, आश्रित. **-Practicable,** *a.* करणीय, कर्तुं शक्य, साध्य, संभाव्य, शक्य, सुकर, सुखसाध्य,उपपाद्य. **-Practical,** *a.* अभ्यासिक-व्यवहारिक-(की *f.*), अभ्याससिद्ध-प्राप्त, आचार-व्यवहार in comp.; 'p. knowledge व्यवहारज्ञानं, लौकिकज्ञानं. **2** अभ्यासक्षम, व्यवहार्य, प्रयोज्य, प्रवर्तनीय, व्यवहारोचित; 'a p. scheme' व्यवहारोचित उपायः; 'he is a p. teacher' स शिक्षणप्रयोगनिपुणः. **3** व्यवहारज्ञ, दृष्टकर्मन्, अभिज्ञ; *See* **Practised.** **-ly,** *adv.* कार्यतः, अर्थतः, वस्तुतः, परमार्थतः, व्यवहारतः, फलापेक्षया. **2** अभ्यासेन, व्यवहारेण. **Practitioner,** *s.* सेविन्, व्यवसायिन् *m.* व्यापारिन् *m.* वृत्ति, आजीव in comp. **2** वैद्यः, वैद्यवृत्तिः, चिकित्सकः **3** व्यवहारज्ञः, व्यवहारदर्शिन् *m.*-निपुणः.

Pragmatic,-al, *a.* परकार्यचर्चक, अनधिकारव्यापारिन्; *See* **Meddle,** &c.

Praise, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, ईड् 2 A, नु 2 P, स्तु 2 U, वर्ण् 10, गै 1 P, कृत् 10, वि-प्र-° ख्या 2 P or c. (ख्यापयति), पन् 1 P, नू 6 P. **-***s.* प्र-,शंसा, श्लाघा, स्तुति *f.*, स्तवः, वर्णनं-ना, कीर्तनं, नुति *f.*, ईडा, स्तोत्रं. **-er,** *s.* प्रशंसकः, स्तावकः, वर्णकः, वंदारुः. **-Praiseworthy,** *a.* प्रशस्य, प्रशंसार्ह, श्लाघ्य, स्तुत्य.

Prance, *v. i.* प्लु 1 A, वल्ग् 1 P, नृत् 4 P. **-ing,** *s.* प्लुतं, वल्गितं, प्लवनं.

Prank, *s.* क्रीडा, चेष्टा, चापलं, ललिा, छंदःदस् *n.*: 'idle p.' वानर or मर्कट-चेष्टा or क्रीडा;'mischievous p.' कु-दुः-चेष्टितं. **-***v.t.* दंभार्थं भूष् 10 or अलंकृ 8 U. **-ish,** *a.* कुचेष्ट, चपल, क्रीडाशील.

Prate, Prattle, *v. i.* प्र-,लप् 1 P, प्र-,जल्प् 1 P, अनर्थकं वद् 1 P or भाष् 1 A. **-er,** *s.* वाचाटः, वाचालः, जल्प (ल्पा)कः, वावदूकः, बहुभाषिन् *m.* **-ing,** *s,* प्रलापः, प्रलपितं, प्र-, जल्पः-ल्पितं-ल्पनं; बालालापः, बालभाषणं-प्रलापः.

Pravity, *s.* भ्रष्टता, विक्रिया, विकारः.

Pray, *v.* (A deity) स्तु 2 U, प्र-अभि-सं-°, नमस्यति (D.), अभिवद् c., आराध् c., प्रणम् 1 P; (मनसा) पूज् 10, उपास् 2 A, ध्यै 1 P, चिंत् 10. **2** आशंस् 1 A. **3** याच् 1 A, प्र-अभि-अर्थ् 10 A; वि-ज्ञा c. (ज्ञापयति), gen. ex. by अर्ह् 1 P with inf.: *See* **Please;** 'I p. you tell me' मह्यं कथयितुमर्हति भवान्. **4** (Lowly) जप् 1 P. **-er,** *s.* स्तवः, स्तोत्रं, प्रार्थना-नं, नमस्या, उपासना, पूजा; (mental) ध्यानं, आवाहनं; (low) जपः, स्वाध्यायः. **2** याच्ञा, प्रार्थना, अभ्यर्थना, विज्ञप्ति *f.*, विज्ञापना. **-ful,** *a.* प्रार्थनाशील, भजनपरायण.

Preach, *v. t.* उदीर् c., उद्-घुष् 10, उच्चर् c, प्र ख्या c. (ख्यापयति), प्रकाश् c., प्रवद् 1 P, कृत् 10. **-***v. i.* धर्मं प्रवच् 2 P or शास् 2 P or उपदिश् 6 P. **-er,** *s.* उपदेशकः, प्रवक्तृ *m.*, प्रचारकः, धर्मशासकः, धर्मोपदेशिन् *m.* **2** घोषकः, प्रख्यापकः. **-ing,** *s.* वि-,घोषणं-णा, प्रख्यापनं, धर्मोपदेशः, धर्मशासनं, प्रवचनं, उपदेशः.

Preamble, *s.* उपोद्घातः; *See* **Introduction.**

Prebend, *s.* *See* **Canon.**

Precarious, *a.* संदिग्ध, अनिश्चित, अनिर्णीत, अनियत, अस्थिर, अध्रुव. **2** पराधीन, परायत्त, अस्वतंत्र; *See* **Doubtful, Dangerous.** **-ly,** *adv.* संदिग्धं, अनियतं. **-ness,** *s.* अनियतत्वं, अन्याधीनता.

Precative, Precatory, *a.* याचक, प्रार्थनात्मक; 'p. mood' आशीर्लिङ्.

Precaution, *s.* पूर्वोपायः, निवारणोपायः, पूर्व-समीक्षा-चिंता, पूर्वावधानं, पूर्वप्रबोधः; 'take p. s' पूर्वमेव उपायं समीक्ष् 1 A or चिंत् 10; 'hence I give you this p.' अतस्त्वामेवं प्रबोधयामि. **-ary,** *a.* पूर्वोपायरूप; by (*s.*).

Precede, *v. t.* पूर्वं-अग्रे-पुरतः गम्-सृ-चर् 1 P- or इ-या 2 P or वृत् 1 A or स्था 1 P; oft. ex. by पूर्वं, प्राक्, प्रथमं, ततः, अनंतरं; 'the flower p. s the fruit' उदेति पूर्वं कुसुमं ततः फलं, so घनोदयः प्राक् तदनंतरं पयः (S. 7.); 'visarga p. ed by अ' अपूर्वः विसर्गः; many kings p. ed Rāma' रामात् पूर्वं बहवो नृपाः समजायंत. **2** (In rank) अग्रपदे वृत्, अग्रमानं अर्ह् 1 P. **-ence,** *s.* अग्रगमनं, पुरःसरणं. **2** अग्र-श्रेष्ठपदं, पुरस्कारः, उत्कर्षः, प्राधान्यं, अग्रत्वं, अग्रणीत्वं, आग्रमानः-पूजा, मुखरता, श्रेष्ठत्वं, प्राथम्यं. **-ent,** *s.* (पूर्व) निदर्शनं, उदाहरणं, आदर्शः, प्रतिमा, प्रमाणं, दृष्टांतः; 'having no p. अप्रतिम. **-***a.*, **-ing,** *a.* पूर्व-अग्रगामिन्, अग्रग, पूर्वग, पूर्व, अग्र, प्रथम, अग्रे-पुरः-सर. **-ented,** *a.* भूत-दृष्ट-पूर्व, दृष्टप्रतिम; 'un.-p.' अप्रतिरूप, निरुपम अतुल.

Precentor, *s.* मुख्यगायकः, गायकाग्रणीः.

Precept, *s.* नियोगः, आ-नि-देशः, अनु-, शासनं, अनुज्ञा, विधिः, नियमः, प्र-,चोदनं-ना, कल्पः, आज्ञा, स्थिति *f.*, मर्यादा. **2** वचनं, उपदेशः; 'moral p. s' नीतिवचनानि; 'religious p.' धर्मानुज्ञा, धर्मशासनं; 'example is better than p. शासनात् करणं श्रेयः, वाचः कर्मातिरिच्यते **-ial, -ive,** *a.* वैधिक-नैयमिक-(की *f.*), विधिरूप, (*s.*) in comp. **-or,** *s.* गुरुः, शिक्षकः, उपदेशकः, आचार्यः, अध्यापकः, उपाध्यायः.

Precession, *s.* अग्रगति *f.*, 'p. of the equinoxes' अयनचलनं, क्रांतिपातगति *f.*

Precinct, *s.* सीमा, पर्यंतः, मर्यादा, अवधिः, परिसरः उपांतं, उपकंठं, समंतदेशः.

Precious, *a.* महार्ह-र्घ, महा-बहु-मूल्य, अनर्घ्य, अमूल्य, उत्कृष्ट, बहुमत, गुरु, परम; 'p. stone' उपलरत्नं, अमूल्यरत्नं, रत्नं, मणिः. **-ness,** *s.* महार्घता, बहुमूल्यं.

Precipice, *s.* प्रपातः, भृगुः, अतटः. **-Precipitous,** *a.* पातुक, विषम, प्रवण, अवसर्पिन्. **2 Rash,** q. v.

Precipitate, (**Precipitant,**) *a.* अवाङ्मुख (खी *f.*), अधोमुख, अवाक्शिरस्. **2** असमीक्ष्य-क्षिप्र-अविमृश्य-कारिन्, साहसिन्, साहसिक (की *f.*); (act) सरभस, अविमृष्ट, अतिक्षिप्र, साहस in comp. **-***v. t.* रभसा अधः क्षिप् 6 P or पत् c. **2** सरभसं प्रवृत् c. or प्रोत्सह् c., त्वर् c. (त्वरयति). **-***v. i.* अव-अधः-पत् 1 P, नि-सद् 1 P. **2** (Fig.) अविचार्य-सरभसं-व्यापृ 6 A or c. **-ly,** *adv.* अवाक्, अवाक्शिरसा, अधोमुखेन. **2** अविमृश्य, असमीक्ष्य, सहसा, साहसेन, अतिक्षिप्रं, सरभसं. **-ion,-ness,** *s.* अधःपातनं-क्षेपणं, अवपातनं. **2** साहसं, साहसिकता, क्षिप्रकारिता, असमीक्ष्य-अविमृश्य-कारिता. **Precipitance,** *s.* साहसं; *See* above.

Precis, *s.* सारः, संक्षेपः, संग्रहः.

Precise, *s.* नियत, निर्दिष्ट, निश्चित, परिच्छिन्न, यथार्थ, विशेष in comp.; *See* **Exact. 2** व्यक्त, स्फुट, सूक्ष्म. **3** (Of persons) सामयिक (की *f.*), समयानुवर्तिन्, संकेतानुरोधिन्, सूक्ष्मनियमनिष्ठ. **-ly,** *adv.* नियतं, यथार्थं, सूक्ष्मतया; oft. by एव; 'at noon p.' मध्याह्नसमये एव; 'p. so' एवमेव. **-ion,-ness,** *s.* नियतत्वं, निर्देशः, सूक्ष्मता, सुनिश्चितता, याथार्थ्यं, व्यक्तता, &c.

Preclude, *v. t.* निवृ c., नि-प्रति-षिध् 1 P, नि-प्रति-रुध् 7 U, बाध् 1 A, प्रतिबंध् 9 P; *See* **Obstruct. -Preclusion,** *s.* प्रतिबंधः, निवारणं, नि-प्रति-षेधः; निरोधः. **-Preclusive,** *a.* निवारक, प्रतिबंधक, निरोधक.

Precocious, *a.* अकालपक्व-परिणत-प्रौढ. **2** बालप्रौढ-पक्व. **-ness, -Precocity,** *s.* अकालपरिणति *f.*-प्रौढता, बालप्रौढि *f.*

Precogitate, *v. i.* पूर्वं-अग्रे चिंत् 10 or विचर् c. or विमृश् 6 P.

Precognition, *s.* पूर्वज्ञानं-बोधः.

Preconceive, Preconcert, *v. t.* पूर्वं चिंत् 10 or कल्प् c. or वि-भू c. **-ed,** *a.* पूर्वकल्पित-निर्धारित, पूर्वघटित-निर्णीत. **-ion,** *s.* अग्र-पूर्व-कल्पना-बोधः-ज्ञानं; पूर्वघटनं-संकेतः.

Precursor, *s.* पूर्वगः; अग्रेसरः, अग्रयायिन् *m.* पुरःसरः; *See* **Harbinger. 2** पूर्वलक्षणं-चिह्नं-लिंगं. **-y,** *a.* पूर्वग, पुरःसर, अग्रवर्तिन्.

Predatory, *a.* दस्युवृत्ति, अपहारक, उपद्रविन्, लुंठक, चौर in comp.

Predecessor, *s.* पूर्वगः, पूर्वाधिकारिन् *m.*

Predestinate, Predestine, *v. t.* पूर्वं-अग्रे-निरूप् 10 or प्रक्लृप् c. or निर्दिश् 6 P. **-ed.** *a.* अग्र or पूर्व-निर्दिष्ट or निरूपित, भाविन्, दैवाधीन, दैवायत्त, दैष्टिक (की *f.*). **-ion,** *s.* अग्रनिरूपणं-निर्देशः. **2** दैववादः, दैवपरता, अदृष्ट-प्रारब्ध-वादः, दैष्टिकता. **-Predestinarian,** *s.*: दैवपरः, दैव-अदृष्ट-वादिन् *m.* यद्भविष्यः, दैवायत्तः, दैष्टिकः.

Predetermine, *v. t.* पूर्वं-अग्रे-निश्चि 5 U or निर्णी 1 P. **-ate,-ed,** *a.* पूर्वनिश्चित-निर्णीत. **-ation,** *s.* पूर्व-अग्र-निश्चयः-संकल्पः निर्णयः.

Predial, *a.* क्षेत्र, भूमि in comp

Proselyte, *s.* परधर्माश्रयिन्, स्वधर्मत्यागिन्, पक्षांतर-मतांतर-ग्राहिन्; *See* **Convert. -ize,** *v. i.* स्वधर्मं ग्रह् c., **-ism,** *s.* मतांतरग्रहणं, धर्मांतरस्वीकारः.

Prosody, *s.* छंदस् *n.*, छंदःशास्त्रं. **-al,-ical,** *a.* छांदस (सी *f.*), छंदः in comp. **-ian,** *s.* छंदःशास्त्रज्ञः.

Prospect, *s.* आलोकः, दर्शनं, चक्षुर्विषयः, दृग्गोचर-प्रदेशः विषयः. **2** आयति *f.*, उत्तरापेक्षा; ' he has good p. s before him ' शुभा तस्यायतिः. **3** आशा, प्रत्याशा, आशंसा, अपेक्षा. **-ive,** *a.* उत्तर,-उत्तरकालीन, भाविकालप्राप्य, उत्तरकालसापेक्ष; *See* **Future. -ively,** *adv.* उत्तरकालापेक्षया.

Prosper, *v. i.* सं-,ऋध् 4, 5 P, प्र-वि-वृध् 1 A. स्फाय् 1 A, एध् 1 A, प्र-उप-चि pass., समृद्धि-वृद्धिं या 2 P or उप-इ 2 P; ' I hope your (commercial) business is p. ing ' अपि प्रचीयंते संव्यवहाराणां लाभाः (Mu. 1). **2** सिध् 4 P, सं-पद् 4 A, सफलीभू 1 P, कृतार्थीभू. -*v. t.* वृध् c., प्र-उप-चि 5 U. एध् c., उपकृ 8 U, अनुग्रह् 9 P, सफलीकृ, साध् c., सिद्धिं नी 1 P. **-ity,** *s.* सं-, ऋद्धि *f.*, संपद् *f.*, संपत्ति *f.* अभ्युदयः, श्रीः, लक्ष्मीः, वि-,भूति *f.*, सौभाग्यं, वैभवं, पुण्योदयः, ऐश्वर्यं; ' time of p. ' संपत्-समृद्धि-उदय-कालः-समयः. **2** समृद्धिः, उत्कर्षः, उन्नति *f.*, उदयः, प्र-उप-चयः, वि-सं-वृद्धि *f.*, साफल्यं, कृतार्थता, सिद्धि *f.* **3** क्षेमः-मं, कौशल्यं, कल्याणं, शुभं, शिवं, हितं, भद्रं. **-ous,** *a.* समृद्ध, श्रीमत्, समृद्धिमत्, लक्ष्मीवत्, सश्रीक, ऐश्वर्यशालिन्; (state &c.) वर्धिष्णु, प्र-उप-चीयमान, एधमान, वर्धमान; in p. days ' संपत्सु, अभ्युदयकाले, भूतिसमये, समृद्धिकाले. **2** सफल, सिद्ध, कृतार्थ, सिद्धार्थ; (happy) सुस्थ, निरापद, क्षेम, कुशल, कल्याण (णी *f.*), शिव, भद्र, मंगल. शुभ, सौभाग्यवत्, धन्य. **-ously,** *adv.* समृद्ध्या, अभ्युदयेन, सुसंपदा, सौभाग्येन, शुभं, भद्रं.

Prostitute, *s.* वेश्या, वेशवधूः, गणिका, वारपण्य स्त्री-अंगना-योषित्, भोग्या, सामान्यस्त्री रूपाजीवा; (false to her husband) पुंश्चली, बंधकी, असती, कुलटा, स्वैरिणी, पांसु(शु)ला, धर्षिणी, इत्वरी. -*v. t.* निंद्यकर्मार्थं प्र-उप-विनि-युज् 1 A, 10 or व्यापृ c. **-ion,** *s.* वेश्याजीवः, वेश्या-गणिका-वृत्ति *f.*, वारसेवा, बंधकीत्वं, पौंश्चल्यं, &c.

Prostrate, *a.* प्रणत, भूमिंगत, साष्टांगप्रणत-पतित; ' lie or fall p. ' *See* (*v.*); ' p. on the bed ' शयनगत, शयने अवमूर्धशय; 'lying p. at the feet' चरण or पाद-पतित or प्रणत. **2** अवसन्न, क्षीण. -*v. t.* (Oneself)

दंडप्रणामेन-साष्टांगपातं-नम् 1 P or प्रणिपत् 1 P, दंडवत् पत्; नीचैः प्रणम् or प्रणिपत्. **2** नि-अव-पत् c.; भूमिं गम् c. (गमयति). **3** (Strength) अवसद् c; ध्वंस् c., प्र-वि-नश् c., हृ 1 P; क्षि 1, 5 P. **-ed,** *a.* प्रणिपतित, भूमिंगत, निपतित, &c. **2** क्षीणबल-शक्ति, हृत or नष्ट-शक्ति or ओजस्. **-ion** *s.* दंडप्रणामः अष्टांगप्रणामः-प्रणिपातः, सांष्टांगप्रणामः-वंदनं; प्रणिपातः, प्रणामः. **2** (Of spirits) अवसादः, ग्लानि *f.*, विषण्णता, उद्वेगः; 'p. of strength' शक्तिपातः-क्षयः, सत्त्वहानि *f.*

Protect, *v. t.* रक्ष् 1 P, अव् 1 P, परि-,त्रै 1 A, गुप् 1 P, पा 2 P, पा c (पालयति), परि-प्रति°-; तृ c. **2** संवृध् c., परि-,पुष् c. **-ion,** *s.* गोपनं, गुप्ति *f.*, पालनं, त्राणं, रक्षा, रक्षणं, अभ्युपपत्ति *f.*, संवर्धनं, परिपोषणं. **2** शरणं, आ-संश्रयः, आ-अव-लंबः, आधारः; 'go for p.' आश्रि 1 U, आलंब् 1 A, शरणं गम् 1 P or प्रपद् 4 A; paper granting p. अभयपत्रं. **-or,** *s.* रक्षकः, गोप्तृ *m.*, पालयिता, रक्षिता, रक्षिन्, पालकः, त्राता, शरणं, शरण्यः; आश्रयः, पः-पालः in comp. **-Protege,** *s.* आश्रितः, पालितः, उपजीविन् *m.*, पोष्यः, शरणं गतः.

Protend, *v. t.* विस्तृ c., प्रसृ c.; *See* **Extend.**

Protest, *v. i.* दृढं-दृढोक्ति पूर्वं-वद् 1 P or आख्या 2 P; p. against दृढं विरुद्धं वद्, दृढं-दृढोक्तिपूर्वं नि-प्रतिषिध् 1 P, दृढं असंमतिं प्रकाश् c. or ज्ञा c.; 'I strongly p. against this order' अयमादेशोऽन्याय्य इति सनिश्चयं वदामि 'p. in writing' असंमतिलेखं-विप्रतिपत्ति-पत्रं-प्रकाश् c. -*s.* दृढनिषेधवाक्यं, अस्वीकार-असंमति-वादः, विरुद्धवादः, अस्वीकारप्रकाशनं; 'written p.' असंमतिपत्रं. **-ant,** *s.* रोमीयमतविरुद्धः. **-ation,** *s.* दृढवचनं-उक्तिः-वादः, विरुद्धवचनं, निषेधोक्तिः.

Proteus, *s.* कामरूपः.

Prototype, *s.* आदर्शः, मूलं, मूलप्रतिमा.

Protract, *v. t.* विलंब् c., व्याक्षिप् 6 P; *See* **Delay. 2** प्र-,तन् 8 U; प्रसृ c., दीर्घीकृ 8 U. **-ed,** *a.* सुदीर्घ, विलंबित, चिरस्थित, चिर in comp.: p. note तानः; 'p. sound प्लुतः. **-ion,** *s.* विलंबः, व्याक्षेपः.

Protrude, *v. i.* प्रः-निः-सृ 1 P, निर्गम् 1 P, उद्भिद् pass., प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. -*v. t.* Causal of roots above. **-ing,** *a.* बहिर्लंब, बहिःस्थ. **-Protrusion,** निःसरणं, उद्भेदः, प्रलंबनं. **-Protuberance,** *s.* वि-,स्फोटः, गंडः, शोथः, शोफः, श्वयथुः, (on the skin). **2** प्रलंबनं, उत्सेधः, उत्तुंगता, आभोगः, उन्नति *f.* **-Protuberant,** *a.* उन्नत, उत्तुंग, उच्छ्रित, उच्छून, प्रलंब; 'having p. breasts' तुंग-उन्नत-स्तनी, घट-कुंभ-स्तनी; oft. ex. by उत्सेधः; पयोधरोत्सेधविशीर्णसंहति (K. v. 8) the continuity being broken by her p. breasts.' **-Protuberate,** *v. i.* प्रलंब् 1 A; *See* **Project,-ing** &c.

Proud, *a.* *See* under **Pride.**

Prove, *v. t.* उप-प्रति-पद् c., साध् c., वि-भू c., प्र-मा 3 A, 2 P, प्रमाणीकृ 8 U, सत्याकृ, स्था c. (स्थापयति). **2** प्र-,दृश् c., सूच् 10, निर्दिश् 6 P, प्रकाश् c., व्यंज् 7 P or c.; 'he was p. ed guilty' अपराधी स्थापितः; 'good men p. their usefulness by deeds, not by words' ब्रुवते हि फलेन साधवो न तु कंठेन निजोपयोगितां (N. II. 48), कर्मणा न तु वाङ्मात्रेण दर्शयंति. **3** परीक्ष् 1 A, निरूप् 10, निर्णी 1 P, निश्चि 5 U, प्रति-इ c.; *See* **Test.** -*v. i.* सं-उत्-पद् 4 A, वृत् 1 A, सं-,भू 1 P; निर्णी-निश्चि-प्रती-pass.; 'the tilled ground p. ed a treasure indeed' कृष्टा भूमिरेव कोषस्थाने बभूव, कोषत्वमापद्यत. **-er,** *s.* साधकः, विभावकः. **-Proof,** *s.* साधनं, प्रमाणं, उपपत्ति *f.*, उप-प्रति-पादनं; 'written p.' लेखप्रमाणं, साधनपत्रं; 'burden of p.' साधनधर्मः, क्रियानिर्णयः; 'the burden of p. lies on both parties' द्वयोरपि वादिनोः क्रिया प्राप्नोति (V. M. 6.). **2** लक्षणं, चिह्नं. **3** परीक्षा-क्षणं, निर्णयः, निश्चयः; 'to put to the p.' परीक्ष्. **4** स्थूल-प्रथम-मुद्रणं. **5** अभेद्यता, अहार्यता, अविकार्यता; 'p. against advice' उपदेशाहार्य; 'water p.' जलेनाभेद्य. **-less,** *a.* निष्प्रमाण, साधनहीन.

Provenance, *s.* उत्पत्ति *f.*, संभवः, उद्गमस्थानं.

Provender, *s.* पाथेयं; खाद्यं, पशुभोज्यं, शुष्कतृणादि *n.*

Proverb, *s.* जनप्रवादः, लोकवादः, आभाणकः, जनोक्ति *f.*, न्यायः, वचनं, उक्तिः. **-ial,** *a.* लौकिक (की *f.*), लोकप्रसिद्ध-प्रचलित, लोक-जन in comp., न्यायरूप. **-ially,** *adv.* लोके, जनरूढ्या.

Provide *v. t.* (पूर्वं) सं-,युज् 7 U, 10, संभृ 3 U, प्र-उप-कृप् c., सनाथीकृ 8 U, द्रव्यसामग्रीं उपपद् c. or वि-धा 3 U or कृ; *See* **Prepare. 2** (पूर्वं) नियम् 1 P, प्रति-ज्ञा 9 A, परिपण् 1 A, संकेतं-समयं-कृ; निर्दिश् 6 P; *See* **Enjoin, Ordain;** (for, against) gen. ex. by अर्थे-अर्थं in comp.; 'should p. wealth against times of want' आपदर्थं धनं रक्षेत्; 'who p. s for the future' अनागतविधाता; 'p. against' निवारणाय सज्जीभू, प्रतिकारोपायं कृप् c. **-ed,** *a.* (पूर्वं) संभृत, परिकल्पित; युक्त, उपेत, सहित, अन्वित,

सनाथ, सनाथीकृत; 'he is duly p. for तस्य समुचिताः संविधाः कृताः; उपकरणसामग्रीयुक्तः, अन्नवस्त्रादियुक्तः. 2 पूर्वं निर्दिष्ट. परिपणित, पूर्वं संकेतित; 'p. that' यदि, चेत्, एतेन समयेन. -ence, s. विधिः, परमेश्वरः; See God. 2 सुविमर्शः, दूरदर्शित्वं, पर्यवेक्षणं, पूर्वविवेकः-विचारः, सुसमीक्षा, दूर-दीर्घ-दृष्टि f. -ent, a. दूरदर्शिन्, विमृश्यकारिन्, विवेकिन्, दूर-दीर्घ-दृष्टि.-ential, a. ईश्वर-विधातृ-कृत-प्रयुक्त-घटित. -entially, adv. विधिवशात्, ईश्वरेच्छया, दैवात्, दिष्ट्या. -ently, adv. सविवेकं, सुसमीक्ष्य, सुविमृश्य, दूरदृष्ट्या. -Provision, s. परिकल्पनं, विधानं, उपपादनं. 2 पूर्वोपायः, पूर्वकल्पना, संविधा-धानं. 3 समयः, संकेतः, प्रतिज्ञा, पणः, नियमः, अभिसंधिः. 4 (P. s.) सामग्री, संभारः, संचयः, संग्रहः, साहित्यं, संविधा, उपस्करः, उपकरणजातं; (for journey) पाथेयं, भोज्यं, भक्ष्यं, भक्ष्यादिसामग्री, गमनसंविधा; (for army) वीवधः. -v. t. Provide, q. v. -al,-ary, a. सामयिक (की f.), अल्पकालस्थायिन्, आपात in comp., आपाततः नियुक्त. -ally, adv. आपाततः, समयानुरूपेण, स्तोककालं. -Provisory, a. सप्रतिज्ञ, सामयिक. -Proviso, s. See (s.) (3).

Province, s. विषयः, राष्ट्रं, देशः, चक्रं, मंडलं. 2 नियोगः,कार्यं, कर्मन् n., कर्तव्यं, अधिकारः. 3 प्रकरणं, अंगं, विषयः (fig. also), (सर्वत्रौदरिकस्याभ्यवहार्यमेव विषयः V. 3. -ial, a. देशीय, देश्य, राष्ट्रीय, राष्ट्रिक-दैशिक-(की f.), देश-राष्ट्र in comp. -s. देशस्थः, ग्रामस्थः. -ialism, s. ग्रामीणभाषा, असंस्कृतभाषा.

Provoke, v. t. प्र-,कुप् c., कुध् c., क्रोधं-कोपं-उत्पद् c. or उद्दीप् or उत्तिज् c. 2 उत्पद् c., जन् c., (जनयति), प्रवृत् c., उत्तिज् c.; See Excite, Cause. 3 धृष् 5 P, आह्वे 1 A. -ing, a. प्रकोपक, उद्दीपक, उत्तेजक, क्रोधावह, संतापकारिन्, संतापक. -ingly, adv. Ex. by (v.). -Provocation, s. प्रकोपः, क्रोधोद्दीपनं, कोपोत्तेजनं;कोपकारणं-हेतुः. 2 उद्दीपनं, उद्बोधनं. -Provocative, a. उद्दीपक, उद्बोधक. -s. दीपनं, अग्निवर्धनं, क्षुद्बोधनं, प्ररोचनं.

Provost, s. अध्यक्षः, अधिकारिन् m., अधीशः.

Prow, s. पोताग्रभागः,

Prowess, s. शौर्यं, वीर्यं, वि-परा-क्रमः, पौरुषं, ओजस् n., रणोत्साहः-शौर्यं; 'personal बाहुवीर्यं, भुजबलं.

Prowl, v. i. (भक्ष्यार्थं) परि-,भ्रम् 1, 4 P, पर्यट् 1 P. -ing, s. परिभ्रमणं, पर्यटनं.

Proximate, a. समीप, निकट, आसन्न, संसक्त, सन्निकृष्ट. -ly, adv. समीपं, संसक्तं. -Proximity, s. सन्निधिः, सन्निकर्षः, सान्निध्यं, नैकट्यं, संसक्ति f.; See Nearness.

Proximo, adv. आगामिनि (मासे)

Proxy, s. प्रतिनिधिः-पुरुषः, प्रतिहस्तः; 'by p.' प्रतिनिधिद्वारा.

Prude, a. (Woman) अतिविनीता, विनयाभिमानिनी, सूक्ष्माचारनिष्ठा. -ry, s. अतिविनीतता, विनयाभिमानः, मिथ्याविनयः. -ish, a. See (a.).

Prudent, a. दूरदर्शिन्, विमृश्य-समीक्ष्यकारिन्, विवेकिन, दूर-दीर्घ-दृष्टि, परिणामदर्शिन्, सदसद्विवेकिन्; बुध, मनस्विन्, नीतिज्ञ, विज्ञ, प्र(प्रा)ज्ञ, मनीषिन्, सावधान, कृतधी; See Wise, also. 2 (Of acts) समीचीन, श्रेयस्, वरं ind. -ial, a. सविवेक, विवेक-समीक्षा-प्रयुक्त. -ly, adv. विमृश्य, समीक्ष्य, सविवेकं, दूरदर्शितया, परिणामदृष्ट्या, प्रज्ञवत्. -Prudence, s. दूरदर्शिता, दूर-दीर्घ-दृष्टि f., विवेकः, प्रसमीक्षा, समीक्ष्य-विमृश्य-कारित्वं, सदसद्विवेकः, नीति f., मनीषा, मति-बुद्धि f.

Prune, v. t. अग्राणि लू 9 U or अव-च्छिद् 7 P or निकृत् 6 P. -ing, s. अवच्छेदः, निकृंतनं; 'p.-knife' विटपच्छेदनी छुरिका.

Prurigo, Prurient, See Itch,-y.

Pry, v. (Into) सूक्ष्मं निरीक्ष् 1 A or निरूप् 10 or दृश् 1 P; निपुणं अनुसं-धा 3 U or अन्विष् 4 P or चर्च् 6 P. -ing, s. सूक्ष्म-निरूपणं-अन्वेषणं, सूक्ष्मचर्चा.

Prythee, adv. अयि, ननु, (ननु मां प्रापय पत्युरंतिकं K. iv. 32).

Psalm, s. स्तोत्रं, गेयं, गीतं, भक्ति-धर्म-गीतं. -ist, s. गीत-स्तोत्र-कारः. -Psalter, s. गीतसंहिता-संग्रहः.

Pseudo, prefix, Ex. by मिथ्या, कपट, कूट. छद्म, कृतक, कृत्रिम in comp.; See False. -nym, s. कृतकनामन् n.

Pshaw, interj. धिक्, अपेहि.

Psychic, a. आध्यात्मिक.

Psychology, s. अध्यात्मविद्या, आन्वीक्षिकी.

Puberty, s. यौवनं, वयस् n., तारुण्यं, यौवनदशा-अवस्था, प्रौढदशा; 'a woman attained to p.' स्त्रीधर्मिणी, उदक्या; See under Menstrual. -Pubescent, a. प्राप्तयौवन, प्रौढ, तरुण.

Public, s. लोकाः, जनाः, प्रजाः, प्रकृतयः. (pl.); लोकः. जनः. प्रजाः 'in p. प्रकाशं. लोकसमक्षं, प्रकटं, सर्वप्रत्यक्षं. -a. प्रजा-लोक-संबंधिन्; साधारण (णी f.,) सामान्य, सर्वजनीन-य, सार्वलौकिक (की f.). लोक-जन-गण in comp.; 'p. odium जनद्वेषः. p. good' लोकहितं; 'p. property गण-द्रव्यं. 2 प्रसिद्ध, लोक-जन-प्रसिद्ध, सर्वत्र प्रचलित. बहुलीभूत, लोकविश्रुत. प्रकाशीभूत,

सार्वलौकिक (की *f.*). 3 प्रकाश, अगूढ, अच्छन्न, अविविक्त, सर्वप्रकाश, राज in comp.; ' p. road ' राजमार्गः; ' p. sale ' प्रकाशविक्रयः; ' p. house ' शुंडा, पानं, शुंडापानं, सुरालयः, सुरापणः; *See* under **Liquor**; ' p.-minded', ' p.-spirited ' उपकारशील, जनहितबुद्धि, सर्वजनहितपरायण, लोकहित, जनहितैषिन्. **-an,** *s.* शौंडिकः, सुरापणिकः 2 कर-शुल्क-ग्राहिन् *m.* **-ity,** *s.* प्रकाशता, प्राकाश्यं, प्रख्याति *f.*, प्रसिद्धि *f.*, विश्रुति *f.*, जन-लोक-प्रसिद्धिः, स्पष्टता; ' give p. ' **Publish,** q. v. **-ly,** *adv.* प्रकाशं-शतः, प्रसिद्धं, प्रकटं, सर्वप्रकाशं-संमुखं-समक्षं; अगूढं, अच्छन्नं, सुव्यक्तं, स्पष्टं. **-Publish,** *v. t.* प्रकाश् c., प्रथ् 10, ख्या c. (ख्यापयति), प्र-वि-घुष् 10, ज्ञा c. (ज्ञापयति), प्रचर् c., बुध् c., प्रकाशीकृ 8 U, प्रकटीकृ, आविष्कृ, प्रकटयति, (:D.), प्रकटी-प्रसिद्धी-कृ; (books &c.) प्रकाश् c. **-er,** *s.* प्रकाशकः, प्रकाशयितृ *m.*, ख्यापकः. **-Publication,** *s.* प्रकाशनं, घोषणं, ख्यापनं. 2 प्रकाशितपुस्तकं-ग्रंथः.

Pucker, *v. t.* संकुच् 1 P, आकुंच् c., संहृ 1 P, पुटीकृ 8 U. **-s.,** **-ing,** *s.* संकोचः, पुटः, वलि-ली *f.* **-ed,** *a.* संकुचित, पुटीकृत. 2 **Wrinkled,** q. v.

Puddle, *s.* पंकिलजलं, पंकगुल्मः, पंकजलाशयः, **-***v. t.* आविली-कलुषी-कृ 8 U; *See* **Spoil.**

Pudency, *s. See* **Modesty.**

Pudendum, Pudenda, *s.* योनि *f.*, भगं, उपस्थः.

Puerile, *a.* बालिश, बालोचित, बालेय, बाल-शिशु-योग्य. **-ity,** *s.* बालिश्यं, बालधर्मः.

Puerperal *a.* प्रसव-प्रसूति in comp. **-Puerperous,** *a.* बालप्रसविनी.

Puff, *v. t.* ध्मा 1 P, आ-उप-°, उत्-, श्वि c., (lit. & fig.); वातेन पूर् 10, उद्-हन् 2 P, स्फाय् c. (स्फावयति). **-***v. i.* श्वस् 2 P, कृच्छ्रेण श्वस्, उद्-ध्मा. 2 वा 2 P. 3 फुत्कृ 8 U, मारुतं निःसृ c. 4 श्वि-उद्धन्-ध्मा-pass., स्फीत-आध्मात-उच्छून- *a.* भू 1 P; ' do not p. up, when praised ' स्तूयमाना नोत्सिच्यंते (Ka. 329). **-***s.* श्वासः, मुखमारुतः. 2 फूत्कारः, फूत्कृतं. 3 वात्या, वातवेगः; *See* **Gust.** 4 अतिप्रशंसा. **-ed,** *a.* आध्मात, उच्छून, स्फीत, उद्धत, मारुतपूर्ण, श्वासपूरित; ' p. up with pride ' दर्पाध्मात, उत्सिक्त, मदोद्धत, उद्धत. **-ing,** *s.* उत्सेकः, *See* **Pride.**

Pug-faced, *a.* वानरवदन, कपिमुख.

Pug-nose, *s. See* under **Flat.**

Pugilist, *s.* मुष्टियोधः, मल्लः. **-Pugilism,** *s.* मुष्टि-मल्ल-युद्धं, मुष्टीमुष्टि युद्धं.

Pugnacious, *a.* कलह-युद्ध-प्रिय, रणोत्सुक, युयुत्सु, रण-युद्ध-कलह-काम. **-Pugnacity,** *s.* युयुत्सा, कलहेच्छा, कलह-युद्ध-कामः.

Puisne, *a.* अवर, अवरपदस्थ.

Puissant, *a.* शूर, विक्रांत, वीर्यवत्, प्रबल. **-Puissance,** *s.* शौर्यं, वि-परा-क्रमः, वीर्यं; *See* **Bravery.**

Puke, *v. i.* वम् 1 P, छर्द् 10. **-***s.* (वांतिकृत्) औषधं.

Pulchritude, *s. See* **Beauty.**

Pule, *v. i.* बालकवत् रु 2 P or कूज् 1 P.

Pull, *s.* कर्षणं, आकर्षः; ग्रहणं, धरणं. **-***v. t.* कृष् 1 P, आ-स-°. 2 ग्रह् 9 U, आ-दा 3 A, धृ 1 P, 10. **-down,** नि-, पत् c., अधः पत् c., अवकृष्; (in strength) अव-सद् c, अप-चि 5 U, क्षि 5 P, अपकृष्. **-off,** अप-नी 1 P, अप-उत्-कृष्, अवतृ c., उन्मुच् 6 P, अपहृ 1 P; निष्कृष्, निर्हृ. **-out,** उद्धृ, निष्कृष्, वि-उत्-पद् 10, उत्खन् 1 P, निर्हृ; (hair) उत्-, लुंच् 1 P. **-towards,** आ-समा-कृष्. **-up,** उन्मूल् 10, उद्धृ, उच्छिद् 7 P, उत्पद्; *See* **Eradicate.** **-ing,** *s.* आकर्षणं, ग्रहणं, &c.; ' p. by the hair ' केशग्रहः-हणः; ' mutual p. of the hair ' केशाकेशि युद्ध.

Pullet, *s.* कुक्कुटशावः.

Pulmonary, *a* तिलक-फुप्फुस in comp.

Pulp, *s.* मज्जा, सारः, वसा. 2 गर्भः, बीजं. **-ous,-y,** *a.* मज्जाबहुल, मज्जागुणक, मांसल, मज्जोपम, कोमल.

Pulpit, *s.* पीठं, आसनं.

Pulse, *s.* नाडि-डी *f.*; (beating) नाडीस्फुरणं-स्पंदनं; ' feel the p. ' नाडीं दृश् 1 P or स्पृश् 6 P. or परीक्ष् 1 A, ' the p. is quick' लघुगतिः नाडी; ' the p. is low on account of phlegm ' कफान्मंदगतिर्ज्ञेया (नाडी). 2 वैदलः, शमी-शिंबी-धान्यं; शमीजः. **-Pulsate,** *v. i.* स्पंद् 1 A, स्फुर् 6 P; *See* **Throb.** **-ion,** *s.* गति *f.*, स्फुरणं, आघातः, स्पंदनं; ' p. of the heart ' हृदयोद्धर्षः.

Pulverize, *v. t.* चूर्ण् 10, क्षुद् 7 P, पिष् 7 P. **-Pulverulent,** *a.* चूर्ण-क्षोद-मय (यी *f.*).

Pummel, *s.* वंका.

Pump, *s.* उत्तोलनयंत्रं, जलोत्क्षेपणं. **-***v. t.* (जलादि) उत्तुल् 10, उत्क्षिप् 6 P. 2 (Out) निष्कृष् 1 P, रिच् 7 P, or c., रिक्तीकृ 8 U.

Pumpkin, *s.* कूष्मांडः-डकः, कर्कारुः.

Pun, *s.* श्लेषः **-***v. t.* श्लेषं प्रयुज् 7 A, 10.

Punch, *s.* प्रहारः, आ-अभि-घातः. **2** विदूषकः, भंडः. **3** वेधनिका. **–***v. t.* तड् 10 or प्रह 1 P. **2 Perforate** q. v.

Punchy, *a.* स्थूलकाय; *See* **Fat.**

Punctilio, *s.* सूक्ष्मता, अतिसौक्ष्म्यं; सूक्ष्म-विषयः-नियमः. **–Punctilious,** *a.* सूक्ष्म-नियमनिष्ठ-निरत, सूक्ष्माचारनिष्ठ, अतिसूक्ष्म-दृष्टि *f.* **–ness** *s.* सूक्ष्मनियमनिष्ठा; अति-सूक्ष्मदृष्टि *f.*

Punctual, *a.* सामयिक (की *f.*), संकेत-समय-निष्ठ-अनुवर्तिन्; 'let us be p.' सा-मयिका भवामः (M. 1). **–ity,-ness,** *s.* समय-संकेत-पालनं-निष्ठा-अनुवर्तनं. सामयि-कता. **–ly,** *adv.* यथासमयं-संकेतं-कालं.

Punctuate, *v. t.* विरामचिह्नानि लिख् 6 P; चिह्नैः अंक् 10.

Puncture, *v. t.* कीलाग्रेण व्यध् 4 P or भिद् 7 P. **–***s.* वेधः-धनं; *See* **Prick.**

Pungent, *a.* तीव्र, तीक्ष्ण, प्रखर, तिग्म. उग्र, चंड. **2** मर्मभिद्, अरुंतुद्, मर्माविध्, कटु. **3** (To the taste) तीक्ष्ण, तिक्त, तीव्र. कटु, उष्ण. **–Pungency,** *s.* प्रखरता. उग्रता, चंडता, तीक्ष्णता. कटुता, तीव्रता *&c.*

Punish, *v. t.* दंड् 10, शास् 2 P, (with two acc.); निग्रह् 9 P, दम् c. (दमयति); तड् 10 (by beating); 'p. ed him by an unjust death' अन्यायेन तं जघान. अन्याय्यवधं तमदंडयत्; 'should p. as a thief' चोरदंडेन दंडयेत् (Y. II. 269). **2 Plain,** q. v. **–er,** *s.* शास्तृ *m.*, शासकः. दंडयिता. **–ment,** *s.* दंडः, शासनं, निग्रहः; साहसं; दमः. **–Punitive, Punitory,** *a.* दंड in comp.

Punt, *s.* तरालुः, तरांधुः.

Puny, *s.* क्षुद्र, अत्यल्प, अतिलघु.

Pupil, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*, अ-ध्येतृ *m.*, विद्यार्थिन् *m.* **2** कनीनिका, तारा, तारका. **–age,** *s.* शिष्यदशा-अवस्था. अंतेवासित्वं.

Puppet, *s.* पुत्रिका, पांचालिका; *See* **Doll;** 'p.-show' पुत्रिकाक्रीडा.

Puppy, Pup, *s.* कुक्कुरशावः-शिशुः.

Purblind, *a.* हतदृष्टि, ईषदंध.

Purchase, *v. t.* क्री 9 U. **2** व्ययेन-अनेन प्राप् 5 P or लभ् 1 Ā. **–***s.* क्रयः. **2** क्रीत-द्रव्यं. **3** संग्रहणं, ग्राहः; 'p.-money' क्रयमूल्यं, अर्घः, मूल्यं. **–er,** *s.* क्रयिन् *m.*, क्रेतृ *m.*

Pure, *a.* वि-, शुद्ध, शुचि (in all senses); स्वच्छ, विशद, निर्-वि-अ-मल, प्रसन्न, अना-विल, अकलुष. **2** पुण्य, अनघ, निष्पाप, साधु, अपाप, अलिप्त, निष्कलंक, अकल्मष. **3** पवित्र, पावन, मेध्य, परि-,पूत, प्रपत, तीर्थ in comp. **4** केवल, शुद्ध, मात्र in comp. **5** अदुष्ट, अभ्रष्ट, असंसृष्ट, अविकृत. **6** (Language) अपशब्दहीन-रहित, असंकीर्ण. **7** (Woman) सती, साध्वी, अज्ञातव्यवाया, सुर-तानभिज्ञा, अस्पृष्टा, अक्षतयोनिः, पुरुषास्पृष्टा; 'of p. descent' सद्वंशज, शुद्धान्वय; of p. heart', 'p.-minded' शुद्धात्मन्, विमला-त्मन्, शुद्धमति, शुद्धहृदय; प्रयतात्मन्; 'to be p.' शुध् 4 P. **–ly,** *adv.* निर्मलं, विशुद्धं, शुचि; निष्पापं, &c.; मात्रं, केवलं &c. **–ness,-Purity,** *s.* वैमल्यं, वि-,शुद्धि, *f.*, शुद्धता, प्रसादः, वैशद्यं, शुचिता, शौचं, पुण्यता, साधुता, अपापता, पवित्रता, पूतता, साध्वीत्वं, &c. **–Purify,** *v. t.* परि-,पू 9 U or c., शुध् c., वि-परि-,° शुचीकृ 8 U, निर्म-लीकृ, पवित्रीकृ, संस्कृ; प्र-,मृज् 2 P, निर्णिज् 3 U, प्रक्षल् 10, धाव् 10. **–ed,** *a.* परि-,पूत, शुद्ध, शोधित, प्रक्षालित, धौत, निर्णिक्त, &c.; 'p. by penance' प्रयतात्मन्. **–ication,** *s.* परि-,पूति *f.*, वि-परि-शुद्धि *f.*, शौचं, सं-स्कारः, पावनं, शोधनं, निर्मलीकरणं, प्रक्षालनं, धावनं, मार्जनं. **–icative,-icatory,** *a.* पावन, पवित्र, पावक, तीर्थ in comp.; अघ-पाप-नाशिन्, अघमर्षण; *See* **Pure,** 'p. rites' शांतिक्रिया, संस्कारः. **–ing,** *a.* पावन, पावक, पाविन्, &c.

Purge, *v. t.* शुध् c., वि-,रिच् 7 P or c., मलं निःसृ c. or शुध् c. **2** परि-,पू 9 U, शुध् c., **2** पापं-अघं-शुध्; *See* **Purify.** **–***s.* वि-,रेचनं-कं; उदरशोधनं. **–ation,** *s.* वि-, रेचनं, वि-,रेकः, शोधनं, शुद्धि *f.* **–ative,** *a.* वि-,रेचक-न, सारक, शोधन. **–***s.* वि-, रेचनं-कं, सारकं. **–atory,** *s.* शोधक, पावन, अघनाशन-मर्षण. **–***s.* पापमोचनस्थानं.

Purlieu, *s.* *See* **Border.**

Purloin, *v.* *See* **Rob, Steal.**

Purple, *a.* धूम्र, धूमल, नीललोहित, धूम्रवर्ण. **–***s.* धूम्रः, धूमलः, धूम्रवर्णः, नीललोहितः. **–***v. t.* धूम्रीकृ 8 U. **–ish,** *a.* आधूम्र, ईषद्धूमल.

Purport, *s.* भावः, अभिप्रायः, तात्पर्यं, अर्थः, आशयः, भावार्थः, तात्पर्यार्थः. **–***v. t.* अभिप्र-इ 2 P; उद्दिश् 6 P; *See* **Intend, Mean.**

Purpose, *s.* हेतुः, अभिप्रायः, आशयः, अर्थः, संकल्पः, उद्देशः, तात्पर्यं, चिकीर्षितं, इच्छा, आकूतं, आकांक्षा, कार्यं, मति-बुद्धि-*f.*, धीः; *See* **Intention;** 'fixed p.' स्थिर or दृढ-संकल्पः or निश्चयः; 'of unfailing p.' दृढ-सत्य-संकल्प, स्थिरधी-मति; 'to no p.' निरर्थकं, वृथा, मुधा, व्यर्थं, निर्गुणं; 'who has effected his p.' कृती, कृतार्थः, कृत-कृत्यः; 'for the p. of' ex by अर्थ-अर्थे, हेतोः, निमित्तं-त्ते, in comp., कृते (with gen. or by dat.); 'for what p.' किमर्थं, किमुद्दिश्य, केन हेतुना. **–***v. t.* अभिप्र-इ, 2 P, उद्दिश् 6 P, संकल्प् c., इष् 6 P; *See*

Intend. -ly, ' on p. ' *adv.* कामतः, बुद्धि-बोध-पूर्वं, ज्ञानतः, बुद्ध्या, साभिप्रायं.

Purse, *s.* धनभस्त्रिका-कोषः, ग्रंथिः. **2** धनं; *See* **Wealth;** p. cutting ग्रंथिच्छेदः-भेदः; p. pride' धनगर्वः-दर्पः- अभिमानः, ' p.-proud ' धनोन्मत्त, वित्तगर्वित; धनदृप्त, -*v. t.* कोषे नि-धा 3 U or निविश् c. **2 Contract,** q. v.

Pursue, *v. t.* अनुसृ 1 P, अनुगम्-धाव्-व्रज् 1 P, अनु-या 2 P, अनुवृत् 1 A, अनुक्रम् 1 U, 4 P. **2** अनु-ष्ठा 1 P, आचर् 1 P, आचर् 1 P, नि-,सेव् 1 A, आश्रि 1 U, आ-स्था 1 P. **3** प्रवृत् c., निर्वह् c., सततं प्रणी 1 P; *See* **Prosecute. 4** आप् desid. (ईप्सति), लभ् desid. (लिप्सते); ' p. one's way ' मार्गं आक्रम्, वह् 1 P: *See* **Follow. -er,** *s.* अनुसारिन् *m.*, अनुधावकः, अनुगामिन् *m.* **-Pursuit,** *s.* अनुसरणं-धावनं-गमनं; अन्वेषणं, मार्गणं. **2** अनुष्ठानं, आचरणं, निषेवणं, अभिनिवेशः, अनुशीलनं; प्रवृत्ति *f.*, लिप्सा, अर्जनप्रयत्नः. निष्ठता-परता in comp. **3** व्यापारः, व्यवसायः, उद्योगः, उद्यमः, आरंभः, व्यवहारः. कार्यं, प्र-,वृत्तिः; ' literary p. s. 'विद्यागमकार्याणि, ज्ञानसंपादनारंभाः. **-Pursuant,** *a.* अनुवर्तिन्, अनुसारिन्, अनुरोधिन्. अनुरूप. **-ly,** *adv.* अनुरूपं, अनुसारेण-रतः, अनुरोधेन, यथा in comp. **-Pursuance,** *s.* अनुसरणं, वर्तनं-गमनं-रोधः; ' in p. of ' अनुरूपं, अनुसारेण, &c. **-Pursuivant,** *s.* अनुचरः, दूतः.

Pursy, *a* स्थूलऱ्हस्व, उच्छून, स्फीत. **2** दुःश्वासिन्, कृच्छ्रश्वास.

Purtenance, *See* **Appertenance.**

Purulent, *a.* पूयपूर्ण-मय (यी *f.*), पूयस्राविन्, सपूय. **-Purulence,** *s.* पूयपूर्णता, सपूयता.

Purvey, *v. t.* उपकरणानि उपक्लृप् c., सं-भृ 1, 3 U or संयुज् 7 U,10; *See* **Provide. -ance,** *s.* भोजनपरिकल्पनं-संभारः-सामग्री. **2** परिकल्पनं, संभारः, संविधा-धानं. **-or,** *s.* भोजनाधिकारिन् *m.*, आहाराधिकृतः.

Purview, *s.* विषयः.

Pus, *s.* पूयः-यं, दूष्यं, पूयरक्तं.

Push, *v.* (हस्तादिना) प्रसृ c., संचल् c., प्रक्षिप् 6 P, प्रचुद् 10, प्रेर् c., प्रणुद् 6 P or c.: *See* **Drive. 2** तुड् 10, प्र-हृ 1 P; आव्यध् 4 P, प्रति-अभि-हन् 2 P, आहन् 2 U; ' p. aside ' अपसृ c., बहिष्कृ 8 U, निःसृ c.; 'p. forward' प्रणुद् c., प्रचल् c., प्रसृ c.; ' p. afar ' उत्सृ c. -*s.*, **-ing,** *s.* प्रसारणं, प्रक्षेपः, प्रेरणं-णा, प्रचोदना. **2** ताडनं, आघातः, प्रहारः. अभ्याघातः. **3** वेगः, प्रयत्नः. **-ing,** *a.* उद्यामिन्, उद्योगिन्, साहसशील, प्रगल्भ, साहसिन्.

Pusillanimous, *a.* कृपण, दीन, क्षुद्रमनस्, कृपणबुद्धि-मति, लघुचेतस्, पामर, भीरुहृदय, कातर, कापुरुष, क्लीब. **-Pusillanimity,** *s.* कार्पण्यं, दैन्यं, क्लीबता, कातर्यं, भीरुता, कृपणमतित्वं, क्षुद्रता.

Puss, Pussy, *s. See* **Cat.**

Pustule, *s.* **Pimple,** q. v. **-ous,** *a.* स्फोटपूर्ण.

Put, *v. t.* स्था c. (स्थापयति), नि-आ-धा 3 U, आरुह् c., दा 3 U, कृ 8 U, ऋ c. (अर्पयति), निविश् c., वि-,न्यस् 4 P. **2** आ-समा-युज् 7 U, 10. **3 Incite,** q. v.; ' p. to death ' हन् 2 P or c., मृ c., व्यापद् c.; *See* **Kill,** ' p. to flight ' वि-द्रु c., ' p. in mind ' स्मृ c., प्र-अनु-बुध् c.; ' p. in order ' यथाक्रमं-यथातथं-रच् 10 or स्था c. or विन्यस्, सज्जीकृ; ' p. in writing ' पत्रे निविश् c., लेख्ये आरुह् c. **-about,** परिवृत् c. **-aside,** by, अपास् 4 U, मुच् 6 P, त्यज् 1 P; *See* **Abandon. 2** परि-,रक्ष् 1 P; सं-चि 5 U. **-away,** अपनिः-सृ c., निष्कस् c., बहिष्कृ, व्याक्षिप् 6 P, विलंब c. **-down,** भूमौ निधा, अवतृ c., निक्षिप्. **2** नश् c., विलुप् c., उच्छिद् 7 P; *See* **Destroy, Overthrow. 3** (In writing) पत्रे लिखू 6 P or निविश् c. or आरुह् c. **-forth,** प्रसृ c. **2** आविष्कृ, व्यंज् 7 P, व्यक्तीकृ, प्रकाश् c., प्र-, दृश् c. **3** उपक्षिप्, उपानी, उपन्यस्, उदाहृ 1 P. **4** उद्-भिद् c.; ' a creeper having p. forth foliage ' सन्नद्धपल्लवा लता (R. III. 7). **-off** व्याक्षिप्, विलंब c., अतिपत् c. **2** उन्मुच्, अवतृ c., अपनी, उच्छिद् 10, अपनिह् 4 P. **3** निराकृ, निःसृ c.; *See* **Discard, Discharge. 4** (From land) अपगम्, अपया, अपसृ 1 P; ' the boat p. off ' मुक्ता नौः (D. K. II. 6). **-on,** वस् 2 A, परिधा; धृ 1 P, 10, सं-व्ये 1 P; प्रसाध् c., आच्छद्; प्रा-आ-वृ 5 U; 'p. on. armour' संनह् 4 P. **2** ग्रह् 9 U, स्वीकृ, धृ, दृश् c. **3** संक्रम् c., संचर् c. **4** आसंज् c.; निविश् c. **-out,** विस्तृ c., प्रसृ c., वितन् 8 U. **2** (Eyes &c.) सं-,उद्धृ, वि-उत्-पद् 10. **3** निर्वा c. (वापयति), प्र-उप-शम् c. (शमयति). **4** विलक्षीकृ, व्रीडया आकुलीकृ, *See* **Embarrass. 5** निःसृ c., बहिष्कृ. **6** प्र-विनि-यु-ज् 7 A, 10; 'p. out at interest' वृद्धिलाभाय विनियोजित. **-over,** अधिकृ c.,अधि-ष्ठा c. **2 Put off,** q. v. **-to, Expose,** q. v.; ' p. to the sword ' खड्गेन छिद् 7 P or हन् 2 P; ' p. to sea ' नावं मुच्; ' p. to a stand ' स्तंभ् 9 P. **-together,** संयुज्; संधा, सं-ग्रंथ् 9 P. **-up,** उत्तृ 1 P. वस् 1 P; *See*

Lodge. 2 (with) सह् 1 A, क्षम् 1 A; *See* **Bear.** 3 व्यक्तीकृ, प्रकाशं स्था c., प्रदृश् c.; 'an article p. up for sale' क्रय्यं द्रव्यं; 'p. up to' प्रणुद् c., प्रोत्सह् c.

Putative, *a.* प्रसिद्ध, अभिमत.

Putrify, *v. i.* पूतीभू 1 P, पूय् 1 A, दुर्गंध-*a.* भू; वि-,गल् 1 P, वि-ली 4 A. -*v. t.* पूतीकृ 8 U, गल् c., विली c. **-action,** *s.* पूति *f.*, दुर्गंधता, पूतिगंधः, गलनं, विलयः. **-Putrid, Putrescent,** *a.* पूतिगंधि, उग्रगंध, दुर्गंध, विगलित, विलीयमान. **-ness, Putrescence,** *s.* पूतिः, दुर्गंधः, पूतिगंधः.

Puzzle, *v. t* व्या-,मुह् c., सं-वि-भ्रम् c. (भ्रमयति), आकुलीकृ 8 U, व्यस् 4 U; *See* **Confuse, Perplex** -*s* कूटं, प्रहेलिका, प्रवल्लिका. 2 व्या-मोहः, भ्रांति *f.*, संभ्रमः, वैक्लव्यं, व्याकुलता, व्यग्रता. **-ed,** *a.* मूढ, भ्रांत, व्यस्तचित्त, आकुलमनस्, किंकर्तव्यतामूढ. **-ing,** *a.* भ्रम-मोह-कारिन्, संभ्रमप्रद.

Pygmy, *s.* ह्रस्वः, खर्वः, वामनः. -*a.* ह्रस्व, खर्व, वामनमूर्ति.

Pyramid, *s.* सूच्यग्रस्तंभः, **-al,** *a.* सूच्याकार; सूच्यग्र, शिखरिन्, शुंडाकृति.

Pyre, *s.* चिता, चित्या, चिति *f.*

Pyretic, *a.* ज्वरसंबंधिन्. -*s.* ज्वरघ्नोऽगदः, ज्वरोपायः.

Pyrites, *s.* स्वर्णमाक्षिकं.

Pyrrhonist, *s.* नास्तिकः, मिथ्यादृष्टिः.

Q

Quack, *s.* कुवैद्यः, दांभिकः, छद्मवैद्यः, मिथ्याचिकित्सकः. 2 हंसनादः-रवः. -*v. t.* हंसवत् नद् 1 P or रु 2 P. **-ery,** *s.* दुश्चिकित्सा; मिथ्याभिमानः. 2 **Boast,** q. v.

Quadrangle, *s.* चतुर्भुजः, चतुष्कोणः; (of a house) प्रकोष्ठः, चत्वरं, संजवनं, चतुःशालं. **-Quadrangular,** *a.* चतुष्कोण, चतुरस्र.

Quadrant, *s.* चतुर्थभागः, पादः. 2 वृत्तपादः.

Quadrate, *s.* *See* **Square.**

Quadratic, *a.* चतुरस्रीय. 2 (equation) वर्गसमीकरणं.

Quadrature, *s.* पदसंस्थानं.

Quadrennial. *a.* चातुर्वार्षिक (की *f.*).

Quadrilateral, *a.* चतुर्भुज, चतुःपार्श्व.

Quadripartite, *a.* चतुर्विध.

Quadrisyllable, *s.* चतुरक्षरं.

Quadruped, *s.* चतुष्पदः (दी *f.*), चतुष्पाद्.

Quadruple, *a.* चतुर्गुण. -*v. t.* चतुर्गुणीकृ 8 U.

Quaff, *v. t.* (सतृष्णं) पा 1 P, उत्-चुलुंप् 1 P. **-er,** *s.* अतिपायिन् *m.*

Quagmire, *s.* *See* **Marsh.**

Quail, *s.* वर्तकः, वर्तिका, लावः. -*v. i.* कंप् 1 A, वेप् 1 A. 2 वि-अव-सद् 1 P, क्षि pass.; म्लै 4 A.

Quaint, *a.* अपरूप, विलक्षण, असंगत. 2 विदग्ध, चतुर, अतिसूक्ष्म. **-ly,** *adv.* विलक्षणं, असंगतं.

Quake, *v. i.* कंप् 1 A, उद्विज् 6 A, त्रस् 1, 4 P; (with abl.). -*s.* कंपः-पनं, उत्-प्रकंपः, वेपथुः.

Qualify, *v. t.* योग्य-उचित-क्षम-*a.* कृ 8 U; ex. by 'q. ed' 2 नियम् 1 P, परिच्छिद् 7 P, परि-मा 3 A, 2 P, निबंध् 9 P. 3 **Moderate,** q. v. **-ed,** *a.* योग्य, क्षम, समर्थ, पर्याप्त, कर्मक्षम, अलंकर्मीण. 2 गुणिन्, गुणोपेत, गुणसंपन्न. 3 नियत, परिच्छिन्न, समर्याद; *See* **Limited.** **-ication,** *s.* योग्यता, क्षमता, पात्रता, औचित्यं, गुणविशिष्टता. 2 गुणः, पात्रत्वं, विशिष्टगुणः. 3 परिच्छेदः, मर्यादा, नियमनं, नियतत्वं, परिमाणं. **-Quality,** *s.* गुणः. 2 भावः, धर्मः, गुणः, स्वभावः, प्रकृति *f.*; स्व-,रूपं, लक्षणं, विशेषभावः-धर्मः-लक्षणं, शीलं; शक्ति *f.* 3 कुलीनता, श्रेष्ठ-विशिष्ट-पदं, प्रतिष्ठा, गौरवं, उत्कृष्टपदं. 4 प्रकारः, जाति *f.*, *See* **Kind;** 'good q.' गुणः, सद्गुणः, सद्भावः, 'having good q. es' गुणिन्, गुणवत्, गुणोपेत, गुणयुक्त, सद्गुण; 'bad q.' दुर्गुणः, अवगुणः; 'inherent q. of a thing' निसर्गधर्मः, वस्तुशक्तिः; 'men of q.' कुलीनजनाः, अभिजात-कुलीन-वर्गः.

Qualm, *s.* वमनेच्छा, विवमिषा. 2 मनस्तापः, अनुशयः, अनुतापः. **-ish,** *a.* विवमिषु.

Quandary, *s.* *See* **Difficulty.**

Quantity, *s.* परिमाणं, प्रमाणं, मानं, मात्रा, अंशः, भागः. 2 मात्रा. 3 राशिः. 4 (Large) संचयः, ओघः, पूगः, पुंजः, राशिः, संग्रहः; 'a great q. of' प्रभूत, प्रचुर, बहु, विपुल; 'great q.' बाहुल्यं, प्राचुर्यं, बहुभागः, भूयिष्ठांशः; ex. by बहु, प्रचुर, विपुल (Much, q. v.); 'in large q. es' बहुशः, बाहुल्येन, प्राचुर्येण; 'small q.' स्तोकांशः, अल्पभागः, अल्पं, स्तोकं, अल्पमात्रं; 'in small q. es' अल्पशः, स्तोकांशेन; 'long q.' दीर्घः; short q.' ह्रस्वः; 'known q.' व्यक्तराशिः; 'unknown q.' अव्यक्तराशिः; 'positive, negative, q.' धन-ऋण-राशिः; 'what q. of' कियत्.

Quantum, *s.* परिमाणं, मात्रा, कल्पितभागः.

Quarantine, *s.* गमनागमन-संसर्ग-निषेधः.

Quarrel, *s.* कलहः, कलिः, विवादः, विसंवादः, विप्रतिपत्ति *f.*, वाक्कलहः, वाग्युद्ध, विप्रलापः; द्वंद्वं, वैरं. **-v.** *i.* विवद् 1 A, विप्रलप् 1 P, विसंवद् 1 P, विप्रतिपद् 4 A, वैरायते-कलहायते (D.), कलहं कृ 8 U, युध् 4 A. **-er,** *s.* विवादिन् *m.*, कलहकारी. **-some,** *a.* कलह-कलि-प्रिय, विवादशील, विसंवादिन्, कलह-कलि-पर, कलहकारिन्, युयुत्सु, विवादार्थिन्.

Quarry, *s.* आकरः, ख(खा)नि-नी *f.*, पाषाणस्थानं-भूमि *f.* **2** आभिषं, मार्गितजंतुः. **-v.** *t.* खन् 1 P; *See* **Dig.**

Quartan, *a.* चातुर्थिक.

Quarter, *s.* पादः, तुयः, तुरीयः, अर्धार्धं, तुरीय-चतुर्थ-भागः; a rupee and a q.' सपादरूपकः. **2** दिश्-शा, आशा, काष्ठा, ककुभ्, हरित्; *See* **Direction;** 'in intermediate q.' अपादिशं; 'guardian of a q.' दिक्पालः, लोकपालः; 'guardian elephant of the q.' दिग्गजः, **3** प्र-,देशः, उद्देशः, स्थानं, दिक्-शा, दिग्भागः, दिग्देशः, दिगंतः; 'from various q.s' नानादिग्देशात्, नानादिगंतेभ्यः, नानादिग्भ्यः; 'in every q.' चतुर्दिक्षु. 4 (Q. s) वासः, वसति *f.*, निकेतनं, वासस्थानं, निवेशः, कटकः-कं; 'head q.s' सेनापतिनिवेशः, कटकः. **5** दया, कृपा, जीव-प्राण-दानं; 'give q.' दयां कृ 8 U, अभयं दा 3 U. **6** (Of night) यामः, प्रहरः. **7** मासत्रयं, त्रिमासं, वत्सरपादः; 'to close q.s' बाहूबाहवि, हस्ताहस्ति, मिथःप्रत्यासन्न-*a.*; 'they two came to close q.s' तौ बाहूबाहवि व्यासृजेताम् (Si. XVIII. 12). **-v.** *t.* चतुर्धा विभज् 1 U or खंड् 10 or छिद् 7 P. **2** वस् c., निविश् c. **-v.** *i.* निवस् 1 P, निविश् 6 A, अध्यास् 2 A. **-ly,** *a.* त्रैमासिक (की *f.*), पादिक (की *f.*). **-***adv.* मासत्रयांते, प्रतित्रिमासं.

Quarto, *s.* चतुःपत्रकं.

Quash, *v.* t. मृद् 9 P, पराजि 1 A, पराभू 1 P. **2** खंड् 10, निवृत् c., विलुप् 6 P or c., उच्छिद् 7 P, निरस् 4 U.

Quasi, Ex. by कु, कल्प, देशीय, in comp.

Quaternion, *s.* चतुष्टयं, चतुष्कं.

Quatrain, *s.* चतुष्पदश्लोकः.

Quaver, *v.* *i.* **Tremble,** q. v. **2** भग्नस्वरेणगै 1 P. **-***s.* स्वरभंगः, कंपस्वरः.

Quay, *s.* घट्टः, घट्टी, तीर्थं, उत्तरणस्थानं.

Quean, *s.* *See* **Prostitute.**

Queen, *s.* राज्ञी, महिषी, देवी (title of address), राजपत्नी-महिषी; 'q.'s metal' कांस्यं. **-like, -ly,** *a.* राज्ञीसदृश (शी *f.*), अनुरूप.

Queer, *a.* विलक्षण, असंगत, अपरूप, अद्भुत; *See* **Odd.**

Quell, *v.* *t.* शम् c. (शमयति), प्र-उप-,° निवृत् c., विनश् c., उच्छिद् 7 P. **2** दम् c. (दमयति), वशीकृ 8 U, परा-अभि-भू 1 P, पराजि 1 A.

Quench, *v.* *t.* (Thirst) शम् c. (शमयति), प्र-उप-,° छिद् 7 P, निवृत् c., अपनी 1 P. **2** निर्वा c. (वापयति), प्र-उप्-शम् c. **-ing,** *s.* शमनं, शांति *f.*, वि-,च्छेदः.

Querulous, *a.* दुःखित, परिदेवनाकुल, विलापिन्, परिदेविन्, विलापशील, शोकगर्भ, दुःखात्मक. **-ly,** *adv.* सविलापं. **-ness,** *s.* विलपनशीलता.

Query, *s.* *See* **Question.**

Quest, *s.* अन्वेषणं, अनुसंधानं, मार्गणं, निरूपणं; 'in q. of prey' भक्ष्यार्थं.

Question, *s.* प्रश्नः, अनुयोगः, पृच्छा; 'put a question to' प्रच्छ् 6 P, अनुयुज् 7 A; 'you have put me a good q.' सम्यक् पृष्टोस्मि भवता. **2** जिज्ञासा, निरूपणं, परीक्षा-क्षणं, अनुसंधानं, विचारः-रणा. **3** संदेहः, संशयः, वितर्कः, विकल्पः, आ-,शंका; 'here a q. arises' अत्रेदं प्रष्टव्यं. **4** वि-,वादविषयः-पदं-वस्तु-आस्पदं; विचारविषयः, &c.; 'call in q.' विचर् c., (आज्ञा गुरूणां ह्यविचारणीया R. XIV 46); the topic in q.' प्रस्तुत-प्रकृत-विषयः; 'the q. arose as to &c.' इति-विवादः-प्रश्नः समुपस्थितः. **-***v.* *t.* प्रच्छ्, अनुयुज्, ज्ञा desid. (जिज्ञासते); 'ascetics may be q.ed without reserve' अनियंत्रणानुयोगस्तपस्विजनः (S. 1). **2** परीक्ष् 1 A, निरूप् 10, अनुसंधा 3 U, विचर् c. **3** आशंक् 1 A, न प्रतिइ 2 P, न विश्वस् 2 P, वितर्क् 10, विकल्प् 1 A; *See* **Doubt. -able,** *a.* विचार्य, विशंक्य, शंकनीय, संदिग्ध, शंकार्ह, संदेह-शंका-पदं. **-ably,** *adv.* साशंकं, संदिग्धं. **-ary,** *a.* प्रश्नात्मक. **-er,** *s.* पृच्छकः, प्रष्टृ *m.*, अनुयोक्तृ *m.*, अनुयोगिन् *m.*, जिज्ञासुः. **-less,** *adv.* निःसंशयं, निःशंकं.

Quibble, *s.* वाक्छलं, वक्रोक्ति *f.*, वक्रभणितं, कैतववादः, अप-व्यप-देशः, अपलापः, अपह्नवः. **-***v.* *i.* अपलप् 1 P, वक्रं भण् or वद् 1 P, अपदिश् 6 P, वाक्छलं कृ 8 U. **-er,** *s.* अपलापिन् *m.*, वक्रोक्तिवादिन् *m.* **-ing,** *s.* *See* (*s.*).

Quick, *a.* शीघ्र, त्वरित, द्रुत, क्षिप्र, सत्वर, अविलंबित, तूर्ण; 'q.-wit' प्रत्युत्पन्नधीः-मतिः &c.; 'q. as thought' मनोजवेन, संकल्पस्य त्वरयेव. **2** तीक्ष्ण, सूक्ष्म, तीव्र, शीघ्रग्राहिन्, आशुकारिन्. **3** शीघ्र, शीघ्र-द्रुत-गति, सवेग, चपल; *See* **Sharp. 4** सजीव, चल, स्पंदमान; 'q. with child' चलित-गर्भा, आपन्नसत्त्वा, *See* **Pregnant;** 'be q.', 'q., q.' त्वरस्व, त्वरस्व; 'q.-lime'

चूर्णजलं, तप्तचूर्णं; 'q. sand' अस्थिर-पुलिनं-सैकतं; q.-sight' तीक्ष्ण-सूक्ष्म-दृष्टि *f.*; 'q.-silver' पारदः; *See* **Mercury**, 'q.-witted' शीघ्र-तीक्ष्ण-बुद्धि-मति, प्रत्युत्पन्नमति. **-*adv.* Quickly**, q. v. **-*s.*** मर्मन् *n.*, मर्मस्थानं-देशः; 'piercing to the q.' मर्मस्पृश्-भिद्-च्छिद्-आविध्. **-en**, *v. t.* त्वर् c. (त्वरयति), गतिं वृध् c. **2** जीव् c., सोच्छ्वास-*a.* कृ 8 U, जीवं दा 3 U. **3** उद्दीप् c., उत्तिज् c., शो 4 P, प्ररुच् c., वृध् c.; *See* **Sharpen.** **-*v. i.*** त्वर् 1 A, द्रुततरं गम् or चल् 1 P. **2** जीवित्वं-चैतन्यं-प्राप् 5 P, सजीवीभू. **3** स्पंद् 1 A, चल् 1 P, स्फुर् 6 P **-ening**, *a.* जीवद्, उद्दीपक. **-ly**, *adv.* शीघ्रं, सत्वरं, त्वरितं, तूर्णं, लघु, आशु क्षिप्रं, द्रुतं, अविलंबं, अविलंबितं, चपलं, अरं, शीघ्र-क्षिप्र- द्रुत in comp.; 'going q.' द्रुतगामिन्, शीघ्र-गति. **2** अह्नाय, सपदि, सद्यः; झटिति, अचिरात्, अचिरेणैव. **-nese**, *s.* शीघ्रता, तीक्ष्णता, &c.

Quiescent, *a.* निश्चल, निश्चेष्ट, स्थिर, अचल; विरत, शांत. **-Quiescence**, *s.* निश्चलता, चेष्टाभावः, शांति *f.*, &c.

Quiet, *a.* शांत, प्र-उप-°, निश्चल, अचल, स्थिर, निष्कंप; अक्षुब्ध, अव्याकुल, स्तिमित, निर्वात, निवृत्तवायु, (sea); विरत, विश्रांत. **2** सौम्य, मृदु. अचंड, अनुग्र; *See* **Mild.** **3** स्वस्थ. निर्विघ्न, अबाध, निरुपद्रव, निरुपप्लव, निरुद्वेग, अभंग. **4** निःशब्द, तूष्णीक; 'keep q.' मौनमवलंबस्व, जिह्वां धारय, तूष्णीं भव, जोषमास्स्व. **-*s.*** स्थिरता, निश्चलत्वं, शांति *f.*, शमः, प्र-उप-°, विश्रामः, स्वास्थ्यं, निरुपद्रवता, निर्वातत्वं, अक्षोभः, निरुपप्लवता, &c. **-*v. t.*** सांत्व् 10, प्र-उप-शम् c. (शमयति), निवृत् c., विरम् c., विश्रम् c., स्थिरीकृ 8 U. **-ism**, *s.* शमः, वैराग्यं, निवृत्तिमार्गः. **-ist**, *s.* विरागिन् *m.* **-ly**, *adv.* शांतं, शांत्या, निराकुलं, अव्याकुलं, अक्षुब्धं, स्वास्थ्येन, अनुग्रं, अचंडं; तूष्णीं, निःशब्दं. **-ness, -itude**, *s.* शमः; *See* (*s.*).

Quill, *s.* पक्षः, पर्ण; (for writing) कलमः, लेखनी; (of a lute) रणः, शारिका, कोणः; (of a porcupine) शलं, शललं-ली.

Quilt, *s.* तूला, तूलिका, तूलिकाप्रच्छदः-संस्तरः; प्रच्छदपटः. **-*v. t.*** तूलादिना निबिड् 4 P.

Quinary, *s.* पंचकं. **-*a.*** पंचरूप, पंचक.

Quindecagon, *s.* पंचदशभुजः.

Quinquennial, *a.* पंचवार्षिक (की *f.*), पंचवर्षीय.

Quinsy, *s.* श्लेष्मजा रोहिणी; कंठपाकः.

Quintessence, *s.* सारः, तत्त्वं; *See* **Essence.**

Quintuple, *a.* पंचगुण; पंचविध.

Quip, *See* **Taunt.**

Quire, *s.* गायकगणः.

Quirk, *s.* **Quibble**, q. v. **2** उपालंभः, अवक्षेपः, धिक्कारः. **3** छंदस् *n.*, मनोलौल्यं; *See* **Fancy.** **-ish**, *a.* चपल, लोलमति.

Quit, *v. t.* त्यज् 1 P, हा 3 P, अपास् 4 U, वि-उत्-सृज् 6 P; *See* **Abandon;** अप-सृप् 1 P, निर्गम् 1 P, अप-या 2 P, व्यप-इ 2 P. (with abl.). **2** (Debt) वि-मुच् 6 P or c., शुध् c., निस्तृ c., निरा-अपा-कृ 8 U. **-*a.*** वि-,मुक्त, शोधित, निस्तीर्ण. **-tance**, *s.* निष्कृति *f.*, मोक्षः, शुद्धि *f.*, निस्तारः, मुक्ति *f.*, साधनं; 'q. of a spite' वैरशुद्धिः-शोधनं.

Quite, *adv.* सर्वथा, सर्वशः, साकल्येन, निःशेषं. **2** सु-अति pr.; अत्यंतं, अतीव, भृशं; *See* **Exceedingly.**

Quiver, *s.* तूणः-णी, तूणीरः, निषंगः, इषुधिः, उपासंगः. **-*v. t.*** स्फुर् 6 P, कंप् 1 A, स्पंद् 1 A, वेप् 1 A. **-ed**, *a.* तूणिन्, तूणीरभृत्. **-ing**, *a.* कंपमान, वेपमान, कंपित, स्फुरित, सकंप, चंचल, लोल, चपल. **-*s.*** स्फुरणं, स्पंदनं, कंपः-पनं.

Quixotic, *a.* अद्भुत, विचित्र, असंभव.

Quiz, *s.* उपहासकः, अवक्षेपकः. **-*v. t.*** उप-अव-हस् 1 P, अवक्षिप् 6 P.

Quoit, *s.* चक्रं, वलयः-यं. **-*v.*** चक्रैः क्रीड् 1 P.

Quondam, *a.* पूर्व; *See* **Former.**

Quorum, *s.* निर्दिष्टसंख्या, कार्यनिर्वाहक्षमा संख्या.

Quota, *s.* अंशः, भागः.

Quote, *v. t.* उद्-हृ 1 P, अवतृ c., उपन्यस् 4 U, उद्-धृ 6 P, उदा-हृ, उप-नी 1 P. **-ation**, *s.* उद्धारः, अवतरणं, उद्धारणं, उपन्यासः, उद्धृत or अवतारित-वाक्यं or लेखः.

Quoth, *v.* आह, वदति, &c.

Quotidian, *a.* दैनंदिन (नी *f.*), प्रात्याहिक (की *f.*); अन्येद्युष्क.

Quotient, *s.* फलं, गुण्यः; 'by dividing is obtained the q.' भजनेन लब्धो गुण्यः.

R

Rabbit, शशः, शशकः.

Rabble, *s.* प्राकृताः, पृथक्-प्राकृत-जनाः; नीचाः; प्राकृतगणः.

Rabid, *a.* उन्मत्त, संभ्रांत, विक्षिप्तचित्त, वातुल. **-ly,** *adv.* सोन्मादं, उन्मत्तवत्. **-ness,** *s.* उन्मादः, वातुलता.

Race, *s.* अन्वयः, कुलं, वंशः, संतानः, संतति *f.*, वंशावलि-ली *f.*, गोत्रं. **2** जाति, वर्गः. **3 March,** q. v. **4** चर्या, धावनं. **5** मूलं; 'to run a r.' अहमहमिकया-परस्परजिगीषया-धाव् 1P; 'slow and steady wins the r.' मंदोप्य-विरतोद्योगः सदा विजयभाग्भवेत्, (कूर्मवृत्तिं समास्थाय सर्वत्र विजयी भवेत्); 'r.-course' चर्याभूमि *f.*; 'r.-horse' जवाश्वः, जवनः. **-***v. i* धाव् 1 P; *See* **Run. -ial,** *a.* जातीय, वर्गीय.

Rack, *s.* तीव्रवेदना, यातना, अतिव्यथा; 'put to the r.' अर्द् 1 P or c., संपीड् 10. **2** गवादनी, द्रोणि-णी *f.* **3** संपीडनयंत्रं, प्रमाथ-यातना-यंत्रं; 'r.-and ruin' उच्छेदः. **-***v. t.* अत्यंतं पीड् or व्यथ् c. (व्यथयति), यातना-यंत्रेण पीड् or प्रमथ् c.

Racket, *s.* कोलाहलः, कलकलः. तुमुलरवः, **2** गुलिकाताडनी. **-y,** *a.* तुमुलकारिन्.

Racy, *a.* सरस, रसवत्; तीक्ष्ण-उग्र-रस.

Radiate, *v. i.* निर्गम् 1 P, समंततः प्रसृ 1 P or उद्-इ 2P (rays); स्फुर 6 P, किरणान् विक 6 P or प्रसृ c., दीप् freq. (देदीप्यते). **-ion,** *s.* अंशुप्रसरणं-स्फुरणं, किरणपातनं-विकिरणं. **-Radiant,** *a.* उज्ज्वल, दीप्तिमत्, सुप्रभ, देदीप्यमान, तेजस्विन्; *See* **Bright. -ly,** *adv.* सुप्रभं, अतितेजसा, उज्ज्वलं. **-Radiance,** *s.* प्रभा, दीप्ति *f.*, कांति *f.*, तेजस् *n.*, औज्ज्वल्यं; *See* **Lustre, Light.**

Radical, *a.* मूलं in comp., मौलिक (की *f.*); मौल (ली *f.*). **2** निसर्गज, स्वाभाविक-नैसर्गिक-(की *f.*); *See* **Natural. -ly,** *adv.* समूलं, मूलतः, आमूलं. **2** स्वभावतः, प्रकृत्या, जातितः.

Radish, *s.* मूलकः-कं.

Radius, *s.* त्रिज्या, जीवा; व्यासार्धं, विष्कंभार्धं. **2** (Of a wheel) अरः.

Raff, *s. See* **Rabble.**

Raft, *s.* उडुपं, प्लवः; कोलः, तरंडः.

Rafter, *s.* तुला, दीर्घस्थूणा-काष्ठं, दीर्घदारु, गृहस्थूणा

Rag, *s.* वस्त्रखंडः-डं, पटखंडः, -चीरं, चीवरं, कर्पटः, न(ल)क्तकः. **2** जर्जर-जीर्ण-वस्त्रं, पटच्चरं; 'dressed in r.s' चीरवाससू, परिहितचीर, कर्पटिक. **-ged,** *a.* जीर्ण, जर्जर.

Rage, *s.* संरंभः, मन्युः, रोषः, क्रोधः, प्रकोपः; उत्तापः, संतापः, क्रोधावेशः, अमर्षः. **2** उत्कटेच्छा, लालसा, तीक्ष्णता, उच्चंडता, तीव्रता, उग्रता, तिग्मता. **-***v. i.* नितरां क्षुभ् 4 P, 1 A, कुध्-रुष्-कुप् 4 P, संरंभं-मन्युवशं-गम् 1 P or प्राप् 5 P, क्रोधाकुल-*a.* भू 1 P. **2** उग्र-चंड-तीक्ष्ण -*a.* भू; 'r. on (oh cloud)' गर्ज, गर्जस्तिष्ठ. **-ful,** *a.* क्रोधान्वित, कोपाकुल, रुष्ट; कुपित, जातामर्ष संरंभित. **-ing,** संरंभिन्, उग्र, तीक्ष्ण, तीव्र, उच्चंड, वेगवत्.

Raid, *s.* अवस्कंदः, आपातः.

Rail, *v. i.* अव-आ-अधि-क्षिप् 6 P, अप-भाष् 1 A, अपवद् 1 A, आक्रुश् 1 P, शप् 1, 4 U, गर्ह् 1, 10 A, निंद् 1 P, भर्त्स् 10 A; 'r. ing words' आक्षेपवादः, गर्हणा, निंदा-वचः. **-***v. t.* लोहस्तंभैः परिवृ 5 U or परि-वेष्ट् 1 A or c., निरुध् 7 U. **-***s.* लोहशंकुः-शलाका-तुला; 'r.-way,' 'r.-road' लोह-पथः-मार्गः. **-er,** *s.* अवक्षेपकः, निंदकः, निर्भर्त्सकः, अपवादकः, आक्रोशकः. **-ing,** *s.* लोहावरणं, लोहशलाकावृति *f.* **2** अव-आ-क्षेपः, आक्रोशः, निंदा, निर्भर्त्सना, गर्हणा, अपवादः, उपालंभः, अपभाषणं, तिरस्कारः.

Raiment, *s.* वस्त्रं, वसनं, वाससू *n.*, अंबरं आच्छादनं, वेशः-षः, परिच्छदः; *See* **Cloth, Garment;** 'food and r.' ग्रासाच्छादनं, अन्नवस्त्रं.

Rain, *s.* वृष्टि *f.*, वर्षः-र्षं, पर्जन्यः; 'gentle r.' शीकरासारः; 'heavy r.' अतिवृष्टिः; shower of r.' धारासंपातः, धारासारः; (r.s) वर्षाः *f.* (pl.), प्रावृष् *f.*, वर्ष-मेघ-घन-समयः-कालः, मेघागमः, तपात्ययः, वर्षा, कालः; 'r.-bow' इंद्रधनुस् *n.*, इंद्रचापं- and similar comp.; सरधनुः, इंद्रायुधं; 'r.-fall' वर्ष-वृष्टि-पातः; 'r.-water' वृष्टि-वर्ष-जलं. **-***v. i.* वृष् 1 P, (the subject being 'Indra' 'Sky' or 'Cloud'), जलं सृ or पत् 1 P; 'when it was r. ing gently' मंदं मंदं वर्षति जलधरे-गगने-वासवे, &c.; 'it r. ed in torrents' धारासारैर्वृष्टिर्बभूव; 'to r. off' 'cease to r.' निर्वृष्. **-***v. t.* वृष्, जलं सृ c. **-y,** *a.* वृष्टिमत्, वर्षिन्, प्रावृषिक (की *f.*); 'a r. day' दुर्दिनं; 'r. season' वर्षाः, प्रावृट्; *See* (*s.*).

Raise, *v. t.* उत्-स्था c. (उत्थापयति), in all senses; उत्तुल् 10, उन्नी 1 P, उच्छ्रि 1 U, उत्कृष् 1 P; उत्क्षिप् 6 P, उद्यम् 1 A, उन्नम् c. (नमयति), उद्-हृ-धृ 1 P, उद्-हन् 2 P; आत्मोद्धतैरपि रजोभिः (S. 1) 'r-ed by themselves': आ-अधि-रुह् c.; oft. ex. by उत् in comp.; 'having r. ed

his neck' उत्कंधरः; उन्मुखः &c.; 'r. ing both his arms' बाहू उद्यम्य. **2** उन्नम् c., उत्कृष्, उच्छ्रि, पदवृद्धिं कृ 8 U, प्रतिपत्तिं प्राप् c., उत्कृष्टपदे नियुज् 7 A, 10. **3** (Doubt, anger, &c.) उत्पद् c., जन् c., प्रवृत् c., उत्था c.; *See* **Cause.** **4** वृध् c., *See* **Increase;** (building) निर्मा 3 A, 2 P, रच् 10; (tax) ग्रह् 9 U; *See* **Levy;** 'to r. one's voice' उच्चैः-तारस्वरेण-वद् 1 P; 'r. a cry' उत्कुश् 1 P, उद्-घुष् 10; 'r. dust' रजः उद्धन्, उड्-धू 5, 9 U, 6 P; 'r. a siege' अवरोधं त्यज् 1 P or मुच् 6 P. **-ed,** *a.* उत्थापित, उच्छ्रित, उन्नत, उन्नमित, उद्यत, उत्थित, उद्धत; उत्पन्न, जात, जनित; oft. by उत्, उद्यत, उच्छ्रित in comp.; 'having the arms r.' उद्बाहुः &c. **-ing,** *s.* उत्थापनं, उन्नयनं, उन्नति *f.*, उत्क्षेप., &c.

Raisin, *s.* शुष्कद्राक्षा.

Rake, *s.* विटः, लंपटः, व्यसनिन् *m.*, खंडितवृत्तः; *See* **Libertine.** **2** दंतच्छुरिका-कर्तरिका **-***v. t.* समाहृ 1 P, संग्रह् 9 P, सं-चि 5 U. **2** पुन-र्जीव् c.; उज्जीव् c. **-***v. i.* व्यभिचर्. लंपटवत् आचर् 1 P, भोगासक्त्या आयुः गम् c. **-ish,** *a.* व्यसनिन्, लंपट, भोगासक्त, विषयसुखनिरत.

Rally, *v. i.* एकत्र-सं-भू 1 P, संमिल् 6 P, व्यूहीभू; *See* **Assemble.** **2** (Fig.) सुस्थ-*a.* भू; प्रकृतिं आ-पद् 4 A, प्रकृतौ स्था 1 P, समुत्था, बलं लभ् 1 A. **-***v. t.* एकत्र आनी or समाहृ 1 P, पुनः व्यूह् 1 U or क्रमेण विन्यस् 4 U or विरच् 10. **2 Jest,** q. v.

Ram, *s.* मेषः, उरभ्रः, उरणः, अविः, एडकः, मेढ्रः, उर्णायुः, वृष्णिः, हुडुः, लोमशः; 'a flock of r. s' औरभ्रं. **2** (Sign) मेषः, मेषराशिः. **-***v. t.* बलात्-आतिबलेन् प्र-नि-विश् c. or प्रणुद् c., or संपीड् 10 'R.-rod', 'battering-r.' चूर्णप्रणोदनी यष्टिः.

Ramble, *v. i.* परि-अट् 1 P, परिभ्रम् 1, 4 P; विहृ 1 P, इतस्ततः चर् 1 P or भ्रम्; 'r. ing from the subject' अप्रस्तुतालापः. **-***s.* परिभ्रमणं, पर्यटनं, विहारः, विहरणं. **-er,** *s.* पर्यटनशीलः, पथिकः, भ्रमणकारिन्.

Ramify, *v. i.* शाखाप्रतिशाखारूपेण विस्तृ pass., उपशाखारूपेण विभिद् pass. **-***v. t.* बहुशाखीकृ 8 U. **-ied,** *a.* शाखिन्, सूक्ष्मशाखामय (यी *f.*), शाखाप्रतिशाखारूपेण विस्तीर्ण. **-ication,** *s.* प्र-प्रति-शाखा, सूक्ष्म-उप-शाखा.

Rammer, *a.* मुद्गरः, घनः, अयोघनः,

Rammish, *a.* उग्र-तीक्ष्ण-गंध.

Ramous, *a.* शाखिन्, शाखाबहुल.

Ramp, *v. i.* प्लु 1 A, वल्ग् 1 P. **-***s.* प्लुति *f.*, प्लुतं, वल्गितं; *See* **Leap.** **-Rampant,** *a.* अनियंत्रित, निरवग्रह, निर्यंत्रण, उच्छृंखल. **2** अतिरिक्त, उद्रिक्त, उत्सिक्त, अतिमर्याद. **3** पश्चात्पादयोः स्थित. **-Rampancy,** *s.* अनियंत्रणा, अतिरेकः, उत्सेकः, अतिक्रमः, उत्क्रमः.

Rampart, *s.* प्राकारः, वप्रः-प्रं, वरणः, सालः; *See* **Fence.**

Rancid, *a.* उग्र or तीक्ष्ण-रस or गंध, विरस, पूतिगंधि.

Rancour, *s.* अभिद्रोहः, विद्वेषः, अतिद्वेषः-द्रोहः, अतिमात्सर्यं; *See* **Malice.** **-ous,** *a.* अभिद्रुग्ध, विद्वेषिन्, अति-दीर्घ-द्वेषिन्-द्रोहिन्, द्रोह-मत्सर-बुद्धि. **2** जिघांसु; विषपूर्ण, दंशशील. **-ously,** *adv.* सद्वेषं, अतिद्रोहेण.

Random, *a.* आकस्मिक-यादृच्छिक-(की *f.*), अनियत, अयंत्रित, संधानहीन, दैवादागत, अतर्कितोपनत, सहसा उत्पन्न; 'at r.' अकस्मात्, यदृच्छया, निःसंधानं, अविचार्य, सहसा, असंबद्धं, अनियतं, उच्छृंखलं; अव्यवस्थया, अक्रमेण; 'talk at r.' अक्रमेण जल्प् or वद् 1 P, (जल्पतोरक्रमेण U. 1); 'oh! how he lies at r. carelessly diffused on the ground' हा हा कथं धरणीपृष्ठे निरुत्साहनिःसहं विपर्यस्तः (U. 3).

Randy, *a.* *See* **Disorderly.**

Range, *s.* राजिः, श्रेणिः-णी, माला, पंक्तिः, ततिः, आवलिः-ली, आलिः-ली, वीथिः-थी, (all *f.*). **2** गणः, वर्गः, वर्णः. **3** परिभ्रमणं, पर्यटनं. **4** सोपानं, आरोहणं. **5** विषयः, पथिन् *m.*, गोचरः in comp.; 'beyond the r. of sight' चक्षुर्विषयं-नयनगोचरं अतीत्य or अतीत; 'within the r. of hearing.' श्रुतिपथे-विषये-गोचरे; 'beyond the r.' अविषये, अविषय-विषयातीत-*a.*; 'r. of an arrow' शरपातः, बाणविषयः. **-***v. i.* परिभ्रम् 1, 4 P, विचर् 1 P, विहृ 1 P (for diversion); 'r. about' इतस्ततो भ्रम्, पर्यट् 1 P. **2.** स्था 1 P, वृत् 1 A; *See* **Be.** **-***v. t.* विन्यस् 4 U, क्रमेण रच् 10, व्यूह् 1 U. **-er,** *s.* लुब्धकः, व्याधः. **2** वनग्राहिन् *m.*, वनपालः.

Rank, *s.* श्रेणि-णी *f.*, पंक्ति *f.*, राजि *f.*; *See* **Range, Line.** **2** (Of an army) व्यूहः, दंडः, सैन्यपंक्तिः-विन्यासः. **3** वर्गः, वर्णः, गणः. **4** पदं, स्थानं, आस्पदं, वृत्ति *f.*, स्थिति *f.* **5** प्रतिष्ठा, मानः, गौरवं, उत्कर्षः, उन्नति *f.*, प्रतिपत्ति *f.* प्राधान्यं, उच्च or परम-पदं or पदवी, कुलोत्कर्षः, आभिजात्यं; 'a man of high r.' प्रतिपत्तिमत्, अभिजात, कुलीन, उच्चपदभाक् **-***v. i.* समान-तुल्य-*a.* वृत् 1 A or स्था 1 P; पंक्तिक्रमेण स्था. **-***v. t.* पंक्तिक्रमेण न्यस् 4 U or रच् 10, वर्गक्रमेण रच्; oft. ex. by वर्गे-पक्षे-स्था c. or गण्-कृत्-10, (दृष्टिपातमप्युपकारपक्षे स्थापयंति Ka. 108); 'fit to be r. ed first' धुरि प्रतिष्ठापयितव्य or कीर्त-

नीय. **2** तुल्य-सम-*a.* मन् 4 A. **-***a.* प्रभूत, प्रचुर, विपुल, अतिस्फीत, अतिरिक्त, उद्रिक्त. **2** उग्रगंध, पूतिगंधि, तीक्ष्णगंध. **-ness,** *s.* उद्रेकः, अतिस्फीति-वृद्धि- *f.*, अतिरेकः, प्रचुर-वृद्धिः. **2** उग्रता, तीक्ष्णता.

Rankle, *v.i.* उद्दीप् 4 A; उग्रतर-तीक्ष्णतर- *a.* भू 1 P; oft. ex. by शल्यं; 'those words r. in my heart' तद्वचो मम हृदये शल्यं जातं, शल्यमिव हृदये प्रत्युप्तं; 'I r. in his eyes' अक्षिगतोऽहं तस्य. **2** अंतः पूय् 1 A or पूतीभू; 'the wound r. ed' स प्रहारः करालतां गतः (P. IV. 3).

Ransack, *v. t.* लुंट्-ट् 1 P, 10; *See* **Plunder. 2** निपुणं-सूक्ष्मं-अन्विष् 4 P or मृग् 10 A.

Ransom, *s.* निष्क्रयः; उद्धारः, निस्तारः, मुक्ति *f.*, मोक्षः; निस्तार परिक्रय-मूल्यं. **-***v. t.* मूल्यं-धनं-दत्वा मुच् c. or उद्धृ 1 P or निस्तृ c., निष्क्री 9 U, परिक्री 9 A. **-er,** *s.* निस्तारकः, निष्क्रेतृ *m.*

Rant, *s.* निरर्थक-निरर्गल-प्रलापः, शब्दमात्रं वाक्यं. **-***v. i.* उच्चैः स्वरेण प्रलप् 1 P, शब्द-पांडित्यं कृ 8 U. **-er,** *s.* प्रलापिन् *m.*

Rap, *v. t.* तीव्रं प्रहृ 1 P or तड् 10 or अभिहन् 2 P. **2** अप-,हृ 1 P; ग्रह् 9 U, चित्तं-मनः-आकृष् 1 P or ग्रह्. **-***s.* तीव्र-प्रहारः-आघातः.

Rapacious, *a.* अति-,लुब्धक, अपहारिन्, अपहरणशील, ग्रसनबुद्धि, सर्वहारिन्-ग्राहिन्, साहसिक (की *f.*). **-ly,** *adv.* प्रसह्य, प्रसभं, बलात्; अपहारबुद्ध्या, अतिलोभेन. **-ness,-Rapacity,** *s.* साहसिकता, आततायित्वं, अपहारशीलता, अपहरणबुद्धि *f.* **2** लुब्धता, अतिलोभः.

Rape, *s.* अप-,हरणं. **2** दूषणं, बलात्कारेण-बलात्-रतं-संभोगः; हठसंभोगः, आधर्षः-र्षणं, बलात्कारः, स्त्रीसंग्रहः; 'to commit r.' बलात्कारेण रम् 1 A or अभिगम् 1 P or संगम् 1 A, आधृष् c.

Rapid, *a.* शीघ्र, द्रुत, क्षिप्र, लघु. **-ity,-ness,** *s.* त्वरा, वेगः, तरस् *n.*; द्रुतता. **-ly,** *adv.* शीघ्रं, सत्वरं, द्रुतं; *See* **Quick,-ly** &c. **-Rapids,** *s.* वेगवत् स्रोतस् *n.*

Rapier, *s.* छुरिका, कर्तरिका, क्षुद्रकृपाणः.

Rapine, *s. See* **Plunder, Pillage.**

Rapt, *a.* हर्षोन्मत्त; परमहृष्ट, अत्यानंदित; (for 'wrapt') पर, लीन, निमग्न in comp. **-Rapture,** *s.* हर्षोन्मादः, आनंदातिरेकः, हर्षावेशः, अत्यंतहर्षः, प्रहर्षः, उन्मादः. **-ed,** *a.* हर्षोन्मत्त, उन्मत्त. **-ous,** *a.* उन्मत्त, परमहर्षद, मोहन; 'r. joy' परमानंदः. **-ously,** *adv.* सोन्मादं, परमहर्षेण; *See* **Ecstasy.**

Rare, *a.* विरल, दुर्लभ, दुष्प्राप, अप्राप्य, असुलभ; 'of r. occurrence' विरल, विरल-दृष्ट. **2** अपूर्व, अदृष्टपूर्व, परम, अत्युत्तम, अतुल्य, अत्युत्कृष्ट. **3** विरल, सूक्ष्म, अघन. **-ly,** *adv.* विरलं, क्वचित्, कृच्छ्रेण, कथमपि, कष्टेन, दुर pr.; oft. ex. by (*a.*); 'r. to be found' दुष्प्राप, दुर्लभ; 'r. to be seen' दुर्लभदर्शन. **-ness,** *s.* विरलता, दुष्प्रापता, दुर्लभत्वं. **2** अपूर्वता, अत्युत्तमता. **3** सूक्ष्मता. **-Rarity,** *s.* अपूर्वं वस्तु, चमत्कारः, कौतुकं, दुर्लभवस्तु. **2 Rareness,** q. v. **-Rarefy,** *v. i.* सूक्ष्मी-तनू-विरली-भू 1 P. **-***v. t.* तनूकृ 8 U, विरलीकृ.

Rascal, *s.* धूर्तः, दुर्जनः, जाल्मः, शठः, कितवः, दुरात्मन् *m.*, दुर्वृत्तः, खलः, पापात्मा, निंद्यचरितः, अधम-जघन्य-वृत्तिः. **-ity,** *s.* धूर्तता, दौर्जन्यं, दौरात्म्यं, कतवं, शाठ्यं, खलता, पापवृत्ति *f.*, अधम-नीच-वर्तनं. **-ly,** *a. See* (*s.*).

Rase, *v. t.* प्रमृज् 2 P or c., विलुप् c.; घृष् 1 P, उल्लिख् 6 P. **2** भूमिसात्कृ 8 U; *See* **Raze, Erase -ure,** *s.* प्रमार्जनं, विलोपनं.

Rash, *a.* क्षिप्र-अविमृश्य-असमीक्ष्य-कारिन्, अविवेकिन्, अपरिणामदर्शिन्, साहसिन्, साहसिक (की *f.*), अदूरदर्शिन्, असावधान. **2** (Of acts) असमीक्ष्य &c. कृत; अविमृष्ट, सरभस, साहसिक, अविचार-असमीक्षा-पूर्व; better ex. by 'r.-ly.' **-***s.* **Eruption, Pimple,** q.v. **-ly,** *adv.* असमीक्ष्य, अविमृश्य, सहसा, अविवेकेन, अविचार्य, अनालोच्य, अनवेक्षा-अविवेक-पूर्वं, सरभसं, क्षिप्रं, उत्तापेन, सावेगं. **-ness,** *s.* असमीक्ष्य-अविमृश्य-कारिता, साहसं, अविवेकः, अविचारः, असमीक्षा, अनवेक्षा, रभसः, आवेगः, उत्तापः.

Rasher, *s.* (वल्लूर) खंडः, छेदः.

Rasp, *s.* सं-,घर्षणी. **-***v. t.* घर्षण्या घृष् 1 P.

Rat, *s.* आखुः, मूष(षि)कः, बिलेशयः, उंदुरुः, खनिकः; 'I smell a r.' किमप्यनिष्टं- अशुभं-आशंकते मे मनः. **-***v. i.* कार्यात् अन्यपक्षं अवलंब् 1 A or आश्रि 1 U.

Ratan, *s.* वेतसः, वेणुः, वेत्रः-त्रं, वानीरः, वंजुलः; 'crackling r.' कीचकः.

Rate, *s.* मूल्यं, अर्घः, मूल्य-अर्घ-प्रमाणं, वस्नः, अवक्रयः. **2** मानं, प्र-परि°. **3** वेगः, गति *f.*, गतिमानं-प्रमाणं. **4** नियत-निरूपित-मूल्यं-वेतनं. **5** करः, शुल्कं, बलिः; 'at any r.' येन केन प्रकारेण; तावत्; 'market-r.' आपणिकः; अर्घबलाबलं. **-***v. t.* अर्घं-मूल्यं-निर्णी 1 P or सं-स्था c., (स्थापयति) or निरूप् 10 or सं-ख्या c. **2** प्रमाणं निरूप्; oft. ex. by गण् 10,

मन् 4 A.; *See* **Consider.** **3** निंद् 1 P, उपालभ् 1 A; *See* **Reproach.**

Risible, *a.* हासजनन (नी *f.*), हास्यास्पदं, हासकर (री *f.*), हासोत्पादकं.

Risk, *s.* संशयः, संदेहः, शंका, भयं, संकटं, ' run the r. of losing all ' सर्वनाशसंशये आत्मानं पत् c. **-***v. t.* संशये निक्षिप् 6 P or पत् c.; *See* **Danger.**

Rite, *s.* क्रिया, विधिः, कर्मन् *n.*, कार्यं, आचारः, संस्कारः, नियमः, कल्पः; ' scriptural r. ' शास्त्रविधिः-कर्म, शास्त्रोक्तक्रिया. **-Ritual,** *a.* वैधिक-नैयमिक -(की *f.*), विध्यनुरूप, शास्त्रोक्त, विधि-क्रिया in com . **-***s.* क्रिया-संस्कारः-विधिः-पद्धतिः-शास्त्रं . **-t,** *s.* संस्कारशास्त्रज्ञः.

Rival, *v. t.* स्पर्ध् 1 A, प्रति-परि-°, with instr.), संघृष् 1 P, अहमहमिकया-परस्पर-जिगीषया-यत् 1 A, वि-,जि desid. (जिगीषति); oft. by प्रतिद्वंद्विन्, प्रतिस्पर्धिन्; ' with hands r. ing young foliage (in beauty) ' किसलयोद्भेदप्रतिद्वंद्विभिः करतलैः (S. 4); चंद्रच्छायाप्रतिस्पर्धी or -प्रतिद्वंद्वी &c. **-***a.*, **-***s.* प्रति-,स्पर्धिन्, प्रतियोगिन्, वि-,जिगीषु, प्रतिपक्ष, सपत्न, परस्परसंघर्षिन्, अभिभवेच्छु; by प्रति in comp.; ' r. combatant ' प्रतियोधः; ' r. army ' प्रतिबलं &c.; ' r. woman ' सपत्नी; ' a r. Kesava ' अपरः केशवः, प्रति-केशवः; ' a r. to *Sri* ' प्रत्यादेश इव श्रियाः (V. 1). **-ry,** *s.* प्रतिस्पर्धा, प्रतियोगिता, वि-,जिगीषा, अहमहमिका, प्रतिद्वंद्विता, संघर्षः, सापत्न्यं, प्रतिपक्षता; विरोधः, वैरं.

Rive, *v. See* **Tear.**

River, *s.* नदी, सरित्, सिंधुः, आ(अ)पगा, निम्नगा, तरंगिणी, स्रोतोवहा, तटिनी, ऱ्हादिनी, स्रोतस्विनी, धुनी, शैवलिनी, द्वीपवती, स्रवंती, निर्झरिणी ' a small r. ' कुल्या, अल्प-कृत्रिम-सरित्; ' confluence of r. s ' संभेदः, सिंधुसंगमः; ' watered by r. s ' नदीमातृक.

Rivet, *v. t.* कील् 10, कीलेन बंध् 9 P, दृढं बंध्; अभिनि-विश् c., सस्ज् c.; ' to be r. ed ' कीलित-दृढबद्ध-*a.* भू, सस्ज् 1 U (sight); स्थाने खलु सज्जाति दृष्टिः (M. 1); ' all eyes were r. ed on him ' नेत्रव्रजाः तस्मिन्निपेतुः (R. VI. 7), तस्मिन् दृष्टिः सक्ताभूत्; बध्नाति मे चक्षुः चित्रकूटः (R. XIII. 47), दयिते प्रत्युप्तस्य चक्षुषः (U. 3); आलिखित इव रंगः (S. 1) ' the audience is r. ed (to the spot) with attention,'. **-***s.* कीलः-लकः-कं, शलाका.

Rivulet, *s.* क्षुद्र-कु-सरित् *f.*, अल्प-क्षुद्र-नदी.

Road, *s.* मार्गः, पथिन् *m.*, अध्वन् *m.*, वर्त्मन् *n.*, वीथि-थी *f.*, रथ्या, सरणि-णी *f.*, पदवी, पद्धति-ती *f.*; ' high r. ' राजमार्गः-पथः; ' common r. ' प्रचारः; ' difficult r. ' दुर्गसंचरः, संक्रमः, दुर्गमार्गः; ' dreary, lonely r. ' प्रांतरं, शून्यमार्गः; ' crossing of r. s ' चतुष्पथं, शृंगाटकं; *See* **Way.**

Roam, *v. i.* परि-,अट् 1 P, परि-,भ्रम् 1, 4 P, वि-सं-चर् 1 P; 'r. about' इतस्ततः वि-हृ 1 P or चर् or भ्रम्. **-ing,** *s.* परि-,अटनं, परिभ्रमणं, विचरणं.

Roar, *v. i.* गर्ज् 1 P, स्तन् 1 P, नर्द् 1 P, रस् 1 P, रु 2 P, नद् 1 P, अनु-हुंकृ 8 U (of lion); ' a r . ing river ' घर्घररवा सरित्. **2** वि-आ-उत्-व्याकुश 1 P, प्रणद् घुष् 10; ' r. ing with pain ' आर्तनादं मुंचन्. **-***s.*, **-ing,** *s.* गर्जित, स्तनित, गर्जनं-ना, नर्दनं, विरावः, महा-दीर्घ-गंभीर-शब्दः-नादः; घनध्वनिः, दीर्घरावः-घोषः; हुंकारः. **2** नादः, वि-आ-क्रोशः, निर्घोषः, शब्दः, स्वरः, ध्वनिः.

Roast, *v. t.* भ्रस्ज् 6 P; ' r. on a spit ' शूलाकृ 8 U. **2** तप् 1 P or c., दह् 1 P, **-ed,** *a.* भ्रष्ट, भृष्ट; ' r. on a spit ' शूल्य-

शूलाकृत, भटित्र, शूलसंस्कृत.

Rob, *v. t.* चुर् 10, मुष् 9 P, लुंट्-ठ 1 P, 10, अपहृ 1 P, (with gen. of person). **-ber,** *s.* दस्युः, चो(चौ)रः, स्तेनः, तस्करः, लुंटाकः, मोषकः; *See* **Thief.** **-bery,** *s.* अपहरणं, मोषणं, स्तेयं, चौर्यं, स्तैन्यं, अपहारः, लुंठनं.

Robe, *s.* वसनं, वस्त्रं. *-v. t.* वसनं परि-धा 3 U, वस् 2 A; *See* **Dress.**

Robust, *a.* दृढदेह, व्यूढोरस्क, दृढांग (गी *f*), वज्रदेह, मांसल, सवीर्य, ससत्त्व, उपचित; 'r. body' उपचितं गात्रं, सिंहसंहननं. **-ly,** *adv.* सवीर्यं, ससत्त्वं. **-ness,** *s.* दृढांगता, वीर्यं, मांसलता.

Rock, *s.* स्थूलशिला, शिलोच्चयः, बृहदुपलः, महाप्रस्तरः, शैलः; शिला, पाषाणः, ग्रावन् *m.*, उपलः, अश्मन् *m.*, प्रस्तरः, (small); *See* **Stone,** 'r.-salt' सैंधवः-वं, शीतशिवं, सिंधुजं, माणिमंथं. *-v. t.* दोलनेन स्वप् c. (rock to sleep); दोलयति-आंदोलयति (D.), इतस्ततः प्र-वि-सं-चल् c. *-v. i.* दोलायते (D.), इतस्ततः वि-प्र-चल् 1 P; *See* **Waver.** **-y,** *a.* शिलामय (यी *f.*), शिलापूर्ण, अश्मर, औपल (ली *f.*), (*s.*) in comp.

Rocket, *s.* हंवतारा, अग्निबाणः.

Rod, *s.* दंडः, शलका (of metal) यष्टि *f.*, वेत्रं (of cane.)

Rodent, *a.* दंशक.

Rodomontade, *s.* गर्वितवाक्यं, उद्धतवचनं.

Roe, *s.* मीनांडं, मत्स्यांडं, मत्स्यगर्भः. **2** मृगी, हरिणी.

Rogue, *s.* धूर्तः, कितवः, जाल्मः, शठः, खलः, वंचकः, प्रतारकः, कापटिकः, कूटकः, कूटकारः, दुर्जनः, दुरात्मन् *m.*, कुहकः. **-ery, -ishness,** *s.* कैतवं, शाठ्यं, दौर्जन्यं, वंचनं, &c. **-ish,** *a.* धूर्त, शठ, कितव; *See* (*s.*) **-ishly,** *adv.* धूर्ततया, शाठ्यात्, सकैतवं.

Roisterer, *s.* तुमुलकारिन् *m.*

Role, *s.* भूमिका, कर्मन् *n.*

Roll, *v. i.* वि-लुठ् 6 P, वि-लुड् 1, 4 P, **2** परि-व्या-वि-वृत् 1 A, परि-,भ्रम् 1, 4 P, घूर्ण् 6 P, 1 A; (about) प्र-वि-चल् 1 P, घूर्ण्, वि-लुल् 1 P; 'with eyes r. ing about' घूर्णल्लोचन, लोलाक्ष, विलोलदृष्टि. **3** (On, by &c.) व्यति-इ 2 P, गम् 1 P, अति-व्यति-क्रम् 1 U, 4 P, परि-,आ-वृत्, परि-इ; 'as days r. ed on' दिनेषु गच्छत्सु, गच्छता कालेन; 'a cloud r. s on through the air' मेघः खमाक्रमितुं प्रवृत्तः (Mr. 5); 'which has r. ed out at the feet of the Vindhya' विंध्यापादे विशीर्णो (Me. 19). *-v. t.* व्या-परि-वृत् c., घूर्ण् c., भ्रम् c., &c.; 'r. down' रयेण नी 1 P; 'r. ing down corpses' प्रेतवाहिनी (नदी). **2** लुट्-ठ् c., वि-प्र-°, **3** पिंडीकृ 8 U, संपुटीकृ, संपिंड् 10. **4** आ-परि-वेष्ट् c., अवगुंठ् 10, आ-प्रा-वृ 5 U. *-s.* लुठनं, परिवर्तनं, &c. **2** पिंडः, गोलः-लकः, नाली. **3** नामावलि-ली *f.* **-er,** *s.* परि-,वर्तनी, वर्तनयंत्रं-चक्रं. **2** वेल्लनं-नी (for flour). **3** पटः. **-ing,** *s.* लोठनं, परि-व्या-वर्तनं, घूर्णनं, परि-,भ्रमणं, &c. *-a.* घूर्णत् वि-,लोल, प्रचलित,

Rollic, *v. i.* *See* **Frolic.**

Romance, *s.* आख्यायिका, काल्पितकथा. *-v. i.* आख्यायिकां लिख् 6 P or प्रबंध् 9 P. **-Romantic,** *a.* अद्भुत, विचित्र, आश्चर्यभूत. **2** शूर, विक्रांत; अद्भुतप्रिय, अशृंखलवृत्ति. **3** असंभव, काल्पित.

Romp, *v. i.* प्रगल्भं क्रीड् 1 P, उद्धतं खेल् 1 P, (U. 4). *-s.* उद्धतखेलनं, प्रगल्भ-अविनीत-क्रीडा. **2** प्रगल्भा, अविनीता, निर्लज्जा; क्रीडाशीला.

Roof, *s.* छदिस् *f.*, पटलं; 'the wooden frame of a r.' गोपानसी, वल(ड)भी; 'the edge of a r.' वलीकं, नीध्रं. **2** तालु *n.* (of the mouth). *-v. t.* पटलेन आच्छद् 10. **-ed,** *a.* सपटल, पटलाच्छन्न. **-less,** *a.* निष्पटल; (fig.) निराश्रय.

Rook, *s.* काकः, वायसः. **2** *See* **Cheat,** *s.* **2.** **-ery,** *s.* काकाश्रयः.

Room, *s.* वेश्मन् *n.*, प्र-,कोष्ठः, शाला, कक्षः-क्षा, कुटी, गृहं; 'upper r.' चंद्रशाला, शिरोगृहं; 'inner r.' गर्भागारं, वासगृहं, अंतःकोष्ठः. **2** प्र-,देशः, स्थानं, आस्पदं, भूमि *f.*, पदं; स वासवेन इतो निषीदेति विसृष्टभूमिः (K. III. 2) 'Vasava made r. for him' &c.; 'there is r. for doubt here' शंकास्थानमेतत्. **3** अवकाशः, अवसरः, प्रसरः, विषयः, अंतरं, स्थलं; 'want of r.' अनवकाशः, स्थलसंकोचः; 'giving no r. for envy' अदत्तावकाशो मत्सरस्य; 'make r.' अंतरं दीयतां, अपसर. **4** (Stead) स्थानं, भूमिः; *See* **Instead of.** **-y,** *a.* विशाल, विस्तीर्ण, विपुल, असंबाध, सावकाश.

Roost, *s.* वासयष्टि *f.*, यष्टिनिवासः, निलयन or शयन-दंडः or स्थानं. *-v. i.* शी 2 A, स्वप् 2 P, निली 4 A, निषद् 1 P, आश्रि 1 U.

Root, *s.* मूलं, in all senses; तरुमूलं, कलहमूलं &c.; अंघ्रिः, पादः. (Foot, q. v.); ब्र(ब्र)ध्नः; शिफा, जटा (fibrous); 'bulbous r.' कंदः-दं; 'to the r. s' आमूलं, मूलतः, समूलं; 'the r. of a branch' अवरोहः. **2** अधोभागः-देशः, तलं, मूलं, जाहं in comp. (of animals only). **3** मूलं, बीजं, योनि *f.*, आदिः, निदानं, कारणं, आदिबीजं-कारणं-हेतुः, प्रकृति *f.*; 'having for its r.' मूल, हेतु, &c. in comp.; वित्तमूलः कलहः, &c. **4** (Of a word) मूलं, प्रकृतिः; शब्द-

योनिः; 'r.-meaning' मूलार्थः, यौगिकार्थः, व्युत्पत्तिसिद्धः. **5** (Of numbers) मूलं, पदं; 'to extract a r.' मूलीकृ 8 U. **-***v. i.* 'take r.' मूलं बंध् 9 P. **-***v. t.* दृढं निखन् 1 P or रुह् c.: ex. by 'r.-ed'. **2** (Up) उन्मूल् 10, समुलं उद्-हृ 1 P, उत्पट् 10, उत्खन्, व्यपरुह् c., उच्छिद् 7 P. **-ed,** *a.* दृढ-बद्ध-मूल, रूढ-धृत-मूल.

Rope, *s.* रज्जु *f.*, गुणः, दामन् *f. n.*, शुल्वं, वराटकः-कं, संदानं, वटः-टी-टं; 'the rope and bucket of a well' उद्घाटनं, घटी-यंत्रं; 'r.-dancer' सूत्रायणः, कलायणः; 'r.-ladder' रज्जुसोपानं; 'r.-maker' रज्जुकारः. **-y,** *a.* रज्जुधर्मन्, श्यान, सांद्र.

Rosary, *s.* अक्षमाला, अक्षसूत्रं, जपमाला-सूत्रं.

Rose, *s.* जपापुष्पं, ओड्रपुष्पं; (tree or flower) जपा-वा; सेवती, शतपत्री; 'r.-apple' जंबु-बू *f.*; (fruit) जंबुफलं, जांबवं. **-y,** *a.* पाटल, जपावर्ण. **2** जवारूप. **-Roseate,** *a.* 'r.-coloured' पाटल, जपासवर्ण. **2** बहिः रमणीय, दृष्टिमनोहर.

Rot, *v. i.* पूतीभू 1 P, वि-,गल् 1 P, विली 4 A, दुर्गंध *a.* भू. **-***v. t.* गल् c., विली c., पूतीकृ 8 U. **-Rotten,** *a.* पूतिगंधि, दुर्गंध, विगलित, विलीन; पूतीभूत, दुष्ट, दूषित. **2** क्षीणसत्त्व, असार, निःसत्त्व.

Rotate, *v. i.* भ्रम् 1, 4 P, चक्रगत्या भ्रम्, परिवृत् 1 A; *See* **Revolve. -ion,** *s.* भ्रमणं, भ्रांति *f.*, आ-परि-वर्तः-वृत्ति *f.*, चक्रावर्तः, चक्रगतिः. **2** पर्यायः, क्रमः, आनुपूर्व्यं; 'in r.' पर्यायेण, पर्यायवृत्त्या, चक्रवत्, पर्यायानुसारेण, अनुपूर्वं. **-ory,-Rotary,** *a.* चक्रावर्तिन्, चक्रगति.

Rote, *s.* आवृत्ति *f.*, अभ्यासः, आवर्तनं; 'learn by r.' (अर्थज्ञानं विना) कंठस्थ-*a.* कृ 8 U, अभ्यस् 4 U; 'learnt by r.' कंठस्थ, अभ्यस्त.

Rotund,-ity, *See* **Round,-ness.**

Rough, *a.* नतोन्नत, विषम, असम, अश्लक्ष्ण. **2** रु(रू)क्ष, परुष, कर्कश, कठिन, असृण, असौम्य, अमृदु, दुःस्पर्श; (in disposition) निष्ठुर, उग्र, कटु, कठोर; (in manners) असभ्य, अशिष्ट, असंस्कृत, स्थूल, घन; 'r. measurement' स्थूलमानं. **3** अपटु, अदक्ष, अनिपुण, अकुशल, स्थूल. **4** (Sea) क्षुब्ध, तरंगाकुल, उत्तरंग, वायुक्षुब्ध, पवनाहत. **5** लोमश, लोमावृत, स्थूललोमन्; 'r.-cast' स्थूलं क्लृप् c. or वि-धा 3 U; 'r.-draw' स्थूलं लिख् 6 P; 'r.-hew' स्थूलं तक्ष् 1, 5 P or छिद् 7 P; 'r.-rider' अश्वशिक्षकः. **-en,** *v. t.* रूक्षी-स्थूली-कृ 8 U. **-ly,** *adv.* रुक्षं, परुषं, कर्कशं, स्थूलं, निष्ठुरं, &c. **-ness,** *s.* वैषम्यं, रुक्षता, पारुष्यं, कर्कशत्वं, उग्रता, कठोरता, स्थूलता, अदक्षता; संक्षोभः, ऊर्मि-प्रलोठनं, &c.

Round, *a.* वर्तुल, गोल, वृत्त, वृत्ताकार, निस्तल, मंडलाकार, चक्राकृति, वृत्त-गोल-रूप, वलयाकार. **2** पीन, पीवर, उन्नत. **3** अवक्र, असंदिग्ध, परिस्फुट, निश्चित, परि-च्छिन्न, व्यक्त; *See* **Decided. 4** (Number) समग्र; शून्यांतक. **-***s.* मंडलं, चक्रं, वर्तुलं, गोलः, वलयः-यं. **2** परिभ्रमणं, परिवर्तः, पर्यायः, आवृत्ति *f.*, आवर्तः. **3** वक्रमार्गः-गतिः *f.*; (of a ladder) भंगि *f.*, आरोहणं, सोपानं. **-***prep.* परितः, अभितः, (with acc.); समंततः, समंतात् (with gen.). **-***adv.* परि in comp. (with verbs). **2** चक्रवत्, मंडलाकारेण, वलयरूपेण, चक्ररूपेण; 'turn r.' परिवृत् c., परिभ्रम् c.; 'turning r.' चक्रभ्रांतिः, परिभ्रमणं, मंडलावृत्तिः; 'to get r.' मतं परिवृत् c. **3** सर्वतः, समंततः, समंतात्, विश्वतः, सर्वदिक्षु; 'the whole year r.' समग्रवर्षं. **-***v. t.* वर्तुलीकृ 8 U, गोलीकृ. **2** परिगम् 1 P, परि-या-इ 2 P. **3** समा-धा 3 U; संस्कृ; 'well-r. ed' सुवृत्त; (fig.) सुसमाहित, सुसंस्कृत; 'r.-about' वक्र, कुटिल, असरल; समंततः, अभितः; &c. **-ly,** *adv.* अवक्रं, सपरिच्छेदं, सुव्यक्तं, स्पष्टार्थं. **-ness,** *s.* वृत्तता, गोलत्वं, वर्तुलता, पीनता, अवक्रता, स्पष्टता, &c.

Rouse, *v. t.* (From sleep) वि-प्र-बुध् c., जागृ c., उत्था c. (उत्थापयति), निद्रां भंज् 7 P or भिद् 7 P. **2** उत्पद् c., जन् c., उद्-प्र-बुध् c., उत्तिज् c., उद्युज् 10, उत्था c., उद्दीप् c., प्रोत्सह् c.; 'r. to action' क्षुभ् c., चेष्ट् c., प्रचुद् 10, कार्ये प्रवृत् c. **-***v. i.* **Awake,** q. v. **-***s.* पानोत्सवः, सग्धि *f.*, सपीति *f.*

Rout, *v. t.* भंज् 7 P, वि-द्रु c., प्र-वि-ध्वंस् c., प्र-पलाय c. **-***s.* भंगः, विध्वंसः, विद्रावः, सैन्यभंगः, व्यूहभेदः, बलव्यसनं. **2** जनसंमर्दः; *See* **Mob. 3** कोलाहलः, तुमुल-रवः, कलकलः. **-ed,** *a.* विद्रावित, भग्न, प्रपलायित; भग्नव्यूह, उत्पिंजल, समुत्पिंज, कांदिशीक.

Route, *s. See* **Road.**

Routine, *s.* क्रमः, पर्यायः, अभ्यासः; 'daily r.' दिनक्रमः, दैनिककार्यपरिपाटी-परंपरा; 'r.-work' नित्यकर्मन् *n.* 'usual r.' नित्य-क्रमः, नित्याभ्यासः.

Rove, *v. i.* पर्यट् 1 P, परि-,भ्रम् 1, 4 P, प्र-वि-चर् 1 P. **-er,** *s.* परिभ्रमकः, पर्यटनकृत् *m.*, भ्रमणशीलः. **2** दस्युः, चौरः. **-ing,** *s.* परि-,भ्रमणं-अटनं, विचरणं.

Row, *v. t.* (नौदंडेन) वह् c., प्रेर् c., संचल् c., प्रचुद् 10, प्रणुद् c. **-***v. i.* नौकां वह् c. or प्रेर् c. &c. **-***s.* राजिः, पंक्तिः, श्रेणिः-णी, आवलिः-ली, ततिः, माला, (all *f.*); *See* **Line. 2** कलहः, संमर्दः, तुमुलरवः, कोलाहलः.

-er, *s.* नाविकः, पोतवाहः, क्षेपणिधरः, दंडधरः.

Rowdy, *a.* दुर्दांत. **2** कलहप्रिय.

Rowel, *s.* कंटकः.

Royal, *a.* राजकीय, राजयोग्य, राजार्ह, नृपोचित; राज-नृप in comp. **-ist**, *s.* राजपक्षीयः, राजपक्षावलंबिन् *m.* **-ly**, *adv.* राजवत्, नृपोचितं. **-ty**, *s.* राजत्वं, राजमहिमन् *m.*, राजाधिकारः, नृपत्वं, प्रभुत्वं, आधिपत्यं, ऐश्वर्यं.

Rub, *v. t.* घृष् 1 P, मृज् 9 P or c. **2** प्र-परि-मृज् 2 P or c., प्रक्षल् 10, निज् 3 U, परिष्कृ, श्लक्ष्णीकृ 8 U. **3** चूर्ण् 10, पिष् 7 P, क्षुद् 7 P. **3** अभि-,अंज् 7 P, दिह् 2 U, लिप् 6 P, मृद्. **5** (Feet) संवह् c., मृद्; 'r. together' संपिष्, संघष्; 'r. the teeth together' दंतैर्दंतान् घृष् or निष्पिष्; 'r. out' अप-व्या-मृज्, व्यामृश् 6 P or c., विलुप् c., उच्छिद् 7 P. **-***v. i.* सं-घट्ट् 1 A, संघष्. **2** संघर्षेण अपचि-क्षि-pass. or अवसद् 1 P **3** कृच्छ्रेण सं-उत्-तृ 1 P, अति-इ 2 P. **-***s.* घर्षणं, अभ्यंजनं, संवाहनं, मर्दनं, &c. **2** संघट्टः, समाघातः, संमर्दः. **3** कृच्छ्रं, कष्टं; *See* **Difficulty**. **-ber**, *s.* घर्षकः, मार्जकः, मर्दकः. **2** (Substance) घर्षकः. **-bing**, *s.* घर्षणं, मर्दनं, &c.

Rubbish, *s.* अवस्करः, उच्छिष्टं, मलं, तुच्छ-निःसार-द्रव्यं.

Rubicund, *a.* आरक्त, पाटल.

Rubric, *s.* व्यवस्था, विधिः.

Ruby, *s.* माणिक्यं, पद्मरागः, शोणरत्नं, लोहितकः. **-***a.* रक्त, पाटल, रक्तवर्ण.

Ruck, *s.* *See* **Crease**.

Rudder, *s.* केनिपातः-तकं, अरित्रं, कर्णः.

Ruddy, *a.* रक्त, अरुण; *See* **Red**.

Rude, *a.* अविनीत, अविनय, वियात, धृष्ट, अमर्याद, उद्धत, सप्रतिभ, असभ्य, अशिष्ट, अनार्य, दुःशील, नष्टविनय, निर्लज्ज, प्रगल्भ. **2** असंस्कृत, अशिष्ट, ग्राम्य, अकृतविद्य, अप्रबुद्ध, अनक्षर, अशिक्षित, विद्याहीन-शून्य. **3** स्थूल, अदक्ष, अनिपुण, अपटु, रूक्ष. **-ly**, *adv.* अविनयेन, धृष्टवत्, प्रगल्भं, स्थूलं, अशिष्टतया, &c. **-ness**, *s.* अविनयः, वैयात्यं, धार्ष्ट्यं, अमर्यादा, प्रागल्भ्यं, प्रतिभा, अनार्यता, अदाक्षिण्यं. **2** असंस्कारः, अशिष्टता, ग्राम्यता. **2** स्थूलता, अदाक्ष्यं, &c.

Rudiment, *s.* उपक्रमः, प्रारंभः, मूलं, प्रथम-मूल-तत्त्वं; 'r.s of knowledge' ज्ञान-तत्त्वानि, ज्ञानमूलं, उपक्रमणिका. **2** मूलांगं, बीजं, मूलं, मूलवस्तु-द्रव्यं. **-al**, **-ary**, *a.* प्राथमिक-मौलिक-(की *f.*), मूल-प्रथम-आदि in comp.

Rue, *v. t.* अनुशुच् 1 P, अनुतप् 4 A; *See* **Repent**, **Regret**, *s.* ब्राह्मी. **-ful**, **-***s.* अनुशोकाकुल, अनुतापार्त, शोकार्त, विषण्ण, उद्विग्न.

Ruffian, *s.* आततायिन् *m.*, साहसिकः, वधोद्यतः

Ruff, **Ruffle**, *v. t.* संकुच् 1 P, आकुंच् c., पुटीकृ 8 U, चूर्ण् 10; 'r. up' प्र-सं-क्षुभ् c., प्रकुप् c., व्याकुलीकृ, उद्विज् c.; 'not r. ed in disposition' प्रकृतिगंभीर, शांतात्मन्. **-***s.* भंगि *f.*, ऊर्मि *f.*, पुटः, चूर्णः. **2** प्र-सं-विक्षोभः, प्रकोपः, व्याकुलत्वं, उद्वेगः, संभ्रमः, अशांति *f.* **-ed**, *a.* सं-,क्षुब्ध, क्षोभित, प्रकोपित, आकुल, व्याकुल, व्यग्र, अस्थिर, संभ्रांत, अशांत, उद्विग्न, कातर, पारिप्लव.

Rug, *s.* कंबलः, रल्लकः; आस्तरः-रणं.

Rugged, *a.* विषम, नतोन्नत. **2** रु(रू)क्ष, कर्कश; *See* **Harsh**. **-ness**, *s.* वैषम्यं, कार्कश्यं.

Rugose, *a.* वलित.

Ruin, *v. t.* नश् c., वि-प्र-°,प्र-वि-ध्वंस् c., क्षि 5, 9 P or c., वि-,लुप् 6 P or c., उच्छिद् 7 P, हन् 2 P or c. (घातयति); उत्-अव-सद् c., नि-अव-पत् c., उद्-हृ 1 P, (building); 'r. a man' संपत्ति-विभवं-नश् c., परिक्षीण-*a.* कृ. **-***s.* वि-,नाशः, प्र-वि-ध्वंसः, क्षयः, लोपः, विघातः, उच्छेदः, अवसादः, निपातनं, उत्सन्नता, जीर्णता (of a house); 'in r. s' जीर्ण, विशीर्ण, उत्सन्न, जर्जर, जर्जरित. **2** अनिष्टं, अपायः, हानि *f.*, क्षति *f.*, अनर्थः. **3** (Of fortune) परिक्षयः, वित्त-विभव-नाशः, भाग्यक्षयः, ऐश्वर्यनाशः-भंगः-लोपः, परिक्षीणता; 'r. of an army' बलव्यसनं, भंगः, पराभवः, पराजयः; 'to go to r.' परिक्षि-pass., क्षयं-नाशं-या 2 P or -इ 2 P, प्र-वि-ली 4 A; ध्वंस् 1 A; 'r. seize thee' अजीवनिः ते भूयात्; *See* under **Perdition**. **-ed**, *a.* नष्ट, ध्वस्त, क्षीण; अवसन्न, उच्छिन्न, जीर्ण, विशीर्ण, जर्जर, &c. **2** परिक्षीण, नष्टविभव, गतश्रीक, नष्ट or गत-धन or ऐश्वर्य, प्रचलितविभव, क्षीणधन. **-ous**, *a.* उत्सन्न, क्षीण, जीर्ण &c. **2** वि-,नाशिन्, नाशावह, नाश-क्षय-कर (री *f.*), घातुक, अनिष्टोत्पादक. **-ously**, *adv.* सनाशं, सक्षयं, सापायं.

Rule, *v.* प्र-,शास् 2 P, नि-विनि-यम् 1 P, परिपा c. (पालयति), विनी 1 P, गुप् 1 P, ईश् 2 A (with gen.); अध्यास् 2 A, अधि-ष्ठा 1 P; तंत्र् 10; 'r. ing subjects like one's own children' प्रजाः प्रजाः स्वा इव तंत्रयित्वा (S. 5). **2** आदिश् 6 P, वि-धा 3 U, नियमं-विधिं-कृ 8 U, व्यव-स्था c. (स्थापयति); gen. ex. by (*s.*). **3** निग्रह् 9 P, सं-नि-यम्; *See* **Control**. **4**

रेखाभिः अंक् 10. -s. शासनं, अधिकारः, प्रभुत्वं, आधिपत्यं, स्वाम्यं, ईशत्वं, ऐश्वर्यं, राजपालनं. 2 विधिः, नियमः, सूत्रं, व्यवस्था; (moral &c.) मर्यादा, क्रमः, निर्देशः, आ-नि-देशः, प्रचोदनं-ना, शासनं, मार्गः, कल्पः; तत्त्वं (of science); न्यायः 3 प्रमाणं, मानं; 'general r.' उत्सर्गः, सामान्यविधिः; 'r. of action' क्रियाविधिः-मार्गः, 'r. of judicature' व्यवहारविधिः-मार्गः; 'according to the r.' यथाविधि, विधितः; यथान्यायं; 'r. of three' त्रैराशिकं. **-er,** s. शासितृ m., पालयितृ m., शास्तृ m., शासकः, पालकः, अधिष्ठातृ m., अधिपतिः, अधीशः, नियंतृ m., स्वामिन् m., प्रभुः, ईश्वरः; 'under one r.' एकस्वामिक. 2 रेखालेखनी. **-ing,** a. शासत्, नियंतृ, पालक &c. 2 प्रबल, गरिष्ठ, प्रधान, बलिष्ठ; 'r. deity' अधिदेवता, अधिष्ठात्री देवता.

Rum, s. सीधु m. n., आसवः, मैरेयं. -a. असंगत, अपरूप.

Rumble, v. i. रस् 1 P, नद् 1 P, गर्ज् 1 P, गंभीरं स्वन् 1 P or घुष् 1 P. **-ing,** s. गर्जनं, नर्दनं, दीर्घ-गंभीर-नादः-ध्वनिः-घोषः, निर्घोषः; (of clouds) स्तनितं, घनध्वनिः, मेघनादः, &c.

Ruminate, v. i. रोमंथायते (D.); रोमंथं अभ्यस् 4 U, (S. 2). 2 पुनः पुनः ध्यै 1 P or विचर् c., नि-ध्यै desid. (निदिध्यासति). **-ion,** s. रोमंथः; अभीक्ष्णचिंता, निदिध्यासनं. **-Ruminant,** a. रोमंथकर (री f.).

Rummage, v. t. अस्ताव्यस्तीकृत्य सूक्ष्मं अन्विष् 4 P or निरूप् 10.

Rumour, s. जनप्रवादः, किंवदंती, प्रवादः, जनश्रुति f., लोकवादः-वार्ता; *See* **Report.** -v. t. Ex. by (s.); 'it is r. ed' इति किंवदंती श्रूयते, इति जनप्रवादः.

Rump, s. *See* **Hip.**

Rumple, *See* **Fold.**

Run, v. i. धाव् 1 P, द्रु 1 P, प्र-वि-°, शीघ्रं-द्रुतं गम्-चल्-चर् 1 P or या-इ 2 P, रंह् 1 P; (as a fluid) क्षर् 1 P, प्र-,स्यंद् 1 A, गल् 1 P, द्रु, प्र-,स्रु; (as rivers) वह् 1 P, अवतृ 1 P, गम् (सागरं); 'how much has the night yet to r.' कियदवशिष्टं रजन्याः (S. 4). 3 प्र-वि-ली 4 A, द्रवीभू, द्रु. 4 प्रवृत् 1 A, प्रगम्, प्रसृ; *See* **Proceed.** 5 अति-इ 2 P, अतिक्रम् 1 U, 4 P, या 2 P, गम्; *See* **Pass.** 6 (Away) प्र-,पलाय् 1 A, अपसृ 1 P, अपक्रम्; अपया-गम्-धाव्-सृप् 1 P, प्र-वि-द्रु. 7 (As a sore) पूयं स्रु c. or मुच् 6 P. 8 वितन्-विस्तृ pass.; प्रसृ; *See* **Extend;** 'r. to waste' परि-,क्षि pass.; 'r. riot' मर्यादां अति-इ or अति-क्रम्. -v. t. धाव् c.; चल् c.; वह् c. **-about,** इतस्ततो धाव्, वि-परि-धाव्. **-after,** अनुधाव-द्रु-गम्-सृ &c. **-against, at, towards,** अभि-प्रति-उप-धाव्-द्रु, संमुखं गम्. **-down,** (v. t.) गुणान् अपलप् 1 P, अवमृद् 9 P; *See* **Decry, Depreciate.** 2 **Chase,** q. v. **-in,** आ-प्र-विश् 6 P. **-into,** उप-गम्, आ-पद् 4 A, ग्रस् pass.; 'ran into debt' ऋणग्रस्तो बभूव. **-off,** अपसृ, अपक्रम्, अपया; 'till the brook has r. off' यावन्निर्झरस्रोतो नापक्रामति, न तिरोभवति, न क्षीयते. **-on,** (of water) प्र-,वह्. 2 प्रवृत्, प्रसृ. 3 **Prate,** q. v. **-out,** क्षि-अपचि-pass., अवसो-समाप्-pass. **-over,** परिवह्, उपरि स्रु; *See* **Overflow.** **-up,** वृध् 1 A: *See* **Increase.** -s. धावनं, द्रवणं, विद्रवः, पलायनं. 2 गति f.; क्रमः, मार्गः, प्रवृत्ति f. 3 प्रवाहः, स्रावः, प्र-नि-स्यंदः. 4 प्रचारः, प्रसिद्धि f.; प्रचलनं. 5 पर्यंतः, परिमाणं. 6 जलयात्रा, समुद्रपर्यटनं; 'in the long r.' अंते, दीर्घकालादूर्ध्वं; 'the ordinary r. of people' सामान्याः, पृथग्जनाः, प्राकृताः, साधारणजनः. **-ner,** s. धावकः. 2 जांघिकः, जंघाकारिकः, प्र-,जविन् m., तरस्विन् m., त्वरितः, वेगिन् m., जवनः, जवः. **-ning,** s. *See* (s.). -a. धावत्, स्रवत् &c. 2 सपूय, पूयस्राविन् (sore). 3 यथाक्रमं, अनुपूर्वशः. **-Runaway,-Runagate.** s. प्रपलायितः, अपधावितः. 2 युद्धत्यागिन् m., रणविमुखः.

Rundle, s. सोपानं, आरोहणं.

Rung, s. भंगि f., सोपानं, आरोहणं, पर्वन् n.

Rupture, s. भेदः, स्फोटनं, भंगः. 2 भेदः, कलहः, स्नेहभंगः-भेदः, सुहृद्भेदः. 3 अंत्रवृद्धि f.-स्रंसः. -v. t. भंज् 7 P, भिद् 7 P, स्फुट् c.

Rural, a. ग्राम्य, जानपद (दी f.), ग्रामीय, ग्रामीण, ग्राम-जनपद in comp.; 'r. pleasures' ग्रामवाससौख्यं.

Ruse, s. *See* **Pretext.**

Rush, v. i. वेगेन-तरसा-धाव् 1 P or गम्-पत्-चल् 1 P, सवेगं प्रया 2 P or प्रसृ 1 P; 'r. upon' आक्रम् 1 U, 4 P, आ-अव-स्कंद् 1 P, सवेगं अभिद्रु or आपत्, अभिसृ; युद्धाभिसारिणः चमूपतयः (U. 5) 'r. ing upon (me) for fighting'; 'r. forth' निर्गम्, बहिर्गम्, निःसृ; 'r. headlong' अतिवेगेन-साहसपूर्वं-प्रविश् 6 P. -s. महावेगः, जवः, आवेगः, संरंभः. 2 अतिवेगेन धावनं-आपातः, सवेगावस्कंदः, सरभसाक्रमः. 3 तृणं. 'I do not care a r.' अणुमात्रमपि नोत्सुकः. **-r.-light,** s. तृणप्रकाशः, तृणालोकः,

Russet, a. कपिश, श्याव.

Rust, *s.* किट्टं, मंडूरं, सिंहा(घा)णं-नं, मलं, अयोमलं; कलंकः. **-***v.* कलंकेन-मलेन-आवृ 5 U. **-y,** *a.* मलित, मलीमस; मलावृत, समल, कलंकावृत.

Rustic, *a.* ग्राम्य, ग्रामीय-ण, ग्रामिक (की *f.*), जानपद (दी *f.*), असभ्य, अशिष्ट, अविनीत, प्राकृत. **-***s.* ग्राम्यः, ग्रामीणः, वृषलः, जानपदः. **-ally,** *adv.* ग्रामिकवत्, ग्राम्यजनवत्. **-ity,** *s.* ग्राम्यता, अशिष्टता, असभ्यता.

Rusticate, *v. t.* निर्वस् c., प्र-षि-वस् c. **-***v. i.* प्र-वि-वस् 1 P.

Rustle, *v. i.* मर्मररवं कृ 8 U. **-ing,** *s.* मर्मर-शब्दः, मर्मरः, वस्त्र-पर्ण-स्वनितं.

Rut, *s.* गर्तः-र्ता, चक्रांकः, चक्रमार्गः. **2** मदः, मदजलं; 'in r.' मदजलस्यंदिन्. **-tish,** *a.* मत्त, मदोत्कट.

Ruth, *s. See* **Pity.-less,** *a.* निर्दय, निर्घृण, क्रूर, निष्कृप; *See* **Cruel.**

Ryot, *s.* कृषकः, कर्षकः, कृषीवलः.

S

Sabbath (day), *s.* विश्रामवासरः-दिवसः.

Sable, *a.* श्याम, कृष्ण, कृष्णवर्ण. **-***s.* श्यामकः. **2** कृष्णवेषः.

Sabot, *s.* काष्ठपादुका.

Sabre, *s.* खड्गः, निस्त्रिंशः, चंद्रहासः, कृपाणः.

Sabulous, *a. See* **Sandy.**

Sac, *s. See* **Sack.**

Saccharine, *a.* शार्कर (री *f.*), मिष्ट, मधुर.

Sacerdotal, *a.* पुरोहित in comp.; याजकीय, पौरोहित (ती *f.*).

Sachel, *s.* क्षुद्रकोषः, पुस्तकाधारः, भस्त्रा.

Sachet, *s.* पुटः, कोषः.

Sack, *s.* स्यूतः, प्रसेवः, स्योतः, स्यूनः, शाणपुटः-कोषः, गोणी. **2** लुंठनं, अपहारः, धनादेः अपहरणं; 's.- cloth' शाणपटः-वस्त्रं, वराशिः, स्थूलशाटकः, शाणं. **-***v. t.* लुंठ् 1 P, 10, उपलु 1 A, सर्वस्वं अपहृ 1 P.

Sacrament, *s.* संस्कारः. **-al,** *a.* संस्काररूप.

Sacred, *a.* पुण्य, पवित्र, परि-,पूत, मेध्य, शुचि. **2** अलौकिक-असांसारिक-वैदिक- (की *f.*), (opposed to profane). **3** पूज्य, पूजार्ह; भावितात्मन्. **4** पुण्यार्थक, सुप्रतिष्ठित. **5** अनतिक्रमणीय, अलंघ्य, अभेद्य; दुर्धर्ष, अवध्य (person); 'an ambassador, being considered s., never tells an untruth' सदैवावध्यभावेन दूतो वदति नान्यथा (H. 3); 's. spot' क्षेत्रं पुण्यस्थानं, तीर्थं; 's. grove' पुण्यवनं, तपोवनं; 's. knowledge' निगम-वेद-ज्ञानं, श्रुति-बोधः; 's. writing' वेदः, निगमः, श्रुति *f.*

Sacrifice, *s.* यज्ञः, क्रतुः, अध्वरः, यागः, इज्या, मखः, सवः, होमः, हवनं, इष्टि *f.*, मेधः in comp.: 'horse-s.' अश्वमेधः; 'human s.' नरमेधः-यज्ञः &c.; 'imperial s.' राजसूयः; 'fit for a s.' याज्ञिय, मेध्य. **2** आलंभः, उत्सर्गः, बलिः, उपहारः. **3** व्ययः, उत्सर्गः, परि-,त्यागः, विनि-योगः, समर्पणं; 'even at the s. of one's life' जीवितव्ययेनापि, प्राणपरित्यागेनापि; oft. by instr. alone (आत्मानं सततं रक्षेत् दारैरपि धनैरपि). **-***v. t.* यज् 1 U; हु 3 U, उपहृ 1 P, उत्सर्गार्थं हन् 2 P or बलिं दा 3 U, समा-आ लभ् 1 A (animal); 'he s. a beast to Rudra' पशुना रुद्रं यजते; 'he s. ed a horse' अश्वमेधं ततान, अश्वमेधेन ईजे. **2** परि-,त्यज् 1 P, उत्-सृज् 6 P, हा 3 P, सं-ऋ c. (अर्पयति), विनियुज् 7 A, 10; 's. ing their own interests स्वार्थं परित्यज्य; 'without s. ing their interests' स्वार्थाविरोधेन (Bh. 1. 74). **-er,** *s.* यजमानः, यष्टृ *m.*, याजकः, यज्वन् *m.*, याज्ञिकः, होतृ *m.*. **-Sacrificial,** *a.* यज्ञिय, वैतान (नी *f.*), मेध्य; :यज्ञ in comp.; 's. work' यज्ञकर्म; 's. fire' होमाग्निः, समूह्यः, परिचाय्यः, उपचाय्यः; 's. priest' ऋत्विज् *m.*; *See* **Priest;** 's. session' सत्रं.

Sacrilege, *s.* देवतादूषणं, देवस्वापहरणं, देवस्वचौर्यं, पुण्यवस्तुदूषणं; धर्मलंघनं-लोपः' **-Sacrilegious,** *a.* देवस्वापहारिन्; पुण्यद्रव्य-दूषिन्.

Sad, *a.* विषण्ण, म्लान, शोकाकुल, सोत्कंठ, अवसन्न, उद्विग्न, उत्कंठासंस्पृष्ट, उदासीन, खिन्न, दुर्मनस्, विमनस्. **2** शोचनीय, शोकावह, दुःखद, क्लेशकर (री *f.*), क्लेशप्रद. **3** गंभीर; *See* **Grave;** 'to be s.' खिद्-pass., अव-वि-सद् 1 P, शुच् 1 P, दुर्मनायते (D.). **-den,** *v. t.* विषण्णीकृ 8 U, अव-वि-सद् c., खिद् c.: *See* **Grieve. -ly,** *adv.* सशोकं, सविषादं, सखेदं, सोद्वेगं, म्लानमुखेन. **-ness,** *s.* विषादः, उद्वेगः, अवसादः, उत्कंठा, औदासीन्यं, म्लानि *f*, खेदः.

Saddle, *s.* पर्याणं, पल्ययनं, पर्ययणं. **-***v. t.* पर्याणं आरुह् c. or निविश् c., सज्जीकृ 8 U; 'mounting the s. ed Indrayudha' दत्तपर्याणमिंद्रायुधमारुह्य (Ka. 126); (fig.) भारं नि-धा 3 U or न्यस् 4 U; 's.-horse' वाहाश्वः. **-er,** *s.* पर्याणकारः.

Safe, *a.* सुरक्षित, निराबाध; सुस्थ, क्षेम, अक्षत, निर्व्रण, अजातापाय. **2** निर्भय, अकुतोभय, अभय, निःशंक, भयातीत, आपद्-भयमुक्त. **3** अलंघ्य, दुरासद, दुर्धर्ष; 's. against

enemies ' दुरासदः परैः (R. VIII. 4.). 4 क्षेम्य, भयरहित, क्षेम, निर्भय; ' a s. place ' निर्भयस्थानं, अभयहेतुकं स्थलं; ' sound and s. ' कुशलिन्, निरामय, सुस्थ, अक्षत. -s. लोहपेटिका, लोहमंजूषा; ' s. conduct' अभयदानं-पत्रं; ' s.-guard ' रक्षा, गुप्ति f., रक्षणं; **Pass,** q. v. **-ly,** *adv.* क्षेमेण, निराबाधं, अक्षतं, सक्षेमं, निर्भयं; ' when she is s. brought to bed ' यदा अनघप्रसवा भवति (S. 4). **-ty,** *s.* क्षेमः-मं, स्वास्थ्यं, क्षेमता, अक्षतं, कुशलं, अनामयं. **2** रक्षा-क्षणं, निर्भयत्वं, अभयं, निर्भयं, भय-आपद्-मुक्ति f.; ' to promise s. ' अभयवचनं दा 3 U.

Safflower, *s.* कुसुंभं, वह्निशिखं, महारजनं, कमलोत्तरं.

Saffron, *s.* कुंकुमं, अग्निशिखं, वरं, बाह्लि-(ह्ली)कं, पीतनं, रक्तं, संकोचं, पिशुनं, धीरं, लोहितचंदनं, काश्मीरजन्म. *-a.* कुंकुमवर्ण-राग, अरुण; ' dyed with s. ' कुंकुमाक्त.

Sag, *v. i.* अव-नम् 1 P.

Sagacious, *a.* चतुर, विदग्ध, दूरदृष्टि, मेधाविन्, सूक्ष्मधी, तीक्ष्ण or कुशाग्र-मति or बुद्धि. **-ly,** *adv.* चतुरं, सूक्ष्मधिया, विदग्धतया. **-Sagacity,** *s.* वैदग्ध्यं, चातुर्यं, तीक्ष्ण-मतित्वं, सूक्ष्मधीः-मति f.

Sage, *s.* प्र(प्रा)ज्ञः, विपश्चित् m., तत्त्वविद् m., बुधः, पंडितः, ज्ञानिन् m. **2** ऋषिः, मुनिः. **3** सिद्धः, साधुः, यतिः, सिद्धजनः-पुरुषः, आत्मज्ञः, मुमुक्षुः, ब्रह्मज्ञः. *-a.* प्राज्ञ, पंडित, ज्ञानिन्; *See* **Wise. -ly,** *adv.* पंडितवत्. **-ness,** *s.* प्राज्ञता, पांडित्यं.

Sagittarius, *s.* धनुः, धनूराशिः.

Sail, *s.* वातवस्त्रं-वसनं, नौवसनं-वस्त्रं; ' set s. नावं-पोतं-मुच् 6 P or चल् c. *-v. i.* (Of a boat &c.) वायुना नुद्-चुद्-वह्-प्रेर्-pass. **2** (Of persons) पोतमारुह्य or अध्यास्य प्र-स्था 1 A; नावा or पोतेन गम् or चल् 1 P, नावा तॄ 1 P or प्लु 1 A, जलवर्त्मना गम्-या &c. **3** चल्, सं-वि-सृप् 1 P; 's ing in the air ' विहायसा-नभोवर्त्मना-गच्छन्, नभसि संसर्पन्. **-ing,** *s.* समुद्रयानं. **-or,** *s.* नाविकः, पोतवाहः, नौवाहः, समुद्रगः.

Saint, *s.* मुनिः, साधुः, सिद्धः, सिद्धजनः, ऋषिः, पुण्यजनः; *See* **Sage. -ly,** *a.* विमल, पवित्र, पुण्यात्मन्, परिपूत, अतिपुण्य, सिद्धतुल्य.

Sake, *s.* कारणं, निमित्तं, हेतुः, प्रयोजनं; ' for the s. of ' अर्थे or अर्थं in comp., हेतोः, निमित्तं, कारणात्, with gen. or in comp., कृते (with gen.); *See* **For.**

Sal, *s.* सालः, श्यालः, सर्जः, काश्यः, अश्वकर्णकः, सस्यसंबरः.

Salacious, *a. See* **Lustful.**

Salary, *s.* वेतनं, वृत्ति f., भृति f., मूल्यं; *See* **Hire,** 'monthly s.' मासिकं; 'annual s.' वार्षिकं. **-ied,** *a.* वृत्ति-वेतन-भुज्, कृतवेतन.

Sale, *s. See* under **Sell.**

Salient, *a.* प्रलंब, प्रोच्छ्रित. **2** प्लवग, प्लुतगामिन्. **3** (fig.) मुख्य, प्रधान, विशिष्ट, पुरःस्फुरत्.

Saline, *a.* लवण, क्षार, लवणगुणविशिष्ट; ' s. taste ' लवणरसः; ' s. soil ' ऊषः, क्षारमृत्तिका; ' having s. soil ' ऊषर, ऊषवत्. **-a,** *s.* लवणक्षेत्रं.

Saliva, *s.* लाला, स्रुणि(णी)का, स्यादेनी; ' his mouth emits s. ' वक्त्रं लालायते. **-Salivary, -Salival,** *a.* लालास्राविन्. **-Salivate,** *v. t.* लालां स्रु c. or निःसृ c.

Sallow, *a.* आपीत, पांडुर, विवर्ण; *See* **Pale.**

Sally, *v. i.* निर्गम् 1 P, निष्पत् 1 P, निष्क्रम् 1 U, 4 P, जवेन बहिर्गम्, अभ्यव-स्कंद् 1 P, अभ्या-सद् c. *-s.* निर्गमः, निष्क्रमः-मणं, निःसरणं, आपातः, अभ्यासादनं, अभ्यवस्कंदनं, अवपातः. **2** स्फुरणं, उल्लवनं, उत्पतनं. **3** विलासः, विलसितं, विभ्रमः; ' s. es of wit ' बुद्धिविलासाः; विदग्धालापाः, नर्मालापविभ्रमाः; ' s. of levity ' बुद्धिचापल्यं-चांचल्यं; ' s.-port ' निर्गमद्वारं.

Saloon, *s.* (सुप्रसाधित-) शाला, कोष्ठः.

Salt, *s.* लवणं; (fig.) पिंडः; सफलीकृतभर्तृपिंडः (M. 5) ' who showed that he had not eaten his master's s. in vain '; ' rock-s. ' सैंधवः-वं, शीताशिवं; *See* under **Rock;** ' sea-s. ' अक्षी(क्षि)वं, वाशि(सि)रं; ' black s. ' पाक्यः, बिडं; क्षारं; ' sambhar s. ' रौमकं, वसकं; ' sochal s. ' सौवर्चलः, अक्षं, रुचकं; ' s.-pan ' लवणक्षेत्रं; 's.-petre' यवजः, यवक्षारः, पाक्यः; यवाग्रजः. *-a.* लवण or क्षार-युक्त or मय (यी f.); लवणगुणविशिष्ट, क्षारधर्मक, लवणक्षार in comp. *-v. t.* लवणीकृ 8 U, लवणेन सिच् 6 P or अंज् 7 P. **-ed,** *a.* लवणाक्त, लवणसंसृष्ट, लवणित. **-ish,** *a.* ईषल्लवण. **-ness,** *s.* लवणत्वं, क्षारता.

Saltant, *a.* उत्पतत्, नृत्यत्.

Salubrious, *a.* हित-स्वास्थ्य-कर (री f.), आरोग्यावह, पथ्य, अनामयकर, क्षेम्य, पुष्टिद, हित. **2 Salutary,** q. v.

Salutary, *a.* हित, हित-कल्याण-कर (री f.), -आवह, उपकारिन्, श्रेयस्कर, शुभंकर. **2** पथ्य; *See* **Salubrious.**

Salute, *v. t.* अभि-,वंद् 1 A, अभिवद् 10 A, प्रणिपत् 1 P, प्रणम् 1 P, नमस्कृ 8 U, नमस्यति (D.), सभाज् 10; अभिनंद् 1 P, उपस्था 1 A; 's. in return' प्रतिनंद्, प्रत्याभिनंद्. **2 Kiss,** q. v. *-s.*, **-ation,** *s.* प्रणामः, प्रणति f., प्रणिपातः, अभि-,वंदनं, अभिवादः-दनं, नमस्कारः, नमस्क्रिया, सभाजनं; ' a s. to

thee' नमस्तुभ्यं. **-er,** *s.* अभिवादकः, अभिवंदकः.

Salvage, *s.* सं-,उद्धृतं; उद्धारः, निस्तरणं.

Salvation, *s.* तारणं, उद्धारः, मुक्ति *f.*, मोक्षः, निस्तारः, पापमुक्तिः, ऊर्ध्व-परम-गति *f.* **2** (Generally) परि-,त्राणं, रक्षणं, रक्षा; 'devotional way of s.' भक्तिमार्गः.

Salve, *s.* अंजनं, प्र-अनु-लेपः, उपदेहः. **-***v. t.* अंज् 7 P. **2** उद्धृ 1 P. **3** शम् c. **4** निस्तृ c.

Salver, *s.* रजतभाजनं, रूप्यपात्रं.

Salvo, *s.* *See* **Excuse.**

Same, *a.* तद् (*pron. a.*) with or without एव; अभिन्न, निर्विशेष, अनन्य; सम, समान, तुल्य; *See* **Like;** 'it is the s. Vâsantî' सैव वासंती; ते एव पादपाः; तदेव वनं &c.:(U. 3); gen. by एक, स, सम, समान in comp.; 'of the s. family' सगोत्र; 'sitting in the s. car' एकस्यंदनमास्थितौ; 'of the s. age' समवयस्क; एकरूप, समानजाति, सोदर &c.; 'at the s. time' एकदैव, युगपत्, एक-सम-काले, समं, यौगपद्येन; 'in the s. way' तद्वत्, तथैव, तथा, एवं; 'he is the s. as a father to me' मां प्रति स पितृस्थाने-भूमौ वर्तते, पितृनिर्विशेषः. **-ness,** *s.* ऐक्यं, साम्यं, एकरूपत्वं, सादृश्यं, संवादः, अभेदः, समभावः; 's. of class' सवर्णता, सावर्ण्यं, एकवर्णता.

Sample, *s.* आदर्शः, प्रतिमा, प्रतिरूपं. **-Sampler,** *s.* सूचिकर्मादर्शः.

Sanable, *a.* साध्य.

Sanative, Sanatory, स्वास्थ्यकारिन्, रोगघ्न (घ्नी *f.*), रोगापह.

Sanctify, *v. t.* पवित्रीकृ 8 U, पुण्यीकृ, पापमलं हृ 1 P or क्षल् 10, परि-,पू 9 U, शुध् c., शुचीकृ, पापं-कल्मषं-निर्धू 5, 9 U, 6 P. **2** अनुमंत्र् 10 A, पुण्यकर्मणि विनियुज् 7 A, 10 or निक्षिप् 6 P. **-ication,** *s.* पापहरणं-नाशनं, पवित्रीकरणं. **2 -Sanctitude, Sanctity,** q. v. **-ing,** *a.* शोधक, पावन. **-Sanctity,** *s.* निर्मलता, पवित्रता, पुण्यता, वि-, शुद्धि *f.*, पाप or कल्मष-नाशनं or हरणं, अंतः शुद्धिः शौचं. **2** अलंघनीयता.

Sanctimony, *s.* दंभः, धर्माभिमानः, पुण्य-वेशधारणं; बकवृत्ति *f.* **-ious,** *a.* दांभिन्, दांभिक (की *f.*), पवित्रंमन्य, बकवृत्ति,धर्माभिमानिन्, कपटधर्मिन्. **-iousness,** *s.* दंभः; *See* (*s.*).

Sanction, *v. t.* अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A; अनुशास् 2 P, आदिश् 6 P; प्रमाणीकृ 8 U, दृढीकृ, सत्यापयति-द्रढयति (D.), सत्याकृ. **-***s.* अनुज्ञा, अनुमति *f.*, अनुशासनं, अनुमोदनं, प्रामाण्यं, प्रमाणं, दृढीकरणं, सत्यापनं.

Sanctuary, *s.* शरणं, आश्रय-शरण-स्थानं. **2** पुण्यालयः, देवतागारं, पुण्य-पवित्र-स्थानं. **3** गर्भः, गर्भागारं, गर्भगृहं.

Sand, *s.* वालुका, सिकताः (pl.); 's.-bank' पुलिनं, सैकतं; 's.-glass' वालुकायंत्रं. **-***v. t.* सिकताभिः आवृ 5 U or आकृ 6 P. **-y,** *a.* वालुकामय (यी *f.*), वालुकाकीर्ण, सिकातिल, सैकत (ती *f.*), बहुभिकत; 's. desert' मरुः, धन्वन् *m.* **2** वालुकानिभ; (fig.) अस्थिर, भंगुर, क्षणस्थायिन्, अदृढ.

Sandal, *s.* चंदनः (tree), चंदनं (wood) गंधसारः, मलयजः, भद्रश्रीः; 'white s. wood' तैलपर्णिकं; 'red s.' रक्तचंदनं, तिलपर्णी, पत्रांगं, रंजनं, कुचंदनं. **2** कोशीषी, पादुका.

Sanders, *s.* (Yellow) पीतद्रुमः, काली-(ले) यकः, हरिद्रुः, दार्वी, पचंपचा, दारुहरिद्रा, पर्जनी. **2** (Red) *See* 'red sandal' under **Sandal.**

Sane, *a.* सुस्थ, निरामय, स्वस्थ, प्रकृतिस्थ, कल्य. **2** (In mind) अनुन्मत्त, प्रकृतिस्थ, अवातुल, अनुपहतचित्त, अविप्लुत, अविक्षिप्तचित्त. **-ity,-ness,** *s.* स्वास्थ्यं, अनुन्मादः.

Sang froid, *s.* प्रशांति *f.*, निर्विकारता, प्रसादः, असंभ्रमः.

Sanguiferous, *a.* असृग्वाहिन्.

Sanguinary, *a.* (Of person) रक्त-रुधिर-प्रिय, जिघांसु, मारात्मक, क्रूरचित्त, निष्ठुरचेतस्. **2** रुधिरपातदूषित, रक्तस्रावयुत, बहुरक्त.

Sanguine, *a.* गाढ, उत्कट; *See* **Intense;** चंड, तीक्ष्ण, चंड-तीक्ष्ण-स्वभाव. **2** (Of persons) आशावत्, सुप्रत्याशिन्, अत्याशान्वित, दृढप्रत्यय, जातविश्वास; 'I feel quite s. that' इति मे गाढाशंसा; 's. hope' सुप्रत्याशा, गाढाशंसा, उत्कटेच्छा. **-ness,** *s.* अत्याशा, अत्याशंसा, &c.

Sanies, *s* पूयं; *See* **Pus. -Sanious,** *a.* पूयस्राविन्.

Sanitary, *a.* स्वास्थ्यहित, स्वास्थ्य in comp., आरोग्यकर (री *f.*), आरोग्यावह.

Sap, *s.* सारः, रसः, द्रवः, सत्त्वं, निर्यासः. **-***v. t.* उत्खन् 1 P, समूलं उच्छिद् 7 P or नश् c. **-per,** *s.* खनकः, सौरुंगिकः. **-less,** *a* असार, निःसार, विरस, नीरस, निःसत्त्व **-py,** *a.* रसाढ्य, सरस, आर्द्र, समत्त्व, रसवत्. **-Sapid,** *a.* सुरस, मिष्ट, स्वादु.

Sapling, *s.* बालवृक्षः, वृक्षकः.

Sapient, *a.* प्राज्ञ, प्रज्ञ, ज्ञानपूर्ण; *See* **Wise.**

Saponaceous, *a.* चिक्कण, मेदुर.

Sapor *s.* *See* **Flavour.**

Sapphire, *s.* महानीलः; इंद्रनीलः, नीलः नीलोपलः.

Sarcasm, *s.* अव-आ-क्षेपः, निंदागर्भं वचः परिभाषणं, सनिंद उपालंभः; कटुः उपहासः **-Sarcastic,-al,** *a.* साक्षेप; निंदागर्भ, अरुंतुद, उग्र, कटु, तीक्ष्ण, सावहास, परिभाषिन् सोपालंभ. **-ally,** *adv.* साक्षेपं, सोपालंभं.

Sarcoma, *s.* *See* **Tumour.**
Sarcophagous, *a.* मांसाशिन्, मांसभुज्.
Sardonic, *a.* विकृत, कराल.
Sardonyx, *s.* गोमेदः-दकः.
Sartor, *s.* सू(सौ)चिकः. **-ial,** *a.* सू-(सौ)चिकसंबंधिन्.
Sash, *s.* (अलंकारार्थं) परिकरः, मेखला, कटि-सूत्रं. **2** वातायनकाष्ठं.
Satan, *s.* पिशाचाग्रणीः, पिशाचनाथः. **-ic,** *a.* पैशाच (ची *f.*).
Satchel, *s.* *See* **Sachel.**
Sate, *See* **Satiate.**
Satellite, *s.* उपग्रहः. **2** (सदा-) पार्श्वचरः, अनुयायिन् *m.*, अनुषंगी; नित्यपार्श्ववर्ती.
Satiate, *v. t.* सं-परि-तृप् 5 P or c., अत्यंतं तुष् c., अतितृप्तिं-सौहित्यं-उत्पद् c., परिपूर् 10. **-ed,** *a.* अतितृप्त, परिपूर्णकाम, पर्याप्त-काम, संतर्पित, सं-परि-पूर्ण; सुहित; 'to be s.' सं-परि-तृप् 4 P or तुष् 4 P. **-Satiety,** *s.* तृप्ति *f.*, तर्पणं, सौहित्यं, अतितुष्टि *f.*, -सौ-हित्यं-तृप्तिः; पूर्णकामता, वितृष्णता, परिपूर्ति *f.*
Satin, *s.* चीनांशुकं (s.-cloth).
Satire, *s.* आक्षेपगर्भं पद्यं-गीतं, अवगीतं, सं-क्षेपकविता. **2 Sarcasm,** q. v **-ical,** *a.* उपहासात्मक, सोपहास, साधिक्षेपः *See* **Sarcastic. -ist,** *s.* आक्षेपवादिन् *m.*, **-ize,** *v. t.* साक्षेपं वर्ण् 10, अवगै 1 P, काव्यद्वारा आ-अधि-क्षिप् 6 P.
Satisfy, *v. t.* (Persons) सं-परि-तृप् c., -तुष् c., कामं-इच्छां-पूर् 10 or निवृत् c., तृप्तिं-तुष्टिं-उत्पद् c., सुखयति (D.), प्री 9 P, आराध् c.; सांत्व् 10, प्रसद् c.; (hunger, desire, &c.) शम् c. (शमयति), प्र-उप-,° छिद् 7 P, परि-पूर्, निराकृ 8 U, निवृत् c.: 'child, s. your curiosity' पूरयतु कुतू-हलं वत्सः (U. 4). **2** संदेहं अपनी 1 P, सं-शयं छिद् or हृ 1 P or निरस् 4 U, निरु-त्तरीकृ. **-action,** *s.* सं-परि-तोषः- तुष्टि *f.*, पर्याप्ति *f.*, इच्छापूर्ति *f.*, सौहित्यं, काम-इच्छा-तृप्तिः-निवृत्तिः-शांति *f.* **2** शांतिः, शमनं, निराकरणं, परि-,पूरणं, छेदः, निवृत्तिः, पूर्तिः, तर्पणं. **3** संशयच्छेदः, संदेहनिवृत्तिः-परिहारः. **4** प्रतिफलं, निस्तारः, शुद्धि *f.* **-ied,** *a* तृप्त, तुष्ट, तोषित, तर्पित, पूर्ण-निवृत्त-काम, पर्याप्त-काम, प्रीत, कृतिन्, कृतार्थ, चरितार्थ. **2** छिन्न, पूर्ण, शांत, निवृत्त. **3** छिन्नसंशय, हृत-निरस्त-संदेह; 'to be s.' तुष्-तृप् 4 P, प्री pass. **-ing,** *a.* संतर्पक, संतोषक, तुष्टि-तृप्ति-कर (री *f.*), संशयच्छिद्. **-Satisfactory,** *a.* युक्त, समर्थ, (समर्थमुत्तरं), पर्याप्त, संशय-च्छिद्, संदेहच्छेदिन्. **2** तुष्टिप्रद, संतोष-तृप्ति-तुष्टि-कर. **3** (Atoning) Ex. by प्रमृज् 2 P, निस्तृ c.; *See* **Atone. -ily,** *adv.* सम्यक्तया, वैशद्येन, संशयच्छेदितया, सम्यक्.
Satrap, *s.* मंडलेशः, भोगपतिः.
Saturate, *v. t.* अत्यंतं पूर् 10, आ-परि-पूर्, नि-सिच् 6 P, अतिक्लिद् c. **-ed,** *a.* अति-सिक्त, परिपूर्ण; *See* **Impregnate. -ion,** *s.* अतिसेकः-क्लेदः, परिपूरणं.
Saturday, *s.* शनि-मंद-वासरः.
Saturn, *s.* शनिः, शनैश्चरः, रविसुतः, सौरः-रिः. **-Saturnine,** *a.* मंद, जड-मंद-शीत-प्रकृति, जडस्वभाव. **-Saturnalia,** *s.* शनि-महोत्सवः.
Satyr, *s.* वनदेवता, वन-अरण्य-चरः.
Sauce, *s.* सूपः, तेमनं, निष्ठानं; उपदंशः, व्यं-जनं, उपस्करः; 's.-pan' उखा, पिठरः; *See* **Frying-pan. -Saucer,** *s.* शरावः, पात्रं, आधारः.
Saucy, *a.* धृष्ट, निर्व्रीड, निर्लज्ज, प्रगल्भ, अ-विनीत; सप्रतिभ. **-ily,** *adv.* अविनयेन, धृष्टवत्. **-iness,** *s.* अविनयः, धार्ष्ट्यं, प्रतिभा-भानं.
Saunter, *v. i.* मंदं मंदं परिक्रम् 1 U, 4 P or भ्रम् 1, 4 P, शनैः शनैः विचर् 1 P. **-ing,** *s.* मंदं परिक्रमणं.
Savage, *a.* वन्य, जांगल (ली *f.*), अरण्यज, वन-अरण्य in comp. **2** असभ्य, अशिष्ट, अ-विनीत, असंस्कृत, आचारहीन, अनाचार. **3** क्रूर, हिंस्र, निष्ठुर, निर्दय, दारुण, क्रूरकर्मन्, श्वापद (दी *f.*): 'all of man is s.' पुरुषा नाम निष्ठुराः (Mr. 5.). **-***s.* अशिष्ट-असभ्यजनः. **2** क्रूरकर्मन् *m.*, राक्षसः, दैत्यः, नरपशुः. **3** म्लेच्छः, किरातः, शबरः, यवनः, भिल्लः &c. **-ly,** *adv.* अशिष्टवत्, निष्ठुरं. **-ness,** *s.* अशिष्टता, क्रौर्यं, दारुणता, &c.
Savant, *s.* बुधजनः, पंडितः, विद्वज्जनः; *See* **Learned.**
Save, *v. t.* रक्ष् 1 P, in all senses, परि-, त्रै 1 A, उद्-समुद्-हृ 1 P, धृ 1 P, तृ c., उत्-सं-निः-°, मुच् c., मोक्ष् 10, पापात् मुच् &c. **2** सं-चि 5 U, संरक्ष्, नि-धा 3 U, संग्रह् 9 P, अवशिष् c. **3** निवृत् c., निवृ c., निरुध् 7 U, परिहृ; 'those that were s. ed out of the slain' हतशेषाः, हतावशिष्टाः. **-***prep.* विहाय, मुक्त्वा, वर्जयित्वा; *See* **Except. -ing,** *a.* अव्ययशील, अल्प-व्ययिन्, मितव्यय, असुक्तहस्त. **2** उद्धारक, मुक्तिदायिन्; मोक्षप्रद. **3** विमोचक, विमोचन-हेतुः. **-***s.* रक्षणं, संचयः, संग्रहः, निधानं. **2** संचित-रक्षित-धनं, संचयः. **-Saviour,** *s.* तारकः, त्रायकः, परि-,त्रातृ *m.* रक्षिता, उद्धर्ता, उद्धारकः.
Savour, *s.* स्वादः, रसः, रुचि *f.* **2** गंधः, वासः. **-***v. i.* सरसी-सगंधी-भू 1 P. **2** (Ap-pear like) Ex. by कल्प, प्राय in comp., ईषद्न with abl.; by आ-अव-भास् 1 A; 'it s. s of falsehood' तत् असत्यकल्पं, अनृताभासं, असत्यसंकाशं, असत्यवदाभासते.

-y, *a.* सरस, सुरस, स्वादु; मिष्ट, रसवत्, रुचिकर. **2** सुरभि, सुगंधि.

Saw, *s.* करपत्रं, क्रकचः-चं, पत्रदारणः. **-***v. t.* क्रकचेन पट् 10 or दृ 9 P or c. or छिद् 7 P or अवकृत् 6 P; 's.-dust' काष्ठविदलं; 's.-pit' काष्ठविपाटनमार्गः. **-Sawyer,** *s.* क्राकचिकः, दारुदारणः.

Say, *v. t.* वद्-गद्-भण् 1 P, वच् 2 P, ब्रू 2 U, भाष् 1 A, उदा-व्या-हृ 1 P; उच्चर् c., उदीर् c., आलप् 1 P (words &c.); मंत्र् 10 A; (tell) कथ् 10, आचक्ष् 2 A, आ-,शंस् 1 P, अभि-धा 3 U, आ-ख्या; *See* **Tell;** 'I say' ननु भणामि, ननु ब्रवीमि, ननु simply; (ननु पदे परिवृत्य भण Mr. 5); 'they s.' ex. by किंवदंती, जनप्रवादः, इति श्रूयते; *See* **Report;** 'that is to s.' ex. by नाम. **-ing,** *s.* वचनं, वाक्यं, वचस् *n.*, उक्तं, &c.; भाषितं, भाषणं, उक्ति *f.*, भणितं. **2** आभाणकः, प्रवादः; 'popular s.' जनप्रवादः; 'so runs the popular s.' तथा च लौकिकानामाभाणकः; *See* **Proverb.**

Scab, *s.* कच्छु-च्छू *f.*, पामन् *f.*, पामा; *See* **Itch;** (white eruption) सिध्मं, किलासं. **2** अधमजनः, नरापसदः, हीनः, अपकृष्टः. **-by,** *a.* कच्छुर, वामन, सिध्मल. **-ies,** *See* (s. 1).

Scabbard, *s.* कोशः-षः, पिधानं, आधारः.

Scabrous, *a.* विषमतल, असमपृष्ठ.

Scaffold, *s.* मंचः, इंद्रकोषः. **2** प्रेक्षामंचः. **3** वध्यशिला-स्थानं-काष्ठं, घातस्थानं. **-ing,** *s.* मंचः.

Scald, *v. t.* तप्तजलादिना दह् 1 P. **-***s.* दाहः.

Scale, *s.* तुला, धटः, तुलायंत्रं; 's.-pan' शिक्यं, पार्श्वः. 'goldsmith's s.' एषणीणिका, नाराची. **2** (Of fishes &c.) वल्कः-ल्कं, वल्कलः-लं, शल्कं, शल्कलं; कवचः-चं. **3** फलकः-कं, पत्रं. **4** नि(निः)श्रेणी, अधिरोहि-(ह)णी, सोपानपद्धति *f.*-परंपरा. **5** श्रेणी, परंपरा, आवलि-ली *f.*, माला, पंक्ति *f.* **6** प्रमाणं, परिमाणं; 'on a large scale' स्थूलपरिमाणेन. **7** (In music) ग्रामः. **-***v. t.* आ-आधि-रुह् 1 P, आ-आधि-क्रम् 1 U, 4 P, लंघ् 1 A, 10, अवस्कंद् 1 P. **2** वल्कं निष्कृष् 1 P or निर्हृ 1 P. **-y,** *a.* सशल्क, वल्कावृत; सवल्क, शल्किन्, वल्किन्.

Scalene, *a.* विषमत्रिभुज.

Scall, *s.* *See* **Scab, Itch.**

Scalp, *s.* मस्तकत्वच् *f.*, शिरोग्रत्वच्, शिरोस्थिचर्मन् *n.* **-***v. t.* मस्तकत्वचं अवच्छिद् 7 P or निर्हृ 1 P.

Scalpel, *s.* लघुच्छुरिका.

Scamp, *s.* *See* **Rascal.**

Scamper, *v. i.* वि-द्रु 1 P, जवेन-वेगात्-द्रु or धाव् 1 P or पलाय् 1 A, सवेगं गम् 1 P.

Scan, *v. t.* निपुणं-सूक्ष्मं-निरूप् 10 or निरीक्ष् 1 A or अवलोक् 1 A, 10. **2** (Verses) मात्राः-गणान्-गण् 10 or विभज् 1 U. **-Scansion,** *s.* गण or मात्रा-गणनं or विभागः.

Scandal, *s.* निर्वादः, परि(री)वादः, अपवादः, असूया, अवर्णः, दुर्वर्णः, कौलीनं, आक्षेपः, उपक्रोशः, जुगुप्सा, कुत्सा, निंदा, वाच्यं, वाच्यता, गर्हणं-णा, पैशुन्यं, पिशुनवाक्यं. **2** कलंकः, दूषणं, अपमान-अपकीर्ति-हेतुः. **-ize,** *v. t.* (*s.*) with प्रकाश् c., अप-परि-वद् 1 A, परि-अप्-भाष् 1 A; *See* **Libel. 2 Offend,** q. v. **-ous,** *a.* परि-अप-वादक, आक्षेपगर्भ, परिवादात्मक, असूयक, (*s.*) in comp. **2** गर्हित, निंद्य, कलंककर-अकीर्तिकर-(री *f.*), दूषणीय, कुत्सित. **3** बीभत्स, घृणावह. **-ously,** *adv.* गर्ह्यं, कुत्सितं.

Scant, Scanty, *a.* अपर्याप्त, अप्रचुर, स्वल्प, अविपुल, न्यून, अबहुल, अभूयिष्ठ. **2** संबाध, अविस्तीर्ण, संकट; *See* **Narrow. 3 Miserly,** q. v. **-ly,** *adv.* अपर्याप्तं, स्वल्पं, अप्रचुरं, अल्पमात्रं, स्तोकं. **-ness,** *s.* अप्राचुर्यं, अपर्याप्ति *f.*, स्वल्पता.

Scantling, *s.* काष्ठखंडं.

Scape-Goat, *s.* बलिः.

Scar, *s.* किणः, अंकः, चिह्नं, क्षताचिह्नं, क्षतांकः, व्रणः-णं, क्षतं; (fig.) कलंकः. **-***v. t.* क्षतेन-किणेन अंक् 10. **-red,** *a.* क्षतांकित, किणांक.

Scaramouch, *s.* भंडः, वैहासिकः.

Scarce, *a.* अबहुल, अप्रचुर, अप्रभूत, अपर्याप्त, अविपुल, न्यून, अभूयिष्ठ, स्वल्प. **2** विरल, दुर्लभ, दुष्प्राप, असुलभ; *See* **Rare. -ly,** *adv.* कष्टेन, कथमपि, कृच्छ्रेण, दुःखेन, सकृच्छ्रं, आयासेन, दुर् pr.; oft. by (*a.*); 'one s. gets a good son' दुर्लभो गुणवान् पुत्रः; by न, स्तोकं, 's. touches (walks on) the ground' स्तोकमुर्व्यां प्रयाति (S. 1); 's. a day passed' नैकमपि दिनं व्यतीतं; 's.-when' ex. by एव with loc. abs.; मात्र affixed to *adj.*, or यावन्न-तावत्; उपस्थितेयं कल्याणी नाम्नि कीर्तिते एव (R. 1. 87); प्रविष्टमात्र एवाश्रमं तत्रभवति निरुपप्लवानि नः कर्माणि संवृत्तानि (S. 3); एकस्य दुःखस्य न यावदंतं गच्छामि तावद् द्वितीयं समुपस्थितं (P. 11. 6); oft. by च-च; आपूर्णश्च कलाभिरिंदुरमलो यातश्च राहोर्मुखं &c. (Mal. 9). **-ity,-ness,** *s.* दुर्लभता, दुष्प्रापता, विरलता, अप्राचुर्यं, अपर्याप्ति *f.*, स्वल्पता, न्यूनता, अबाहुल्यं, &c. **2** दुर्भिक्षं, अभावः, दुष्कालः, प्रयामः, नीवाकः.

Scare, *v. t.* त्रस् c., सं-वि-,° भी c., उद्विज् c.; 's. away' भयदर्शनेन वि-द्रु c.; 's.-crow' बिभीषिका, संत्रासनं, भयहेतुः.

Scarf, *s.* चेलकः, सिचयः; उत्तरीयं, चेलं; 's.-skin' बाह्यत्वच् *f.*-चर्मन् *n.*

Scarify, *v. t.* त्वचं-चर्म-उल्लिख् 6 P or छिद् 7 P. **-ication,** *s.* त्वगुल्लिखनं, चर्मच्छेदः.

Scarlet, *a.* शोण, अरुण, सिंदुरवर्ण; 's. fever' उदर्धः.

Scarp, *s.* लंबः. **-v.** *t.* लंबरूपेण निकृत् 6 P.

Scate, *See* **Skate.**

Scath, Scathe, *t.* क्षण् 8 P, अर्द् 1 P or c.; *See* **Harm, Injure. -less,** *a.* अक्षत, अपरिक्षत, क्षतहीन, असंजातव्यथ, निर्व्रण.

Scatter, *v. t.* कॄ 6 P, वि-आ-अवा-प्र-°, प्रसृ c., विक्षिप् 6 P; (away) विश्लिष् c., निर्धू 5, 9 U, विभिद् c.; निरस्, 4 U, अपनुद् 6 P; वि-द्रु c. (army); *See* **Dispel, Disperse. -v. i.** विकॄ pass., दिशि दिशि निर्गम् 1 P or प्र-या 2 P, बहुधा विक्षिप् pass. **-ed,** *a.* प्र-वि-आ-कीर्ण, विक्षिप्त, व्यस्त, प्रसृत, प्रसारित, विनिर्धूत, असंहत, विश्लिष्ट, विभिन्न. **-ing,** *s.* विकिरणं, विक्षेपणं, &c.

Scavenge, *v. t.* सं-मृज् 2 P, 10. **-er,** *s.* संमार्जकः, खलपूः, बहुकरः, मल-अवस्करवाहः.

Scene, *s.* स्थलं, स्थानं, भूमि *f.*; 'the s. lies in Hastinapura' स्थलं हस्तिनापुरं. **2** अपटी; य(ज)वनिका, नेपथ्यं, रंगसज्जा. **3** प्रवेशः. **4** रंगः,-भूमिः,-शाला. **5** दृश्यं, दृग्गोचरं स्थानं, आलोकः, दृक्पातविषयः; oft. by स्थानं, आलोकः, or other words; 'this is indeed a lamentable s.' नन्वनुशयस्थानमेतत् (Mal. 8); रमणीयालोकं तत्स्थानं, &c.; अहो अधिकरणमंडपस्य परा श्रीः (Mr. 9) 'how splendid the s. of (presented by) the Court of Justice'; *See* **Present** also **-Scenery,** *s.* Ex. by भूमिः, स्थानं; *See* above. **2** गृहवृक्षादिरचना, कृत्रिमरचना.

Scent, *s.* गंधः, अधिवासः; 'sweet s.' आमोदः, परिमलः (arising from trituration), सौरभं; *See* **Fragrance;** 'diffusing s.' निर्हारी, समाकर्षी; 'having a sweet s.' सुगंधि, इष्टगंध, सुरभि, घ्राणतर्पण. **2** (Organ) घ्राणं, घ्राणेंद्रियं, घ्राणशक्ति *f.*, 'having a quick s.' तीक्ष्णघ्राण. **-v.** *t.* घ्रा 1 P, उप-आ-°. **2** वास् 10, सुरभीकृ 8 U, भू c., धूप् 1 P, 10. **-ed,** *a.* सु-,वासित, सुरभि, सुगंधि, सुरभीकृत, सामोद, भावित, सगंध. **-less,** *a.* निर्गंध, गंधहीन.

Sceptic, *s.* संदेहभृत् *m.*, हैतुकः, अप्रत्ययिन् *m.*, अविश्वासी. **-al,** *a.* हैतुक, अप्रत्ययिन्, संशयात्मन्. **-ism,** *s.* संदेहः, हैतुकता, अविश्वासः.

Sceptre, *s.* दंडः, राजदंडः-वेत्रं-यष्टि *f.* **2** राजाधिकारः, प्रभुत्वं, आधिपत्यं; 'hold the s.' महीं शास् 2 P, *See* **Reign. -ed,** *a.* दंडधर, दंडभृत्; 's. king' अभिषिक्तो राजा.

Schedule, *s.* पत्रं, लेख्यं. **2** परिसंख्या, परिशिष्टं.

Scheme, *s.* उपायः, कल्पना, प्रयोगः, संकल्पः, प्रबंधः, प-,युक्ति *f.* **2** पद्धति *f.*, व्यवस्था; 'secret s.' गूढमंत्रणा, कपटप्रबंधः, कुटिलनयः. **-v.** (मनसा) परि-,कल्पृप् c., उपायं चिंत् or युज् 10. **-ing,** *a.* कुटिलनयनिष्णात, युक्तिमत्, विदग्ध; अनुसंधायिन् (in a good sense).

Schism, *s.* भेदः, शाखा, धर्म-मत-भेदः. **-atic,** *a.* मतभेदमूलक.

Scholar, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*; *See* **Pupil;** 's. of a s.' प्रशिष्यः. **2** वृत्तिभुज् *m.*, वृत्तिभाक्. **3** पंडितः, कृतविद्यः, विद्वान्; *See* **Learned, Wise. -ly,** *a.* पंडितोचित, पांडित्यद्योतिन्. **-ship,** *s.* पांडित्यं, वैदुष्यं, विद्या. **2** वृत्ति *f.*, वेतनं.

Scholiast, *s.* टीकाकारः, टीकाकृत् *m.*, वृत्तिभाष्य-कारः. **-Scholium,** *s.* टीका, भाष्यं, वृत्ति *f.*

School, *s.* विद्यालयः, विद्यागारं-गृहं-मंदिरं, पाठशाला, अध्ययनस्थानं. **2** शिष्य-छात्र-समूहः. **3** शाखा, संप्रदायः; 's. of philosophy' दर्शनं; 's. boy' बालशिष्यः, युवच्छात्रः; 's.-fellow' सहाध्यायिन् *m.*, सतीर्थः-र्थ्यः, एकगुरुः; 's.-man' तार्किकः, नैयायिकः; 's.-master' आचार्यः, गुरुः, उपदेशकः, उपाध्यायः, पाठशालाधिकृतः-अध्यक्षः. **-v.** *t.* शिक्ष् c., वि-नी 1 P, अधि-इ c. (अध्यापयति); *See* **Instruct. -ing,** *s.* शिक्षणं, अध्यापनं, उपदेशः. **3** गुरुदक्षिणा, शिक्षामूल्यं.

Schooner, *s.* द्विकूपका नौः.

Sciatica, *s.* कटिशिरावेदना.

Science, *s.* वि-,ज्ञानं; *See* **Knowledge. 2** विद्या, शास्त्रं. **-Scientific,-al,** *a.* शास्त्रानुरोधिन्, विज्ञान-शास्त्र in comp. **2** कृतविद्य, विद्वस्, आगमिन्, विज्ञानविद्.

Scimitar, *s.* खड्गः, असिः; निस्त्रिंशः, करवालः; *See* **Sword.**

Scintilla, *s.* अणुः,कणः, स्फुलिंगः. **-v. i. -te,** स्फुलिंगान् मुच् 6 P or उत्क्षिप् 6 P; 'a blazing fire will s. in all directions' अग्निर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन् (S. B. 109). **2** स्फुर् 6 P, भ्राज् 1 A, प्रकाश् 1 A; *See* **Shine. -tion,** *s.* स्फुरणं; अग्निकणः, स्फुलिंगनिर्गमः; 'in the state of s.' स्फुलिंगावस्थ *a.*

Sciolist, *s.* पल्लवाग्राहिपंडितः, किंचिज्ज्ञः, (शास्त्र-) चुंचकः. **-Sciolism,** *s.* पल्लवाग्राहिज्ञानं, किंचिज्ज्ञता.

Scion, *s.* नवपल्लवः; किसलयः, अंकुरः, प्ररोहः. **2** वंश्यः, वंशजः; 'the s. of the family of some one' कस्यापि कुलांकुरः (S. 7.)

Scirrhus, *s.* मांसग्रंथिः.

Scissors, *s.* कर्तरी, खंडधारा, कर्तरिका, कृपाणी, छेदनी.

Scoff (at), *v.* अव-उप-हस् 1 P, अव-आ-अधि-क्षिप् 6 P, अव-ज्ञा 9 U, तिरस्कृ 8 U, धिक्कृ, अवमन् 4 A, परिभू; *See* **Contemn, Mock. -ing,** *s.* अव-उप-हासः, अव-अधि-क्षेपः, अवज्ञा, अवमानः, धिक्कारः. **-ingly,** *adv.* सोपहासं, साक्षेपं.

Scold, *v. t.* निर्-,भर्त्स् 10 A, परुषं निंद् 1 P, आक्रुश् 1 P, आ-अधि-क्षिप् 6 P, गर्ह् 1, 10 A, अप-परि-भाष् 1 A, उपालभ् 1 A; *See* **Reproach. -s.** कर्कशा, दुर्मुखी, कैकेयी, वक्रशीला. **-er,** *s.* निंदकः, भर्त्सकः. **-ing,** *s.* भर्त्सनं-ना, निंदा, उपालंभः, आक्रोशः. परिभाषणं, &c.

Sconce, *s.* दंडः. **2** आश्रयस्थानं, शाला, आश्रयः. **3 Fort,** q. v. **4** दीपाधारः. **-***v. i.* दंड् 10; *See* **Fine.**

Scoop, *s.* दर्वी, कंचि-ची *f.*; *See* **Ladle. 2** कोटरः-रं, पुटं. **3** खनित्रं. **-***v. t.* दर्व्या अव-पत् c. or अवतृ c. **2** उत्खन् 1 P, खनि-त्रेण पुटीकृ 8 U.

Scope, *s.* आशयः, अभिप्रायः, हेतुः, अर्थः, तात्पर्यं, उद्देशः. **2** विषयः, प्रसरः. परिमाणं, पर्यंतः, अवधिः, सीमा; 'mind of limited s.' अल्पविषया मतिः (R. 1. 2). **3** अवसरः, अवकाशः; लब्धावकाशा मे प्रार्थना (S. 1) 'has found a s. (for itself)'.

Scorch, *v. t* अभि-सं-तप् 1 P or c., निर्-परि-दह् 1 P, क्लुष् 1 P, भ्रस्ज् 6 P, (in a pan); 's. ed with heat' आतपाक्रांत, 's. ed with the fire of missiles' अस्त्रपावकक्लुष्ट. **-ing,** *a.* दाहक, तापक, अत्युष्ण, अतितिग्म, उच्चंड, प्रखर, नैदाघ (घी *f.*).

Score, *s.* विंशति *f.* **2** अव-,च्छेदः, भंगः, दंतः. **3** रेखा, चिह्नं. **4** गणना, गणनापत्रं-लेखः. **5** विन्यासः (in music). **6** हेतुः, कारणं, निमित्तं; विषयः, अर्थः; 'on that s.' तस्मिन्विषये, तदर्थं; 'on the s. of friendship' सख्यहेतोः &c. **-***v. t.* अवच्छिद् 7 P, दंतुरीकृ 8 U, भंगं कृ. **2** अंक् 10; रेखाभिः अंक्. **3** अभि-,लिख् 6 P, गण् 10; (ऋणं or देयं) गण् or पत्रे लिख् 6 P.

Scoria, *s.* *See* **Dross.**

Scorn, *v. t.* निर्-अव-धू 5, 9 U, तिरस्कृ 8 U, अवज्ञा 9 U, अवमन् 4 A, उपेक्ष् 1 A, परिभू 1 P, न्यक्कृ, धिक्कृ, परुषं निंद् 1 P. **-***s.* (अत्यंत) अवज्ञा, अवमानः, तिरस्कारः, धिक्कारः, परिभवः, उपेक्षा; *See* **Contemn, Contempt. 2** अवलेपः, दर्पः; *See* **Pride. -er,** *s.* अवमंतृ *m.*, तिरस्कर्ता, निंदकः. **-ful,** *a.* सावमान, सावज्ञ; तिरस्कारिन्, अवमानिन्, निंदात्मक; अवज्ञागर्भ; सावलेप, दृप्त. **-fully,** *adv.* सावज्ञं, सावमानं, सावलेपं.

Scorpio, *s.* वृश्चिकः.

Scorpion, *s.* वृश्चिकः, अ(आ)लिः, द्र-(द्रो)णः; 'the sting of a s.' लूभं.

Scot, *s.* करः, देयभागः; : 's.-free' अक्षत, अविकल, निर्व्रण.

Scotch, *v. t.* छेदैः अंक् 10, ईषत् छिद् 7 P. **2** अव-रुध् 7 U.

Scoundrel, *s.* खंडितवृत्तः, जाल्मः, दुरात्मन् *m.*, अधमः, नरापसदः, निकृष्टः, खलः, दास्याः पुत्रः; (in voc.) कार्णेलीमातः; *See* **Rascal.**

Scour, *v. t.* सं-परि-मृज् 2 P or c.; निर्णिज् 3 U, घर्षणेन क्षुद् c., निर्घृष् 1 P. **2 Purge,** q. v. **-***v. i.* (Off, along) द्रुतं-जवेन-शीघ्रं-अपक्रम् 1 U, 4 P or धाव् 1 P or पलाय् 1 A, द्रुतं तॄ 1 P or अतिक्रम्. **-er,** *s.* निर्णेजकः, वस्त्रधावकः. **-ing,** *s.* मार्जनं, निर्णेजनं.

Scourge, *s.* कशा-षा, प्रतिष्कशः-षः, प्रतोदः, ताडनरज्जु *f.*; (fig.) धूमकेतुः, उपप्लवः, उत्पातः, कृतांतः, कालः, पीडकः. **-***v. t.* कशया हन् 2 P or तड् 10 or प्रह् 1 P; 'fit to be s. ed' कश्य. **2** अत्यंतं पीड् 10 or अर्द् 1 P or c.; उप-प्लु 1 A. **-ing,** *s.* कशाघातः, कशाताडनं-प्रहारः.

Scout, *s.* चारः, चरः, प्रणिधिः, अपसर्पः, गूढ-चरः; *See* **Spy. -***v. i.* संचर् 1 P, गूढं-प्रच्छन्नं परचेष्टां निरूप् 10. **-***v. t.* अव-उप-हस् 1 P, सहासं निरस् 4 U or निराकृ 8 U or प्रत्यादिश् 6 P.

Scowl, *s.* भ्रूभंगः, भ्रु(भ्रू)कुटि-टी *f.* **-***v. i.* भ्रुकुटिं बंध् 9 P, कृ 8 U with (*s.*), भ्रुवौ संकुच् 1 P, भ्रूभंगेन दृश् 1 P; *See* **Frown. -ing,** *a.* सभ्रूभंग; 'with a s. look' सभ्रूभंगं, भ्रूवोर्भेदात्.

Scraggy, *a.* रूक्ष, कर्कश; *See* **Rough, Hard. 2** कृश, क्षाम, क्षीण; *See* **Lean.**

Scramble, *v. i.* हस्ताभ्यां धृत्वा-मंदंमंदं आरुह् 1 P. **2** संमर्द-कलहं-कृ 8 U (with dat.); झटिति संग्रह् 9 P, ग्रहीतुं उद्यम् 1 A; 's. ed for water' जलादानार्थं परस्परं संमर्द-मकुर्वन्. **-***s.*, **-ing,** *s.* मंदं मंदं आरोहणं. **2** सरभसग्रहणं, संमर्दः.

Scrap, *s.* खंडः, शकलः-लं, लवः, अंशः; 's. s of what is eaten' फेला, भुक्तसमुज्झितं; उच्छिष्टं, पिंडः; 's.-book' खंडाधारः, द्रव्य-खंडाधारः.

Scrape, *s.* कृच्छ्रं, संकटं, आपद् *f.*, दुर्गं, कष्टं, दुःखं, दुर्गतिं *f.*, दुर्दशा; 'got into a s.'

कृच्छ्रगत, आपद्गत, दुःस्थित. **2** घर्षणं. **-v.** *t.* घृष् 1 P; लिख् 6 P, उत्-वि-°, तक्ष् 1, 5 P, त्वक्ष् 1 P, खुर् 6 P. **3** घर्षणेन प्रमृज् 2 P or निर्णिज् 3 U or अप-नी 1 P or शुध् c.; (with feet) अपस्कृ 6 P. **4** (Together) (कष्टेन or महाप्रयत्नेन) समाहृ 1 P, संचि 5 U, संग्रह् 9 P, एकीकृ. **-er,** *s.* उल्लेखनी, निर्घर्षणी, निर्घर्षणकः. **2** काष्ठकुद्दालः. **-ing,** *s.* घर्षणं, उल्लेखनं, तक्षणं, क्षुरणं. **2** विदलं, तष्टं; अव(प)स्करः, अवकरः, मलं.

Scratch, *v. t.* वि-उत्-प्रोत्-लिख् 6 P, वि-अव-दृ 9 P or c.; छिद् 7 P, निर्भिद् 7 P, खुर् 6 P; ' s. with the nail ' नखेन क्षण् 8 P or अंक् 10 or लिख्. **2** कंडूयति-ते (D.): नखैः घृष् 1 P. **3** (As birds) विष्कृ 6 P, अपस्कृ. **4** ईषत् क्षण् or उल्लिख्. **5 Scrawl,** q. v. **6** (Out,) प्रमृज् 2 P, विलुप् 6 P or c., निर्घृष्, उच्छिद् 7 P, विनश् c.: *See* **Erase.** **-s.** (त्वचः) उल्लेखनं, दारणं, छेदः, भेदः; क्षतं, घर्षणं; व्रणः; ' s. with the nail ' नखक्षतं, नखांकः-व्रणः-पदं. **2** ईषत्क्षतं, त्वग्व्रणः; ' hard s. ' ओरंफः. **-er,** *s.* उल्लेखकः, विदारकः, कंडूयनकः; विष्किरः. **-ing,** *s.* उल्लेखनं, विदारणं, छेदः, &c.; कंडूयनं, कंडूया, कंडूति *f.*

Scrawl, *v. t.* अस्पष्टं-स्थूलं-लिख् 6 P, स्थूलाक्षरैः-अतिक्षिप्रं-लिख्. **-s.,** **-ing,** *s.* अस्पष्ट-स्थूल-लेखः.

Scrawny, *See* **Lean.**

Scream, *v. i.* आ-उत्-वि-क्रुश् 1 P, उच्चैः नद् 1 P or वि-,रु 2 P, वाश् 4 A (of birds): रवं मुच् 6 P, उच्चैः आक्रंद् 1 P, चीत्कारशब्दं कृ 8 U: ' s. with pain ' आर्तवत् रु, आर्तनादं मुच्. **-s.,-ing,** *s.* आक्रंदनं, उत्क्रोशः, चीत्कारः, उच्चनादः-रवः, कोलाहलः, विक्रुष्टं; ' s. of pain ' आर्तरवः-नादः.

Screech, *See* **Scream;** ' s.-owl ' नक्तरावी उलूकः, कालपेचकः.

Screen, *s.* आवरणं, व्यवधा-धानं, तिरस्करिणी, ज(य)वनिका; अंतर्धा-र्धानं, प्रतिसीरा. **-v.** *t.* प्र-,छद् 10, निगुह् 1 U, गुप् 1 P, (crime &c.); नि-आ-सं-वृ 5 U or c., व्यव-धा 3 U, पिधा, अंतर्धा. **2** रक्ष् 1 P; आश्रयं दा 3 U, आश्रयदानेन प्रच्छद्, &c.

Screw, *s.* कर्षणी, व्यावर्तनकीलः. **2** कृपणः, बद्धमुष्टिः. **-v.** *t.* कर्षण्या-कीलकेन-बंध् 9 P. **2** व्या-परि-वृत् c. **3** (Out) निष्पीड् 10, निर्ह 1 P, निष्कृष् 1 P, निर्दुह् 2 U. **4** पीड्, अर्द् 1 P or c., बाध् 1 A, उपरु 1 A.

Scribble, *See* **Scrawl.**

Scribe, *s.* लेखकः, लिपिकारः, अक्षरचणः, कायस्थः.

Scrip, *s.* पुटः, पुटी, क्षुद्रकोषः. **2** लेखः, पत्रं, लेख्यं.

Scripture, *s.* वेदः, श्रुति *f.*, आम्नायः; निगमः. **2** शास्त्रं; ' religious s. ' धर्मशास्त्रं; ' authority of the s. s ' शास्त्रप्रमाणं. **-al,** *a.* शास्त्रसिद्ध-उक्त, श्रुतिविहित, शास्त्र in comp.; ' s. prohibition ' शास्त्रप्रतिषेधः.

Scrivener, *s.* कुसीदः; *See* **Usurer.** **2** लेखकः, लिपिकारः, लेखकवृत्तिः.

Scrofula, *s.* गंड-कंठ-माला. **-Scrofulous,** *a.* गंडमालिन्.

Scroll, *s.* पट्टः, लेख्यं, दीर्घपत्रं-पटः.

Scrotum, *s.* मुष्कः, अंडः, फलं, कोशः-षः, अंड-मुष्क-फल-कोशः-षः, वृषणः.

Scrub, *v. t.* अत्यंतं मृज् 2 P or c. or प्रक्षल् 10 or निर्णिज् 3 U, or घृष् 1 P. **-s.** व्रातीनः, अधम-नीच-जघन्य-वृत्तिः. **-Scrubby,** *a.* तुच्छ, निकृष्ट, हीन; *See* **Mean.**

Scruple, *s.* संदेहः, आ-,शंका, संशयः, विकल्पः. **-v.** *i.* विकल्प् 1 A or c., संदिह् 2 U, शंक् 1 A, वि-आ-परि-°; ex. by ' Doubt ', q. v. **-Scrupulous,** *a.* सरल, ऋजु. **2** सूक्ष्म, निपुण, अतिसूक्ष्म, अतिसूक्ष्म-दृष्टि. **3** साशंक, शंकाशील, आ-,शंकित.

Scrutiny, *s.* निपुणपरीक्षणं, सूक्ष्मनिरूपणं-परीक्षा-दर्शनं, अनुसंधानं, निरूपणं. **-eer,** *s.* सूक्ष्मनिरूपकः. **-ize,** *v. t.* सूक्ष्मं-निपुणं-दृश् 1 P or परीक्ष् 1 A or निरूप् 10, निपुणं अनुसं-धा 3 U or अनुयुज् 7 A or अन्विष् 4 P. **-izer,** *s.* सूक्ष्मनिरूपकः, निपुणपरिक्षकः, सूक्ष्मदर्शिन् *m.*

Scud, *v. i.* अतिवेगेन-सहसा-गम् 1 P or चल् 1 P.

Scuffle, *s.* तुमुलं, नियुद्धं, कलहः, बाहूबाहवि-युद्धं, द्वंद्वं, **-v.** *i.* बाहूबाहवि युध् 4 A.

Scuff, *v. i.* निभते-गूढस्थाने-वृत् 1 A or स्था 1 P, गुप् pass.; ' s. off ' व्यपसृप् 1 P, पलाय् 1 A, अपक्रम् 1 U, 4 P. **-er,** *s.* गुप्तवर्तिन् *m.*

Scull, *s.* कपालः-लं, शिरोस्थि *n.*, करोटि-टी *f.*, कर्परः. **2** क्षुद्रक्षेपणि *f.*; ' s.-cap ' शिरस्कं, मस्तकावरणं.

Scullery, *s.* पात्रक्षालनकुटी.

Scullion, *s.* पात्रक्षालकः-मार्जकः.

Sculptor, *s.* त्वष्टृ *m.*, तक्षकः, तष्टृ *m.*, तक्षन् *m.* **-Sculpture,** *v. t.* तक्ष् 1, 5 P, त्वक्ष् 1 P, उल्लिख् 6 P, प्रतिमां कृ 8 U or निर्मा 3 A. **-s.** तक्षणं, त्वक्षणं, प्रतिमा-मूर्ति-करणं. **2** प्रतिमा, मूर्ति *f.*

Scum, *s.* मंडः-डं; फेनः-णः; ' s. of boiled rice ' निस्रावः, आचामः; *See* under **Rice.** **2** मलं, उच्छिष्टं, अवस्करः, अवकरः; कल्कं, असारद्रव्यं, किट्टं; (fig.) मलं; मलं पृथिव्या वाहीकं (Mah. VIII 45. 23) ' are the s. of the (whole) world. '

Scurf, *s.* शुष्कचर्मन् *n.*, किलासं, सिध्मं; *See* **Itch.** (dry).

Scurrile, Scurrilous, *a.* परुष, तीक्ष्ण; दुरुक्त,अश्लील,अदक्षिण, दुर्वाच्य.**2** कटुभाषिन्, दुर्मुख, मुखर, वाग्दुष्ट. **Scurrility,** *s.* पारुष्यं, मौखर्यं, दुरुक्तं, &c.

Scurvy, *s.* शीतादः, लवणरक्तं. **-***a.* कुत्सित, गर्ह्य, तुच्छ, नीच; *See* **Mean.**

Scutcheon, *s.* कुलीनचिह्नपत्रं, कौलीनकोषः. [1 A.

Scuttle, *s.* करंडः, मंजूषा. **2** छिद्रं. **-***v. i.* त्वर्

Scythe, *s.* लवित्रं, दात्रं, खड्गीकं, शस्यकर्तरिका.

Sea, *s.* सागरः, समुद्रः, उदधिः, अर्णवः, जलधिः, वारिधिः, अपांपतिः; *See* **Ocean;** 'a rough s.' क्षुब्धार्णवः; 's. of worldly existence' भवसागरः, संसारार्णवः; 's. of troubles' क्लेशसागरः, दुःखार्णवः, &c.; 'go to s.' नाविकः-सांयात्रिकः-भू 1 P, नाविकवृत्तिं सेव् 1 A; 'beyond the s. s' द्वीपांतरं-रे; 's.-beat' तरंगाहत; 's.-faring' समुद्रग-यायिन्, सांयात्रिक; 's.-fight' नौयुद्धं; 's.-girt' *See* **Girt;** 's.-green' श्यामहरित, सागरवर्ण; 's.-gull' करंटः; 's.-man' नाविकः, समुद्रगः, पोतवाहः; 's.-port' पोताश्रयस्थानं, पोतशरणं, नौकाश्रयः; 's.-shore' समुद्रतटं-तीरं, वेला, रोधस् *n.*; 's.-sick' समुद्रच्छर्दिष्मत्; 's.-side' समुद्रवेला &c.

Seal, *s.* मुद्रा, (fig. also); 'opening the s. of sleep' क्षिपन्निद्रामुद्रां (Mal. 2); 'open it, preserving the s. and show me' मुद्रां परिपालयन् उद्घाट्य दर्शय (Mu. 5); 's. of the lips' ओष्ठमुद्रा. **2** मकरः, नक्रः **-***v. t.* मुद्रयति (D.). **2** निर्णी 1 P, स्थिरीकृ 8 U, दृढीकृ, दृढयति (D.); 'the defeat in that battle s. ed his fate' पराजयेन तस्य भाविगतिः एकांततः निर्णीता. **2** मुद्रया अंक् 10 or चिह्नयति (D.). **3** (मुद्रया) पि-धा 3 U, बंध् 9 P; मुखं बध्नाति 's. s the lips'. **-ed,** *a.* मुद्रित, कृतमुद्र, मुद्रांकित, मुद्राबद्ध; 's. ing wax' ला(रा)क्षा; *See* **Lac.**

Seam, *s.* संधिः; सीवनं; 's. of planks' काष्ठसंधिः. **2** शुष्कव्रणः. **-y,** *a.* संधियुक्त; 'turn the s. side within' स्वदोषान् प्रच्छादय-निगूह. **-Seamstress,** *s.* सूचिका, सूचिकर्मोपजीविनी.

Sear, *v. t.* निर्दह् 1 P, प्लुष् 1 P; दहनेन दृढीकृ or शुष्कीकृ 8 U. **-***a.* संशुष्क, विशीर्ण, म्लान.

Search, *v.* (For) अन्विष् 4 P, निरूप् 10, अनुसंधा 3 U, मृग् 10 A, मार्ग् 1 P, 10, विचि 5 U, निर्-अव-ईक्ष् 1 A; (fig.) निपुणं परीक्ष् or निरूप्; s. into' निरूप्, परीक्ष्; 's. out' अन्विष्य &c. उपलभ् 1 A or प्राप् 5 P. **-ing,** *s.* अन्वेषणं-णा, मार्गणं, निरूपणं, अनुसंधानं, निरीक्षणं, अन्वीक्षणं; विचयः, जिज्ञासा. **-er,** *s.* अन्वेषकः, अन्वेष्टृ *m.*, निरूपकः, निरीक्षकः; 's. of the human heart' पुरुषांतरविद्. **-ing,** *a.* निपुण, सूक्ष्म, अवहित; 'casting at me a s. look' सुनिपुणं मां विलोक्य.

Season, *s.* ऋतुः, कालः, समयः; (in general) कालः, वेला, समयः, अवसरः, अवकाशः, प्रस्तावः; 'auspicious s.' लग्नं, मुहूर्तः, शुभवेला,-लग्नं; 'in due s.' काले; 'pertaining to the s.' आर्तव (वी *f.*); 'out of s.' अकाले, अनवकाशे; 'in s. and out of s.' कालोऽकालो वा, औचित्यानौचित्यमविचार्य; 'wrong s.' अकालः, अनवकाशः. **-***v. t.* अधि-,वास् 10, उपस्कृ 8 U or स्वादूकृ. **2** पच् 1 P, परिपाकं उत्पद् c., पक्वीकृ; *See* **Mature.** **3** (Accustom) ex. by परिचय, सहिष्णु, &c.; 's. ed to heat' रविकिरणसहिष्णु (S. 2); 's. s the body to exertions' श्रमजयात् तनुं प्रगुणां करोति (R. IX. 49); 's. ed to exertions' जितश्रम, श्रमसहिष्णु. **-able,** *a.* समयोचित, कालानुरूप, प्रस्तावसदृश (शी *f.*), प्राप्तकाल, कालोचित, and sim. comp. **2** कालकृत, काल in. comp.; 's. efforts' कालकृतोद्योगाः. **3** आर्तव (वी *f.*), कालोद्भव, ऋतुज, ऋतव्य. **-ableness,** *s.* कालौचित्यं, प्रस्तावसादृश्यं, &c. **-ably,** *adv.* यथाकालं-समयं-अवसरं, काले, समये, प्रस्तावसदृशं, प्राप्तकालं, कालानुरूपं. **-ing,** *s.* उपस्करः, व्यंजनं.

Seat, *s.* आसनं, पीठः-ठं; 'take a s. here' अत्र आसनपरिग्रहं करोतु भवान्; पर्यंकः (s. on a sofa), विष्टरः (cane-s.); आस्तरः-रणं; 'raised s.' वितर्दि-र्दी *f.*, वेदिका. **2** स्थानं, आयतनं, आस्पदं, धामन् *n.*, अधिष्ठानं, निकेतनं, नि-आ-लयः, आगारं, पदं, आशयः; 'capital s.' राजधानी-नगरं; 's. of justice' न्यायासनं, धर्मासनं, व्यवहारासनं; 's. of blood' रक्ताशयः; क्रोधस्थानं; विद्यागारं, &c. **-***v. t.* (Oneself) आसने उपविश् 6 P, निषद् 1 P, आसनपरिग्रहं कृ 8 U; (another) (आसने) उपविश् c., आसनं ग्रह् c., अध्यास् c., अधि-ष्ठा c., (-ष्ठापयति). **2** प्रति-ष्ठा c., अधिकृ, अधि-आ-रुह् c., निविश् c.; 'he was s. ed on throne' राजपदमधिरोपितः, सिंहासने प्रतिष्ठापितः. **-ed,** *a.* आसीन, उपविष्ट, निषण्ण, अध्यासीन; आसनस्थ, आसनस्थित-उपविष्ट-आरूढ-गत-आश्रित, पीठस्थ; 's. at ease' सुखासीन, सुखोपविष्ट; 'be s.' गृह्यतां आसनं, क्रियतामासनपरिग्रहः. **2** प्रतिष्ठित, निविष्ट, स्थित, गत-स्थ-निष्ठ in comp.; 's. in

the heart' हृदयनिष्ठ, हृत्स्थ; कंठगत, अस्थिनिष्ठ, &c.

Secede, *v. i.* अपसृ 1 P, अपगम् 1 P, अप-या-इ 2 P, अपक्रम् 1 U, 4 P; व्यपसृ &c.; (to) आश्रि 1 U, अव-आ-लंब् 1 A; (from) (धर्मं &c.) त्यज् 1 P, उत्सृज् 6 P; मतांतरं ग्रह् 9 U or आश्रि &c. **-er,** *s.* भिन्नमताश्रितः; मतांतर-ग्राहिन् *m.* **-Secession,** *s.* अपसरणं, अपगमः-मनं, अपक्रमः-मणं, &c. **2** मतांतर-स्वीकारः-ग्रहणं, स्वधर्मत्यागः.

Seclude, *v. t.* नि-अव-रुध् 7 U, गुप् 1 P. **2** विविक्ते वस् c., पृथक् कृ 8 U; वि-विच् 3, 7 U or c. **3** (Oneself) विविक्तं आश्रि 1 U or सेव् 1 A, विविक्ते-एकांते-वस् 1 P, जनसंसर्गं त्यज् 1 P or परिह् 1 P or वृज् 10. **-ed,** *a.* विविक्त, निर्जन, विजन, निभृत; *See* **Lonely. 2** (Of persons) त्यक्त-मुक्त-संग, विविक्तसेविन्-वासिन्-वृत्ति. **-Seclusion,** *s.* रहस् *n.*, विविक्तता, एकांतता, विविक्तदशा- स्थिति *f.*; रहः-स्थानं, विविक्तं, एकांतवासः.

Second, *a.* द्वितीय; 's. to none', 'without a s.' अद्वितीय, अनुत्तर, अत्युत्तम; 's. in rank' द्वितीयपदभाक्. **2 Secondary,** q. v.; 's.-hand' भुक्तपूर्व, अन्यभुक्त-व्यवहारित, अन्योपयुक्त; अन्यकल्पित, अन्यसृष्ट; 's.-hand information' अन्यस्मादधिगता वार्ता; 's.-hand witness' श्रुतसाक्षिन् *m.* 's.-rate' मध्यम, सामान्य; s.-sight' दिव्यचक्षुस् *n.* -दृष्टि *f.* **-s.** विपलं; विकला; क्षणः निमि-(मे)षः. **2** सहायः, सहकारिन् *m.*, उपकारी. **-v. t.** अनुमुद् 1 A, अनुग्रह् 9 P, उपकृ 8 U, अभिनंद् 1 P. **-er,** *s.* अनुमोदिन् *m.*, समर्थयितृ *m.*, पक्षोद्ग्राही. **-ly,** *adv.* द्वितीयतः, द्वितीयस्थाने. **-Secondary,** *a.* अप्रधान, गौण (णी *f.*), अमुख्य, अनुषंगिन्, उपसर्जन, उपसृष्ट, अप्रथम; oft. by उप pr.; a s. planet' उपग्रहः; 'a s. rank' अप्राधान्यं. **2** मध्यम, सामान्य, सामान्यगुणक. **-ly,** *adv.* अप्राधान्येन, गौणतः, अप्रधानतः, अनुषंगतः.

Secret, *a.* नि-,गूढ, गुप्त, प्र-,छन्न, निभृत, संवृत, अव्यक्त, अप्रकाश, अविदित; 's. door' प्रच्छन्नं, अंतर्द्वारं. **2** गुह्य, गोप्य, रहस्य, संवरणीय. **3** गुह्याभेदिन्, रहस्याभेदिन्. **4** गहन, गूढ, अव्यक्त, गूढार्थ, गहनार्थ. **5** रहस् in comp., विविक्त, निर्जन, निभृत; 'keep s.' गुह् 1 U, छद् 10; *See* **Conceal. -s.** रहस्यं; गुह्यं, गोप्यं, मर्मन् *n.*; 'have you kept the s. entrusted to you' रक्ष्यते भवता रहस्यनिक्षेपः (V. 2); 'the s. of one's power' शक्तेःरहस्यं; 'the s. of good men (of their conduct)' साधूनां रहस्यं (U. 2); 'in s.' रहसि, रहः, मिथः; 's. counsel' मंत्रः, गूढमंत्रः; 'knowing s. s' रहस्यज्ञ, अंतर्वादिन्; मर्मविद्; 'the matter is no longer a s.' बहुलीभूतः-प्रकाशतां गतः-सोऽर्थः; 'diving into the s. s of others' परमर्मभेदिन्, मर्मान्वेषिन्, पररहस्यविद्. **-ly,** *adv.* प्र-,छन्नं, गूढं, निभृतं, गुप्तं, अव्यक्तं, उपांशु, गूढ-गुप्त in comp.: 'walking s.' गूढाचार, गुप्तसंचारिन्. **-ness,-Secrecy,** *s.* गुप्तता, गूढता, प्रच्छन्नता, गुप्ति *f.*, गुप्त-निभृत-भावः. **2** संवृत्ति *f.*, गुप्तिः, गुह्य-रहस्य-रक्षणं, गोपनं, रहस्याभेदः-पालनं, मौनं, अप्रकाशनं. **3** विविक्तता; रहः, रहोवासः, विविक्तवासः-भावः.

Secretary, *s.* कार्याधिकृतः, सचिवः.

Secrete, *v. t.* सु c., प्र-निः-परि°-, निर्गम् c., निःसृ c., उद्गम् 1 P, उद्-गृ 6 P, उत्सृज् 6 P; (bile &c.) उत्-,रिच् 7 P or c.; उत्पद् c., जन् c.; 'the mouth frequently s. s saliva' मुहुर्वक्त्रं लालायते, लालां स्रावयति. **2** गुप् 1 P, गुह् 1 U, संवृ 5 U, अपनि-ह्नु 2 A; *See* **Conceal. -ion,** *s.* स्रावः-वणं, उद्रेचनं, उत्सर्गः, उत्पादनं. **2** मलं; 's. of the throat' कफः, श्लेष्मन् *m.* 's. of the bowels' पुरीषं, विष्ठा; *See* **Dung.**

Sect, *s.* शाखा, पथिन् *m.*, मार्गः, पक्षः, मतं, संप्रदायः, गणः. **-ary,-ariar,** *a.* शाखागत, सांप्रदायिक (की *f.*); स्वपक्षानुसारिन्, शाखावलंबिन्, शाखाश्रित.

Section, *s.* वि-,भागः, छेदः, परिच्छेदः; खंडः-डं, पर्वन् *n.*, प्रकरणं, उल्लासः, उच्छ्वासः, स्कंधः, कांडः-डं, पादः (of different compositions): 'sub-s.' अधिकरणं.

Sector, *s.* वृत्तखंडं.

Secular, लौकिक-ऐहलौकिक-सांसारिक-ऐहिक-प्रापंचिक-व्यावहारिक-(की *f.*). **-ity, -ness,** *s.* ऐहिकत्वं; संसारासक्ति *f.*, प्रपंचानुरागः.

Secure, *a.* सुरक्षित, अकुतोभय, अभय, निर्भय, वीतभय, अनाश्य, निराबाध, निर्विघ्न; (of persons): निः-शंक, अशंक, निश्चिंत, निरातंक, निरपेक्ष, स्वस्थ. **-v. t.** रक्ष् 1 P, भयं निवृ c., or निवृत् c. or निरस् 4 U, निर्भयीकृ 8 U; ex. by (*a.*) with कृ. **2** स्थिरीकृ, दृढीकृ, निर्णी 1 P. **3** दृढं बंध् 9 P; 's. ed with a bolt' अर्गलाबद्धं (द्वारं). **4** आक्रम् 1 U, 4 P, ग्रह् 9 U. **-ity,** *s.* रक्षाक्षणं, गुप्ति *f.*, स्थैर्यं, परि-,त्राणं, गोपनं, क्षेमः-मं, निर्भयत्वं, अहार्यता, शंकाभावः, अभयं. **2** अभयवाच् *f.*, अभयदानं-दक्षिणा. **3** रक्षकः, शरणं, आश्रयः. **4** प्रतिभूः, बंधकः, लग्नकः (persons); प्रातिभाव्यं, आधिः, न्यासः, निक्षेपः; *See* **Pledge. -ly,** *adv.* निःशंकं, निर्भयं, क्षेमेण, निराबाधं.

Sedan, *s.* शिबिका.

Sedate, *a.* धीर, शांत, स्तिमित, गंभीर, निरुद्वेग, अनाकुल, अक्षुब्ध, अचंचल. **-ly,** *adv.*

धीरवत्, शांतं, अनाकुलं, निरुद्वेगं. -ness, *s.* धीरता, शांतता, गांभीर्यं, अनुद्वेगः, अक्षोभः, स्थैर्यं, गौरववृत्ति *f.* -Sedative, *a.* शांतिकर (री *f.*), शीतल, शांतिद, शमक. -*s.* लंघनं, अप-,कर्षणं.

Sedentary, *a.* निरुद्योग, अचपल, अव्यवसायिन्, अनुद्योगशील, अव्यायामिन्, चलनगति-हीन.

Sedge, *s.* तृणं.

Sediment, *s.* मलं, खलं, कल्कं, किट्टं, उच्छिष्टं, शेषः-षं.

Sedition, *s.* राजद्रोहः, प्रजाप्रकोपः संक्षोभः, प्रकृतिक्षोभः, भेदः, कलहः, 'fomenting s.' उपजापः, भेदजननं. -Seditious, *a.* राजद्रोहिन्; (causing s.) प्रजासंक्षोभजनन (नी *f.*), प्रजा-प्रकृति-क्षोभकर (री *f.*). भेदकर, उपजापक. -ly, *adv.* राजद्रोहपूर्वं, सोपजापं.

Seduce, *v. t.* दुष् *c.* (दूषयति), वि-,मुह् *c.*, विलोभ्य अपह् 1 P. सत्पथात् प्रभ्रंश् *c.* or च्यु *c.*; प्र-वि-लुभ् *c.*, आ-वि-कृष् 1 P. आक्षिप् 6 P; (a. woman) दुष् *c.*, सतीत्वात् भ्रंश् *c.*,चारित्र्यं नश् *c.*; पापमार्गे प्रवृत् *c.*; अभिगम् 1 P. -er, *s.* दूषकः, प्रलोभयितृ *m.*, प्र-वि-लोभकः, आकर्षकः, वि-मोहकः. -Seduction, *s.* प्र-वि-लोभनं, आकर्षणोपायः,विमोहनं,आकर्षणं. 2प्रतारणं-णा, वंचनं-ना, विप्रलम्भः. 3 दूषणं, शीलपातनं, सतीत्वनाशः,चारित्र्यभ्रंशः, संग्रहणं. -Seductive, *a.* प्र-वि-लोभक, आकर्षक, वि-,मोहिन्.

Sedulous, *a.* उद्यमिन्, उद्योगासक्त, उद्यमतत्पर, कार्यव्यापृत, अभिनिविष्ट. -ly, *adv.* आसक्तिपूर्वं, साभिनिवेशं, सोद्यमं. -ness, *s.* कार्यासक्ति *f.*, उद्योगशीलता, उद्यमपरता; *See* Industry-ous, &c.

See, *s.* धर्माध्यक्षाधिकारः. -*v. t.* दृश् 1 P, ईक्ष् 1 A, वि-सं-अव-प्र-निर्-;° लक्ष् 10, अव-वि-आ-लोक् 1 A, 10, निरूप् 10, निर्वर्ण् 10 (carefully), आलोच् 10; 's. with one's own eyes' प्रत्यक्षीकृ 8 U, (कदाचिदस्याः प्रत्यक्षीकृता विक्रिया S. 7). 2 ज्ञा 9 U, बुध् 1 P,अवगम् 1 P,अव-इ 2 P, उपलभ् 1 A. 3 Beware, q. v.; 's. ing that' यतः, यस्मात्, यत्. -er, *s.* द्रष्टृ *m.*, दर्शिन् *m.*, 2 सिद्धः, भविष्यद्वादिन् *m.* -Sight, *s.* दर्शनं, विलोकनं, वीक्षणं, आलोकः &c. 2 (View) दृष्टिपथः-विषयः-गोचरः. 3(Eye) दृष्टि *f.*, दृश् *f.*, चक्षुस् *n.*, नेत्रं, नयनं, दृक्-शक्ति *f.* 4 आलोकः, कौतुकं, चमत्कारः; 'being within s.' दृश्य, दृग्गोचर, दृष्टिविषय; 'out of one's s.' परोक्षं-क्षे, अगोचरं-रेण; 'gone out of s.' अंतरित, अंतर्हित, तिरोहित; 'in s. of' समक्षं, प्रत्यक्षं, साक्षात्, with gen. or in comp.; 'at the very first s.' प्रथमदर्शनादेव, आप्रथमदर्शनात्; 'charming the s.' दृष्टिमोहः-बंधः. -ly, *a.* सुदृश्य, प्रेक्षणीय, ललित; *See* Pleasant.

Seed, *s.* बीजं, in all senses; 'growing from s.' बीजप्ररोह-रुह, बीज्य. 2 मूलं, आदिः, प्रभवः, उद्भवः; *See* Origin. 3 प्रजा, अपत्यं, वंशः, संतानः, संतति *f.* 4 शुक्रं, रेतस् *n.*; *See* Semen; 's.-corn' बीजधान्यं; 's.-time' बीज-वाप-कालः; 's.-vessel' बीजकोशः-गुप्ति *f.* -*v. t.* बीजं आरुह् *c.*, बीजयति (D.). -*v. i.* बीजं प्रदा 3 U or उत्पद् *c.* -less, *a.* निर्बीज. -ling, *s.* बीजप्ररोहः, बीजांकुरः. -y, *a.* बीजिन्, बीजपूर्ण, बहुबीज. -Seedsman, *s.* बीजिन् *m.* 2 बीजविक्रयिन् *m.*

Seek, *v.* अन्विष् 4 P, मृग् 10 A, निरूप् 10, विचि 5 U: *See* Search. 2 कम् 1 A, आ-अभि-कांक्ष् 1 P, इष् 6 P: प्रार्थ् 10 A, अभ्यर्थ्, याच् 1 A: 's ing to get heaven' स्वर्गकामः. 3 प्र-,यत् 1 A, यत्न् 1 A, चेष्ट 1 A, उत्-जृंभ् 1 A: *See* Attempt. -er, *s.* अन्वेष्टृ *m.*, निरूपकः, प्रार्थकः. -ing, *s.* अन्वेषणं. मार्गणं, निरूपणं.

Seem, *v. i.* भा 2 P, आ-प्रति-,° दृश-लक्ष् pass., आभास् 1 A: *See* Appear; 'it s. s to me' मन्ये, शंके, इति मे मतिः. -ing, *a.* बाह्य, बहिः in comp., कृतक, कृत्रिम. -*s.* आभासः, बाह्यरूपं, आकारः. -ingly, *adv.* बहिः, बाह्यतः, आभासेन; 's. true' सत्याभास, सत्यसंकाश. -ly, *a.* विनीत; युक्त, उचित, संगत, उपपन्न; *See* Proper.

See-Saw, *s.* उन्नतानतं, निम्नोन्नतं.

Seethe, *v. t.* क्वथ् 1 P, पच् 1 P. -*v. i.* पच् pass. -r, *s.* स्थाली, उखा, पिठरः, ऋजीषं.

Segment, *s.* खंडः-डं, वि-,च्छेदः; (of a circle) वृत्तखंडं.

Segregate, *v. t.* वियुज् 7 A, 10, विश्लिष् *c.* -*v. i.* विश्लिष् 4 P, विभिद् pass; *See* Separate. -ion, *s.* वियोगः, विश्लेषः.

Seismal, Seismic, *a.* भूकंपसंबंधिन्.

Seize, *v. t.* सं-ग्रह् 9 P, धृ 1 P, 10, परामृश् 6 P, कल् 10 (कलयति); ग्रस् 1 A; 's. ing by the hair' केशेषु-केशैः-गृहीत्वा. 2 अप-,हृ 1 P, बलेन ग्रह् or धृ. 3 आपत् 1 P, अभिद्रु 1 P; *See* Attack. 4 आक्रम् 1 U, 4 P, अभिभू 1 P, उपसृज् 6 P, ग्रस्, उपहन् 2 P, आविश् 6 P: 's. ed with deep sleep' गाढनिद्राक्रांत; 's. ing an opportunity' गृहीतावसर, प्राप्तकाल, प्राप्तावसर, अवसरं प्राप्य-गृहीत्वा. -er, *s.* हर्तृ *m.*, हारिन्-ग्राहिन् in comp. -ure, *s.* ग्रहणं, धारणं, हरणं, सं-,ग्राहः, ग्रहः, ग्रसनं, आकलनं. 2 आक्रमः, आवेशः, अभिभवः, ग्रासः.

Seldom, *adv.* क्वचित्, कदाचित्, विरलं, दुर् pr.; 's. to be found' दुर्लभं.

Select, *v. t.* वृ 5 U or 10 (वरयति), वृं 9 U, उद्-ह 1 P, उद्-ग्रह् 9 P, विशिष् 7 P or c. **2** संग्रह्, समुद्धृ, संकल् 10 (कलयति) **-***a.* विशिष्ट, उत्तम, उत्कृष्ट; *See* **Choice. -ed,** *a.* वृत,वृत्त, व्यावृत्त, उद्धृत. **-ion,** *s.* वरणं, उद्धरणं, वरः, वृति *f.* **2** संग्रहः, सारः; 's. of poetical pieces' काव्यसंग्रहः.

Selenite, *s.* चंद्रकांतः.

Self, *a.* आत्मन्, स्व in comp., स्वीय, निज; *See* **Own;** 's. -interest' आत्महितं; 's. -destroyer' आत्मघातकः; (with pronoun) स्वयं, स्वतः. **-***s.* आत्मन् (sing. and *m.*); देवी प्राप्तप्रसदमात्मानं गंगादेव्यां विमुंचति (U. 7). In comp. ex. by आत्म, स्व, or स्वयं, स्वतः; 's. -accomplished' आत्मोपार्जित, स्वतः अर्जित; 's. -command' आत्मसंयमः, दमः, इंद्रियजयः; 's. -conceit' अहंकारः ममत्वं, स्वाभिमानः; s. -denying' आत्मसंयमिन्; 's. -evident' स्वतःसिद्ध, स्वयंप्रकाश, प्रत्यक्ष; 's. -existent' स्वयंभू, आत्मभू; 's. -interested' स्वार्थपर, स्वार्थबुद्धि; 's. -love' ममता, अहंमानः, स्वानुरागः; 's. -possessed' अव्यग्र, स्थिरात्मन्, स्वस्थचित्त, धृतिमत्; 's. -possession' धृति *f.*, स्वास्थ्यं, आत्म-स्व-निष्ठा; *See* **Presence,** (of mind); 's. -sufficient' स्वाभिमानिन्; 's. -will' स्वेच्छा, स्वैरिता, स्वाच्छंद्यं; 's. -willed' स्वैर, स्वैरिन्, स्वच्छंद, काम-स्वेच्छा-चारिन्, कामवृत्ति, स्वैरगति. **-ish,** *a.* स्वार्थपर-निष्ठ-परायण; उदरंभरि, स्वार्थदृष्टि-बुद्धि, स्वहितपर-निष्ठ, स्वहितैषिन्, स्वलाभनिष्ठ-तत्पर, &c. **-ishly,** *adv.* स्वार्थदृष्ट्या, आत्महितबुद्ध्या, स्वलाभेच्छया. **-ishness,** *s.* स्वार्थ-स्वलाभ-स्वहित-परता-निष्ठा-बुद्धि *f.*-दृष्टि *f.*, स्वलाभेच्छा, ममता.

Sell, *v. t.* वि-क्री 9 A (rarely P also). **-***v. i.* मूल्येन विक्री pass.; 'this picture will s. for a large price' महता मूल्येनेदमालेख्यं विक्रेष्यते. **-er,** *s.* विक्रेतृ *m.*, विक्रयिन् *m.*, विक्रयिकः, पणायिता. **-ing, -Sale,** *s.* विक्रयः; पणनं; 'exposed for s.' क्रय्य, क्रयार्थं प्रसारित; 'an article for s.' पण्यं, पण्यद्रव्यं; 'underhand s.' अवक्रयः. **-Saleable,** *a.* विक्रेय.

Selvage, *s.* *See* **Border.**

Semblance, *s.* आभासः, आभा, औपम्यं, सादृश्यं; आकारः, रूपं; 'it has a s. of truth' सत्यमिवावभासते, सत्यसंकाशं; 'to wear the s. of displeasure (anger)' कृतककोपं दर्शयितुं.

Semen, *s.* शुक्रं, रेतस् *n.*, बीजं, वीर्यं, तेजस् *n.*, इंद्रियं. **-Seminal,** *a.* (*s.*) in comp.; s. discharge' रेतःस्रावः-क्षरणं, निषेकः.

Semi, *a.* अर्ध or सामि in comp.; 's. -circle, वृत्तार्धं, अर्धवर्तुलं; 's. -form' अर्धाकृति &c. &c.

Seminary, *s.* बीजारोपणस्थलं. **2** शिक्षणालयः, विद्यामंदिरं.

Semi=vowel, *s.* अंतस्थः.

Sempiternal, *a.* *See* **Eternal.**

Sempstress, *s.* सूचिका.

Senate, *s.* वृद्ध-शिष्ट-सभा; मंत्रि-सचिव-सभा. **-or,** *s.* सभासद् *m.*, वृद्धसदस्यः.

Send, *v. t.* प्र-हि 5 P, सं-,प्रेष् c., सं-, प्रेर् c., विसृज् 6 P or c., (with acc. of place and dat. of person); 's. away' प्र-स्था c. (स्थापयति), विसृज्; 's. for' आह्वे 1 P, आनी c.; आगम् c., आह्व c.; 's. for a doctor' भिषजमाह्वातुं कमपि प्रेषय; 's. forth' नि-प्र-सृ c., उदीर् c., उत्क्षिप् 6 P, उद्वम् 1 P, उद्-गृ 6 P; (as a missile) प्र-,मुच् 6 P, प्रक्षिप्, प्रास् 4 P. **-er,** *s.* प्रेषकः, प्रेरकः.

Senile, *a.* वृद्ध, जराजन्य. **-ity,** *s.* वृद्धत्वं, जरा, वार्धक्यं.

Senior, *a.* ज्येष्ठ, वरिष्ठ, ज्यायस्, वरीयस्, वर्षीयस्; (in age) कालज्येष्ठ, वयोज्येष्ठ; 's. in office' अधिकारज्येष्ठ. **-***s.* ज्येष्ठः, अग्रजः, &c. **2** गुरुः, गुरुजनः, आर्य-वृद्धजनः. **-ity,** *s.* ज्येष्ठता, ज्यैष्ठ्यं, वरिष्ठता; वयोज्येष्ठता, &c.; 'according to s.' अनुज्येष्ठं.

Sennight, *s.* सप्तरात्रं, सप्ताहः.

Sense, *s.* इंद्रियं, हृषीकं, विषयिन् *n.*, 's. s collectively' इंद्रियवर्गः-गणः, पंचेंद्रियं; 's. s of perception or knowledge' ज्ञानेंद्रियाणि; 's. s of action' कर्मेंद्रियाणि;, करणानि, कर्मसाधनानि; 'evident to the s.' प्रत्यक्ष, इंद्रिय-ग्राह्य-गोचर; 'pleasures of s.' विषय-इंद्रिय-सुखं, 'object of s.' विषयः, इंद्रियार्थः, इंद्रिय-विषयः. **2** उपलब्धि *f.*,वेदनं-ना,बोधः, ज्ञानं, अनुबोधः, ग्रहणं, संवेदनं, इंद्रियबोधः-ग्रहणं. **3** बुद्धि *f.*, मति *f.*, धीः, चिच्छक्तिः, प्रज्ञा; *See* **Intellect. 4** चेतना, संज्ञा, चैतन्यं; ज्ञानं, बोधः, अनुभवः, संवेदनं; 's. of obligation' कृतज्ञता, कृतवेदित्वं; 's. of pleasure' सुखबोधः-अनुभवः; 'come to s. s', 'recover one's s. s' संज्ञां-चेतनां-लभ् 1 A or आ-प्रति-पद् 4 A, प्रकृतिं आ-पद्, प्रकृतिस्थ-*a.*भू 1 P; 'loss of s. s' मति-भ्रंशः, बुद्धि-मति-नाशः, विप्लवः; 'common s.' विवेकः; 'good s.' सुबुद्धिः, सद्भावः; सौजन्यं; 'out of s. s' विगतचेतन, लुप्त-संज्ञ, नष्ट-हत-ज्ञान, बुद्धिभ्रष्ट, नष्टेंद्रिय-बुद्धि;

'who has lost all s. of honour and dishonour on account of old age' जरावलुप्तमानावमानचित्तः. 5 मतं,अभिप्रायः, उद्देशः, आशयः, आकांक्षा. 6 अर्थः, भावः (purport); 'understanding the literal s.' शाब्दबोधः; 'literal s.' शब्दार्थः; अक्षरार्थः; 'in its true s.' अन्वर्थ-यथार्थ-*a.*, यथार्थतः, परमार्थतः,अर्थतः; 'else this repetition has no s.' अन्यथा एषा वीप्सा न चरितार्था भवति (Ka. 320), निरर्थका भवेत् &c.; *See* **Significant.** **-ible,** *a.* इंद्रियगोचर-ग्राह्य-गम्य-ज्ञेय, प्रत्यक्ष. 2 विषय-इंद्रियार्थ-ग्राहिन्, ग्रहण-समर्थ. 3 अभिज्ञ, ज्ञ, वेदिन् in comp.; 's. of your service' त्वत्सेवाभिज्ञ; उपकारज्ञ-वेदिन् 's. of obligations'. 4 संज्ञावत्, चेतनोपपन्न, सचेतन,चेतन, चेतनावत्, वेदन-ज्ञान-क्षम;लब्ध or प्राप्त-संज्ञ or चैतन्य,आपन्न-चेतन. 5 मति-बुद्धि-मत्, सज्ञान, ज्ञानवत्, विवेकिन्, ज्ञान-बुद्धि-शालिन्, मनस्विन्, धीसंपन्न; *See* **Rational** also. 6 विचक्षण, सुधी, सुमेधस्, प्राज्ञ. 7 उपपन्न, युक्त, उचित, संगत, समंजस, सयुक्तिक, युक्तिपूर्व. **-ibility,** *s.* ग्रहणसामर्थ्य-शक्ति *f.* 2 सूक्ष्म or शीघ्र-चैतन्यं or बोधः; वेदनं-ना, बोधः, ज्ञानं, अनुभवः, चेतना; चैतन्यं; संज्ञा. **-ibly,** *adv.* प्रत्यक्षं-क्षतः, &c. 2 सुबुद्ध्या, सुबुद्धिपूर्वं, बोध-ज्ञान-पूर्वं, चेतनवत्, अभ्रमेण. **-less,** *a.* अचेतन, विषयग्रहणाक्षम. 2 अ-वि-गत-चेतन, निःसंज्ञ, लुप्तसंज्ञ, नष्टचैतन्य, सुप्तबुद्धि, संज्ञा-चैतन्य-हीन. 3 दुर्बुद्धि, मति-बुद्धि-हीन, मूढ, मूर्ख, अनात्मज्ञ, निर्बोध; *See* **Foolish.** 4 अयुक्त, असमंजस, अनुपपन्न, अनुचित. 5 निरर्थक, असंगत, असंबद्ध. **-lessly,** *adv.* मूर्खवत्, मूढवत्, &c. **-Sensitive,** *a.* सचेतन, चेतनावत् विषयग्रहणक्षम-समर्थ. 2 सूक्ष्म or शीघ्र or वेदिन् or ग्राहिन्,शीघ्रचेतन; चलेंद्रिय, अनायासेन संक्षोभ्य, मृदुप्रकृति, कोमलहृदय. 3 लज्जालु, लज्जावत्; *See* **Modest;** 's.plant' लज्जालुः,नमस्कारिन्*m.* **-ly,** *adv.* शीघ्रज्ञानेन, सूक्ष्मचैतन्येन. **-ness,** *s.* सूक्ष्मचैतन्यं, शीघ्रबोधः, &c. **-Sensual,** *a.* इंद्रिय, विषय in comp.; 's. pleasures' विषयसुखानि, इंद्रियोपभोगः, विषयासक्ति *f.* 2 (Of persons) इंद्रियसुखनिरत, विषयासक्त, विषयपरायण- पर-निरत-अधीन-वश, इंद्रियवश, &c.; विषयिन्, विषयोपसेविन्, विषयसुखासक्त, भोग-काम-आसक्त. **-ist,** *s.* विषयिन् *m.*, विषयासक्तः, भोगासक्तः; *See* above. **-ity,-ness,** *s.* विषयासक्तिः, इंद्रियसुखोपभोगः, विषय-वशता-परायणता &c., भोगासक्तिः, कामासक्तिः, इंद्रिय-विषय-सुखनिरतिः. **-Sentient,** *a.* सचेतस्, सचेतन, चेतनावत्, चैतन्य-प्राण-विशिष्ट; *See* **Sensible;** 'a s. being' प्राणिन् *m.*, देहिन् *m*, शरीरिन् *m.* जीवः, प्राणभृत् *m.*,चेतनः. **-Sensation,** *s.* प्रत्यक्षं. 2 सं-,वेदनं-ना,बोधः, ज्ञानं, उपलब्धिः, चेतना, प्रत्यक्षज्ञानं, अनुभवः. 3 विकारः, विक्रिया; 'produced a great s. among the people' जनमनांसि भृशं समक्षोभयत्-आकुलीचकार.

Sensorium, *s.* मस्तिष्कं, मस्तिकं, गोर्दं, गोदं.

Sensory, *a.* संवेदक-यितृ.

Sentence, *s.* निर्णयः, दंडाज्ञा, दंडादेशः, आधर्षणं; 's. of death' प्राणदंडाज्ञा. 2 विचारः, निश्चयः, निर्णयः, संकल्पः. 3 वाक्यं, वचनं, उक्ति *f.*, वचस् *n.*, पदसमूहः. 4 सूत्रं. **-***v. t.* दंडं आदिश् 6 P or निर्णी 1 P or कथ् 10 or निविश् c.; 's. ed him to death' तस्य वधदंडमादिशत्, वध्यतामसौ इति आज्ञापयत्. **-Sententious,** *a.* लाघवयुक्त, लाघवगुणोपेत, सूत्रमय (यी *f.*), सूत्रप्राय.

Sentiment, *s.* मतं, अभिप्रायः, बुद्धि *f.*, मति *f.* 2 संकल्पः, कल्पना. 3 अर्थः; *See* **Sense, Idea.** 4 भावः, रसः, रागः; 's. of love' शृंगाररसः; करुणारसः &c. **-al,** *a.* रसिक, रसमय (यी *f.*), सरस, रसात्मक, सराग, रसभूयिष्ठ. 2 काल्पनिक (की *f.*), भावित.

Sentinel, Sentry, *s.* रक्षिन् *m.*, रक्षापुरुषः, रक्षकः.

Separate, *v. t.* वियुज् 7 A,10, वि-,रह् 1 P, 10 (रहयति), विनाकृ 8 U, (with instr.); 'Rati s.ed from Madana' मदनेन विनाकृता रतिः. 2 पृथक् कृ, विश्लिष् c., वि-,भिद् 7 P or c. विभज् 1 U, विच्छिद् 7 P, विघट् c., विगम् c. (गमयति); व्यासंज् c., व्यतिरिच् 7 P or c.; (distinguish between) विविच् 3, 7 U, विशिष् 7 P or c.; 's.-ing milk from water' दुग्धजल-भेदविधिः. **-***v. i.* पृथग्भू 1 P, विश्लिष् 4 P, विघट् 1 A, अपया 2 P, व्यप-इ 2 P, वियुज्-विच्छिद्-भिद्-pass.; 'the brothers have s. ed' विभक्ता भ्रातरः. **-***a.* **-ed,** *a.* वि-,भिन्न, विभक्त, वियुक्त, विच्छिन्न; न जाने कियताध्वना विच्छिन्नमितो बलमनुयायि मे (Ka. 120) 'by what distance s.' &c.; पृथक् *ind.*,असंलग्न,असंसृष्ट,व्यतिरिक्त,व्यस्त. **-ion,** *s.* वियोगः, विरहः, विप्रयोगः,विश्लेषः, विभेदः, व्यतिरेकः, विच्छेदः, (with instr. for 'from'); भिन्नता, पार्थक्यं, पृथग्भावः. 2 पृथक्करणं, विभागः, वि-,भेदः-दनं, व्यासंगः, विगमः, विघटनं; विवेकः; 'afflicted by s.' विरहातुर, विरहपर्युत्सुक, विधुर. **-ly,** *adv.* पृथक्, वि-,भिन्नं; 'taken s.' एकैक-*a.*, व्यस्त-*a.*; सर्वाविनयानामेकैकमप्येषामायतनं (Ka. 103), तदस्ति किं व्यस्तमपि त्रिलोचने (K. v. 72) 'even one, taken s.' &c. **-ness,** *s.* पृथग्भावः, पार्थक्यं

-Separable, *a.* विभाज्य, वियोज्य, विच्छेद्य; 'not s.' नित्यस्थायिन्, नित्य, प्रकृतिस्थ.
Sepsis, *s.* विलयनं, पूतीभवनं.
Septangular, *a.* सप्तकोण, सप्तास्र.
September, *s.* भाद्रपदाश्विनं.
Septenary, *s.* सप्तकं. **-***a.* सप्तन्.
Septennial, *a.* सप्तवार्षिक (की *f.*).
Septic,-al, *a.* विलयनकारिन्.
Septilateral, *a.* सप्तभुज, सप्तपार्श्व.
Septagenarian, *a.* सप्ततिवर्षीय.
Septum, *s.* महाबीज्यं, विटपः.
Sepulchre, *s.* समाधिः, प्रेतवासः, श्मशानं, शवस्थानं-मंदिरं-गर्तः. **-Sepulchral,** *a.*(*s.*) in comp. **-Sepulture,** *s.* निखननं, भूमौ निगूहनं. **2** प्रेतकर्मन् *n.*-क्रिया; *See* **Funeral.**
Sequel, *s.* उत्तरं, उत्तरभागः, शेषः, शेषभागः, परिशिष्टं. **2** परिणामः, अंतः.
Sequence, *s.* अनु-,क्रमः, अन्वयः, आनुपूर्व्यं, परंपरा.
Sequester, Sequestrate, *v.* वियुज् 7 A, 10, पृथक् कृ 8 U. **2 Seclude,** q. v. **-ed,** *a.* विविक्त; *See* **Secluded.**
Seraglio, *s.* अंतःपुरं, अवरोधः, शुद्धांतः, अंतर्गृहं; *See* **Harem.**
Seraph, *s.* *See* **Angel.**
Sere, *a.* शुष्क, म्लान, विशीर्ण.
Serene, *a.* प्र-,शांत, प्रसन्न, अक्षुब्ध, स्तिमित, स्थिर, निरुद्वेग; निराकुल, अनुद्विग्न; (sky) निरभ्र, वितिमिर, प्रसन्न; (water) विशद, स्वच्छ, शुद्ध, निर्-वि-अ-मल, प्रसन्न. **-ly,** *adv.* प्रसन्नं, सप्रसादं, शांत-प्रसन्न-चेतसा. **-ity,-ness,** *s.* प्रशांति *f.*, प्रसादः, अनुद्वेगः, असंभ्रमः, अक्षोभः, प्रसन्नता, निरभ्रता, निर्मलता.
Serf, *s.* दासः, कृषकदासः. **-dom,** *s.* दास्यं, दासवृत्ति *f.*
Seriatim, *adv.* यथाक्रमं, अनुपूर्वशः, अनुक्रमशः, आनुपूर्व्येण.
Series, *s.* माला, परंपरा, राजिः, श्रेणिः-णी, आवलिः-ली, पंक्तिः, (all *f.*); दामन् *f.* *n.*, पर्यायः, परिपाटि-टी *f.*,आनुपूर्वी-र्व्यं. **-Serial,** *a.* क्रमिक, यथाक्रम, क्रमानुसारिन्.
Serious, *a.* ग(गं)भीर, धीर; गंभीरवृत्तिशील-स्वभाव; धीरदर्शन-स्वभाव; 'a s. look' धीरविलोकितं. **2** गुरु, अलघु, अनुपेक्ष्य, अनतिपात्य,गुर्वर्थ. **3** अपरिहासिन्, अविनोदशील; 'this is in truth, a s. matter' न खलु अयं परिहासस्य विषयः (Mal. 9); *See* **Earnest. -ly,** *adv.* गंभीरं, धीरं, सधैर्यं, गौरवेण. **2** अपरिहासेन, सत्यं; 'I tell you s.' न परिहसामि, नायं विनोदः, न परिहासः. **-ness,** *s.* गांभीर्यं, धीरता, धैर्यं, गौरवं, गुरुता; अपरिहासः, अविनोदः &c.
Sermon, *s.* धर्मोपदेशः, धर्मव्याख्यानं.
Serous, *a.* मेदस्विन्, मेदुर.
Serpent, *s.* सर्पः, भुजगः, भुजंगः-गमः, अहिः, पन्नगः, नागः, उरगः; *See* **Snake. -ine,** *a.* (*s.*) in comp.; वि-,सर्पिन्, वक्र, कुटिल; 's. course' भुजंगगतिः, वक्रा-कुटिला-गतिः.
Serpigo, *s.* दद्रुमंडलं, मंडलकुष्टं.
Serrate,-ed, *a.* करपत्रनिभ, क्रकचतुल्य; अनुक्रकच, क्रकचधार, दंतुर, सच्छेद.
Serried, *a.* संहत, संश्लिष्ट.
Serum, *s.* मेदस् *n.*, वसा, वपा.
Serve, *v. t.* सेव् 1 A, शु desid. (शुश्रूषते), उपास् 1 A, उप-स्था 1 A, उपचर् 1 P, परि-अनु-चर्; 'he who s. s not another's will' परेच्छानुरूपं न वर्तते, परच्छंदानुवर्ती न भवति, अन्यभावं न अनुप्रविशति. **2** अनुवृत् 1 A, अनुरुध् 4 A, अनुवि-धा 3 U; *See* **Obey. 3** उपकृ 8 U, अनुग्रह् 9 P, उपचर्, साहाय्यं कृ; श्रेयः-सं-पद् c. **4** (अर्थं) साध् c., प्रवृत् c., सं-पद् c., निर्वृत् c. **5** पर्याप्त-उचित-*a.* भू 1 P, अलं with dat. or inf., क्लृप् 1 A (with dat.); 'this will s. to rouse his anger' तस्य कोपमुद्दीपयितुं-कोपोद्दीपनाय-अलं or पर्याप्तमिदं. **6** उप-परि-क्लृप् c., उप-स्था c. (स्थापयति). **7** स्थाने-भूमौ-वृत् or भू or प्रयुज् pass. **8** प्र-उप-युज् 7 U, 10, विनि-युज्, निक्षिप् 6 P. **9** वृत्, आचर्, व्यव-हृ 1 P, (with loc. of person); *See* **Act, Behave;** 's. the purpose of', 's. as' उपयोगं व्रज् 1 P,स्थाने-भूमौ-भू; भूर्जत्वचः व्रजंति विद्याधरसुंदरीणामनंगलेखक्रियायोपयोगं (K. I. 7) 's. as love-letters' &c.; 's. up meals' परिविष् c., अन्नं उप-स्था c.; 'the Gods s. ed up food' मरुतः परिवेष्टारः आसन्; 's. out' प्रतिकृ, वैरं &c. निर्यत् 10. **-***v. i.* सेवां-कार्यं-कृ; नियोगमनुष्ठा 1 P; कार्यं संपद् c.; 'this will s. as water to wash his feet with' इदं पादोदकं भविष्यति (S. 1). **-ant,** *s.* भृत्यः, सेवकः, किंकरः, अनु-उप-जीविन् *m.*, दासः, चेटः, प्रेष्यः, अनु-परि-चरः, परिजनः, परिचारकः, नियोज्यः, भुजिष्यः, शुश्रूषकः, उपासकः, सेवाजीविन् *m.*,वैतनिकः,भृतिभुज्, *m.*, भरण्यभुज् *m.*, भृतकः; कर्मक(का)रः, (labourer); 'female s.', 's.-maid' चेटी, दासी, भुजिष्या, प्रेष्या, कर्मकरी, सैरं(रिं)ध्री. **-Service,** *s.* सेवा, शुश्रूषा, उपचारः, उप-परि-चर्या, उपासनं-ना; आ-सं-श्रयः; 's. of kings' नृपसंश्रयः, राजाश्रयः. **2**(State) दास्यं, दासवृत्ति *f.*, प्रेष्य-भृत्य-भावः, सेवा; 'he lives in my s.' स मामनुजीवति, मदाश्रितः. **3** अनुवर्तनं, अनुवृत्तिः, आराधनं; *See* **Obedience. 4** वृत्तिः, नियोगः, कार्यं, व्यवसायः; व्यापारः, कर्मन् *n.*, व्यवहारः. **5** उपकारः, साहाय्यं, उपकृतं-ति *f.*, अनुग्रहः, हितं, अर्थः. **6** उपयोगः, व्यवहारः. **7** सपर्या, उपासना, पूजा, उपचारः, पूजोपचारः. **8**

भोजनपात्रगणः; 'I am entirely at your s.' सर्वथा त्वदधीनोऽहं, भवता यथेच्छं नियुज्यतामयं दासः; 'in whose s. are you' कस्य सेवया जीवसि, केन नियुक्तस्त्वं; 'to keep in s.' सेवायां नियुज् 7 U, 10, (कर्मणि) व्यापृ c. **-able,** *a.* उपयुक्त; उपयोगिन्, उपकारिन्, सहायभूत, प्र-उप-योज्य. **2** कार्यक्षम, कर्मकुशल, अलंकर्मीण. **-ably,** *adv.* सोपयोगं, सलाभं, सोपकारं. **-Servile,** *a.* दासेय (यी *f.*), दासोचित, दास-दास्य in comp.; 's. state - दासभावः, दास्यं, प्रेष्यभावः, दास्यवृत्तिः. **2** अतिचाटुपर, अत्यनुरोधिन्, श्ववृत्ति, अतिलालनपर. **-ity,** *s.* दास्यं, दास्यभावः. **2** चरणावपातः, श्ववृत्तिः, अतिलालनं, अत्यनुरोधः, छंदोनुवर्तनं. **-ly,** *adv.* दासवत्, अत्यनुरोधेन, अतिलालनपूर्वं. **-Servitor,** *s.* सेवकः, भृत्यः, &c.; *See* **Servant.** **-Servitude,** *s.* दास्यं, भृत्यभावः, किंकरत्वं, सेवा, प्रेष्यभावः, श्ववृत्तिः, सेवाधर्मः, सेवकदशा.

Sesame, Sesamum, *s.* तिलः, सारालः, सुगंधः; 'sowed with s.' तिल्य.

Session, *s.* उपवेशनं; 'sacrificial s.' सत्रं; 's. s judge दंडाधिकरणिकः. **2** (Time) सत्रकालः, कार्यनिर्वाहकालः.

Set, *s.* अस्तमयः, अस्तमनं, अस्तः. **2** जातं, जाति *f.*, गणः, संघः, श्रेणी, पंक्ति *f.*, समूहः, संयोगः; 's. s of ornaments fitting all parts of the body' सर्वांगिका आभरणसंयोगाः (Mal. 6). **3** (Of persons) वर्गः, गणः, संघः. **-***v. t.* आ-नि-धा 3 U, वि-,न्यस् 4 P, स्था c.: (स्थापयति), निविश् c., अवरुह् c.; oft. by कृ 8 U, दा 3 U, ऋ c. (अर्पयति); (in 'the ground) रुह् c., निखन् 1 P. **2** प्र-परि-कल्पृप् c., व्यव-स्था c. **3** प्रणि-धा, प्रतिबंध् 9 P, (यदिमणिरुणि प्रतिबध्यते P. I. 1), उत्-,खच् 10 (खचयति), अनु-व्यध् 4 P; 's. with jewels' रत्नानुविद्ध. **4** नि-,शो 4 P, उत्-,तिज् c., तीक्ष्णीकृ. **5** युज् 7 U, 10, सं-आ-°, समाधा, सं-,वि-धा (limb &c.); 's. one's foot in पदं कृ (lit. and fig.), करिष्यसि पदं पुनराश्रमेस्मिन् (S. 4), कृतं मे वपुषि नवयौवनेन पदं (Ka. 137); 's. a trap' पाशं युज्; 's. in motion' चल् c., संचर् c., ईर् 10.: 's. the heart on' मनः-धियं-चित्तं, &c. ('**Mind,** q. v.) बंध् or आ-धा or संनि-विश् c. or युज्, आसक्त-*a.* भू 1 P (with loc.); 's. your heart on religious duties' आधीयतां धर्मे धीः (Ka. 63); 's. not your heart on transient objects' विनाशधर्मसु विषयेषु मनो मा संनिवेशय, विनाशिविषयासक्तो मा भूः; 's. the teeth on edge' दंतहर्षं जन् c.; 's. right'. 's. in order' समीकृ, व्यव-स्था c., विन्यस्, विरच् 10; 's. to rights' प्रति-,समा-धा, सुस्थीकृ; प्रतियुज्, (प्रतियोजयितव्यवल्लकी R. VIII. 41); 's. free' मुच् 6 P or c.; *See* **Free;** 's. at naught' तृणाय-तृणवत्-मन् 4 A, तृणीकृ; ex. also by का मात्रा-गणना; 's. to music' स्वर-ताल-बद्ध *a.* कृ. **-***v. i.* अस्तं गम्-व्रज् 1 P or या-इ 2 P, अस्ताचलं-अस्तशिखरं-अवलंब् 1 A or प्राप् 5 P, सागरे मस्ज् 6 P. **2** संहन्-बंध्-pass. **-about,** आरभ् 1 A, प्र-वृत् 1 A. **-against,** विरुध् 7 U, प्रत्यव-स्था c., प्रतियुध् c.; *See* **Oppose.** **-apart,** पृथक् रक्ष् 1 P or स्था c., पृथक् कृ. **-aside,** अवक्षिप् 6 P, मुच्, त्यज् 1 P, oft. by आस् 2 A, स्था 1 P; 's. aside that point' आस्तां-तिष्ठतु-तावद्दूरे स विषयः; *See* **Reject, Omit.** **-before,** उप-स्था c., उपानी 1 P, उपाहृ 1 P; 's. food before a person' परिविष् c. **-down,** न्यस्, भूमौ न्यस् or नि-धा. **2** आ-अधि-क्षिप्, भर्त्स् 10 A, अपकृष् 1 P, अवमन् c., अव-ज्ञा 9 U. **3** गण् 10, मन् 4 A. **4** (In writing) लिख् 6 P, निर्दिश् 6 P. **-forth,** उपनि-विनि-अस्, वर्ण् 10, उपक्षिप्, निर्दिश्, अभि-धा. **-forward,** प्रया, प्रगम्, प्रसृ; (*v. t.*) पुरस्कृ, उन्नम् c., वृध् c. **-in,** समुपा-गम्, उप-स्था, प्रवृत्, अवतृ 1 P; 'summer which has just s. in' अचिरप्रवृत्तं ग्रीष्मसमयं (S. 1), वसंतावतारसमये &c.; (*v. t.*) अंतर् ग्रह् 9 U. **-off, Set out,** q. v.; (*v. t.*) शुभ् c., प्रकाश् c; शोभां पुष् 4, 9 P लक्ष्मीं तन् 8 U, (मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति S. 1.); oft. by शुभ् 1 A, गुणा विनयेन शोभंते 'are s. off by modesty'; 's. off against' तुल् 10 (तुलयति), प्रतिगण्. **-on,** प्रवृत् c., प्रयुज्, (अथावमानेन पितुः प्रयुक्ता K. I. 21), प्रेर्, प्रोत्सह् c.; *See* **Prompt;** 's. on foot' प्रति-ष्ठा c., प्रवृत् c., आरभ्; 's. on fire' दह् c., ज्वलनाय ऋ c. or विसृज् 6 P; 's. on guard' अवहित *a.* कृ. **-out,** प्र-स्था 1 A, प्र-या, प्रगम्, प्रचल्, निर्गम्. **-over,** नियुज्, अधिकृ, अधि-ष्ठा c. **-to,** मनः बंध् or युज् or निविश् c., आसक्त-*a.* भू; 'they s. to their work' कार्यव्यापृता बभूवुः &c., **-up,** बंध्, उत्था c.; सं-अव-प्रति-स्था c.; *See* **Raise,** 'the people s. up a howl' बद्धकोलाहला जनाः; उत्थितो निनादः 'a scream was s. up'; (*v. i.*) वृत्तिं-व्यवहारं-आरभ् or प्रवृत् c.; 's. up for' अभिमन् 4 A; *See* **Pretend, Profess.** **-upon,** आक्रम्, आ-अव-स्कंद् 1 P, सहसा ग्रह्. **-***a.* नियत, परिकल्पित, एकरूप; विन्यस्त, सुविरचित. **2** स्थापित, न्यस्त, निहित, निवेशित,

&c. 3 खचित, छुरित, अनुविद्ध, प्रणिहित, प्रतिबद्ध, प्रत्युप्त, करंब, करंबित. **-ter,** *s.* योजयितृ *m.*, प्रतिष्ठापकः, &c. 2 मृगयाकुक्कुरः, विश्वकद्रुः. **-ting,** *s.* योजना, सन्निवेशः, स्थापनं-ना, अर्पणं, रोपणं, &c. 2 अस्तमनं, अस्तं. **-Set-down,** *s.* अपकर्षणं, अभिभवः, मानखंडनं. **-Set-off,** *s.* परिवर्तः, तुल्यमूल्यं वस्तु.

Setateous, *a.* शूकयुक्त, बहुशूक.

Settle, *v. t.* स्था c. (स्थापयति), प्रति-अव-°, नि-आ-रुह् c. 2 सं-व्यव-स्था c., व्यवसो 4 P, निर्-अव-धृ 10, संकल्प् c., साध् c.; 's. ing what to say' व्यवस्थापितवाक्, वाचं व्यवस्थाप्य; अस्याः पितुः समीपनयनमवस्थितमेव (S. 5) 'is but s. ed &c.' 3 (Lands &c.) दा 3 U, युज् 10 (with instr. of grant); त्वां शासनशतेन योजयिष्यामि (P. I. 4). 4 अधिवस् c. 5 स्थिरीकृ 8 U, स्वस्थ-निर्वृत-*a.* कृ. 6 प्र-,शम् c. (शमयति), सं-धा 3 U, समा-धा. 7 सं-,वि-धा, वि-,रच्, विन्यस् 4 U; 's. in marriage' निविश् c., (तनयं निवेश्य S. 4); 's. a debt' ऋणं शुध् c. or अपाकृ. 8 अधः पत् c. or गम् c., अव-सद् c. -*v. i.* अव-व्यवस्था 1 A, स्थिरीभू 1 P, निवासं स्थिरीकृ. 2 प्रशम् 4 P, विश्रम् 4 P. 3 तले पत् 1 P, सद् 1 P, अव-नि-°, अधः गम् 1 P; प्रसद् (for becoming clear). 4 अधः पत् c. 5 घनीभू, संहन् pass., संहतीभू; 's. ed amongst themselves' मिथः प्रशमं याताः, परस्परसंधानमकुर्वन्; 's. in life' विवह् pass., निविश् 6 A (संसारपथं), विवाहं कृ, प्रतिष्ठित-*a.* भू. **-ed,** *a.* स्थापित, रोपित, प्रतिष्ठित &c. 2 नियत, निश्चित, निर्णीत, व्यवस्थित, सिद्ध, निष्पन्न. **-ing,-ment,** *s.* स्थापनं, सं-प्रति-अव-°. 2 निर्णयः, निश्चयः, निर्धारणं-णा, अवधारणं 3 सं-धानं, प्र-,शमः-मनं, संधिः, समाधानं. 4 अधिवासनं. 5 अधिवासितदेशः; 's. in life' विवाहः, संसारप्रतिष्ठा; 'marriage-s.' शुल्कः-ल्कं. **-er,** *s.* अधिवासिन् *m.*

Seven, *a.* सप्तन्. **-fold,** *a.* सप्तगुणं. -*adv.* सप्तधा, सप्तगुणं. **-th,** *a.* सप्तम (मी *f.*). **-Seventeen,** *a.* सप्तदशन्. **-th,** *a.* सप्तदश (शी *f.*,). **-Seventy,** *a.* सप्तति *f.*

Sever, *v. t.* अव-वि-च्छिद् 7 P or c., अवकृत् 6 P or c., वियुज् 7 A, 10, विश्लिष् c., विभिद् c. **-al,** *a.* भिन्न, पृथक् in comp., पृथगात्मक. 2 अनेक, बहु; *See* **Many.** 3 स्व, आत्म in comp. 4 स्व-स्व; *See* **Respective.** **-ance,** *s.* विच्छेदः, विश्लेषः, विभेदः, पृथक्करणं. **-ally,** *adv.* पृथक्, पृथक् पृथक्, प्रत्येकं, अवयवशः, व्यक्तिशः. **-alty,** *s.* भिन्नता, पार्थक्यं, पृथग्भावः.

Severe, *a.* खर, परुष, तीक्ष्ण, निष्ठुर, कठोर, चंड, तीव्र, उग्र, असौम्य, उग्रशासन, तीक्ष्णदंड. 2 (Of things only) दुःसह, दुर्विषह; तुमुल, घोर, (of fight); अत्यंत, अतिमात्र; सु-अति pr. **-ity,** *s.* पारुष्यं, कठोरता, नैष्ठुर्यं, काठिन्यं, उग्रदंडता; तीव्रता, दुःसहता, &c. 2 तीक्ष्णदंडः. **-ly,** *adv.* परुषं, कठोरं, निष्ठुरं, उग्रं, तीव्रं, तीक्ष्णं, चंडं, बलवत्.

Sew, *v. t.* सिव् 4 P; वि-नि-° (together); वे 1 P, प्र-वि-°. **-ed, Sewn,** *a.* स्यूत-न, उत, प्रोत. **-ing,** *s.* सीवनं, सेवनं, स्यूति *f.*

Sewer, *s.* प्रणाली-लः, परि(री)वाहः, जलोच्छ्वासः, मलनिर्गमः, संकरः, मलपथः.

Sex, *s.* Ex. by स्त्री or पुंस्-पुरुषः ('Man' q. v.), द्वंद्वं, मिथुनं. 2 जाति *f.*, लिंगं; 'the male s.' पुंजातिः; स्त्रीजातिः &c. **-ual,** *a.* स्त्रीपुंस, स्त्रीपुरुष in comp.; 's. intercourse' सु-,रतं, मैथुनं,: संगमः, व्यवायः, संगः, संभोगः.

Sexagenarian, *s.* षष्टिवर्षीय.

Sexangular, *a.* षडस्र, षट्कोण.

Sexennial, *a.* षड्वार्षिक (की *f.*).

Sextant, *s.* वृत्तषड्भागः.

Shabby, *a.* कुत्सित, कृपण, तुच्छ, निंद्य, अपकृष्ट, अधम, जघन्य; *See* **Mean.** 2 मलिन; सूत्रदरिद्र, जर्जरित,पाश in comp. **-ily,** *adv.* कुत्सितं, कृपणं, मलिनं. **-iness,** *s.* कार्पण्यं, मालिन्यं &c.

Shackle, *s.* निगडः, शृंखला-लः, बंधनं, पाशः. -*v. t.* निगडैः बंध् 9 P or संयम् 1 A; *See* **Fetter.**

Shade, *s.* छाया, in all senses; 'the dense s. of sugarcanes' इक्षुच्छायं; 'full of s.' प्रच्छायं; अनातपः, अप्रकाशः, निरातपस्थानं. 2 अंधकारः, तिमिरं, तमस् *n.* 3 व्यवधा-धानं, तिरस्करिणी, वितानं. 4 क्रमः, भागः. 5 **Ghost,** q. v.; 's. of difference' सूक्ष्मभेदः, स्वल्पांतरं; 's. of meaning' अर्थस्य सूक्ष्मभेदः; 'like a picture with all its s. s painted by a pencil' उन्मीलितं तूलिकयेव चित्रं (K. I. 32); cast into s.' तिरस्कृ 8 U, प्रत्यादिश् 6 P; *See* **Back-ground.** -*v. t.* छद् 10, प्र-आ-°, वितन्, 8 U. 2 आतपं निवार् 10, अनातप-*a.* कृ. **-y,** *a.* प्रच्छाय, सच्छाय, छायाबहुल-आवृत-युक्त-सनाथ; निरातप, आतपरहित, छाया in comp.; 'a s. tree' छायावृक्षः. **-Shadow,** *s.* छाया, प्रतिच्छाया, प्रतिबिंबं, प्रतिमा, प्रतिरूपं, प्रतिमूर्ति *f.* 2 आश्रयः, शरणं. 3 तमस् *n.*, अंधकारः; 'deep s. s' गाढतमः पटलानि. 4 गंधः, लेशः, आभासः. -*v. t.* प्र-आ-च्छद् 10. 2 आभासं दृश् c., प्रतिबिंबयति (D.). **-y,** *a.* छायारूप, असार, छायात्मक, अवास्तविक (की *f.*), मिथ्या-मृषा in comp. 2 मंद-

च्छाय, मंदकांति-प्रभ,' मंद-न्यून-तेजस् ; *See* **Dim, Faint.**

Shaft, *s.* कांडः (of arrows) **2** बाणः, शरः, इषुः; *See* **Arrow;** शल्यः-ल्यं. **3** दंडः; (of a carriage) धुर् *f.*, कूबरः; (of a plough) ईषाशा; (of a mine) कूपः, गर्तः, अवटः.

Shag, *s.* दृढ-स्थूल-लोमन् *n.* **-gy,** *a.* लो-(रो)मश, लोमावृत, स्थूललोमन्. **2** रूक्ष, मलिन.

Shake, *v. i.* प्र-,कंप्-वेप्- 1 A, वि-प्र-चल् 1 P, वेल्ल् 1 P, सं-प्र-क्षुभ् 4 P, 1 A; (fig.) अभिभू-बाध्-pass. *-v. t.* कंप् c., धू 5, 9 U, 6 P, वि-आ-°, चल् c., सं-वि-प्र-°; क्षुभ् c.; ध्वानेन सर्वतः प्रचलितमिव तदरण्यभवत् (Ka. 29) ' was, as if, s. en by the sound '. **2** अभिभू 1 P, आकुलीकृ 8 U; ' this position would be s. en ' इति प्रतिपादितमाकुलीभवेत् (S. B. 335); ' s. one's confidence ' साशंक-शंकान्वित-*a.* कृ; ' s. about ' प्रेंख् c., आंदोलयति (D.); ' s. off ' निर्धू, निरस् 4 U, निराकृ, अपास्, त्यज् 1 P, अपानुद् 6 P, प्रतिसृ c.; *See* **Dispel;** ' s. hands with each other ' अन्योन्यं हस्तौ स्पृशतः. *-s.*, **-ing,** *s.* कंपः धूननं, वि-,धु(धू)ति *f.*, विचलनं, वेपनं, सं-,क्षोभः. **-ing,** *a.* चल, सकंप, चलन, लोल, तरल, चंचल, पारिप्लव. **2** क्षोभकारिन्. **-y,** *a.* अस्थिर, चल, लोल; *See* **Fickle.**

Shallow, *a.* गाध, उत्तान; अग(गं)भीर, गाधजल, अल्पजल; ' s. knowledge ' पल्लवाग्राहि पांडित्यं; ' s. person ' अल्प-मतिः-बुद्धिः, गाधज्ञानः. *-s.* सैकतं, पुलिनं, गाधस्थलं.

Sham, *s.* व्यपदेशः, छद्मन् *n.*, व्याजः, छलं; *See* **Pretext.** *-a.* छाद्मिक-कापटिक-(की *f.*) कपट-व्याज-कूट-मिथ्या in comp.; कृतक, अश्रद्धेय, अनृत. *-v. i.* अप-व्यप-दिश् 6 P; *See* **Pretend.**

Shambles, *s.* शू(सू)ना, सौनस्थानं.

Shambling, *a.* वक्र, विरूप. **2** चंचल, चपल, विषम.

Shame, *s.* लज्जा, ह्रीः, त्रपा, व्रीडा. **2** अप-मानः, दुष्कीर्ति *f.*, कलंकः, लज्जास्पदं, अकी-र्तिहेतुः; ' to feel s. ' लज्ज् 6 A; ' s., for s.! ' धिक् (with acc.). *-v. t.* ' put to s. ' ह्री c. (ह्रेपयति); त्रप् c., व्रीड् c., लज्ज् c. **2** अपमन् c., कलं-कयति (D.); *See* **Disgrace.** **3** अवमन् 4 A, लघूकृ 8 U, अव-ज्ञा 9 U. **-ed,** ' s.-faced ' *a.* लज्जित, त्रपित, व्रीडित, लज्जा-व्रीडा-शील. **-ful,** *a.* लज्जाकर (री *f.*), ह्रेपण (णी *f.*), लज्जा-त्रपा-जनन (नी *f.*), अपकीर्तिकर, गर्ह्य. **-less,** *a.* निर्लज्ज, निर्व्रीड, निर्ह्रीक, अपत्रप, लज्जाहीन, त्यक्त-निरस्त-लज्ज, वियात, धृष्ट, सप्रतिभ. **-'essly,** *adv.* निर्लज्जं, लज्जां विहाय-विजित्य.

Shampoo, *v. t.* संवह् c., मृद् 9 P or c. **-er,** *s.* संवाहकः. **-ing,** *s.* संवाहनं, अंगमर्दनं.

Shank, *s.* जंघास्थि *n.* **2** जंघा, दीर्घभागः अंशः; ' having long s.s ' दीर्घजंघ, ऊर्ध्वजु, ऊर्ध्वजानु.

Shanty, *See* **Hut.**

Shape, *s.* आकारः, रूपं, आकृति *f.*, मूर्ति *f.*, संस्कारः, संस्थानं. *-v. t.* आकारं वि-धा 3 U or दा 3 U, रूप् 10, क्लृप् c., घट् c, (घट-यति), रच् 10. **-ed,** *a.* साकार, सरूप, रूपिन्, (*s.*) in comp.: 'moon-s.' चंद्राकृति &c. **-less,** *a.* निराकार, अमूर्त, निराकृति, अरूप. **2** अप-वि-कु-रूप. **-ly,** *a.* सुरूप, सुरेख, शुद्धाकार.

Shard, *s.* मृत्पात्रखंडः.

Share, *v. t.* सं-विभज् 1 U, परिक्लृप् c., अंश् 10, वंट् 10: अंशांशि दा 3 U; ' sorrow s. ed by dear friends' स्निग्धजनसंविभक्तं दुःखं- (S. 3): ' with ' whom else shall I s. my grief ' केन वान्येन सह साधारणीकरोमि दुःखं (Ka. 233). **2** भागं-अंशं-ह 1 P or लभ् 1 A or ग्रह् 9 U, अन्येन सह भुज् 7 A; ' the demons shall s. the labour of churning ' दानवा अपि मंथनश्रमभाजः भवेयुः, (युष्माभिः सार्धं) मंथनश्रममनुभवेयुः, &c.; ' s. ing equally pleasure and pain ' समदुःखसुख. *-s.* अंशः, भागः, वंटः, उद्धारः (of an estate); ' he is to have a s. ' अंशभाग्भवेत्; ' he has a s. in the plot ' कपटप्रबंधे सहकारी असौ. **2** (Of a plough) फालः, कुशी. **-er,** *s.* अंशहरः, अंशिन् *m.*, भागिन्-भाक् in comp. **-Share-holder,** *s.* अंशभागी, अंशग्राही, भागहारी-ग्राही.

Shark, *s.* ग्राहः, नक्रः, अवहारः, मकरः; (fig.) बकवृत्तिः, धूर्तः; *See* **Rogue.**

Sharp, *a.* तीक्ष्ण, in all senses; तीक्ष्णा बुद्धिः, तीक्ष्णा वर्षधारा, तीक्ष्णो दंडः &c.; नि-,शात, नि-,शित, प्र-,खर, तिग्म, तीव्र, तीक्ष्ण-शित-धार, सूच्यग्र, तीक्ष्णाग्र; ' s. descending arrows ' निशितनिपाताः शराः (S. 1). **2** (Intellect) अतिप्रदीप्त, सूक्ष्म, तीक्ष्ण, सूक्ष्म-शीघ्र-ग्राहिन्; (of persons) तीक्ष्णमति, कुशाग्रबुद्धि-मति, सूक्ष्म-शीघ्र-तीव्र-मति, प्रदीप्तप्रज्ञ, विदग्ध, निपुण, पटु, चतुर, कुशल; (in action) शीघ्र, आशु-क्षिप्र-कारिन्, तीक्ष्ण-कर्मन्. **3** सरस, विदग्ध, रसिक. **4** अम्ल, शुक्त. **5** कटु, उग्र, (smell &c.) **6** कटु, उग्र, तीव्र तीक्ष्ण, परुष, अरुंतुद, मर्मस्पृश्-भिद्; ' s. pain ' तीव्रवेदना; ' s. language ' परुषवचनं, वागसिः; ' s. sound ' कर्कशध्वनिः; ' s.-edged ' तीक्ष्ण

निशितधार, धारासनाथ; ' s.-pointed ' तीक्ष्णाग्र, सूच्यग्र; ' s.-set ' तीव्रक्षुधाग्रस्त, अतिप्रबलक्षुधावसन्न; ' s.-shooter ' लक्ष्य-वेधिन्; ' s.-sighted ' तीक्ष्ण-सूक्ष्म-दृष्टि, &c. -s. उदात्तः;उदात्त-उच्च-स्वरः. -en, v.t. नि-, शो 4 P, उत्तिज् c., शाणयति (D.), तीक्ष्णीकृ 8 U, क्ष्णु 2 P; (appetite) उत्-,बुध् c., प्र-,रुच् c., दीप् c. -er, s. वंचकः, धूर्तः; See Rogue. -ly, adv. तीक्ष्णं, तीव्रं, प्रखरं, उग्रं, परुषं, &c. -ness, s. तीक्ष्णता, कुशाग्र-मतित्वं, मतिप्रकर्षः, पाटवं, पारुष्यं, कार्कश्यं &c.

Shatter, v. t. वि-,शॄ 9 P, वि-,दॄ 9 P or c., खंडशः-लवशः-भंज् 7 P, लवशः चूर्ण् 10 or निष्पिष् 7 P; ' why am I not s. ed into a thousand pieces ' दीर्ये किं न सहस्रधाहं (U. 6); यथा यथायं वैनासिकसमय उपपत्तिमत्त्वाय परीक्ष्यते तथा तथा विदीर्यत एव (S. B. 580) ' the more is this V. theory put to a logical test, the more is it s. ed to pieces (does it give way). -v. i. विदॄ &c. pass.

Shave, v. t मुंड् 1 P, 10, क्षुरेण कृत् 6 P or छिद् 7 P or लू 9 U, आवप् c., क्षुर्-खुर् 6 P. 2 तक्ष् 1, 5 P; See Pare. -er, s. क्षौरिकः, नापितः, क्षुरिन् m., मुंडकः. -ing, s. क्षौरं, मुंडनं. 2 तष्टं, विदलं, शकलं, खंडः.

She, pron. सा; in comp. ex. by f. terminations, ' s.-goat ' अजा, ' s.-sparrow ' चटका &c.

Sheaf, s. (शस्य-)मुष्टि m. f., स्तंबः, गुच्छः, स्तबकः.

Shear, v. t. लू 9 U, कृत् 6 P, छिद् 7 P, आवप् c., मुंड् 1 P, 10, वि-,शॄ 9 P. 2 अपहृ 1 P, निर्हृ; ' shorn of ' वीत, हृत, निर्, हीन in comp.; See Destitute; 'was shorn of his arms' छिन्नबाहुः कृतः or तस्य बाहू व्यशीर्येताम्. -er, s. लोम-च्छिद् m.-च्छेदिन्, छिद् in comp. -ing, s. लवनं, कर्तनं, वपनं, छेदः-दनं. -Shears, s. खंडधारा, कर्तरिका, कर्तरी, कृपाणी.

Sheath, s. कोशः-षः, पिधानं, आधारः; आ-, वेष्टनं, पुटः-टं, आच्छादनं. 2 दलं. -Sheathe, v. t. कोशे नि-धा 3 U or निविश् c. 2 आ-परि-वेष्ट् 1 A or c., पि-धा, आवृ 5 U, आच्छद् 10.

Shed, v. t. नि-,पत् c., वि-,मुच् 6 P, or c., विसृज् 6 P, गल् c.; ' s. tears ' बाष्पं विहृ 1 P, अश्रूणि वि-,मुच् or पत् c. 2 (Blood) स्रु c., पत् c., मुच्, मोक्ष् 10; 's. influence' फल् 1 P; ' the moon s. s her white glory ' इंदुर्धवलरश्मिजालं विकिरति. 3 (Light) क्षिप् 6 P, विसृज्, प्रकॄ 6 P, प्रसृ c. -s. शाला; ' s. for cattle ' गो-शाला, गोष्ठं. -der, s. स्रावकः, मोचकः पातकः.

Sheen, a. उज्ज्वल, दीप्तिमत्; See Bright. -s. प्रभा, तेजस् n.

Sheep, s. मेषः, अविः, उरभ्रः, ऊर्णायुः; See Ram; ' a female s. ' मेषी, एडका, 'goats and s. ' अजाविकं; ' flock of s. ' औरभ्रं -ish, a. अप्रतिभ, लज्जाशील, जनभीत; निस्तेजस्, निष्प्रभ, हत-नष्ट-गत-वीर्य, मेष-स्वभाव-शील.

Sheer, a. शुद्ध, केवल, मात्र in comp.; See Bare, Mere. -v. i. वि-,अपसृ-सृप् 1 P.

Sheet, s. उत्तरच्छदः, प्रच्छदः, प्रच्छदपटः-वस्त्रं, शय्याच्छादनं. 2 (Of paper) पत्रं, फलकं, खंडः, एकभागः. 3 पत्रं, फलकः-कं (s. of metal); 'winding-s. ' प्रेत-शव-वस्त्रं; ' s. of water ' जलसंघातः, तोयराशिः.

Shelf, s. काष्ठफलकः.

Shell. s. कोशः-षः, कंचुकः, कवचः-चं, त्वच् f. (of fruit &c.); पुटः-टं; ' bivalve s. ' कंबुः-बु; ' conch-s. ' शंखः; कंबुः; 'oyster-s. ' शुक्ति f.; ' dealer in s. s. ' शंखकारः, शांखिकः; कांचविकः, ' s. of a pea ' शिंबा, बीजकोशः; तुषः (of rice.) 2 आ-परि-वेष्टनं, पुटः, कोशः (envelope). 3 बहि-र्भागः; ' s.-cutter ' कांचविकः; ' s.-fish ' कंबुस्थः, शंखस्थः. -v. t. कोषं-त्वचं &c. अपनी 1 P or निर्हृ 1 P, निस्त्वचीकृ 8 U. -y, a. शंखिन्, कंबुमय (यी f.),-पूर्ण.

Thousand, *a., s.* सहस्रं, दशशतं; 't.s of times' सहस्रशः-वारं; 'in a t. ways or parts' सहस्रधा; 'ten t.' अयुतं; 'hundred t. लक्षं; 'by t. s.' सहस्रशः. **-th,** *a.* सहस्रतम (मी *f.*).

Thrall, *s.* दासः. **-dom,** *s.* दास्यं, दासवृत्ति *f.*, दासत्वं; *See* **Slave,-ery.** **2** वशता, पारतंत्र्यं, अधीनता.

Thrash, *v. t.* परुषं-बलवत्-तड् 10 or प्र-हृ 1 P. **2** निस्तुषीकृ 8 U, पू 9 U; *See* **Thresh.**

Thread, *s.* सूत्रं, तंतुः, (fig. also), (आशा-तंतुः), गुणः,तंत्रं; 't. of a story' कथाप्रबंधः-अनुबंधः-संदर्भः-अन्वयः,अनु-,संधानं,प्रबंधार्थः; 't.-bare' सूत्रदरिद्र; अयं पटः सूत्रदरिद्रतां गतः (Mr. 2), सूत्रशेष; जर्जर. **-***v. t.* सूत्र् 10; गु(गुं)फ् 6 P, ग्रंथ् 9 P; 't. one's way' मंदं मंदं प्रसृप् 1 P. **-y,** *a.* सूत्र-तंतु-मय (यी *f.*).

Threat, *s.* तर्जनं, तर्जितं, भर्त्सनं, अपकारगिर् *f.* **-en,** *v. t.* सं-,तर्ज् 1 P, 10 A, निर्-, भर्त्स् 10 A, भी c. **-***v. i.* प्रत्या-सद् 1 P, लग्न-*a.* संपद् 4 A, उन्नम् 1 P; 'war t.s' प्रत्यासीदति रणप्रसंगः; *See* **Impend.** **-ening,** *a.* भर्त्सनकृत्; अनिष्टावेदिन्; प्रत्यासन्नभय, विभीषक. **-eningly,** *adv.* तर्जयत्-*a.*

Three *a.* त्रि (तिस्र् *f.*); 'aggregate of t. त्रयं, त्रितयं, त्रिकं, त्रयी; 't. months' त्रिमासं, मासत्रयं; 'two or t.' द्वित्र, त्रि-चतुर, &c.; 't.-cornered' त्रिकोण; 't.-eyed' त्रिलोचनः, त्रिनयनः; &c.; 't.-fold' त्रिगुण; 't.-fourths' त्रिपादः, पाद-त्रयं; '2 and t.-fourths' पादोनत्रयं. **-Third,** *a.* तृतीय. **-***s.* तृतीयभागः-अंशः. **-ly,** *adv.* तृतीयस्थाने. **-Thrice,** *adv.* त्रिः, त्रिवारं.

Thresh, *v. t.* मृद् 9 P, परि-,पू 9 U, निस्तु-षीकृ 8 U, कंड् 10. **2** तड् 10, प्र-हृ 1 P. **-ed,** *a.* निस्तुषित, निस्तुष, पूत, बहुलीकृत. **-ing,** *s.* पावनं, बहुलीकरणं, कंडनं, निस्तु-षीकरणं; 't. floor' खलधान्यं; 't. instrument' मुसलः-लं, अयोग्रं, कंडनी.

Threshold, *s.* देहली, द्वारपिंडी, ग्रहावग्रहणी; (fig.) प्रारंभः.

Thrift, *s.* मितव्ययः-व्ययेता. **2** सं-वि-वृद्धि *f.* **-y,** *a.* मितव्ययिन्, अल्पव्यय; *See* **Frugal.**

Thrill, *s.* प्र-,कंपः, स्फुरणं, हर्षः; (of joy, horror, &c.) रोमांचः, पुलकः; उद्धर्षः; 't. of joy' हर्षरोमांचः, पुलकोद्गमः, रोमहर्षः, 'a t. came over her body' तस्या गात्रं रोमांचितं-पुलकितं-कंटकितं-बभूव; 'with a t. of horror' साध्वसरोमांचितगात्रः. **-***v.* स्फुर् 6 P, हृष् 4 P, प्र-,कंप् 1 A; gen. ex. by पुलकित, रोमांचित, कंटकित, (*a.*); 'he t.-ed with joy' आनंदपुलकिततनुर्बभूव. **-ing,** *a.* लो(रो)महर्षण (णी *f.*), पुलकित, रोमांचित, &c.

Thrive, *v. i.* प्र-,वृध् 1 A, प्र-उप-चि pass., संऋध् 4, 5 P, उन्नतिं-उत्कर्षं-प्राप् 5 P; *See* **Prosper, Flourish.** **-ing,** *a.* वर्धिष्णु, प्र-उप-चीयमान, समृद्ध.

Throat, *s.* कंठः, गलः, कृकः, निगरणः; 'relat-ing to t.' कंठ्य; 'up to the t.' आकंठं, आकंठात्.

Throb, *v. t.* प्र-,स्पंद् 1 A, स्फुर् 6 P, वेप् 1A; कंप् 1 A. **-bing,** *s.* स्पंदः, स्पंदनं; स्फुरणं, स्फुरितं, कंपः.

Throe, *s.* यातना, वेदना, व्यथा; (of deli-very) प्रसववेदना, प्रसवकालव्यथा.

Throne, *s.* सिंहासनं, नृपासनं, &c.; भद्रासनं; 'ascended the ancestral t.' भेजे पैतृ-कमासनं (R. XVII. 28); 'getting the t.' राजपदावाप्ति *f.*; 'having lost his t.' छत्रभ्रष्टः. **-***v. t.* अभिषिच् 6 P, राज्ये अभिषिच्, सिंहासनं आरुह् c.; 't. ed king' अभिषिक्तो राजा.

Throng, *s.* जनसंमर्दः-संकुलं, लोकनिवहः. **-***v. t.* आ-समा-कृ 6 P, संबाध् 1 A. **-***v. i.* जनाकीर्ण-जनसंबाध-*a.* भू; *See* **Crowd.** **-ed,** *a.* आ-समा-कीर्ण, जनसंकुल-संबाधित.

Throttle, *v. t.* गलं निष्पीड् 10, गलनिष्पी-डनेन व्या-पद् c., गलहस्तयति (D.).

Through, *prep.* Ex by instr. or abl. **2** मध्येन, अंतरेण; 't. the branches' विट पांतरेण. **3** पारं, तीरांतरं यावत्. **4** मुखेन; द्वारेण, द्वारा, in comp; सखीमुखेनोचे 'spoke t. her friend'. **-***adv.* समग्रं, साद्यंतं, शेषं यावत्, आसमाप्तेः; oft. by पारं गम् or दृश् 1 P; 'he has learnt the Vedas t.' श्रुतिपारं गतः, श्रुतिपारदृश्वा, 'to get t.' तारयति-पारयति (D.); समाप् c. **-Throughout,** *prep.* Ex. by सर्व, समस्त; *See* **All;** आ or यावत् in comp.; 't. one's life' यावज्जीवं-वेन, आजीवि-तांतात् 't. the town' अखिले नगरे, नगरे सर्वत्र. **-***adv* सर्वत्र, अशेषतः; सर्वत्र वैता-लीयं छंदः 'the metre is Vaitāli'ya t.'

Throw, *v. t.* प्र-,क्षिप् 6 P, प्र-,अस् 4 P, पत् c., प्र-,मुच् 6 P, विसृज् 6 P, ईर् c, प्रेष् c., (with loc. of place); 't. a glance' दृष्टिं-चक्षुः-क्षिप् or दा 3 U or पत् c.; 't. into disorder' पिंजली-आकुली-कृ 8 U, व्यूहं भंज् 7 P; 't. dice' अक्षान् आवप् 1 P or पत् c. **-about,** उत्-वि-क्षिप्, इत-स्ततः चल् c.; बाहूत्क्षेपं 't. ing about the arms.' **-away,** निः-वि-क्षिप्, अपास्,

अप-हा 3 P, अपव्यध् 4 P, त्यज् 1 P; (time) क्षिप्, हृ 1 P, यां c. (यांपयति). **2** निरस्, प्रत्याख्या 2 P; *See* **Reject;** 'it was t.-ing words away' निरर्थकं-मोघं-एव तद् भाषणं, वागायासमात्रकं भाषणं; 'kindness was not thrown away upon him' सोऽनुग्रहं कृतज्ञतयास्मरत्; 'to be thrown away upon' विफलीभू 1 P, विफलतां गम् 1 P, लयं-क्षयं-नाशं-गम्-या &c.; गता नाशं तारा उपकृतमसाधाविव जने (Mr. 5); असत्पुरुषसेवेव दृष्टिर्विफलतां गता (Mr. 1). **-down,** पत् c., अधः क्षिप् or पत्; प्र-भ्रंश् c., प्र-च्यु c. **-off** निः-प्र-क्षिप्, अव-निर्-धू 5, 9 U, निराकृ, अपव्यध्, अप-सृ c.; 't. one off his guard' असावधान-*a.* कृ; 't. off the veil or mask' स्वरूपं प्रकटीकृ or वि-वृ 5 U or प्रकाश् c. **-out, Reject,** q. v. **2** निः-,सृ c., अपास्. **3** (Hints) सूच् 10, उप-क्षिप्, उपन्यस्, व्यंज् c. **-up,** उदस्, उत्क्षिप् &c.; (from the stomach) उद्वम् 1 P, उद्-ग 6 P; 'I have thrown a wall around' उपक्षिप्तो मया भित्तिबंधः (M. 5). **-***s.* प्र-,क्षेपः-पणं, प्रासनं, प्रेरणं; &c. **-er,** *s.* क्षेप्तृ *m.*, प्रासकः.

Thrum, *s.* दशाः-वस्तयः (pl.).

Thrush, *s.* सारिका, शरारि *f*

Thrust, *v. t.* अपव्यध् 4 P, प्र-सृ c., प्र-क्षिप् 6 P; 't. away', 't. out' निरस् 4 U, निः-सृ c., बहिष्कृ 8 U; (the hand &c.) प्र-सृ c.; 't. into' प्र-नि-विश् c.; 't. on' प्रचुद् c., c. प्रचल् c. **-***s.* आघातः, प्रहारः ताडनं; (with fist) मुष्टिप्रहारः-आघातः.

Thumb, *s.* अंगुष्ठः; 'under one's t.' आयत्त, वश्य. **-***v. t.* अंगुष्ठेन परामृश् 6 P or स्पृश् 6 P or अंक् 10.

Thump, *v. t.* आहन् 2 U, तड् 10, प्र-हृ 1 P. **-***s.* आ-अभि-घातः, प्रहारः.

Thunder, *s.* मेघगर्जनं, घनध्वनिः, जीमूतस्तनितं, मेघगर्जितं; and sim. comp.; वि-, स्फूर्जथुः- थूः, स्फूर्जितं, स्तनितं, रसितं; गर्जितं, गर्जनं-ना; 't. bolt' वज्रः-ज्रं, कुलिशं, भिदुरं, पविः, अशनि *m. f.*, शतकोटिः, स्वरुः, शंबः, ह्रादिनी, दंभोलिः; 't. clap' वज्रनिर्घोषः-निर्घातस्वनः-निष्पेषः; *See* (*s.*); 't.-storm' अशनिवर्षः-पातः; 't.-struck' अशनिताडित, वज्राहत, *See* **Astounded.** **-***v.* गर्ज् 1 P, स्तन् 1 P, वि-स्फुर्ज् 1 P; 'shouldst t. reproof' यत्त्वं (साक्षेपमिव) नदसि सिंहनादैः (Mr. 5). **-er,** *s.* वज्रिन् *m.*, कुलिशभृत्, वज्रपाणिः.

Thursday, *s.* गुरुवासरः.

Thus, *adv.* एवं, इत्थं, इति, अनेन प्रकारेण, अनया रीत्या.

Thwack, *See* **Smack.**

Thwart, *v. t.* खंड् 10, वि-प्रति-हन् 2 P, मोघीकृ 8 U, नि-प्रति-वि-रुध् 7 U; प्रतिकूलयति-प्रतीपयति (D.); क ईप्सितार्थस्थिरनिश्चयं मनः प्रतीपयेत् (K. v. 5); *See* **Frustrate, Baffle.**

Tiara, *s.* मुकुटं, किरीटः, मौलिः.

Tick, *s.* यूका. **2 Credit,** q. v.

Ticket, निर्दर्शनी, अभिज्ञानपत्रं.

Tickle, *v.* कुतकूतयति (D.), कंडूयति (D.); (fig.) **Please, Gratify,** q. v. **-er,** *s.* कंडूयनकः.

Tide, *s.* वेला (of the sea). **2** स्रोतस् *n.*, ओघः, वेगः, रयः; *See* **Stream.** **-***v. t.* (over) तॄ 1 P, सं-उत्-°.

Tidy, *a.* **Neat,** q. v.

Tidings, *s.* वार्ता, प्रवृत्ति *f.*; *See* **News.**

Tie, *v. t.* नि-,बंध् 9 P, पिनह् 4 P; (together) योक्त्रयति (D.), संबंध्, संश्लिष् c., संसंज् c., सं-युज् 7 U, 10, संधा 3 U; (flowers &c.) गुंफ् 6 P, सं-ग्रंथ् 9 P. **-***s.* निबंधनं, (द्वितीयं मनसो निबंधनं); संश्लेषणं, बंधः-धनं-नी, ग्रंथिः; 't. of a yoke' योक्त्रं, आबंधः; 'this (child) is the mutual t. of parents' एतदन्योन्य-संश्लेषणं पित्रोः (U. 3). **2** दामन् *f. n.*, गुणः, तंतुः. **2 Fetter,** q. v. **4** संगः, बंधः; 'worldly t. s' संसारबंधः; 'free from t. s' निः-संग, मुक्तसंग. **-er,** *s.* पंक्ति-श्रेणि-*f.*; *See* **Line.**

Tiffin, *s.* उपाहारः.

Tiger, *s.* व्याघ्रः, शार्दूलः, द्वीपिन् *m.*

Tight, *a.* अशिथिल, दृढ, गाढ, संसक्त, सुसंहत. **2** अतिपिनद्ध, गाढ-दृढ-बद्ध, संनिबद्ध; 'I am chained down by this t. bark-garment' अतिपिनद्धेन वल्कलेन नियंत्रितास्मि (S. 1); 'the coat sits t. on your body' अंगानंतरवर्ती-अंगसंसक्तः-कंचुकः. **3** आतत. **4** संबाध. **-en,** *v. t.* दृढीकृ 8 U, नियम् 1 P, द्रढयति (D.). **-ly,** *adv.* दृढं, प्र-गाढं, अशिथिलं; 't. tied' दृढबद्ध &c. **-ness,** *s.* दृढता, घनता, सुसंसक्ति *f.*, संहति *f.*, आनंतर्यं.

Till, *adv. prep.* यावत् (with acc. of noun) or यावत् न (followed by तावत्); 't. now' अद्यावधि, अद्य यावत्; gen. by आ in comp. or with abl.; 't. death' आमरणं, आमृत्योः; 't. the learned are satisfied' आपरितोषाद्विदुषां (S. 1). **-***v. t.* कृष् 1 P, 6 U. **-age, -Tilth** *s.* कृषिकर्मन् *n.*, कृषि *f.* **-er,** *s.* कृषकः, कर्षकः, कृषीवलः; क्षेत्राजीवः.

Tilt, *s.* वितानं, उल्लोचः. **2** प्रासक्रीडा-युद्धं. **-***v. t.* आवृज् 10. **2** प्रासयुद्धे प्रवृत् 1 A. **-***v. i.* आ-अव-नम् 1 P, भुज् 6 P.

Timber, *s.* काष्ठं, दारु *n.*

Timberel, *s.* *See* **Drum.**

Time, *s.* कालः, समयः, वेला. **2** (Occasion) अवसरः, प्रसंगः, प्रस्तावः. **3** वारः, वासरः. **5** अवधिः, मर्यादा. **5** तालः, लयः. **6** (Personified) कालः. **7** (With numerals) गुणं, कृत्वः, वारं, in comp.; '10 t.s' दशकृत्वः; सहस्रगुणं, त्रिवारं, &c.; 'from t. to t.' काले काले; 'losing or wasting t.' कालहरणं, कालक्षेपः-हानिः; 'by this t' अनेन समयेन, इयता कालेन; 'after a long t.' चिरात्, बहोः कालात्; 'for a long t.' चिर, महांतं कालं; 'of the same t.' समकालीन, समकालिक (की *f.*); 'at the right t.' काले, यथावसरं, प्राप्तकालं; '-in time' यथासमयं-अवसरं, काले; 'in a short t.' अचिरेणरात्; 'at the t. when' यदा-तदा; 'at the same t.' समं, एकावसरं, तत्कालं, तत्क्षणं; 'at all t.s.' सदा, सर्वदा; 'at other t.' अन्यदा; 'at t.s.' काले काले, अंतरा अंतरा; 'at this, that, t.' अधुना, तदा; 'at any t.' यदा कदा; 'come at any t.' यदा इच्छसि तदा-यथेष्टकाले-आगच्छ; 'of our, those, t.s' इदानींतन-तदानींतन-(नी *f.*); 'high t.' उचितः समयः; 'it is high t. to bathe and take our meals' समयः स्नानभोजनं सेवितुं (V. 2); 'good for the t. being' आपातरमणीय, आपाततो रम्य; 'hard t.s.' आपत्कालः; विपत्समयः, आपद् *f.*; 'dark t.s.' कलिकालः; 'from t. to t.' अनुवेलं, वारंवारं; 'many t.s' बहुशः, बहुवारं, काले काले; 't.-server', 't.-serving' कालानुवर्तिन्, समयानुरोधिन्; 'I shall not do so next t.' नैवं वारांतरं विधास्यामि; 'what is the t. now' का वेला अधुना वर्तते; 'begging is out of t.' अनवसरग्रस्तोर्थिभावः (Mal. 9); 'sign of the t.' कालधर्मः; 'without loss of t.' अकालक्षेपेण, अविलंबितं; 'one keeping or beating t. with the hands' पाणिघः, पाणिवादः; करकिसलयतालैर्मुग्धया नर्त्यमानः (U. 3) 'by keeping t. with her hands' &c.; 'quick, mean, slow, t.' द्रुतं, मध्यं, विलंबितं; 'out of t.' विताल, वैतालिक (की *f.*). **-v.** *t.* कालं निर्णी 1 P or परिक्लृप् c., कालानुरूप *a.* कृ 8 U. **-ly,** *a.* Ex. by (*s.*) in comp.; 'showering t.' काल-समयवर्षिणः; सामयिक (की *f.*); कालकृतोद्योगात् 'by t. attempts.' **-***adv.* काले, यथासमयं-कालं.

Timid, Timorous, *a.* भीरु, कातर, ससाध्वस, त्रस्त, सभय, दीन, भीरुहृदय, चकित. **-ity,-ness,** *s.* सं-,त्रासः, कातर्यं, साध्वसं, &c., भीरुता-त्वं, चित्तवैक्लव्यं. **-ly,** *adv.* ससाध्वसं, चकितं, सभयं.

Tin, *s.* त्रपु *n.*, वंगं, रंगं, पिच्चटं; 't.-man' वंग-त्रपु-कारः; 'calx of t.' त्रपुभस्मन् *n.*

Tincture, *s.* आभा, छाया, आभासः; ईषन्मिश्रणं-संसर्गः. **2** औषधाधिवासितो मद्यार्कः; निर्यासः, (extract). **-***v.* (lit.) ईषत् मिश्र 10 or अधिवास् 10; (fig.) ex. by (*s.*): 't. ed with truth' सत्याभास.

Tinder, *s.* इंधनं, एधस् *n.*, शीघ्रदाह्यं.

Tine, *s.* शूलः. **2** मृगविषाणशाखा.

Tinge, *s.* रंगः, रागः; आभा, छाया, आभासः; 'speech with a t. of falsehood' असत्याभासं वचनं. **-***v.* *t.* रंज् c. **-ed,** *a.* सराग.

Tingle, *v.* *i.* रणत्कारं कृ 8 U, रणरणायते (D.), सशूलं स्फुर् 6 P; 'making the ears t.' श्रवणाविदारणं (वचः). **-***s.* सशूलस्फुरणं, रणरणायितं.

Tinker, *s.* कांस्यकारः.

Tinkle, *v.* *i.* क्वण् 1 P, शिंज् 2 A, झणझणायते (D.); वि-रु 2 P. **-ing,** *s.* क्वणितं, शिंजितं, झणझणध्वनिः.

Tinsel, *s.* मिथ्याशोभनं वस्तु, बाह्यशोभनं द्रव्यं. **-***a.* बाह्यशोभ, कृत्रिमशोभि, मिथ्याशोभन.

Tint, *s.* रागः, रंगः, छाया. **-***v.* *t* रंजू c.

Tiny, *a.* क्षुद्र, अतिलघु, प्रतनु; 't. spark' तनुप्रकाशः.

Tip, *s.* अग्रं, शिखरं, अग्रभागः, प्रांतः, मुखं, अणि *m. f.*; 't. of the foot' प्रपदं, पादाग्रं; 'learning danced on the t. of his tongue' असुष्य विद्या रसनाग्रनर्तकी (N. I.), समस्ता एव विद्या जिह्वाग्रेभवन् (Ka. 346); 't.-toe' पादाग्रं, प्रपदं, अग्रपादः; 'from head to t.-toe' आपादमस्तकं, नखशिखांतं. **-***v.* *t.* Ex. by अग्र, मुख in comp.; 't. ed with silver' रजताग्र, रजताश्लिष्टकोटि; 't. ed with iron' अयोग्र, लोहाग्र, अयोमुख. **2 Top,** q. v. **3** पारितोषिकं दा 3 U. **-s,** *s.* पारितोषिकं.

Tippet, *s.* ग्रैवेयं-यकं, ग्रीवाच्छादनं.

Tipple, *v.* *t.* अतिपानं कृ 8 U, नित्यशः मद्यं पा 1 P. **-er,** *s.* अतिपानासक्तः, मद्यपः.

Tipsy, *a.* क्षीव, प्रमत्त, मदविह्वल, मदवश.

Tirade, *s.* आक्षेपः, निंदावचस् *n.*, -लेखः, उपालं-भलेखः.

Tire, *s.* उष्णीषः-षं, शिरावेष्टनं; 't. ing room' वेषस्थं,-शाला. **2** लोहवलयः-यं. **-***v.* *t.* खिद् c., क्लम् c., श्रम् c.; 'to be t.ed' क्लम् 1, 4 P, परि-, श्रम् 4 P, आयस् 1, 4 P, खिद् pass., निर्विद् pass., (राज्ञो वयस्यभावेन निर्विण्णोस्मि S. 2); *See* **Fatigue. -ing,-some,** *a.* कष्ट-खेद-कर (री *f.*). आयासक, कष्टावह.

Tissue, *s.* जालं, क्रमः, रचना; 't. of falsehood' अनृतवाज्जालं.

Titan, *s.* दानवः, दैत्यः; *See* **Demon.**
Tithe, *s.* दशांशः, दशमभागः.
Titillate, *v. i. See* **Tickle.**
Title, *s.* नामन् *n*, संज्ञा, लक्षणं, आख्या; *See* **Name;** 't. of honor' उपाधिः, उपपदं, मानपदं, कीर्तिचिह्नं; 'distinguished by the t. of *Sri'kantha*' श्रीकंठपदलांछनः (U. 1). **2** अधिकारः, आगमः, स्वत्वं. **3** उपाधिः, उपपदं. **4** स्थानं, पदं, विषयः; 't.-page' मुखपृष्ठं-पत्रं; 't.-deed' आगमः, -पत्रं. **-Titular,** *a.* नाममात्र; *See* **Nominal.**
Titter, *s.* रुद्धहास्यं.
Tittle, *s.* लवः, लेशः, अणुमात्रं.
Tittle-Tattle, *s.* विजल्पितं.
To, *prep.* (With verbs of motion) ex. by acc.; वाच्यतां याति, उमाख्यां जगाम &c. **2** (As indirect object) by dat. of person. **3** (Up to) आ in comp. or with abl., यावत् with acc.; अंत-पर्यंत in comp.; 'from one to ten' एकादिदशांताः (संख्याः). **4** (Possession) by gen. **5** (Purpose) by dat. or inf., or अर्थे-र्थं in comp. **6** (Consequence) by circum.; by dat.; 'he was stoned to death' लोष्टघातं हतः, 'he, to my great delight, soon recovered' सोचिरात्सुस्थोऽभवद्येनाहं प्रमुदितोऽभवम्; 'tortured to death' तथा पीडितो यथा विगतासुरभूत्; 'went to his ruin' स्वनाशायैव जगाम; 'was frightened to death' भीत्या मृतकल्पो बभूव; 'she accompanies the movements of her feet to the musical time' पादन्यासो लयमनुगतः (M. 2); 'to the number of 10' दशसंख्य-*a.*; 'face to face' समक्षं, संमुखं; 'ten to one' प्रायः, भूयसा; भूयिष्ठं; 'take to wife' पत्नीस्थाने मन् 4 A; 'to a man' निःशेषं, अशेषेण; 'to and fro' *adv.* इतस्ततः.
Toad, *s.* मंडूकः. **-y,** *s.* मिथ्याशंसकः.
Tobacco, *s.* तमाखुः.
Tocsin, *s.* भयध्वनिः; भयसूचिका घंटा.
Toddy, *s.* ताली.
Toil, *v. i.* यत् 1 A, श्रम् 4 P, आयस् 4 P. **-***s.* श्रमः, आयासः.
Toilet, *s.* प्रसाधनं, मंडनं.
Token, *s.* चिह्नं, लक्षणं.
Tolerate, *v. t. See* **Endure.**
Toll, *v. t.* (घंटां &c.) वद् c., क्वण् c.; *See* **Sound.** **-***v. i.* शनैः क्वण् 1 P. **-***s.* शुल्कः-ल्कं; करः; 't.-collector' शौल्किकः, शुल्कग्राहिन्. *m.*
Tomb, *s.* समाधिः,-स्थानं; 't.-stone' चैत्यं.
Tome, *s.* (ग्रंथस्य) खंडः, भागः.
To-morrow, *adv.* श्वः, परेद्युः, परेद्यवि; 'day after t.' परश्वः; 'of t.' श्वस्तन (नी *f.*).
Tomtom, *s.* पटहः, भेरी.
Ton, *s.* शिष्टाचारः. **2** टनः (परिमाणविशेषः).
Tone, *s.* स्वरः, स्वनः, नादः, ध्वनिः, रवः, शब्दः; *See* **Sound.** **2** भावः, चेष्टा, चेष्टितं. **3** (In music) स्वरः; 'long t.' तानः; 'keep a protracted t.' तानं प्रदा 3 U, (उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगंतुं K. 1. 8). **4** (Of body) बलं, आरोग्यं, स्वास्थ्यं, सुस्थता, अग्निः. **-***v. t.* (down) मृदूकृ 8 U, स्निग्धीकृ; पारुष्यं अपनी 1 P. **-Tonic,** *s.* बल्यं, वाजीकरणं, बलवर्धनं, अग्निदं, रोचकं, दीपनं; क्षीणबलीयवाजीकरणचिकित्सा 'administering t.s to persons reduced in strength.' **-***a.* वाजीकर (री *f.*), बलवर्धन.
Tongs, *s.* कंकमुखं, संदंशः.
Tongue, *s.* जिह्वा, रस(श)ना, रसज्ञा; 'hold the t.' *See* **Hold;** 't. of a bell' लोला. **2** वाणी, भाषा; *See* **Language;** 't.-tied' बद्ध-नियंत्रित-जिह्व.
To-night, *adv.* अद्य रात्रौ, नक्तं.
Tonsil, *s.* जिह्वामूलस्थः मांसग्रंथिः.
Tonsure, *s.* क्षौरं, मुंडनं, केशवपनं, चूडासंस्कारः शिरोमंडनं; 't. ceremony' चौलं.
Too, *adv.* अपि, तथा, चैव. **2** अति or सु pr.; अत्यंतं, अतीव, भृशं; *See* **Exceedingly;** सुदीर्घ, दीर्घतर 't. long' &c.
Tool, *s.* उपकरणं, साधनं, यंत्रं 'a mere t.' यंत्रमात्रं; 'you are a t. in the minister's hands' त्वं सर्वथा सचिवाज्ञानुवर्ती तेन यंत्रवत् चाल्यसे.
Tooth, *s.* दंतः, दशनः, रदः, रदनः, दंशः. दंष्ट्रा, द्विजः, जंभः; 'two middle foreteeth' राजदंतौ; 'double teeth' माढि *f.* **2** (Of a saw) दंतः; 't.-picker' दंतस्य निष्कोषणं, दंतोल्लेखनी; शोधनी, निर्घर्षणकं; 't.-powder' दंतशोधनचूर्णं, दंतपवनं; 't.-brush' दंतपवनं,-कूर्चकं; 'having good teeth' सुदत्; 'in the teeth of' अनादृत्य (with acc.) or by abs. constr.; *See* 'In spite of' under **Spite,** 'in the teeth of the Vedas' वेदेषु जागरूकेषु सत्सु आप. **-ed,** *a.* दंत, दत् in comp. **-less,** *a.* दंतहीन, गलितदंत, निर्दंतनीरद, भग्न-उद्धृत-दंष्ट्र. **-some,** *a.* स्वादु. **-Teething,** *s.* दंतोद्भेदः, दंतोद्गमः.
Top, *s.* अग्रं, शिखर, शृंगं, सानु *m. n.*, शिखा, चूडा, शिरस् *n.*, शीर्षकं, मूर्धन् *m.*, मस्तकं. **2** भ्रमरं. **3** पिधानं, आच्छादनं, पुटं. **4** मुख्य. श्रेष्ठ-स्थानं; 'he stands at the t. of the class' सर्वेषां बालकानां मूर्ध्नि तिष्ठति; 't.-

heavy ' उर्ध्वगुरु; ' t-knot ' चूडा, शिखा, शिखंडः, शेखरः. -*a.* मुख्य, उपरिस्थ, अग्र in comp.; 't.-most branch,' अग्रशाखा. -*v. t.* Ex. by (*s.*); ' t. ed with snow ' तुहिनावृतशिखर. **2** Excel, q. v.; *See* (*s.*) also.

Topaz, *s.* पीताश्मन् *m.*, पुष्परागः.

Tope, *s.* स्तूपः. -*v. i.* मद्यातिपानं कृ 8 U. **-r,** *s.* मद्यासक्तः.

Topic, *s.* विषयः, अर्थः, प्रस्तावः; प्रकरणं, वस्तु *n.*

Topography, *s.* स्थानवर्णनं.

Topple, *v. i.* (शिखरात्) सहसा पत् 1 P or अवपत्.

Topsyturvy, *adv.* विपर्यस्त *a.*,अधरोत्तर *a.*

Torch, *s.* उल्का, उल्मुकं, दीपिका, अग्निकाष्ठं.

Torment, *v. t.* (अत्यंतं) अर्द् 1 P or c., पीड् 10, संतप् c., सं-,बाध् 1 A, क्लिश् 9 P, आयस् c., विप्र-कृ 8 U, प्रमंथ् 9 P; *See* **Afflict.** -*s.* (अत्यंत-) आतंकः, संतापः, व्यथा, पीडा, दुःखं, वेदना, यातना; कारणा, दारुण-तीव्र-तिग्म-यातना-वेदना. **-ing,** *a.* प्रमाथिन्, अरुंतुद, आयासकारिन्. **-or,** *s.* अतिपीडकः, प्रमाथिन् *m.*, आयासकः, संतापकः.

Tornado, *s.* घूर्णवायुः.

Torpid, *a.* जड; सुप्त, विचेतन. **2** मंद, जड; *See* **Dull, Slow. -ity, Torpor,** *s.* जाड्यं, सुप्ति *f.*, चैतन्यनाशः, स्वापः, मोहं, तंद्रा, जाडिमन् *m.*

Torrent, *s.* स्रोतस् *n.*, रवः, वेगः, ओघः. **2** जलप्रवाहः-प्रपातः, निर्झरः, प्रस्रवणं; नदी. **3** धारा, आसारः; ' t. s of rain ' धारासंपातः, धारासारः, वृष्टिधारा; धारासारैर्महती वृष्टिर्बभूव 'it rained in t. s'.

Torrid, *a.* उष्ण; *See* **Hot.**

Tortoise, *s.* कूर्मः, कमठः, कच्छपः; ' female of a t. ' कूर्मी, कमठी, डुलिः.

Tortuous, *a.* वक्र, कुटिल, जिह्म, तिर्यच्. **-ly,** *adv.* वक्रं, तिर्यक्-कुटिल in comp.

Torture, *v. t.* यत् c., अत्यंतं पीड् 10, प्रमंथ् 9 P; *See* **Torment.**

Toss, *v. t.* उत्-वि-क्षिप् 6 P, व्युदस् 4 U. उद्-धू 5, 9 U, संक्षुभ् c.; *See* **Throw,** -*v. i.* विक्षिप्-उद्धू-pass., इतस्ततः विचल् 1 P or लुट् 6 P or लुल् 1 P or हू 1 A, घूर्ण् 6 P, 1 A. -*s.* उत्-क्षेपः-पर्णं; स-व्याक्षोभः.

Total, *a.* सकल, सर्व, समग्र, संपूर्ण, &c.; *See* **Whole;** ' t. rout ' अत्यंतनाशः, सुपलायितं; ' t. disorder' अत्यंतमाकुलं. **-ity,** *s.* साकल्यं, समष्टि *f.*, ऐक्यं, कार्त्स्न्यं; ' what is the t. ' एवं सर्वे (पिंडीकृत्य) कति संपद्यंते. **-ly,** *adv.* संपूर्णं, साकल्येन, सर्वथा-तः, अशेषेण, निःशेषं.

Totter, *v.* प्र-,स्खल् 1 P, कंप् 1 A, वि-चल् 1 P; *See* **Shake. -ing,** *a.* स्खलित, स्खलित-विह्वल-गति.

Touch, *v. t.* सं-,स्पृश् 6 P, (fig. also); परामृश् 6 P, हस्तेन आलभ् 1 A; शतसंख्या तु मामियं स्पृशति (Ve. 2) ' t. es me home '; ' was t. ed to the heart ' हृदये (दिग्धशरैरिव) आहतः (R. v. 25); 'heart t. ed with anxiety' हृदयं संस्पृष्टमुत्कंठया (S. 4). **2** (On, upon) उद्दिश्य-अधिकृत्य-वद् 1 P ('Say ', q. v.). -*v. i.* संसर्ग-संपर्क-इ 2 P or गम् 1 P. -*s.* सं-,स्पर्शः-र्शनं, परामर्शः, आलंभनं, संसर्गः, संपर्कः. **2** स्पर्शबोधः-ज्ञानं. **3** स्पर्शः, स्पर्शेंद्रियं; ' t.-stone ' नि-,कषः, निकषग्रावन् *m.*-पाषाणः-उपलः, शाणः; ' adversity is the t.-stone of (the sincerity of) friendship' तेषां (मित्राणां) तत्त्वनिकषग्रावा विपत् (H. 1.). **-ing,** *prep.* उद्दिश्य, अधिकृत्य; *See* **About.** *a.* हृदयंगम, हृदिस्पृश्; *See* **Pathetic. -y,** -*a.* कोपन, चंडकोप, शीघ्र-सुलभ-कोप.

Tough, *a.* कठिन, दृढ, दुर्भेद्य.

Tour, *s.* परि-भ्रमणं; पर्यटनं; ' he is on t. ' स्वमंडले चरति-भ्रमति; ' make a t. ' परिभ्रम् 1, 4 P. **-ist,** *s.* पर्यटकः.

Tournament, *s.* सादिक्रीडा-युद्धं.

Tow, *v. t.* कृष् 1 P, आकृष्य संचल् *c.* -*s.* स्थूलशाणं, शणसूत्रं.

Toward, Towards, *prep.* प्रति (with acc.), अभि in comp.; by अभिमुख-*a.* (स्त्री *f.*) or अभिमुखं-*adv.* in comp., (गृहाभिमुखं प्रतस्थे), उद्दिश्य (with acc.). **2** (With words of direction) by loc. also, उपरि (with gen.); ' t. the north ' उत्तरस्यां दिशि, उत्तराभिमुखं; ' t. me ' ममोपरि, मां प्रति, मामुद्दिश्य, मयि. **3** प्रायः; ' t. evening' अभिसायं, सायाह्नकल्पं. -*a.* *See* **Forward;** 'un-t' अतर्कित, असमर्थितोपनत.

Towel, *s.* गात्रमार्जनी, मार्जनवस्त्रं.

Tower, *s.* अट्टः, उत्सेधः; क्षौमः-मं (room on the t.). -*v. i.* मूर्ध्नि वृत् 1 A or स्था 1 P. **-ing,** *a.* प्रोन्नत, प्रोच्छ्रित, उत्तुंग.

Town, *s.* पुरं, पुर् *f.*, पुरी, नगरं-री, पत्तनं (small t.), पुटभेदनं, स्थानीयं, निगमः. **-Townsman,** *s.* नागरिकः, पौरः,-जनः (पौरी, पौरवधू *f.*).

Toxic, *a.* विषसंबंधिन्. **-ology,** विषविद्या.

Toy, *s.* क्रीडनकं, क्रीडाद्रव्यं-वस्तु. -*v. i.* क्रीड् 1 P; *See* **Play.**

Trace, *s.* चिह्नं, अंकः, अभिज्ञानं; *See* **Mark. 2** (Of foot-steps) पद्वी, पद्पद्धति *f.*; *See* **Footstep. 3** (Of carts) प्रग्रहः, चर्मबंधः. -*v. t.* आलिख् 6 P, बाह्य

रेखां लिख्. 2 अनु-सृ 1 P, अनु-धाव् 1 P; मृग् 10 A, अनुपदं या or गम्. 3 (Out) आ-सद् c., ग्रह् 9 U, ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा (Y. II. 266) 'or is t. ed out' &c.; oft. by प्रभवः ('Source' q. v.)' his sudden affluence has been t. ed out' तस्याकस्मिकविभूतेः प्रभव उपलब्धः. 4 (Word) व्युत्पद् c.; 'when the word *Brahman* is t. ed (to its root); ब्रह्मशब्दस्य व्युत्पाद्यमानस्य. (S. B. 33).

Trachea, *s.* श्वास-प्राण-मार्गः.

Track, *v. t.* अनु-सृ 1 P, अनु-धाव् 1 P, मार्ग् 10; *See* **Follow.** -*s.* मार्गः, पदचिह्नं-पंक्ति *f.*; *See* **Way.** 2 चिह्नं, अंकः. **-less,** *a.* निःसंचार, निर्जन, पादास्पृष्ट.

Tract, *s.* प्र-,देशः, भूभागः. 2 प्रबंधः, ग्रंथः, लघुलेखः-ग्रंथः.

Tractable, *a.* विधेय, विनीत; वश्य; *See* **Docile.**

Traction, *s.* कर्षणं, वहनं.

Trade, *s.* वाणिज्यं, वणिक्कर्मन् *n.*, व्यापारः, क्रयविक्रयः. 2 व्यवसायः, व्यवहारः, वृत्ति *f.*, व्यापारः. -*v. i.* वाणिज्यं कृ 8 U, व्यव-हृ 1 P, पण् 1 A, क्रयविक्रयं कृ; oft. by (*s.*); 'went out to t.' वाणिज्येन गतः; 't. ing by sea' समुद्रव्यवहारी (S. 6). **-er,** *s.* वणिज् *m.*, वाणिज्यकारिन्; *See* **Merchant.** **-Tradesman,** *s.* पण्यविक्रयिन् *m.*

Tradition, *s.* संप्रदायः, आम्नायः. 2 ऐतिह्यं, लोककथा, पारंपरीयकथा, पारंपर्यं; 'there runs a t. to this effect' इति ऐतिह्यं. **-al,-ary,** *a.* परंपरागत-प्राप्त,परंपरीण, क्रमागत-आयात, सांप्रदायिक-पौराणिक- (की *f.*); 't. knowledge' संप्रदायः, (कुमारस्य पुनः कुतः संप्रदाय इति पृच्छामि U. 6). **-ally,** *adv.* संप्रदायतः, पारंपर्येण.

Traduce, *v. t.* आक्षर् c., अभिशंस् 1 P, अपपरि-वद् 1 A; *See* **Calumniate.** **-er,** *s.* आक्षारकः, अपवादकः.

Traffic, *See* **Trade.**

Tragedy, *s.* शोकपर्यवसायि नाटकं. **Tragic, -Tragical,** *a.* शोकपर्यवसायिन्, दुरंत. 2 करुणरसप्रधान.

Trail, *s.* गंधः. 2 पदवी, पादचिह्नं, पदं. -*v. t.* वि-आ-कृष् 1 P; *See* **Drag.** -*v. i.* कृष् pass.

Train, *s.* परंपरा, श्रेणी, माला; *See* **Series.** 2 परिवारः, परिबर्हः, परिजनः. 3 (Of dress) पुच्छं, वसनांतः. 4 परिपाटी, अनु-,क्रमः; प्रबंधः; 't. of reasoning' ऊहक्रमः, तर्कप्रबंधः, t. of a peacock' बर्हः, पुच्छं. -*v. t.* वि-नी 1 P, (animal also), अधि-इ c. (अध्यापयति); अनु-,शास् 2 P, शिक्ष् c.; दम् c. (दमयति). 2 परिचयं-अभ्यासं-कृ c.; 'a t. -ed soldier' कृतशस्त्रपरिचयः पदाती. **-ing,** *s.* शिक्षा, विनयः-यनं; शिक्षणं, अभ्यासः; 'military t.' रण-अस्त्र-शिक्षा, युद्धाभ्यासः.

Trait, *s.* लक्षणं, चिह्नं.

Traitor,-ous, *s.*, *a.* विश्वास-विश्रंभ-घातिन्, मिथ्याप्रतिज्ञ, शत्रु-द्विट्-सेविन्; 't. to the king' राजापथ्यकारिन्, राजद्रोहिन्; 't. to the country' स्वदेशशत्रुः-घातकः; 'act the t.' द्रुह् 4 P.

Trammel, *See* **Fetter.**

Tramp, *v. i.* चरणं-पादं-न्यस् 4 P or क्षिप् 6 P. -*s.* पादशब्दः, चरणविक्षेपः.

Trample, *v. t.* मृद् 9 P, सं-अव-°, अभिहन् 2 P; (under foot) पादतलेन आहन् 2 U or आ-समा-क्रम् 1 U, 4 P or क्षुद् 7 P; 't. to dust' चूर्ण् 10; निष्पिष् 7 P. **-ed,** *a.* सं-अव-मर्दित, पादतलाहत, पादाक्रांत; पादक्षुण्ण. **-ing,** *s.* मर्दनं, पादाघातः, पादाक्रमणं, प्रमथनं.

Trance, *s.* समाधिः, लयः, तन्मयावस्था, देहातीतवृत्ति *f.*, 'being in a t.' लीनवृत्ति, समाधिस्थ.

Tranquil, *a.* प्र-,शांत, स्तिमित, निश्चल,स्वस्थ, अक्षुब्ध, शांतात्मन्; *See* **Calm.** **-lity,** *s.* शमः,शांति *f.*, प्र-,उप-°, अक्षोभः, निर्वृति *f.*, निरुपप्लवत्वं, धैर्यं, अनुद्वेगः, स्वास्थ्यं, स्थैर्यं. **-lize,** *v. t.* सां(शां)त्व् 10, शम् c. (शमयति), प्र-उप-°,आ-समा-श्वस् c.; *See* **Calm, Compose;** 't. yourself' समाश्वसिहि.

Transact, *v. t.* सं-निः-पद् c.,साध् 5 P or c., वि-धा 3 U, कृ 8 U, अनु-ष्ठा 1 P; निर्वृह् c., प्रवृत् c., आ-समा-चर् 1 P; (a business) पण् 1 A, व्यव-हृ 1 P. **-ion,** *s.* करणं, अनुष्ठानं, विधानं, निर्वाहः, आचरणं &c. 2 कार्यं, कृत्यं, कर्मन् *n.*, व्यापारः, व्यवहारः, पणाया.

Transcend, *v. t.* अति-इ 2 P, अति-शी 2 A; अतिक्रम् 1 U, 4 P; *See* **Excel;** 't. s. definition' अपरिच्छेद्य, परिच्छेदातीत; 't. s description' सकलवचनानामविषयः (Mal. 1), वर्णनविषयातिक्रांतः; *See* **Pass.** **-ent, -ental,** *a.* सर्वातिरिक्त, सर्वातिशायिन्, अत्युत्तम. **-ently,** *adv.* सविशेषं, परमं, अत्युत्तमं.

Transcribe, *v. t.* लिख् 6 P. **-er,** *s.* लिपिकारः; लेखकः. **-Transcript,** *s.* प्रतिलेखः, प्रति-,लिपि *f.*

Transfer, *v. t.* स्थानांतरं नी 1 P or गम् c. 2 सं-क्रम् c (with loc. for 'to') संचर् c., सं-,क्रा c. (अर्पयति), निक्षिप् 6 P, अध्यारुह् c.; तनयस्नेहं तरुषु संक्रमय्य (Ka. 345), (पुत्रसंक्रांतलक्ष्मीकैः U. 1). **-ence,** *s.* स्थानांतरप्रापणं-नयनं, स्थान-स्थल-परिवृत्ति,

f. 2 संक्रांति *f.*, संक्रमणं, संचारः, परहस्तसमर्पणं.

Transfigure, *v. t. See* **Transform.**

Transfix, *v. t.* व्यध् 4 P, निर्भिद् 7 P. 2 जडीकृ 8 U, कील् 10, निखन् 1 P, कीलितेव चास्मिन्नेव स्थाने तनुः (Ka. 278) 'as if t-ed to this very spot'; 't.-ed through the belly' निर्भिन्नोदर.

Transform, *v. t.* परिणम् c. (परिणमयति), रूपांतरं वि-धा 3 U, आकारं-रूपं-परिवृत् c.; 'to be t.-ed' परिणम् 1 U, रूपांतरेण परिणता &c. (V. 4.). 2 विडंब् 10, विकृ 8 U. **-ation,** *s.* रूपांतरपरिणामः, परिवर्तः, रूपांतरं, विकृति *f.*, विडंबनं.

Transfuse, *v. t.* अन्यपात्रे संक्रम् c. or निविश् c., **-ion,** *s.* संक्रामणं.

Transgress, *v. t.* वि-,अतिक्रम् 1 U, 4 P, अति-इ 2 P, उद्-,लंघ् 1 A, 10, भंज् 7 P; व्यभि-अति-चर् 1 P, अतिवृत् 1 A, लुप् 6 P or c. *-v. i.* अप-,राध् 4 P (with loc. of person); *See* **Offend. -ion,** *s.* अतिक्रमः, उल्लंघनं, व्यतिक्रमः, अत्याचारः, अत्ययः, भंगः, लोपः, अतिपातः. 2 अपराधः, दोषः, पापं. **-or,** *s.* अतिक्रामिन्, अत्याचारी, अपराधी.

Tranship, *v. t.* वाहन-यान-अंतरं नी 1 P.

Transient, *a.* चंचल, लोल, क्षणभंगुर, अचिरस्थायिन्, अस्थायिन्, चपल, विनश्वर, अनित्य, क्षणिक, असार, अशाश्वत (ती *f.*), क्षणविध्वंसिन्. **-ness,** *s.* अनित्यता, अस्थायित्वं.

Transit, *s.* क्रांति *f.*, संक्रमः. **-ion,** *s.* संक्रांति *f.*, परिवर्तः, विकारः; (state) स्थित्यंतरं, अवस्थांतरं. **-ive,** *a.* सकर्मक. **-ory,** *a.* क्षणभंगुर, असार; *See* **Transient.**

Translate, *v. t.* भाषांतरेण वि-परिणम् c. or परिवृत् c.; 'boys should t. Sanskrit sentences into English' बालकाः संस्कृतवाक्यानि आंग्लभाषया विपरिणमयेयुः. 2 **Transform,** q. v. 3 (To the skies) (सशरीरं) लोकांतरं नी 1 P or प्राप् c. or गम् c., 't.-ed to the skies' सशरीरमुक्तः. **-ion,** *s.* विपरिणामः, विपरिणमनं, भाषांतरं. अनुवादः. 2 लोकांतरनयनं, स्वर्गारोपणं, सशरीरमुक्ति *f.* **-or,** *s.* भाषांतरकृत् *m.*

Translucent, *a. See* **Clear.**

Transmigrate, *v. i.* पुनर्जन्म प्राप् 5 P, देहांतरं गम् 1 P. **-ion,** *s.* पुनर्जन्मन् *n.*, पुनर्जननं, देहांतरप्राप्ति *f.* -गमनं, योन्यंतरं.

Transmit, *v. t. See* **Send, Remit. -Transmission,** *s.* प्रापणं, वाहनं, प्रेषणं, संचारणं.

Transmute, *v. t. See* **Change, Transform.**

Transparent, *a.* शुद्ध, स्वच्छ, प्रसन्न, विशद, निर्-वि-अ-मल, स्फटिकप्रभ. 2 प्रकाश-किरण-भेद्य, पारदर्शिन्. **-Transparency,** *s.* स्वच्छता, प्रसादः, नैर्मल्यं, &c.

Transpire, *v. i.* प्रकाशतां गम् 1 P, प्रचली-प्रकाशी-भू 1 P, (कथं प्रकाशतां गतोयमर्थः पौरेषु Mu. 1), प्रसिद्धीभू, निः-प्र-सृ 1 P.

Transplant, *v. t.* स्थानांतरे रुह् c.

Transport, *v. t.* नी-वह्-1 P; तृ c. 2 द्वीपांतरे निर्वस् c. or विवस् c., स्वदेशात् दूरीकृ 8 U. 2 अत्यंतं प्रमुद् c.; 'Delight' excessively, q. v.; 't.-ed with joy' हर्षनिर्भर, आनंदस्य परां कोटिं गत. *-s.* नयनं, वाहनं. 2 प्रवहणं. 3 हर्षोन्मादः, हर्षनिर्भरः; हर्षावेशः.

Transpose, *v. t.* विपर्यस् 4 U, स्थानं परिवृत् c., विनि-मे 1 A; *See* **Exchange. -ition,** *s.* (स्थान-) व्यत्ययः, व्यत्यासः, विनिमयः, विपर्यासः, परिवृत्ति *f.*

Transverse, *a.* व्यत्यस्त, तिर्यक्; 'with legs t.' व्यत्यस्तपाद-*a.* **-ly,** *adv.* व्यत्यासेन, तिर्यक्, व्यत्यस्तं.

Trap, *s.* उन्माथः, कूटयंत्रं, कूटं; 't.-door' कूटद्वारं, छन्नमार्गः. *-v. t.* कूटे निक्षिप् 6 P. 2 भूप् or मंड् 10.

Trapezium, *s.* अतुल्यलंबकः.

Trapezoid, *s.* समलंबकः.

Trappings, *s.* सज्जा, भूषा, परिकर्मन् *n.*, परिच्छदः; 't. of an elephant' परिष्टोमः, आदानं; *See* **Housings.**

Trash, *a.* असार, निरर्थक, निःसार. *-s.* असार-निरर्थक-द्रव्यं.

Travail, *See* **Lobour.**

Travel, *v. i.* परि-भ्रम् 1, 4 P, परि-,अट् 1 P, विचर् 1 P; *See* **Journey. -s.,-ling,** *s.* पर्यटनं, परि-,भ्रमणं, विचरणं, यात्रा, प्रवासः, अध्वगमनं. **-ler,** *s.* पांथः, पथिकः, अध्वगः, अध्वनीनः, अध्वन्यः, यात्रिकः, पादविकः, सारणिकः.

Traverse, *v. t.* आक्रम् 1 U, 4 P, तृ 1 P, सं-अति-उत्-°, पारं गम् 1 P.

Tray, *s.* भाजनं, आधारः, पात्रं.

Treachery, *s.* विश्वासभंगः-घातः, विश्रंभभंगः, असत्यसंधता, प्रतिज्ञा-समय-भंगः; *See* **Perfidy. -ous,** *a.* विश्वासघातिन्, अविश्वास्य, असत्यसंध. 2 मिथ्यावभास, असार, मायाबहुल. **-ously,** *adv.* विश्वासघातेन, शाठ्येन. **-ousness,** *s. See* (*s.*).

Treacle, *s.* गुडः; *See* **Molasses.**

Tread, *v.* क्षुद् 7 P, आ-समा-क्रम् 1 U, 4 P. पादाभ्यां पीड् 10 or आक्रम् or मृद् 9 P; 'from the trodden path' क्षुण्णाद्वर्त्मनः, (क्षुद्रजनक्षुण्ण एष मार्गः Ka. 146); 'trod one of them to death' तेषामेकतमः

पादाक्रांतोऽम्रियत, एकं पादतलेन अवामृन्दात; 't. in the footsteps of' पदं अनुवि-धा 3 U, पदवीं प्रतिपद् 4 A, (पदवीं तरुवल्कवाससां प्रपेदिरे R. VIII. 11). **2** क्रम्, पदं-चरणं-विन्यस् 4 P or क्र c. (अर्पयति). **-s.** चरणपातः, पादन्यासः-विक्षेपः, विक्रमः.

Treason, *s.* राजद्रोहः, राजाभिद्रोहः-अपकारः, राजापथ्यकारित्वं. **-able,-ous,** *a.* राजद्रोहिन्, राजापथ्यकारिन्.

Treasure, *s.* कोशः-षः, निधिः निधानं, द्रव्य-संचयः-राशिः-संग्रहः. **2** वित्तं, धनं, भांडं, द्रविणं; *See* **Wealth.** **-v. t.** सं-चि 5 U, राशीकृ 8 U, नि-उप-धा 3 U; *See* **Store;** 't. in the heart' हृदि उप-नि-धा, अवधृ 10, चित्ते कृ. **-er,** *s.* कोशाध्यक्षः-अधीशः, कोषगृहे नियुक्तः. अर्थाधिकारिन् *m.*, धनाध्यक्षः, कनकाध्यक्षः, भौरिकः (gold t.); रूप्याध्यक्षः, नैष्किकः (silver t.). **-y,** *s.* कोषागारं, कोशः-षः, भांडागारं, कोशगृहं.

Treat, *v. t.* Ex. by 'Act' (towards) q. v.: पुत्रे मित्रवदाचरेत् 'should t. a son like a friend'; 't. your rivals as dear friends' कुरु प्रियसखीवृत्तिं सपत्नीजने (S. 4); 't. with honour' पूजय् 10, पुरस्कृ 8 U, सत्कृ, सेवृ 1 A; *See* **Honour;** 't. hospitably' आतिथ्यं कृ, अतिथिसत्कारं कृ. **2** (A subject) निरूप् 10, विचर् c., वर्ण् 10, प्र-स्तु 2 U; 't. at length' प्रपंचयति (D.). **3** उप-उपा-चर् 1 P, कित् desid (चिकित्सति-ते). **4** संतृप् c.; 'gave a good t.' भोजनविशेषैः संतर्पयाचकार; 't. with' सं-धा 3 U. **-s.** भोजनविशेषः, उत्तमान्नतर्पणं. **-ment,** *s.* आचरणं, व्यवहारः, वृत्ति *f.*, आचारः, नयः; 'ill-t.' अपकारः, अपक्रिया. **2** चिकित्सा, उपचारः, उपक्रमः. **3** वर्णनं-ना, निरूपणं, विवेचनं, विचारणा. **-y,** *s.* संधिः, संधानं. **2** संधिपत्रं, नियम-समय-पत्रं.

Treatise, *s.* नि-प्र-बंधः, लेखः.

Treble, *a.* त्रिगुण, त्रिविध. **-s.** (In music) तारः; उच्चस्वनः. **-v. t.** त्रिगुणीकृ 8 U. **-Trebly,** *adv.* त्रिगुणं, त्रिधा, त्रेधा.

Tree, *s.* वृक्ष, तरुः, द्रुमः, पादपः, वनस्पतिः, शाखिन् *m.*, अनोकहः, विटपिन् *m.*, कुटः, सालः, पलाशिन् *m.*, द्रः, अगमः, अगः; and रुहः-हू with 'Earth' q. v., क्षिति-मही-पृथिवी-रुहः-हू *m.* &c.

Trefoil, *a.* त्रिपर्ण, त्रिदल.

Trellis, *s.* जालं, गवाक्षजालं.

Tremble, *v. i.* वि-त्रस् 1, 4 P, (with fear) प्र-वेप् 1 A, कंप् 1 A, स्फुर् 6 P, प्र-वि-°, स्पंद् 1 A; प्र-वि-ह्वल् 1 P. **-ing,-Tremulous,** *a.* कंपमान, वेपथुमत्, सकंप, तरल, विलोल, चपल, चंचल; उत्त्रस्त, कातर (with fear); भग्न, गद्गद (voice); 'in a t. voice' स्वरभंगेन, सगद्गदं. **-Tremor,** *s.* प्र-कंपः, साध्वसं, वेपथुः, वेपनं, स्फुरणं, उत्त्रासः, कातरता, &c.

Tremendous, *a.* महाप्रमाण, अतिबृहत्; घोर, दारुण, अतिगुरु.

Trench, *s.* खातं, परिखा, नाली, प्रणाली; आलवालं (of a tree). **-v. t.** खन् 1 P; 't. upon' आक्रम् 1 U, 4 P; *See* **Encroach. -er,** *s.* खनकः. **2** काष्ठपात्रं-भाजनं.

Trend, वृत्ति *f.*, भावः.

Trepidation, *s.* उद्वेगः, संक्षोभः, साध्वसोत्कंपः, भयकंपः.

Trespass, *v.* अति-उत्-क्रम् 1 U, 4 P, अति-चर् 1 P, अनधिकारं प्रविश् 6 P; *See* **Transgress, Intrude, Offend. -s.** अतिक्रमः, मर्यादातिक्रमः अमर्यादा, अपराधः, दोषः.

Tress, *s.* कबरी, केशकलापः; अलकः, चूर्णकुंतलः.

Triad, *s.* त्रिकं, त्रयं, त्रितयं.

Triangle, *s.* त्रिभुजः, त्रिकोणः, त्र्यस्रं. **-Triangular,** *a.* त्रिकोण, त्र्यस्र, त्रिभुजाकार, त्रिकोणाकृति.

Tribe, *s.* जाति *f.*; वर्गः, वर्णः (caste).

Tribulation, *s.* दुःखं, क्लेशः, कष्टं; *See* **Distress.**

Tribunal, *s.* धर्म-न्याय-आसनं, व्यवहारासनं; 'sat on the t.' व्यवहारासनमाददे. **2** धर्म-न्याय-सभा.

Tribute, *s.* करः, शुल्कः-ल्कं; (fig.) उपहारः; *See* **Present. -ary,** *a.*, *s.* करद; सामंत; 'rendered t.' करदीकृत. **2** (Of a river) शाखा.

Trice, *s.* *See* **Twinkling. 2** रज्ज्वा बंध् 9 P or कृष् 6 P.

Tricentenary, *s.* त्रिशताब्दं. **2** त्रिशताब्दतिथि *m. f.*

Trick, *s.* छलं, छद्मन् *n.*, कपटं, कूटोपायः-कल्पना-प्रबंधः, अप-व्यप-देशः, व्याजः, कैतवं. **2** माया, हस्तलाघवं (juggler's t.). **3** कुचेष्टा, चेष्टितं; लीला, खेलनं, दुर्लक्षणं. **-v. t.** वंच् 10, प्र-तृ c.; *See* **Cheat. -ery,** *s.* *See* **Deceit. -ster,** *s.* वंचकः, कितवः, प्रतारकः.

Trickle, *v. i.* मंदं मंदं स्रु 1 P, परि-स्रु, कणशः-शनैः शनैः-क्षर् 1 P or स्यंद् 1 A.

Trident, *s.* त्रिशूलं; त्रिशिखं, त्रिशीर्षकं पिनाकः,-कं (of Siva).

Triduan, *a.* त्र्याहिक (की *f.*).

Triennial, *a.* त्रैवार्षिक (की *f.*).

Trifle, *v. i.* बालकवत् आचर् 1 P or वृत् 1 A; खेल् 1 P; 't. with' परिहस् 1 P; *See* **Jest;** 't. away' अव-,क्षिप् 6 P; *See* **Spend.** -*s.* अणुः, लेशः,लवः. **2** अल्प-स्वल्प-विषयः लघ्वर्थः. **-ing,** *a.* लघु, निरर्थक, तुच्छ, क्षुद्र, लघ्वर्थ, सु-,अल्प, तृणप्राय, अकिंचित्कर (री *f.*).

Trifoliate, *a.* त्रिदल, त्रिपर्ण.

Trigonometry, *s.* त्रिकोणमिति *f.*

Trilateral, *a.* त्रिभुज, त्रिपार्श्व.

Triliteral, *a.* त्र्यक्षर.

Trill, *s.* स्वरकंपः. -*v. i.* कंप् 1 A (Said of voice).

Trillion, *s.* दशपरार्धं.

Trim, *v. t.* क्लृप् c., वि-,रच् 10,परिष्कृ 8 U. -*a.* क्लृप्त, सु-,रचित, विनीत, परिष्कृत. -*s.*, **ming,** *s.* परिकल्पः, भूषा-षणं, सज्जा; 'the body is not in good t.' शरीरमसाधुवं (Mal. 1). **2** अवस्था, दशा.

Trinity, *s.* त्रिमूर्ति *m.*

Trinket, *s.* कंकणः-णं; अलंकारः; *See* **Ornament.**

Trinomial, *a.* त्रिपद.

Trio, *s.* त्रयी, त्रयं, त्रितयं, त्रिकं.

Trip, *v. i.* प्र-,स्खल् 1 P; वि-,भ्रम् 1, 4 P, वि-चल् 1 P. **2** लघु चल्-इ 1 P. -*v. t.* प्र-,स्खल् c. -*s.* स्खलितं स्खलनं, भ्रमणं, पर्यटनं.

Tripartite, *a.* त्रिभाग, त्रिखंड.

Tripe, *s.* जठरं, उदरं; अंत्राणि (pl.).

Triped, *s.* त्रिपदी.

Triple, *a.* त्रिगुण, त्रिविध, त्रिधा-त्रेधा *ind.* -*v. t.* त्रिगुणीकृ 8 U. **-Triplicate,** *a.* त्रिगुण, त्रिरावृत. -*s.* तृतीयः प्रतिलेखः. **-Triplicity,** *s.* त्रैविध्यं, त्रैगुण्यं.

Tripod, *s.* त्रिपदं आसनं.

Trisect, *v. t.* समं त्रिधा विभज् 7 P.

Trisyllable, *s.* त्र्यक्षरं, त्रिकं.

Trite, *a.* क्षुण्ण, जीर्ण, उच्छिष्ट, सुप्रसिद्ध, सदाव्यवहारित.

Triturate, *v. t.* संघृष् 1 P, निष्पिष् 7 P; *See* **Grind.**

Triumph, *v. i.* वि-परा-जि 1 A, पराभू 1 P. **2** विजयोत्सवं कृ 8 U. -*s.* वि-,जयः. **2** विजयोत्सवः, जययात्रा. **3** जयहर्षः-उल्लासः; आनंदहेतुः. **-al,** *a.* जय in comp.; जय-तोरणं 't. arch'; 't. column' जयस्तंभः. **-ant,** *a.* जैत्र (त्री *f.*), जयशालिन्, जेतृ, जिष्णु, वि-,जयिन्, प्राप्तजय, क्षतारि. **-antly,** *adv.* सजयं, सजयघोषं.

Triumvirate, *s.* त्रिनरप्रभुत्वं.

Trivial, *a.* *See* **Trifling.**

Troll, *v. i.* परि-भ्रम् 1,4 P. -*s.* *See* **Goblin.**

Troly (**ey**) हस्तवाह्यं यानं.

Troop, *s.* (T. s) सैनिकाः, पदातयः, सैन्यं; *See* **Force.** **2** गुल्मः-ल्मं, दलं. **3** यूथं, गणः, कदंबः, वृंदं, कुलं; *See* **Herd.** **-er,** *s.* सादिन् *m.*, अश्वारोहः.

Trope, *s.* रूपकं.

Trophy, *s.* जयस्तंभः-चिह्नं.

Tropic, *s.* अयनवृत्तं, क्रांतिवलयं-मंडलं. **-al,** *a.* Ex. by (*s.*) in comp.

Trot, *s.* धो(धौ)रित-तकं. -*v. i.* धोरितेन या 2 P or गम् 1 P.

Troth, *s.* विश्वासः, प्रत्ययः; 'by my t.' सत्यमेव, यदि तव मयि विश्वासः.

Trouble, *s.* कष्टं, दुःखं, पीडा, क्लेशः, प्र-आयासः, खेदः, कृच्छ्रं; आ-वि-पद् *f.*, दुर्दशा, बाधा, उपरोधः. **2** यत्नः, उद्यमः; *See* **Pains.** **3** कंटकः, आयासकः, शल्यं. -*v. t.* बाध् 1 A, पीड् 10, क्लिश् 9 P, उपरुध् 7 U, आयस् c., सं-परि-तप् c.; *See* **Afflict;** 't.-ed at heart खिन्नांतःकरण, उद्विग्नचित्त and sim. comp.; 'Oh! do not t. yourself' अलमात्मानमायास्य, कृतं कृतं आयासेन. **-ed,** *a.* बाधित, पीडित &c., व्यग्र, उद्विग्न, कातर, विह्वल, आर्त, विक्लव. **-some,** *a.* कष्ट-पीडा-कर (री *f.*), पीडाप्रद, क्लेशावह, दुःखावह, दुष्ट, आयासहेतुक; 'a t. fellow' कंटकः. **-Troublous,** *a.* क्षुब्ध, सोपप्लव.

Trough, *s.* द्रोणि-णी *f.*

Trounce, *v. t.* *See* **Whip.**

Troupe, *s.* संघः.

Trow, *v. t.* श्रद्-धा 3 U. प्रति-इ 2 P.

Trowel, *s.* कर्णी *f.*

Trowsers, *s.* जंघात्राणं-वस्त्रं.

Truant, *a.* कार्यपराङ्मुख (खी *f.*); अलस; 'to be t.' अलसवत् आचर् 1 P.

Truce, *s.* युद्धविश्रामः, युद्धनिवृत्तिं *f.*, अवहारः; 't. to' ex. by विरम् 1 P, अलं (with instr.); 't. to your jest' अलं परिहासेन 't. to your impudence' विरमातिप्रसंगात् (U 5).

Truck, *s.* शकटः-टं; *See* **Cart.**

Truckle, *v. i.* *See* **Flatter.**

Truculent, *a.* क्रूर, निष्ठुर, निर्दय.

Trudge, *v. i.* शनैः-मंदं-व्रज् or चल् 1 P. पद्भ्यां चल्.

True, *a.* सत्य, तथ्य, अवितथ, ऋत, यथार्थ, वास्तविक (की *f.*), सत् pr.; अकृत्रिम, अकृतक (not feigned). **2** युक्त, उपपन्न; 'what you say is t.' युक्तं आह भवान्; 't. to one's engagements' सत्यसंधप्रतिज्ञ-व्रत. **-ly,** *adv.* सत्यं, वस्तुतः, यथार्थतः, परमार्थतः, तत्त्वतः; 'affection t. so called' परमार्थतः, प्रेम; 'Parantapa t. so called' परंतपो नाम यथार्थनामा (R. vi. 21); ध्रुवसिद्धेरपि यथार्थनाम्नः सिद्धिं न मन्यते (M. 4) 'true to his name', 't. so called.' **-Truism,** *s.* सत्यं, स्वतः-

सिद्धवचनं. **-Truth,** *s.* तथ्यं, सत्यं, अवितथं, ऋतं, तत्त्वं, भूतार्थः, परमार्थः; तत्त्वार्थः. **2** सत्यता, यथार्थता, याथार्थ्यं; 'in t.' सत्यमेव, खलु, नूनं; 'to tell you the t.' यत्सत्यं, वस्तुतः. **-ful,** *a.* सत्य; *See* (*a.*). **2** (Of persons) सत्यवादिन्, यथार्थवक्तृ-वादिन्, तथ्यभाषिन्.

Trump, *v. t.* कल्पय् c., सकूटं निर्मा 3 A; *See* **Fabricate. -Trumpery,** *a.* असार, कृत्रिम, कूट in comp. *-s.* असार-तुच्छ-द्रव्यं.

Trumpet, *s.* तूर्यं, तूरी. **2** (Flower) पाटलालिः, मोघा, काचस्थाली, फलेरुहा, कृष्णवृंता, कुबेराक्षी. *-v. t.* उद्-घुष् 10, प्रकाश् c., उच्चैः प्र-ख्या c. (ख्यापयति). **-er,** *s.* तूर्यवादकः. **2** उद्घोषकः.

Truncate, *v. t.* लू 9 U, अवच्छिद् 7 P.

Truncheon, *s.* यष्टि *f.*, दंडः, गदा.

Trundle, *See* **Roll.**

Trunk, *s.* (Of the body) कबंधः, अपमूर्धकलेवरं. **2** (Of trees) स्कंधः, प्र-,कांडः-डं; 't. with the branches lopped off' स्थाणुः. **3** (Of elephants) शुंडः, शुंडा,-दंडः, हस्तः, करः. **4** भांडं. **5** अग्र-मुख्य-भागः.

Truss, *s.* पट्टः, बंधनं. **2** (तृण-) कूर्चः, भारः. *-v. t.* कील् 10, संबंध् 9 P, संसंज् c.

Trust, *v. t.* विश्वस् 2 P, प्रति-इ 2 P; *See* **Believe. 2** निक्षिप् 6 P, सं-,ऋ c. (अर्पयति), न्यस् 4 U; *See* **Entrust.** *-v. i.* Ex. by **Sure,** q. v.; 'learn to t. in God' ईश्वरासक्त-ईश्वराधीन-चित्तो भव, ईश्वरं शरणं प्रपद्यस्व; 't. to' आ-अव-लंब् 1 A, आश्रि 1 U. *-s.* विश्वासः, विश्रंभः, प्रत्ययः. **2** निक्षेपः, न्यासः. **3** कालिका, उद्धारः. **-ee,** *s.* निक्षेपधारिन् *m.* **-ing,** *a.* विश्वासिन्, विश्वस्त; 't. to the strength of his own arms' स्वभुजबलमवलंब्य. **-worthy, -y,** *a.* विश्वसनीय, विश्वास्य, विश्वासार्ह, विश्वासयोग्य, विश्रंभास्पदं-पात्रं-भूमिः, आप्त.

Try, *v. t.* परीक्ष् 1 A, अनु-भू 1 P; 'to t. their strength upon a traveller' पथिकमात्मशक्तिनिकषं कर्तुं. **2** (Cases) दृश् 1 P, वि-चर् c., अनुसं-धा 3 U, वि-विच् 3, 7 U; *See* **Judge;** 't. ing cases' व्यवहारदर्शनं; ददर्श संशयच्छेद्यान्व्यवहारान् (R. XVI. 39) 'tried contested cases'. *-v. i.* प्र-यत् 1 A, उद्यम् 1 A, व्यव-सो 4 P, प्रवृत् 1 A; *See* **Attempt;** oft. ex. by desid. forms. **-ing,** *a.* कष्ट-पीडाकर (री *f.*), (beat &c.). **-Trial,** *s.* परीक्षा-क्षणं; 'to make a t. of' परीक्ष्; अनुभवः; 'under t.' अनुभूयमान. **2** व्यवहारदर्शनं, विचारः. **3** कृच्छ्रं, वि-आ-पद् *f.*; *See* **Calamity, Misfortune. 4** प्र-,यत्नः, उद्यमः, उद्योगः.

Tryst, *s.* संकेतस्थानं. **2** समागमसंकेतः.

Tub, *s.* द्रोणि-णी *f.*

Tube, *s.* नालः-ली-लं, न(ना)लिका, नाडि-डी *f.*, सुषिरं, प्रणालः-ली. **-Tubular,** *a.* नालाकृति, नाडीरूप.

Tuber, *s.* कंदः-दं. **-ous,** *a.* ग्रंथिल, ग्रंथिमत्, कंदिन्.

Tubercle, *s.* सूक्ष्मव्रणः, ग्रंथिः.

Tuck, *See* **Fold.**

Tuesday, *s.* मंगलवासरः.

Tuft, *s.* चूडा, शिखा, शिखरः-रं, शेखरः; 'having a t.' शिखिन्. **2** पल्लवः; स्तबकः, गुच्छः, अवतंसः. **-ed,** *a.* शिखिन्, शेखरित.

Tug, *v. t.* आ-कृष् 1 P, प्रयत्नेन कृष्; *See* **Pull.**

Tuition, *s.* शिक्षणं, अध्यापनं, उपदेशः.

Tumble, *v. i.* अवपत् 1 P, स्खल् 1 P. *-s.* अवपातः, स्खलनं.

Tumbler, *s.* काचपात्रं. **2** कलायनः, सूत्रायणः.

Tumid, *a.* स्फीत, आध्मात.

Tumour, Tumefaction, *s.* वि-,स्फोटः-टकः, शोफः, श्वयथुः, व्रणः-णं, मांसार्बुदं, ग्रंथिः; 'fatty t.' मेदोर्बुदं.

Tumult, *s.* तुमुलं, संकुलं, अत्यंतमाकुलं; 't. in the army' पिंजलः. **2** कोलाहलः, कलकलरवः. **-uous,** *a.* तुमुल, संकुल, क्षुब्ध, अव्यवस्थित.

Tune, *s.* रागः; तालः. **2** तालैक्यं, स्वरैक्यं; 'out of t.' विस्वर-*a.*; 'in t.' श्लिष्टस्वर, युक्तस्वर-*a.* *-v. t.* स्वरैक्यं कृ 8 U. **-ful,** *a.* सुस्वर, मधुर, संगतस्वर. *See* **Harmonious.**

Tunic, *s.* चोलः-ली, कूर्पासकः-कं.

Tunnel, *s.* कुल्या, सुरुं(रं)गा, गूढ-आंतर्भौम-मार्गः *-v. t.* उत्खन् 1 P, सुषिरीकृ 8 U.

Turban, *s.* उष्णीषः-षं, शिरोवेष्टनं.

Turbid, *a.* कलुष, आविल, पंकिल, सपंक, पंकदूषित, मलिन.

Turbulent, *a.* पीडाकर (री *f.*). दुर्दांत, कलह-तुमुल-कारिन्; अवशवर्तिन्, अनवस्थित.

Turf, *s.* शाद्वलं, सतृणभूमि *f.*

Turgid, *s.* स्फीत, उच्छून.

Turmeric, *s.* हरिद्रा, कांचनी, पीता, निशा, वरवर्णिनी.

Turmoil, *s.* संक्षोभः, उपप्लवः, तुमुलं; 't. of war' संग्रामतुमुलं.

Turn, *v. i.* परि-,भ्रम् 1, 4 P, घूर्ण् 1 A, 6 P, व्या-परि-वृत् 1 A. **2** परिवृत्; oft. by भू 1 P, जन् 4 A. **3** अम्लीभू, अम्लतां गम् 1 P; food t. s into blood' अन्नं रुधिरभावेन परिणमति; *See* **Change;** 't. into white' श्वेतीभवति; 't. to nothing' निरर्थक-

व्यर्थ-*a.* भू. **4** भू with संमुख-अभिमुख-(खी *f.*) in comp. or with gen.; 't. ing to the hero' नायकाभिमुखी भूत्वा. **-*v. t.*** परि-,भ्रम् c., (fig. also), घूर्ण् c.; परि-वि-व्या-वृत् c. **2** परिवृत् c., आ-,वेल् c., (आवलितवदनं राजकमासीत् Ka. 10); परिवृत्तार्धमुखी (V. 1) 'with her face half-t.-ed'. **3** विपर्यस् c. **4** साचीकृ 8 U; *See* **Bend. 5** अम्लीकृ; 't. to account; *See* under **Account;** 't. to use' उपयुज् 10; 't. into ashes' भस्मसात्-भस्मी-कृ or भू; 't. the back' पृष्ठं दृश् c., पराङ्मुखीभू 't. s a single fault to two' एकापराधं द्विगुणीकरोति. **-about,** वि-परि-वृत्; परिक्रम् 1 U, 4 P. **-against,** प्रतीपयति (D.); (*v. i.*) प्रतिकूलीभू, प्रत्यर्थिन्-*a.* भू, विरुद्ध-*a.* भू. **-away,** अपनी 1 P, दूरीकृ; अपास्, निःसृ c., निराकृ; *See* **Dismiss, Discharge. 2** (aside) नि व्यावृत् c., सं-हृ 1 P; साचीकृ, तिर्यग्-वल्; (अभिमुखे मयि संहृतमीक्षितं S. 2); 'shall t. away his mind (in another direction)' अन्यतः एनं क्षिपामि-संचारयामि; (*v.i.*) व्यावृत् 1 A, (व्यावर्तमाना ह्रिया), पराङ्मुखी विमुखी-भू; मुखं परिवृत्. **-back,** परि-परा-वृत्; (*v. t.*) परि-परा-वृत् c. **-into,** कृ, (तपोवनमुपवनं कृतं S. 2). **2** परिणम् c. with भावेन; आखुं बिडालभावेन पर्यणमयत् 't.-ed the rat into a cat'; *See* **Change. off,** दूरीकृ, निवृत् c., अपास् &c.; (*v. i.*) अपसृ 1 P, निर्गम् 1 P. **-out,** (*v. t.*) निः-सृ c., निष्कस् c., बहिष्कृ; *See* **Discharge;** (*v. i.*) संपत् 1 P; *See* **Happen. 2** जन् 4 A, भू 1 P; 't. ed out pale' विवर्णीभूतः, सहसा विवर्णभावं प्रपेदे; 'the words of the great never t. out untrue' न हीश्वरव्याहृतयः कदाचित्पुष्णंति लोके विपरीतमर्थं (K. III. 63). **-over,** उत्क्षिप् 6 P. **2** परिवृत् c., चल् c.; 't. ing over the pages' पृष्ठानि चालयित्वा-समालोक्य. **-round,** परि-परा-वृत्. **-to,** दृश् 1 P, ईक्ष् 1 A; by प्रति with acc. **-towards,** अभिमुखी-संमुखी-भू (with gen.). **-up,** सहसा आविर्भू or प्रादुर्भू. **2 Happen,** q. v. **-*s.*** आवर्तः-र्तनं, आवृत्ति *f.* **2** परिवृत्तिः, परिवर्तः, विकरः. **3** पर्यायः, परिवृत्तिः; 'by t. s' पर्यायेण, पर्याय in comp.; 'service by t. s' पर्यायसेवा. **4** वारः, (ज्ञशकस्य वारः समायातः P. I. 8). **5** प्र-,वृत्तिः, भावः, दशा; 't. of mind' चित्तवृत्तिः, मनःस्वभावः **6** आकारः, स्वरूपं; 'matters took a different t.' वस्तुस्थितेरवस्थांतरं अदृश्यत, सकलोऽर्थः परिवृत्तः. **7** गति *f.*, क्रमः; 'mysterious is the t. of fate' कर्मणो गहना गतिः; 't. of fortune' दैवगतिः. **8** परिक्रमः; (walk) ईषद्विहारः. **9** अवसरः, समयः, कालः. **10** वंकः (of rivers); 'a good t.' उपकारः; 'ill t.' अपकारः; 'one good t. deserves another' उपकारः प्रत्युपकारेण निर्यातयितव्यः. **-er,** *s.* चक्रिन् *m.*, कुंदिन् *m.* **-Turncoat,** *s.* स्वपक्षत्यागिन् *m.*, समयाननुरोधिन्.

Turnip, *s.* शिखामूलं.

Turpentine, *s.* देवदारुतैलं, सरलद्रवः.

Turpitude. *s.* दुष्टता, दोषः.

Turquoise, *s.* वैदूर्यं, हरिताश्मन् *m.*

Turret, *s.* शिरोगृहं; प्रासादशृंगं-शिखरं.

Turtle, *s.* कूर्मः; *See* **Tortoise.**

Tusk, *s.* दंतः, दंष्ट्रा, रदः, रदनः.

Tussel, *s.* बाहुयुद्धं. **-*v. i.*** प्रति-आ-युध् 4 A.

Tutelage, *s.* बालावस्था, बाल्यं.

Tutelary, *a.* रक्षक, रक्षा in comp.; 't. deity' इष्ट-कुल-देवता.

Tutenag, *s.* तुत्थं, तुत्थांजनं.

Tutor, *s.* गुरुः अध्यापकः, आचार्यः, शिक्षकः **-ship,** *s.* आचार्यत्वं.

Twaddle; *See* **Prate.**

Twain, *s.* (In t.) द्विधा, द्वेधा.

Twang, *v. t.* (A bow) आ-स्फल् c., टंकृ 8 U, ज्यां घुष् 10; (a lute) क्वण् c., नद् c. **-*v. i.*** क्वण् 1 P, टंकारं कृ 8 U **-*s.*** टंकारः, ज्या-शब्दः-घोषः, धनुरास्फालनं. **2** क्वणितं, झणत्कारः.

Tweak, *See* **Pinch.**

Tweezer, *s.* संदंशः, कंकमुखं.

Twelve, *a.* द्वादशन्. **-Twelfth,** *a.* द्वादश (शी *f.*). **-*s.*** द्वादशांशः.

Twenty, *a.* विंशति *f.* **-Twentieth,** *a.* विंश (शी *f.*), विंशतितम (मी *f.*).

Twig, *s.* विटपः, शाखा, प्रशाखा.

Twilight, *s.* संध्या, संधिप्रकाशः, संध्याकालः-समयः, निशादिः.

Twin, *a. s.* यम, यमज, यमल; 'we are t. brothers' भ्रातरावावां यमजौ (U. 6); oft. by यमलं, युगं, द्वंद्वं, मिथुनं, युगलं; 't. stars' मिथुनं; 'one of t.' यमः, यमलः.

Twine, *s.* सूत्रं, तंतुः. **-*v. t.*** उद्-ग्रंथ् 9 P, उत्खच् 10, (कुसुमोत्खचितान्वलीभूतश्चलयन् अलकान्. R. VIII. 53). **2** (Itself) आ-परि-वेष्ट् c., आ-परि-वृत् c.

Twinge, *s.* व्यथा, पीडा, वेदना, शलः-लं, तीव्रवेदना. **-*v. t.*** Ex. by कृ with (*s.*).

Twinkle, *v. t.* (Of the eye) नि-,मिष् 6 P, उन्मिष्, निमील् 1 P, उन्मील्, निमेषोन्मेषं कृ. **2** स्फुर् 6 P, तरलं-सकंपं-प्रभा 2 P or प्रकाश् 1 A or द्युत् 1 A. **-*s.*,-ing,** *s.* निमि(मे)षः, निमेषोन्मेषौ; 'within the t. of the eye' निमेषमात्रात्, निमेषेण. **2** स्फुरणं, स्फुरितं, तरलज्योति *n.*, प्रभा; 'the

eyes knowing no t.' (पपौ) निमेषाल-सपक्ष्मपंक्तिः (R. II. 19), अनिमेषलोचनो ददर्श (Ka. 11).

Twirl, *v. t.* त्वरितं भ्रम् c. or परि-वृत् c. -*v. i.* परि-वृत् 1 A, भ्रम् 1,4 P. -*s.* त्वरित-परिवृत्ति *f.*

Twist, *v. t.* परि-व्या-वृत् c., आकुंच् c., मुड्-ड् 10. -*v. i.* व्यावृत् 1 A, आकुंच् pass. -*s.* व्यावर्तनं, आ-,कुंचनं, मोटनं.

Twit, *v. t.* *See* **Censure, Taunt.**

Twitch, *v. t.* (सहसा) आकृष् 1 P, आ-क्षिप् 6 P. -*v. i.* स्फुर् 6 P, स्पंद् 1 A, प्र-,कंप् 1 A. -*s.* सहसाकर्षः-आक्षेपः, स्फुरणं, स्पंदनं.

Twitter, *v. i.* प्र-जल्प् 1 P, प्र-लप् 1 P. -*s.* प्रलापः, प्रजल्पः; *See* **Chatter.**

Two, *a.* द्वि (द्वौ, द्वे *f. n*), द्वि pr.; द्वयं affixed; 't. years' द्विवर्षं, वर्षद्वयं; 't. or three' द्वित्राः; 't.-fold' द्विगुण; 't.-handed' द्विहस्त; द्विजिह्व &c.; 'in t. ways' द्विधा. **-Twice,** *adv.* द्विः, द्विवारं; 't. married' पुनरूढा, पुनर्भूः (widow remarried); '20 is t. 10' द्विरावृत्ता दश विंशतिः संपद्यते.

Tynpanum, *s.* कर्णोदरं, कर्णदुंदुभिः.

Type, *s.* आदर्शः; प्रतिरूपं; *See* **Model.** 2 चिह्न, लक्षणं, व्यंजनं. 3 मुद्राक्षरं. 4 प्रकारः, रीति *f.* **-ical,** *a.* Ex. by (*s.*) in comp.; आदर्शभूत, प्रतिरूपक. **-Typefy,** *v. t.* आदर्शीकृ 8 U, प्रतिरूपेण दृश् c. **-Typography,** *s.* मुद्रांकनं.

Tyranny, *s.* प्रजापीडनं, लोकोपप्लवः, जनमर्दनं, निष्ठुरशासनं. **-ic,-ical,** *a.* प्रजोपप्लविन्, प्रजोपद्रविन्. **-ize,** *v. t.* (भृशं) पीड् 10, उप-प्लु 1 A, विप्र-कृ 8 U, उपद्रु 1 P. **-Tyrant,** *s.* प्रजापीडकः, लोकोपप्लावकः, उपद्रविन् *m.*, निष्ठुरशासनः.

Tyre, *s.* नेमि *f.*

Tyro, *s.* नवच्छात्रः-शिष्यः, अनभ्यस्तः.

U.

Ubiquitous, *a.* सर्वगत, सर्वव्यापिन्.

Udder, *s.* ऊधस् *n.*, आपीनं, स्तनं (mostly human); 'having pot-like u. s' घटोध्नी; 'having large u. s' पीनोध्नी.

Ugly, *a.* कु-वि-अप-रूप, विकृत, कदाकार; दुर्दर्शन, विकृताकार. 2 कुत्सित, निंद्य. **-iness,** *s.* वैरूप्यं, अपरूपता, कदाकारः.

Ulcer, *s.* पूयव्रणः-णं, विद्रधिः, नाडीव्रणः-णं, पूयक्षतं. **-ate,** *v. t.* व्रणं उत्पद् c. -*v. i.* सक्षतीभू 1 P, व्रणं बंध् 9 P. **-ated,-ous,** *a.* पूयव्रणिन्, सव्रण, सक्षत, उपहत in comp. with (*s.*).

Ulterior, *a.* उत्तर, अपर; *See* **Distant.**

Ultimate, *a.* चरम, अंतिम; *See* **Last.** **-ly,** *adv.* अंते, शेषे, अंततः. **-Ultimatum,** *s.* चरमाभिसंधिः, अंत्यप्रतिज्ञा.

Ultra, *a.* ex. by अति in comp.

Ultra-marine, *a.* द्वीपांतरभव.

Umbilical, *a.* नाभ्य, नाभि in comp.; 'u. cord' नाभि *f.*,-नालः.

Umbra, *s.* पूर्णच्छाया.

Umbrage, *s.* छाया. 2 अप्रीति *f.*, कोपः, असंतोषः, अपराधः; 'take u.' प्र-,कुप् 4 P, **Angry,** q. v.; 'give u.' विरागं नी 1 P; *See* **Insult.**

Umbrella, *s.* छत्रं, आतपत्रं, घर्मवारणं, जलत्रं.

Umpire, *s.* मध्यस्थः, निर्णेतृ *m.*

Un, A prefix, ex. by अ (अन् before vowels), sometimes by निर्, वि, दुस् pr., हीन, रहित in comp.; 'unaided' असहाय, साहाय्यहीन; 'undaunted' निर्भीक, अभय; 'unmixed' अ-मिश्र; 'unwelcome' अप्रिय, अनभिमत &c.; 'unattainable' दुष्प्राप. (In cases where the word formed with 'un' is not given, the student should take the simple word or form it, and use the above prefixes. With nouns the sense of 'un' may be expressed by अप-नी 1 P, or हृ 1 P; *e. g.* 'unbar' अर्गलं अपनी, निरर्गलीकृ &c.).

Unaccustomed, *a.* अपरिचित, अनभ्यस्त, अननुभूत.

Unaffected, *a.* अकृत्रिम, सहज, अव्याज; *See* **Artless.**

Unanimous, *a.* एकमत-चित्त. **-ly,** *adv.* एकचित्तीभूय, ऐकमत्येन. **-Unanimity,** *s.* ऐकमत्यं, चित्त-मत-ऐक्यं, एकचित्तता; अस्मिन् विषये सर्वेषामैकमत्यं 'there is a u. on this point.'

Unarmed, *a.* विशस्त्र, निरायुध, असज्ज.

Unassailable, *a.* दुष्प्रधर्ष, अधृष्य, दुरासद.

Unassuming, *a.* अविकत्थन, अदृप्त, विनीत; *See* **Humble.**

Unavailing, *a.* निरर्थक, निर्गुण, निष्फल.

Unawares, *adv.* अतर्कितं, अलक्षितं, निभृतं, अकस्मात्; *See* **Suddenly** also.

Unbar, Unbolt, *v. t.* निरर्गलयति (D.).

Unbeliever, *s.* नास्तिकः,-बुद्धिः, पाखंडः, मिथ्यादृष्टिः.

Unbend, *v. t.* शिथिलीकृ 8 U; *See* **Relax.** **-ing,** *a.* **Cruel,** q. v.

Unbind, *v. t.* उद्-ग्रंथ् 9 P, शिथिलीकृ 8 U.

Unblemished, *a.* निष्कलंक, निरवद्य, अक्षत.

Unbosom, *v. t.* विवृ 5 U; *See* **Disclose;** ' u. oneself ' हृदयं-मनोगतं-विवृ.

Unbounded, *a.* अनंत, अमित.

Unbridled, *a.* उच्छृंखल, उद्दाम, निर्मर्याद, अनर्गल.

Unburden, *v. t.* भारमपनी 1 P; *See* **Alleviate** also.

Unceremonious, *a.* अनादर, मंदादर. **-ly,** *adv.* मंदादरेण.

Uncertain, *a.* संदिग्ध, संशयग्रस्त; *See* **Doubtful. -ty,** अनिश्चयः, अनिर्णयः.

Unchain, *v. t.* निगडान् अपनी 1 P, मुच् c.; *See* **Free, Liberate.**

Uncharitable, *a.* दोषदृष्टि, असूयक, छिद्रान्वेषिन्.

Unchaste, *a.* अविनीत, पांसुल, &c.; *See* **Prostitute.**

Unclaimed, *a.* अस्वामिक, अनधिकृत.

Uncle, *s.* पितृव्यः. **2** मातुलः (maternal u.)

Unclose, *v. t.* **Open,** q. v.

Unclothe, *v. t.* **Strip,** q. v. **-ed,** *a.* विवस्त्र, नग्न; *See* **Naked.**

Uncloven, *a.* अविदीर्ण, अस्फुटित. 'u. hoofed,' एकशफ, एकखुर.

Uncommon, *a.* असामान्य, अपूर्व, अलौकिक (की *f.*). **-ly,** *adv.* अपूर्व; *See* **Exceedingly.**

Uncompromising, *a.* प्रतिनिविष्ट, स्थिर, निश्चल; आग्रहिन्.

Unconcern,-ed, *a.* **Indifferent,** *&c.* q. v.

Unconscionable, *a.* विवेकशून्य.

Unconscious, *a.* निःसंज्ञ, अपगतचेतन, मूर्छित. **2** अनभिज्ञ.

Uncontrolled, *a.* अप्रतिबंध, निरर्गल, निर्यंत्रण.

Uncouple, *v. t.* **Separate,** q. v.

Uncouth, *a.* **ugly, Strange,** q. v.

Uncover, *v. t.* उच्छद् 10, अपा-वि-वृ 5 U; *See* **Strip;** ' they u. ed their heads ' शिरोवेष्टनमपनिन्युः.

Unction, *s.* अभि-,अंजनं, आ-वि-लेपः-पनं. **-Unctuous,** *a.* स्निग्ध, मसृण, चिक्कण, सांद्र.

Undeceive, *v. t.* भ्रमं निरस् 4 U or अपाकृ 8 U or छिद् 7 P.

Undecided, *a.* अनिश्चित; (of persons) **Irresolute,** q. v.

Undeniable, *a.* निर्विवाद, निःसंदेह.

Under, Underneath, *prep.* अधः, अधस्तात् (with gen.); *See* **Below;** तले in comp. or with gen. **2** अधीन, आयत्त, वशग; *See* **Subject. 3** (**Age** &c. ऊन in comp.; ' u 16, ' ऊनषोडशवर्ष; ' u. age ' अप्राप्तवयस्क, अप्राप्तव्यवहार 'should bury one wi. is u. two years ' ऊनद्विवर्षं निखनेत् (Y. III 1.). **4** काले, समये or ex. by ' Reign ', q. v. ' u. the Moghuls ' मोंगलेषु महीं शासत्सु; gen. ex. by loc. or instr.; ' u. this condition ' अनेन समयेन; ' u. misfortunes ' आपदि, आपत्काले; ' u. your favour ' भवतोऽनुग्रहेण, *-a.* अधर, अधः in comp.; **Undercurrent,** *s.* अधः or अंतःप्रवाहः. ' u.-garment ' अधोंशुकं, अधोवासस् *n.*; *See* **Garment;** oft. by उप pr.

Undergo, *v. t.* अनुभू 1 P, सह् 1 A, उपगम् 1 P; *See* **Suffer;** ' u. examination ' परीक्ष् pass.; ' u. change ' परिवृत् 1 A. विकृ pass.

Underground, *a.* आंतर्भौम, भूम्यधस्तात्.

Underhand, *a.* गूढ, प्रच्छन्न, परोक्षकृत, छलेन कृत; निंद्य, गर्हणीय.

Underlay, *v. t.* अधः नि-धा 3 U or स्था c.

Underlie, *v. t.* ली 4 A, निगृह् pass. (with loc.).

Underline, *v. t.* अधोरेखया अंक् 10.

Underling, *s.* अनुजीविन् *m.*

Undermine, *v. t.* सुरंगां कृ 8 U, उत्खन् 1 P, अधस्तात् विनश् c. **2** विनश् c., अवसद् c., उच्छिद् 7 P, कष् 1 P;'a river u. -ing its banks' कूलंकषा सिंधुः.

Underrate, Undervalue, *v. t.* न्यूनमूल्यं कल्प् c., अर्घतः पत् c. **2** लघु मन् 4 A, अवमन्, लघूकृ, अपकृष् 1 P.

Understand, *v. t.* बुध् 1 P, ज्ञा 9 U, अवगम् 1 P, ग्रह् 9 U, उपलभ् 1 A, वि-भू c., अव-इ 2 P, अवधृ 10; *See* **Know. 2** (Words &c.) अध्याहृ 1 P, ऊह् 1 A, (इदं पदमत्राध्याहर्तव्यं). **-ing,** *s.* मतिः, बुद्धिः, धीः, मेधा, ग्रहण-ज्ञान-शक्तिः, प्रज्ञा; *See* **Intellect. 2** भावः, वृत्ति *f.*; ' good u. ' सद्भावः, मित्रभावः; 'come to an u.' *See* **Settle.**

Undertake, *v. t.* आरभ् 1 A, उपक्रम् 1 A; *See* **Begin. 2** व्यवसो 4 P, ईह् 1 A; *See* **Attempt, Intend. 3** स्वी-अंगी-कृ 8 U, उ (ऊ) रीकृ, अभ्युपगम् 1 P, अभ्युप-इ 2 P, प्रति-पद् 4 A. **-er,** *s.* आरंभकः, अनुष्ठातृ *m.* **2** प्रेतकर्मनिर्हारकः. **-ing,** *s.* कार्य, व्यवसायः, कर्मन् *n.*, आरंभः, व्यापारः, प्रवृत्ति *f.*

Underwood, *s.* गुल्मः-ल्मं; स्तंबः.

Underworld, *s.* अधो-भुवनं-लोकः.

Undeserving, *a.* अनर्ह, अगुणवत्, अपात्र, निर्गुण.

Undesigned, *a.* अनभिप्रेत, अबुद्धिपूर्व. **-ly,** *adv.* अज्ञानतः, अबोधपूर्वं, अकामतः.

Undesigning, *a* **sincere,** q. v.

Undiminished, *a.* अक्षत, अन्यून, अनपाय, अलुप्त, अक्षीण.

Undisguised, *a.* **Frank,** q. v.

Undivided, *a.* अभिन्न; (attention) एकाग्र, अनन्य, अनन्यासक्त, सुसमाहित; *See* **Fixed.**

Undo, *v. t.* उन्मुच् 6 P, उद्-घट्ट् c., उद्-ग्रथ् 9 P. **2** व्या-परा-वृत् c.; 'able to do, not to do, or u. things' कर्तुमकर्तुमन्यथा कर्तुं क्षमः. **3** हन् 2 P, नश् c.; 'Oh! I am undone हा हतोस्मि (मंदभाग्यः), दैवेन मुषितोस्मि.

Undress, *v. t.* वासः-वस्त्रं-अपनी 1 P or अवतृ c. or उन्मुच् 6 P or अपनह् 4 P. **-s.** लघुवासस् *n.* **-ed,** *a.* (food) असंस्कृत, अपक्व, आम. : **2** विवस्त्र, विवसन, उन्मुक्तवसन.

Undulate, *v. i.* तरंगायते (D.), उत्सृप् 1 P; better by 'u. -ing.' **-ing,-ory,** *a.* ऊर्मिमत्, तरंगित, उन्नतावनत, भंगुर, उत्सर्पिन्. **-ion,** *s.* भंगुरता, ऊर्मिमत्ता, &c.

Unearth, *v. t.* उत्खन् 1 P.

Uneasy, *a.* आतुर, चिंताकुल.

Unequalled, *a.* **Matchless,** q. v.

Unerring, *a.* अमोघ, अभ्रांत, अवंध्यपात; 'took an u. aim on his bow' धनुषि अमोघं समधत्त बाणं; *See* **Fix.**

Uneven, *a.* विषम, उन्नतानत.

Unexpected, *a.* असमर्थित, अतर्कित, आकस्मिक (की *f.*), अकांड, अनपेक्षित, अचिंतितपूर्व. **-ly,** *adv.* अकस्मात्, अकांडे, अतर्कितं.

Unfaithful, *a.* **Faithless,** q. v.

Unfasten, *v. t.* **Loose,** q. v.

Unfathomable, *a.* अगाध, अतलस्पर्श.

Unfavourable, *a.* प्रतिकूल, वि-पराङ्-मुख (स्त्री *f.*), विरक्त, अननुकूल; विषम, अप्रिय, अप्रसन्न.

Unfeeling, *a.* निर्दय, क्रूर; *See* **Cruel.**

Unfeigned, *a.* अकृत्रिम, निर्व्याज.

Unfit, *a.* अयोग्य, अक्षम, &c. **-v. t. Disable,** q. v.

Unfold, *v. t.* विस्तृ-स्तृ c. **2** विवृ 5 U; *See* **Disclose.**

Unforeseen, *a.* **Unexpected,** q. v.

Unfortunate, *a.* अधन्य, दुर्दैव, मंद-हत-भाग्य, दैवोपहत, आपद्ग्रस्त. **2** अमंगल, अभद्र, अशुभ. **-ly,** *adv.* मंदभाग्यतया, दुर्दैवात्.

Unfounded, *a.* अमूलक, निर्मूल, मिथ्या in comp.

Unfruitful *a.* **Fruitless,** q. v.

Unfurl, *See* **Unfold.**

Ungainly, *a.* **Clumsy,** q. v.

Ungodly, *a,* पाप, धर्मभ्रष्ट.

Ungovernable, *a.* अवश्य, अविधेय, अनिवार्य, दुर्निवार दुर्निग्रह, उद्दाम, निर्यंत्रण, उच्छृंखल.

Ungrateful,-ness, *See* **Ingrate** &c.

Unguent, *s.* अभ्यंजनं, अनु-वि-लेपः-पनं, समालंभः-भनं.

Unhappy, *a.* अधन्य, मंदभाग्य, दुःखभाज्, अनिर्वृत; *See* **Miserable.**

Unharmed, *a.* अक्षत, निर्व्रण.

Unharness, *v. t.* मुच् c.

Unhealthy, *a.* अपथ्य, रोगावह.

Unhinge, *v. t.* विसंधीकृ 8 U, अपसंधीकृ.

Unhurt, *See* **Unharmed.**

Unicorn, *s.* एकशृंगः.

Uniform, *a.* सरूप, एक-समान-विध, एक-समान-रूप, एकप्रकार, एकाकार; सम, समान, अविशेष. **-s.** निर्विशेषः वेषः. **-ity,** *s.* सारूप्यं, ऐकविध्यं, साम्यं, एकरूपता. **-ly,** *adv.* नियतं, अश्रांतं, अविरतं, एकरूपेण, सदा

Unimpeachable, *a.* निर्दोष.

Unimpeded, Uninterrupted, *a.* निर्विघ्न, निरंतर, अनंतराय, अविच्छिन्न, अविरत.

Unique, *a.* अपूर्व, अद्वितीय, अप्रतिरूप.

Unison, *s.* एकतानः, स्वरैक्यं.

Unit, *s.* एकः, एकांकः. **-Unity,** *s.* एकतात्वं, अद्वैतं; 'doctrine of u.' अद्वैतवादः, अभेदः. **2** ऐक्यं, एकचित्तता. **-Unitarian,** *s.* अद्वैतवादिन् *m.*

Unite, *v. t.* युज् 7 U, 10, सं-समा-°, संगम् c., संहन् 2 P, समानी 1 P, सं-घट् c., संपृच् 7 P, 2 A, सं-धा 3 U; 'seems u. ed' भवति कृतसंधानमिव (S. 1). **-***v. i.* घट् 1 A, (तप्तेन तप्तमयसा घटनाय योग्यं V. 2), संयुज् pass; एकत्र भू, सं-,मिल् 6 P; *See* **Assemble. -ed,** *a.* संहत; मिलित्वा; संयुक्त. **-edly,** *adv.* संभूय, मिलित्वा, एकीभूय, संहत. *a.* **-Union,** *s.* संगः, संगमः, समागमः, संगतिः *f.*, संहतिः *f.*, समवायः, सं-,योगः, संधिः; 'u. is strength' समवायो हि दुस्तरः; (*cf.* बहूनामप्यसाराणां संहतिः कार्यसाधिका 'weak faggots make a strong bundle').

Universe, *s.* विश्वं, सर्वं जगत्, त्रिभुवनं; *See* **World. -al,** *a.* विश्व, सार्वलौकिक-सार्वत्रिक-(की *f.*); सर्वगत, सर्व; 'u. spirit विश्वात्मा, जगदात्मा, ब्रह्म. **-ality,** *s.* सर्वगतत्वं, अभिव्यापित्वं. **-ally,** *adv.* सर्वतः, सर्वत्र, विश्वतः, विष्वक्. [मंडलं.

University, *s.* विद्यालय-मंडलं-गणः, शाला

Univocal, *a.* एकार्थ, ऐकतानिक (की *f.*).

Unkempt, *a.* अप्रसाधित.

Unkind, *a.* अस्निग्ध, विप्रिय, निर्दय, क्रूर. **-ness,** *s.* निर्दयता, &c. **2** अपकारः, अहितं

Unlace, *v. t.* *See* **Free.**

Unlawful *a.* **Illegal,** q. v.

Unlearn, *v. t.* स्मृतेः अपास् 4 U, वि-स्मृ 1 P. **-ed,** *a.* अज्ञान, अकृतविद्य.

Unless, *conj.* न-नो-चेत्, यदि न.

Unlicensed, *a.* विशृंखल, निरर्गल.

Unload, *v. t.* भारं अप-नी 1 P or अव-तृ c. or अवरुह् c.; *See* **Disburden.**

Unlock, *v. t.* उद्-घट्ट् c., उन्मुद्रयति (D.).
Unloose, *See* **Loose,-en.**
Unman, *v. t.* पौरुषं नश् c. or हृ 1 P. **-ly,** *a.* क्लीब, पौरुषहीन, पुरुषानर्ह.
Unmask, *v. t.* छद्मवेशं अपहृ 1 P, (fig.) निजरूपं प्रकटीकृ 8 U; 'he was u. ed' तस्य वास्तविकं स्वरूपमाविष्कृतं.
Unmeaning, *a.* अनर्थक, असंगत, अपार्थ.
Unmoor, *v. t.* उन्मुच् 6 P or c.
Unmoved, *a.* स्थिर, अविचलित, निर्विकार.
Unnatural, *a.* निसर्ग or सृष्टिक्रम-विरुद्ध or बाह्य.
Unnecessary, *a.* निष्प्रयोजन, वृथा in comp.
Unnerve, *v. t.* **Enfeeble,** q. v.
Unpack, *v.t.* उद्-घट्ट् c.,कोशात् निष्कृष् 1 P.
Unparalleled, *a.* निरुपम, अतुल.
Unprecedented, *a.* अपूर्व.
Unpretending, *a.* विनयशील.
Unprincipled, दुर्वृत्त, विचारहीन, सदसद्विवेकहीन.
Unravel, *v. t.* उद्-ग्रंथ् 9 P, व्याकृ 1 U, व्या-ख्या 2 P.
Unreal, *a.* असार, मायात्मक, अतथ्य.
Unrelenting, *a.* *See* **Cruel.**
Unremitting, *a.* दृढ, अशिथिल.
Unreserved, *a.* अशेष, निःशेष, सं-,पूर्ण.
Unrest, *s.* चिंता, वैक्लव्यं, क्षोभः, अनिर्वृत्ति *f.*
Unrestrained, *a.* निरवग्रह, उच्छृंखल, उद्दाम, निर्यंत्रण, अनर्गल, निरंकुश.
Unrivalled, *a.* अप्रतिम, अद्वितीय, अतुल, अप्रतिरूप; अनुपम.
Unroll, *v. t.* *See* **Open.**
Unruly. *a.* **Ungovernable,** q. v.
Unsaddle, *v. t.* पर्याणं अपनी 1 P.
Unscrupulous, *a.* निःशंक, शंकाहीन.
Unseal, *v. t.* मुद्रां अपनी 1 P, उद्-घट्ट् c., उन्मुद्रयति (D.).
Unsettle, *v. t.* आकुलीकृ 8 U, क्षुभ् c., आकुलयति (D.); *See* **Agitate. -ed,** *a.* अस्थिर, आकुल, क्षुब्ध.
Unshackle, *v. t.* *See* **Free.**
Unsheathe, *v. t.* कोशात् उद्-हृ 1 P or निष्कृष् 1 P. **-ed,** *a.* विकोश, उल्लसित.
Unsightly, *a.* अप्रिय-विरूप-दर्शन, कुरूप; *See* **Ugly.**
Unsophisticated, *a.* निर्व्याज, निर्व्यलीक, सरल, ऋजु.
Unsound, *a.* असार, अयुक्तिसिद्ध.
Unspeakable, *a.* अवर्णनीय. **2** अवाच्य.
Unspotted, *a.* निष्कलंक, विमल.
Unstable, *a.* अस्थिर, चंचल.
Unsteady, *a.* *See* **Fickle.**
Unstring, *v. t.* (A bow) ज्यां अपनी 1 P or शिथिलयति (D.); 'a bow unstrung' शिथिलज्यावंधं धनुः (S. 2).
Unsuitable, *a.* अन्-उपपन्न-उचित.
Unswerving, *a.* स्थिर, दृढ, अचल.
Untenable, *a.* अरक्षणीय, अप्रतिपादनीय.
Untie, *v. t.* उत्-मुच् c., मोक्ष् 10, उद्-ग्रंथ् 9 P, शिथिलयति (D.).
Until, *prep.* *See* **Till.**
Untimely, *a.* अकाल in comp.; oft. अप pr.
Unto, *prep.* *See* **To.**
Untoward, *a.* प्रतिकूल, प्रतीप, अभद्र, कष्टद.
Untwist, Untwine, Unveil Unwrap, *See v. t.* **Open.**
Unusual, *a.* अपूर्व, असामान्य, अलौकिक (की *f.*).
Unvarnished, *a.* यथार्थ, यथातथ, अनलंकृत.
Unwholesome, *a.* अपथ्य, अहितावह.
Unwieldy, *a.* स्थूल, अतिमहत्, अनुत्थानयोग्य.
Unwittingly, *adv.* अज्ञात्वा, अज्ञानात्.
Unworthy, *a.* अनर्ह, अयोग्य, निर्गुण; oft. by अ; 'u. object' अपात्रं; अकार्यं, &c.
Unyoke, *v. t.* मुच् c.,मोक्ष् 10. **2** वियुज् 10.
Up, *prep.*, *adv.* उत् prefixed; ऊर्ध्वं, उपरि, उच्चैः; 'up to' *See* Till; आप्रदानात् 'up to being given away' आफलोदयकर्मणो &c.; 'be up and doing' कार्यव्यग्रो भव, 'ups and downs' पातोत्पाताः; *See* **Down. -per,** *a.* उपरितन (नी *f.*), उपरिस्थ, ऊर्ध्व, उत्तर; 'to get the u. hand' अभि-भू 1 P, अतिरिच् pass; *See* **Excel.**
Upbraid, *v. t.* निर्भर्त्स् 10 A; *See* **Reproach.**
Uphold, *v. t.* समर्थ् 10, द्रढयति (D.), उत्तंभ् 9 P, सं-धृ 10, आ-अव-लंब् 1 A; *See* **Support.**
Upholsterer, *s.* गृहोपस्करविक्रयिन् *m.*
Upkeep, *s.* रक्षा, रक्षणं.
Upland, *s.* उपरिभूमि *f.*, अधित्यका.
Uplift, *v. t.* उद्यम् 1 A, उत्था c., (उत्थापयति), उच्छ्रि 1 U; *See* **Raise.**
Upon, *prep.* *See* **On.**
Upraise, *See* **Uplift.**
Upright, *a.* उन्नत, उच्छ्रित, दंडवत् *ind.*, ऋजु. **2** सरल, सत्यात्मन्, ऋजु; *See* **Honest.-ly,** *adv.* दंडवत्; ऋजु,सारल्येन.
Uproar, *s.* कोलाहलः, कलकलः, तुमुलं.
Uproot, *v. t.* उन्मूल् 10, मूलात् छिद् 7 P, उत्पट् 10, उद्धृ 1 P; *See* **Eradicate.**
Upset, *v. t.* परिवृत् c., पर्यस् 4 U.-*s.* पर्यासः, परिवर्तनं; *See* **Overturn.**
Upshot, *s.* परिणामः, पर्यवसानं.
Upside, *s.* अधरांशः; 'u.-down' अधरोत्तर-*a.*, अधोमुख-*a.*, 'turn u.-down' अधोमुखीकृ.

Upstart, *s.* नवोदयः, नवोत्थानः, नवर्द्धिः, आगंतुकः.

Upward, Upwards, *adv.* ऊर्ध्वं, उपरि. **2** अधिक in comp.; अधिकत्रिंशा नराः 'u. of 30'; परं, परः in comp. (परःसहस्राः शरदः U. 1).

Urban, *a.* पौर (री *f.*). नागरिक (की *f.*). **2** सुजन, सुशील, दाक्षिण. **-ity,** *s.* दाक्षिण्यं, नागरिकवृत्ति *f.*, सौजन्यं.

Urchin, *s.* (दुष्ट-) बटुः, माणवकः.

Urethra, *s.* मूत्रमार्गः-द्वारं.

Urge, *v. t.* प्रोत्सह् c., प्रचुद् 10, उत्तिज् c., प्रणुद् 6 P or c., प्रवृत् c.; *See* **Prompt. 2** निर्बंधेन प्रच्छ् 6 P, अनुनिर्बंध् 9 P; *See* **Importune. -ency,** *s.* गौरवं, गुरुता, भारः. **2** निर्बंधः, आग्रहः. **-ent,** *a.* गुरु, आवश्यक (की *f.*), अपरिहार्य, अविलंब्य. **-ently,** *adv.* निर्बंधेन. **2** आशु, अपरिहार्यतया.

Urine, *s.* मूत्रं, प्रस्रावः, मेहः. *-v. i.* मूत्र् 10. **-al,** *s.* मूत्रपात्रं-भाजनं. **-ary,** *s.* मूत्रस्थानं. *-a.* मूत्र in comp.

Urn, *s.* (जल-) कुंभः, कलसः-शः, भाजनं.

Ursa-major, *s.* सप्तर्षयः.

Usage, *s.* प्रयोगः. **2** व्यवहारः, आचारः, आचरणं, वृत्ति *f.*; 'conventional u.' रूढि *f.*

Use, *v. t.* प्र-उप्-युज् 7 A, 10, व्यव-हृ c., व्यापृ c., उप-,भुज् 7 U, सेव् 1 A; धृ 10 (clothes &c.). **2** प्र-युज्; 'is used in the sense of *Light*' तेजसि प्रयुज्यते; 'for it is found to be so used' इति प्रयोगदर्शनात्; 'to be used (conventionally or by popular acceptance)' ex. by रूढ, प्रसिद्ध; ज्योतिःशब्दो ज्वलन एव रूढः (S. B. 104); दाक्षिण्यरूढेन नाम्ना (R. 1. 31). **3** आचर् 1 P, व्यव-हृ 1 P, वृत् 1 A (with loc.); *See* **Act. 4** अभ्यस्त-परिचित-*a.* कृ 8 U. **5** (With inf.) By present tense simply; पातुं न प्रथमं व्यवस्यति, नादत्ते &c. (S. 4) or by पूर्वं, पुरा; 'I used to sing' पुरा गायकवृत्तिरासं; 'it used to be so' एवं पूर्वं आचार आसीत्; 'to be used to' अभिज्ञ, परिचित, अभ्यस्त, अनुभूत, उपभुक्त; अनभ्यस्तरथचर्याः (U. 5) 'not used to sit in chariots'; 'Used to pain' दुःखाभिज्ञ, अनुभूतदुःख; 'not used to ornaments' अनुपभुक्तभूषणः (S. 4).-*s.* उपयोगः, प्रयोजनं, अर्थः, फलं,कार्यं;किं with instr.; किं तेन जातेन, कोर्थस्तेन जातेन &c.; *See* **Want. 2** प्रयोगः, व्यवहारः, व्यापारः, उपभोगः, सेवनं; 'to apply to one's own u.' स्वयं उपयुज्; 'in general u.' रूढ, प्रसिद्ध, सर्वप्रयुक्त. **-ful,** *a.* उपयुक्त, हित, सोपकार, उपयोगिन्, उपकारिन्, हितकर (री *f.*). **-fully,** *adv.* अवृथा, सफलं, सोपयोगं, असुधा. **-fulness,** *s.* उपयोगः-गिता, हितकारित्वं. **-less,** *a.* निष्प्रयोजन, निरर्थक, विफल, निष्फल, निर्गुण, निरुपयोग, व्यर्थ, अनुपयोगिन्, वृथा-सुधा in comp. **-lessly,** *adv.* वृथा, व्यर्थं, सुधा, निष्फलं. **-lessness,** *s.* अनुपयोगः, वैयर्थ्यं.

Usher, प्रति(ती)हारः.

Usual, *a.* साधारण (णी *f.*), सामान्य, व्य-(व्या)वहारिक-प्रायिक-लौकिक-सांप्रदायिक-(की *f.*) प्रसिद्ध; oft. by 'u.-ly.' **-ly,** *adv.* प्रायः, प्रायेण, प्रायशः, साधारण्येन, सामान्यतः, बहुशः.

Usufruct, *s.* फल-फलभोग-अधिकारः.

Usurp, *v. t.* बलाद् ग्रह् 9 U or आत्मसात्कृ 8 U, अनधिकारेण आक्रम् 1 U, 4 P. **-ation,** *s.* बलाद् आक्रमणं-ग्रहणं, बलापहारः. **-er,** *s.* बलाद् ग्राहिन्; 'u. to the throne' राज्यापहारिन् *m.*

Usury, *s.* कुसीदं, कौसीद्यं, अर्थप्रयोगः, वृद्धिजीविका. **-er,** *s* कुसीदकः, वृद्ध्याजीवः, वार्धुषिकः, वार्धुषिः. **-ous,** *a.* कौसीद (दी *f.*), सवृद्धिक.

Utensil, *s.* भांडं, पात्रं, उपकरणं, भाजनं.

Uterus, *s.* गर्भकोशः, गर्भाशयः, योनि *f.* **-Uterine,** *a.* सहोदर, सोदर, समानोदर, सनाभि.

Utility, *s.* उपयोगः; *See* **Use.**

Utmost, *a.* परम, पर; 'to the u. of one's power' यावच्छक्यं, यावच्छक्तितः; 'do or try one's u.' यावच्छक्यं प्रयत् 1 A; 'u. limit' परा काष्ठा, परा कोटिः; 'this is the u. that I can do' एष मे परमो विभवः (Ka. 159).

Utopian, *a.* काल्पनिक (की *f.*), मनःसृष्ट; 'u. scheme' कल्पना-मनः-सृष्टिः.

Utter, *a.* संपूर्ण; *See* **Complete. 2** केवल, मात्र in comp.; (मौर्ख्यमात्रमिदं). *-v. t.* उदीर् c., व्या-हृ 1 P, उदाहृ, उद्-गृ 6 P, उच्चर् c.; *See* **Say** also. **-ance,** *s.* उच्चारः-रणं, उद्गारः, व्याहारः, उदीरणं; 'easy of u.' सुखोच्चार्य, सुखोद्य. **-ly,** *adv.* सर्वथा, अशेषेण, साकल्येन, संपूर्णं.

Uvula, *s.* अलि-गति- जिह्वा.

Uxorious, *a.* स्त्रीवश्य, भार्यासक्त, स्त्रीविधेय, दारनिरत, कामवश. **-ness,** *s.* भार्यासक्ति *f.*, भार्याधीनता.

V.

Vacant, *a.* शून्य, (fig also), रिक्त; 'with v. looks' शून्येक्षण *a.*; 'v.-minded' शून्यहृदय. **2** अस्वामिक; 'a v. throne' अराजक. **-Vacancy,** *s.* शून्यं, रिक्तं. **2** शून्यं; अस्वामिकं अधिकारपदं. **-Vacate,** *v. t.* उत्सृज् 6 P, रिच् 7 P, परि-, त्यज् 1 P. **-ion,** *s.* अनध्ययनं, अध्ययनविश्रामः-निवृत्ति *f.*, विश्रामकालः.

Vaccine, *a.* गव्य.

Vaccinate, *v. t.* गोबीजं निविश् c.

Vacillate, *See* **Waver. -ion,** *s.* अस्थिरता, अनिश्चयः, चांचल्यं.

Vacuity, Vacuum, *s.* शून्यं, खं, रिक्तं, आकाशं.

Vagabond, *a.*, *s.* स्वेच्छाचारिन्, परिभ्रमिन्; यथेच्छविहारिन् **2** अज्ञातनिवास,गूढचारिन्.

Vagary, *s.* वि-,भ्रमः, छंदः-दस् *n.*, मनोलौल्यं, बुद्धिचापल्यं.

Vagrant, *See* **Vagabond.**

Vague, *a.* अनिश्चित, संदिग्ध, अनियत, अनिर्णीत, अपरिच्छिन्न. **-ness,** *s.* अनिश्चयः अपरिच्छेदः, अनिर्णयः, संदेहः, संशयः.

Vain, *a.* व्यर्थ, निष्फल, विफल, निरर्थक, मोघ, मुधा-वृथा in comp.; 'v. thoughts' वृथामनोरथाः. **2** असार, निःसार, शून्य. **3** (Vainglorious) वृथाभिमानिन्, अहंकारिन्, वृथावलेप, गर्वित; *See* **Proud. -ly,** 'in v.' *adv.* वृथा, मुधा, निरर्थकं, व्यर्थं, निष्फलं. **-Vanity,** *s.* वृथाभिमानः, मिथ्यागर्वः, अहंकारः; *See* **Pride. 2** असारत्वं, निःसारता, अवलेपः, वैयर्थ्यं, मोघता. **3** असारद्रव्यं.

Valediction, *s.* आमंत्रणं, आपृच्छा, आप्रच्छनं; स्वस्तिवादः. **-Valedictory,** *a.* स्वस्तिवाचनिक (की *f.*).

Valet, *s.* चेटः, दासः, पार्श्वचरः.

Valetudinarian, *a.*, *s.* रोगिन्,दुर्बल, व्याधिपीडित, सदारोगिन्.

Valiant, *a.* विक्रांत, पराक्रमवत्, उरुविक्रम, शूर, वीर; *See* **Brave. -ly,** *adv.* सविक्रमं, सपराक्रमं, शूर-वीर-वत्, साहसपूर्वकं.

Valid, *a.* सबल, प्रबल, सप्रमाण; सयुक्तिक (की *f.*), अखंडय, न्याय्य, धर्म्य. **-ity,** *s.* प्राबल्यं, सिद्धि *f.*

Valise, *s.* चर्म-मंजुषा-पेटकः.

Valley, Vale, *s.* दरी, उपत्यका, अद्रिद्रोणी.

Vallum, *s.* प्राकारः, वप्रः.

Valor, *s.* वि-परा-क्रमः, शौर्यं, वीर्यं. **-ous,** *a.* शूर, वीर, विक्रांत; *See* **Brave,**

alue, *v. t.* मूल्यं-अर्घ-निरूप् 10 or स्था c. (स्थापयति) or सं-ख्या c. **2** मन् 4 A, वि-गण् 10, आ-कल् 10; 'v. highly,' बहु मन्-संमन् c. **-***s.* मूल्यं, अर्घः; *See* **Price. 2** माहात्म्य, गरिमन् *m.*, ससारता. **3** महार्घः, बहु-महा-मूल्यं. **4** अर्घप्रमाणं; 'fixing the v.' अर्घसंख्यापनं. **-able,** *a.* महार्ह-र्घ, महा-बहु-मूल्य, मूल्यवत्, गुणवत्. **-***s.* बहुमूल्यद्रव्यं. **-ation,** *s.* मूल्यनिरूपणं-संख्यापनं-निर्णयः.

Valve, *s.* कपा(वा)टः-टी-टं; पिधानं.

Vampire, *s.* भूतः, प्रेतः, पिशाचः.

Van, *s.* (सेना-) मुखं, अग्रभागः, अग्रं, मूर्धन् *m.*, नासीरं, शिरस् *n.*; 'in the v.' अग्रे, पुरस्तात्, अग्रतः. **2** यानं; *See* **Cart;** 'v.-guard' अग्रानीकं, सेनामुखं, नासीरचराः (pl.).

Vane, *s.* वायुगतिदर्शि यंत्रं.

Vanish, *v. i.* तिरोभू 1 P, तिरोधा-अंतर्धा-pass.; *See* **Disappear. 2** वि-नश् 4 P, प्र-वि-ली 4 A.

Vanquish, *v. t.* पराजि 1 A, पराभू 1 P, वशं नी 1 P; *See* **Humble, Subdue. -er,** *s.* जेतृ *m.*

Vantage,-ground, *s.* अग्रभूमि *f.* **2** उत्कर्षः, श्रेष्ठपदं.

Vapid, *a.* विरस, नीरस, रसहीन.

Vapour, *s.* बाष्पः, धूमः; 'v. of the sky' खबाष्पः, अभ्रं; 'v.-bath' उष्णस्वेदः. **-***v. i.* वि-,कत्थ् 1 A; *See* **Boast. -ous, -y,** *a.* बाष्पमय (यी *f.*), बाष्परूप. **2** असार, निःसार.

Variegate, *v. t.* चित्र् 10, चित्रीकृ 8 U, कर्बुरीकृ, शबलीकृ; कल्माषयति (D.). **-ed,** *a.* चित्र, कर्बुर, कर्बुरित, कि(क)र्मीर, किर्मीरित, शबल, कल्माष, कल्माषित, एत, शार; 'v. colour' कर्बुरः, किर्मीरः, शबलः.

Variola, *s.* मसूरी-रिका.

Varlet, *s.* भृत्यः, किंकरः. **2** नरापसदः, जाल्मः.

Varnish, *s.* कुक्कुभः. **-***v. t.* कुक्कुभेन लिंप् 6 P, स्निग्धीकृ; (fig.) बाह्यशोभां दा 3 U.

Vary, *v. t.* परिवृत् c., विपर्यस् 4 U or c., अन्यथाकृ 8 U, नानाविध-विविध-*a.* कृ; विपर्यासं नी 1 P; *See* **Change. -***v. i.* भिद् pass, परिवृत् 1 A; विरुध् pass.; oft. ex. by भिन्न, भिन्नरूप; प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु (K. III. 1) 'v. -es with the object in view': &c. **-iable,** *a.* अस्थिर, चंचल, परिवृत्तिशील, अनित्य,अनवस्थितं. **-iance,** *s.* भेदः, विरोधः, विप्रतिपत्ति *f.*; विवादः, कलहः, वैरं, द्वंद्वं; 'to be at v.' विप्रति-पद् 4 A; (अत्र स्मृतयः विप्रतिपद्यंते); 'at v.' विमत, विप्रतिपन्न, परस्परविरुद्ध. **-iation,** *s.* परिवृत्ति *f.*, विकारः, भेदः, **-iety,** *s.* विचित्रता; भेदः, विशेषः in comp.; शमी वृक्षविशेषः-भेदः. **2**

शवलता, चित्रता, (of colours); 'v. of' **Various**, q. v. **-Varied, Various,** *a.* विविध, नानाविध-रूप-प्रकार-जातीय, अनेक-नाना in comp.; बहुविध; 'v. talks' उच्चावचाः प्रलापाः; 'in v. ways' अनेकधा, बहुविधं, नाना. **-ly,** *adv.* बहुधा, विविधं, नाना, नानाप्रकारं, अनेकविधं.

Vascular, *a.* नाडीविशिष्ट-संबंधिन्.

Vase, *s.* कुंभः, कलसः-शः, पात्रं, भाजनं; 'a golden v.' भृंगारः, कनकालुका.

Vassal, *s.* प्रजा, वशवर्तिन् *m.*, आयत्तः, परतंत्रः; *See* **Dependent.**

Vast, *a.* विशाल, विस्तीर्ण, विपुल, अपरिमित, सुमहत्, अतिबृहत्.

Vat, *s.* कुंडं, (बृहत्) भांडं.

Vaticinate, *v. t. See* **Prophesy.**

Vault, *s.* गुप्ति *f.*, विवरं, भूमिगृहं. **2** खोडकशीर्षं; 'v. of heaven' नभोमंडलं. **3** वल्गितं. **-***v. i.* वल्ग् 1 P, प्लु 1 A.

Vaunt,-er, *See* **Boast;** 'v. ing of his might' अतिदर्पितबलः (Mr. 5), स्वबलावलिप्तः.

Veal, *s.* गोवत्समांसं.

Veer, *v.* परिवृत् 1 A, भिन्नादिशं या 2 P or गम् 1 P.

Vegetate, *v. i.* उद्भिद् pass., स्फुट् 6 P, प्र-रुह् 1 P. **-ion,** *s.* उद्भिद्,उद्भेदः, तृणादि *n.*, तृणजाति *f.* **-Vegetable,** *a.* उद्भिद्-द, उद्भिज्ज, औद्भिद (दी *f.*). **-***s.* (Eatable) शाकः-कं; हरितकं, शिग्रुः. **-***s.* उद्भिद्-ज्जं, ओषधि *f.*, तृणादि.

Vehement, *a.* प्रचंड, तीव्र, तीक्ष्ण, बलवत्, उग्र, सरभस, सवेग; परुष, रूक्ष (of tone, speech &c.). **-ly,** *adv.* बलवत् चंडं, तीव्रं. **-Vehemence,** *s.* चंडता, तीक्ष्णता, रभसः, वेगः, तरस् *n.*, संरंभः.

Vehicle, *s.* यानं, प्रवहणं, वाहनं, रथः, वाहः, पत्रं. **2** द्वारं.

Veil, *v. t.* छद् 10, आ-प्र-सं-°, अवगुंठ् 10, सं-वृ 5 U, व्यव-धा 3 U; *See* **Cover.** **-***s.* अवगुंठनं, आवरकं, आवरकः, तिरस्करिणी. **2** आवरणं, व्यवधानं, आच्छादनं, संवरणं; 'throw the v. off' स्वरूपं प्रकटीकृ 8 U, or आविष्कृ, वि-वृ 5 U, विषदीकृ.

Vein, *s.* शि(सि)रा, धमनी, नाडि-डी *f.*; (of stones) रे(ले)खा. **2** वृत्ति *f.*, भावः, मनोवृत्तिः; 'angry v.' कोपवृत्तिः. **-y,** *a.* शिराल.

Vellum, *s.* चर्म-पटः-पत्रं.

Velocity, *s.* जवः, वेगः. रंहस् *n.*, रभसः, तरस् *n.*

Venal, *a.* धनभेद्य, उत्कोचदानवश्य. **2** पण्य in comp; 'a v. woman' पण्य

Vend, *v. t.* वि-क्री 9 A, पण् 1 A. **-er,** *s.* विक्रयिन् *m.* **-ible,** *a.* पण्य, विक्रेय.

Venerate, Venerable, *See* **Revere,-ed.**

Venery, *s.* मैथुनं, रति *f.*, संभोगः. **2** मृगया. **-Venereal,** *a.* (*s.*) in comp.; 'v. disease' उपदंशः. **2** वाजीकर (री *f.*).

Venesection, *s.* शिराच्छेदः.

Vengeance, *s.* प्रतिहिंसा, प्रत्यपकारः, वैरनिर्यातन-शुद्धि *f.*; *See* **Revenge.**

Venial, *a.* मर्षणीय, क्षंतव्य,लघु, उपेक्ष्य, अल्प; oft. by उप pr.

Venison, *s.* मृग-हरिण-मांसं.

Venom, *s.* विषं, गरलं, गरं, क्ष्वेडः. **-ous,** *a.* सविष, विषाक्त, दंदशूक, विष in comp.

Vent, *v. t.* उत्-वि-सृज् 6 P, उत्क्षिप् 6 P. निः-सृ c., उद्गम् 1 P, उद्-गु 6 P; *See* **Emit.** **-***s.* छिद्रं, रंध्रं, द्वारं; 'give v. to' उदीर् c., प्रकटयति (D.), आविष्कृ 8 U.

Ventilate, *v. t.* वीज् 10; *See* **Fan.** **2** प्रचर् c., प्र-सृ c. **-ed,** *a.* प्रवात, वायुव्याप्त; 'a bed in a v. place' प्रवातशयनं (M. 4). **-or,** *s.* वीजनं, व्यजनं.

Ventral, *a.* उदर in comp.

Ventricle, *s.* कोशः-षः, द्वारं.

Ventriloquist, *s.* गारुडवादिन् *m.* **-Ventriloquism,** *s.* गारुडवादः.

Venture, *s.* साहसं, साहसक्रिया. **2** संकट, संशयः; *See* **Danger.** **-***v. i.* संशये निक्षिप् 6 P. **2** उत्सह् 1 A, साहसं कृ 8 U, धृष् 5 P; 'we cannot v. to state this' इति कथनरूपं साहसं कर्तुं न शक्नुमः, इति कथयितुं नोत्सहामहे; 'nothing v., nothing gain' साहसे श्रीः प्रतिवसति. **-ous,-some,** *a.* साहसिक (की *f.*), साहसबुद्धि.

Venus, *s.* शुक्रः, भार्गवः, कविः, उशनस् *m.*, काव्यः, दैत्यगुरुः.

Veracious, *a.* सत्यवाच्, सत्यगिर्, सत्यवादिन्, सत्यशील. **-Veracity,** *s.* सत्यवादित्वं, सत्यशीलता.

Veranda, *s. See* **Porch.**

Verb, *s* क्रिया,-पदं. **-al,** *a.* शाब्दिक (की *f.*), शाब्द (ब्दी *f.*), शब्दरूप. **2** (Oral) वाचिक-वाचनिक -(की *f.*); (वाचिकमिदानीं श्रोतुमिच्छामि Mu. 5). **-ally,** *adv.* वाचा. **2** शब्दतः, यथाशब्दं **-atim,** *adv.* यथाव्याहृतं, पदानुपदं, शब्दशः, यथाशब्दं. **-ose,** *a.* वाग्बहुल, अतिविस्तीर्ण; *See* **Prolix.** **-osity,-iage,** *s.* वाग्विस्तरः, वाक्प्रपंचः, वागुपचयः.

Verdant, *a.* हरित, शाद्वल.

Verdure, *s.* हरितत्वं, हारित्यं; शादः, शाद्वलता; 'clothed in fresh v. of sprouts' नवहरितसस्यांकुरवती.

Verdict, *s.* निर्णयः; विचारः; दंडनिर्णयः.

Verdigris, *s.* ताम्रकिट्ट-मलं, कलंकः.

Verge, *s.* प्रांतः, पर्यंतः, धारा; 'on the v. of' उन्मुख (खी *f.*), आसन्न in comp.; 'on the v. of ruin' विनाशोन्मुख, आसन्नलय. **2** दंडः, यष्टि *f.* -*v. i.* अव-,लंब् 1 A; by (*s.*); 'is v. ing on ruin' आसन्ननाशो वर्तते; 'when it was v. ing towards sunset' परिणतप्राये अहनि 'v. ing on 18' अष्टादशवर्षदेशीय; *See* **Border. -er,** *s.* दंडिन् *m.*,दंड-वेत्र-धरः.

Verify, *v. t.* प्रमाणीकृ 8 U, प्रमाणयति (D.), समर्थ् 10, सत्याकृ, सत्यापयति (D.), निर्णी 1 P. **-ication,** *s.* सत्यापनं, सत्याकारः.

Verily, *adv.* सत्यं, नूनं, नियतं, नाम, खलु.

Verisimilitude, *s* संभवः. **2** सादृश्यं.

Veritable, Verity, *See* **True, Truth.**

Vermes, *s.* (pl.) कृमयः, कीटकाः. **Vermicide, -Vermifuge,** *a.* कृमि-हर-घ्न (घ्नी *f.*); **-Vermicular,** *a.* कृमिसदृश (शी *f.*), **-Vermiform,** *a.* कीटकाकृति.

Vermilion, *s.* सिंदूरं. -*a.* शोण, रक्त. -*v. t.*, 'cover with v.' सिंदूरीकृ, सिंदूरेण रंज् c.

Vermin, *s.* कृमयः (pl.), कृमिगणः.

Vernacular, *a.* जन्म in comp.;'v.dialects' भाषा, प्राकृतभाषा. -*s.* जन्मभाषा, मातृभाषा.

Vernal, *a.* वासंत (ती *f.*), वासंतिक (की *f.*), वसंत in comp.

Versatile, *a.* चपल, लोल, लोल-मति-बुद्धि, चंचल; *See* **Fickle. -ity,** *s.* (बुद्धि-)चापल्यं, लौल्यं.

Verse, *s.* कविता, पद्यं, काव्यं; 'syllabic v.' वृत्तं; 'blank v.' मुक्तप्रासः. **2** श्लोकः. **3** (Portion of v.) चरणः, पादः, पदं. **-Versify,** *v. t.* पद्यानि रच् 10 or निबंध् 9 P, कवयति (D.). **-ier,** *s.* कविः, कवि-देश्यः. **-ication,** *s.* श्लोक-पद्य-रचना, छंदोबंधः.

Versed, *a.* अभिज्ञ, कुशल, निपुण, प्रवीण, सुप्रतिष्ठित, अभ्यंतर, विशारद; *See* **Skilful.**

Version, *s.* **Translation,** q. v. **2** पाठांतरं, पाठभेदः.

Vertebra, *s.* पृष्ठवंशास्थि *n.* **-te,-ted,** *a.* पृष्ठवंशयुत-विशिष्ट.

Vertex, *s.* शीर्ष, अग्रं, शिखरं; *See* **Top** also.

Vertical, *a.* ऊर्ध्व-उपरि-तन (नी *f.*), लंब-रूप. **-ly,** *adv.* अधोमुखं, ऊर्ध्वाधरं.

Vertigo, *s.* भ्रमरं; *See* **Giddiness.**

Verve, *s.* उत्साहः, आवेशः.

Very, *adv.* अति-सु pr., सातिशयं, अतीव, भूरि,नि-सु-तरां, अत्यंतं; *See* **Exceedingly;** 'v. deceitful' भूरिमाय. -*a.* ex. by demonstrative pron. with एव; 'the v. hills' त एव गिरयः; 'this v. day' अद्यैव. **2** सत्य, तथ्य. **3** मात्रं in comp., केवल.

Vesicle, *s.* त्वक्-चर्म-स्फोटः.

Vesper, *s* संध्या, संध्योपासनं.

Vessel, *s.* पात्रं, भाजनं,भांडं, आधारः. **2** पोतः, समुद्रयानं, जलयानं, वहित्रं, नौः. **3** नाडी; *See* **Vein.**

Vest, *s.* वस्त्रं वेशः-षः, वसनं. -*v. t.* वेष् c., परि-धा c.; *See* **Dress. -ed,** *a.* (in) व्यवस्थित; 'are warlike qualities v. (in any one)' किं व्यवस्थितविषयाः क्षात्रधर्मा इति (U. 5). **2** अधीन, आयत्त. **-Vestment, Vesture,** *s.* वासस् *n.*, वस्त्रं; **Dress.**

Vestal, *a.* शुद्ध, पवित्र; *See* **Chaste.**

Vestibule, *s.* देहलि-ली *f.*; *See* **Porch.**

Vestige, *s.* चिह्नं, अंकः, लक्षणं, पदांकः, पदपंक्ति *f.*, पदवी.

Veteran, *a.*, *s.* जातानुभव, ज्ञानवृद्ध, अभ्यासवृद्ध.

Veterinary, *s.* पशुचिकित्सकः, पशुवैद्यः; (art) पशुचिकित्सा.

Veto, *v. t.* प्रति-नि-षिध् 1 P, प्रत्या-ख्या 2 P; *See* **Contradict.** -*s.* प्रति-नि-षेधः, प्रत्यादेशः.

Vex, *v. t.* बाध् 1 A, पीड् 10, क्लिश् 9 P, संतप् c., उद्विज् c., अर्द् 1 P or c. **2** प्रकुप् c., क्रोधं उद्दीप् c. **-ation,** *s.* क्लेशः, दुःखं, पीडा, कष्टं, बाधा, आयासः, संतापः. **2** प्रकोपनं, क्रोधोद्दीपनं. **-atious,** *a.* कष्टद, क्लेशकर-पीडाकर -(री *f.*), उद्वेगकर, संतापक. **-ed,** *a.* दुःखित, संतापित, अर्दित, &c. **-edly,** *adv.* सक्रोधं, सोद्वेगं.

Viand, (V. s.) *s.* अन्नं, भक्ष्यं, सिद्धान्नं.

Viaticum, *s.* पाथेयं, पथि भोज्यं.

Vibrate, *v. i.* दोलायते (D.), कंप् 1 A, स्फुर् 6 P, भ्रम् 1, 4 P. -*v. t.* भ्रम् c., इतस्ततः चल् c., वि-धू 5, 9 U. **-ion,** *s.* आंदोलनं, दोलायितं, स्फुरणं, कंपः, भ्रमणं.

Vicar, *s.* प्रतिनिधिः. **-ious,** *a* प्रतिनिधिरूप.

Vice, *s.* अधर्मः,पापं, पापाचरणं, असदाचारः, व्यभिचारः. **2** दोषः, दुर्गुणः, व्यसनं. **3** (Instead of) Ex. by स्थाने or प्रतिनिधिः oft by उप pr.; 'viceroy' 'vicegerent,' राजप्रतिनिधिः; राजस्थाने स्थितः; 'v.-president' उपाध्यक्षः. **-Vicious,** *a.* दुष्ट, दुराचार, अपथप्रवृत्त; व्यसनिन्, दुरात्मन्, पापवृत्त; दुर्वृत्त, दुश्चरित, खंडितवृत्ति. **-ly,** *adv.* दुष्टतया, दुर्वृत्ततया, दुष्टभावेन.

Vicinage, Vicinity, *s.* संनिधिः, संनिधानं, संनिकर्षः.

Vicissitude, *s.* आ-परि-वृत्ति *f.*, विपर्ययः, परिवर्तः, अनुक्रमः; 'Oh! how rarely seen (by mortal prescience) the strange v. s of human life' अहो अलक्षितोपनिपाताः पुरुषाणां समविषमदशाविभागपरिणतया भवंति (Mu. 6).

Victim, *s.* बलिः, उपहारः, वध्यः, यज्ञपशुः; (fig.) *See* **Prey.** **-ize,** *v. t.* उपहारीकृ 8 U; *See* **Sacrifice.**

Victor, Victorious, *s., a.* वि-, जायिन्, जैत्र (त्री *f.*), जित्वर (री *f.*), जिष्णु, प्राप्तजय. 2 जय-प्रद, जयावह. **-iously,** *adv.* सविजयं, जयपूर्वं. **-y.** *s.* वि-, जयः; 'gain v' विजयं-लभ् 1 A, or प्राप् 5 P, वि-जि 1 A; 'v. to your Majesty' जयतु जयतु देवः.

Victual, *v. t.* खाद्यसामग्रीं उपक्लृप् c **-s.** (V. s) खाद्य-भक्ष्य-सामग्री, भक्ष्यसंभारः. **-ler,** *s.* भक्ष्यविक्रयिन् *m.* **-ling,** *s.* अन्न-विक्रयः, भक्ष्यव्यवहारः.

Vie, (with) *v. i.* स्पर्ध् 1 A, जि desid. (जिगीषति); *See* **Rival;** अहमहमिकया प्रणामलालसाः (Ka. 81) 'v. -ing with each other for saluting'.

View, *v. t.* सं-, ईक्ष् 1 A, निर्वर्ण् 10, आ-अव-लोक् 1 A, 10, निरीक्ष्; *See* **See.** **-s.** आलोकनं, समीक्षणं, दर्शनं, दृष्टि *f.*; 'point of v.' दृष्टिः, पक्षः; 'from a worldly (practical) point of v.' लोक-व्यवहार-दृष्ट्या; शास्त्रदृष्ट्या &c.; इत्येतल्लोक-दृष्ट्या निदर्शितं शास्त्रदृष्ट्या न पराणुद्यते (S. B. 508); 'from this point of v.' अस्मिन् पक्षे. 2 मतं, बुद्धि *f.*, मति *f.*, दृष्टिः. 3 हेतुः, आशयः, अभिप्रायः, उद्देशः; 'with what v.' किमुद्दिश्य, केन हेतुना, किमभिप्रेत्य; 'with this v.' अस्माद्धेतोः, एतदर्थं; 'of narrow v. s' कृपणबुद्धि-दृष्टि; 'of liberal v. s' उदारधीः. 4 दृक्पातः-विषयः, नयनगोचरः प्रदेशः; 'having in v.' दृग्गोचरवर्तिन्. **-less,** *a.* अदृश्य.

Vigil, *s.* जागरणं, प्र-, जागरः, रात्रिजागरः. **-ance,** *s.* अवधानं, अवहितता, दक्षता, जागरूकता. **-ant,** *a.* जागरूक, अवहित, दक्ष, सावधान, अप्रमत्त. **-antly,** *adv.* अप्रमादेन, सावधानं.

Vigour, *s.* वीर्यं, बलं, शक्ति *f.*, ओजस् *n.*, सत्त्वं, तेजस् *n.*, प्रभावः, पौरुषं; *See* **Strength.** **-ous,** *a.* प्रबल, ओजस्विन्, महासत्त्व, ऊर्जस्वल, वीर्यवत्; *See* **Strong;** सोत्साह, सप्रयत्न. **-ously,** *adv.* चंडं, बलवत्, तरसा, ओजस्वितया; सवीर्यं, महा-प्रयत्नेन, सोद्यमं, सोत्साहं.

Vile, *a.* अधम, नीच, जघन्य, नि-अप-कृष्ट. **-ness,** *s.* नीचता &c.; *See* **Mean,** &c. **-Vilify,** *v. t.* परि-वद् 1 A, कुत्स् 10, आ-क्षप् c.; *See* **Traduce, Libel.** **-er, -lcation:** *See* **Calumny.**

Villa, *s.* ग्राम्यं गृहं, विनोदस्थानं.

Village, *s.* ग्रामः; निवसथः; 'head of a v.' ग्रामणीः, ग्रामेशः, ग्रामाध्यक्षः. **-a.** ग्राम्य, ग्रामीय ग्रामीण, ग्राम in comp. **-er,** ग्रामिन् *m.*, ग्रामिकः, ग्रामवासिन् *m.*, ग्रामीणः, ग्रामस्थः, ग्राम्यजनः.

Villain, *s.* दुर्वृत्तः, अपसदः affixed, (नरापसदः), चांडालः, खलः, अधमः, दुरात्मन् *m.*; *See* **Rascal** also. **-ous,** *a.* दुर्वृत्त, दुष्टतम, अधम &c.

Villein, *s.* दासः, प्रजा.

Vim, *s.* शक्ति *f.*, सत्त्वं, बलं.

Vindicate, *v. t.* रक्ष् 1 P, प्रमाणीकृ 8 U, समर्थ् 10, प्रति-पद् c., स्था c. (स्थापयति); (from blame) शुध् c., निर्दोषीकृ. 2 निर्वह् 1 P or c.; निर्व्यूढस्तेपत्यस्नेहः (U. 3) 'thy parental affection has been v. ed'. **-ion,** *s.* रक्षणं, प्रतिपादनं; स्थापनं; निर्वाहः; दोषमुक्ति *f.*, परिशोधनं. **-or,** *s.* रक्षकः, समर्थयितृ *m.*

Vindictive, *a.* प्रतिकारपरायण-शील, वैर-साधनपर, वैरनिर्यातनोत्सुक; क्रोधन, कोधिल; अक्षमिन्, असहिष्णु.

Vine, *s.* द्राक्षा, -लता. **-ous,** *a.* सुरामय (यी *f.*). **-Vinegar,** *s.* शुक्तं, शौक्तिकं. **-Vineyard,** *s.* द्राक्षाक्षेत्रं-वाटिका. **-Vintage,** *s.* द्राक्षाः, द्राक्षाफलं; 'v.-time' द्राक्षावचयकालः. **-Vintner,** *s.* शौंडिकः, सुराजीविन् *m.*

Violate, *v. t.* धृष् c. (a woman). 2 अति-क्रम् 1 U, 4 P, उल्लंघ् 1 A, 70, अतिचर् 1 P, व्याहन् 2 U, लुप् c., भंज् 7 P; 'for fear of v. -ing your word' प्रतिज्ञाभंग-भीरुणा (त्वया). 3 भंज्, पराजि 1 A. **-ion,** *s.* अतिक्रमः, भंगः, उल्लंघनं, लोपः, -पनं. 2 आ-, धर्षणं-णा. **-or,** *s.* धर्षकः 2 उल्लंघकः.

Violent, *a.* प्रचंड, प्रबल, तीव्र, गुरु, महावेग, उग्र. 2 साहसिन्, साहसिक (की *f.*), तीक्ष्ण-कर्मन्; 'a v. death' अपमृत्युः. **-ly,** *adv.* प्रसह्य, प्रसभं, तरसा, वेगेन, बलात्कारेण, बलवत्, उच्चंडं, तीव्रं, गाढं, अति-सु pr.; 'v. in love' गाढानुराग. **-Violence,** *s.* बलं, तरस् *n.*, जवः, वेगः. 2 बलात्कारः; साहसं, प्रमाथः, प्रसभं.

Violet, *s.* पाटलं. 2 (Colour) नीललोहितः

Violin, *s.* सा(शा)रंगी, पिनाकी.

Viper, *s.* दंदशूकः, अहिः; *See* **Snake.**

Virago, *s.* स्त्रीयोधी, पुरुषवृत्तिः, ऋषभी.

Virgin, *s.* कुमारी, कन्या, तरुणी, अक्षता, अक्षत-अविद्ध-योनिः, पुरुषास्पृष्टा. **-a.** कौमार (री *f.*), (*s.*) in comp. 2 वि-, शुद्ध, अक्षत. **-ity,** *s.* कौमारं, कुमारीत्वं; पुरुषास्पर्शः. 2 विशुद्धता.

Virgo, *s.* कन्या, -राशिः.

Viridity, *s.* *See* **Verdure.**

Virile, *a.* पौरुष (षी *f.*), पौरुषेय (यी *f.*). पुरुष in comp. **-ity,** *s.* पुंस्त्वं, पुरुषत्वं, पौरुषं.

Virtue, *s.* धर्मः, पुण्यं; सुकृतं, सदाचारः, साधुता, धर्माचरणं, नीति *f.* 2 गुणः, सद्-

गुणः. 3 शक्तिं *f.*, बलं, प्रभावः, सामर्थ्यं; 'by v. of' वशात्, बलेन, प्रभावेण. **-Virtual,** *a.* वास्तविक (की *f.*), better by 'v.-ly'. **-ly,** *adv.* वस्तुतः, यथार्थतः, अर्थतः. **-Virtuous,** *a.* धार्मिक (की *f.*), पुण्य-धर्म-शील, धर्मपर-परायण, साधु, पुण्यात्मन्, सुकृतिन्, पुण्यभाज्, न्यायाचार, साधुवृत्त, सदाचार, सच्चरित; oft. by मत्; सती, सज्जनः &c. 2 (Of acts) धर्म्य, पुण्य, साधु. **-ly,** *adv.* धर्मतः, धर्मेण, सदाचारतः.

Virulent, *a.* उग्र, कटु, तीक्ष्ण, चंड; *See* **Malignant, Sharp.**

Virus, *s.* विषं.

Visage, *s.* आस्यं, आननं, वदनाकृति *f.*, वदनच्छाया; 'with sad v.' विषण्णवदन.

Viscera, *s.* अंत्राणि (pl.).

Viscid, Viscous. *a.* सांद्र, श्यान, शीन; चिक्कण, स्निग्ध; 'v. fluid' दानजलं, दानं (of an elephant).

Visible, *a.* दृश्य, दृग्गोचर, प्रत्यक्ष, दृष्टिविषय, नयनपथवर्तिन्, नेत्रविषयगत, व्यक्त, सुप्रकाश, चक्षुर्ग्राह्य, and sim comp. **-Visibly,** *adv.* प्रत्यक्ष, प्रत्यक्षतः, साक्षात्.

Vision, *s.* दृष्टि *f.*, चक्षुरिंद्रियं. 2 छाया, आभासः, माया, मनःसृष्टि *f.*, कल्पना. 3 स्वप्नः, स्वप्नदर्शनं. **-ary,** *a.* अवास्तव (वी *f.*), मानसिक-काल्पनिक (की *f.*), मनःसृष्ट-कल्पित.

Visit, *s.* दर्शनं, अभ्यागमः. 2 साक्षात्कारः; 'pay a v. to' द्रष्टुं अभ्यागम् 1 P. *-v. t.* दृश्, अभि-इ 2 P, अभ्युपगम्, द्रष्टुं गम् or या 2 P. 2 साक्षात्कृ 8 U. 3 (With punishment) दंड् 10; 'v. a lover' अभि-सृ 1 P (कामुकं). **-ant,-or,** *s.* अभ्यागतः, गृहागतः. **-ation,** *s.* अभ्यागमनं. 2 दुर्विपाकः.

Vista, *s.* वीथि-थी *f.*, तरुपंक्ति-श्रेणी *f.*,

Visual, *a.* चाक्षुष (षी *f.*), दृष्टिगत, चक्षुस्-नेत्र in comp.; 'v. organ' चक्षुरिंद्रियं.

Vital, *a.* आवश्यक (की *f.*). 2 प्राणभूत, जीव-प्राण in comp.; 'v. air' प्राणवायुः; 'v. principle' जीवात्मा; 'v. rt' मर्मन् *n.*; 'v. -s' मर्माणि; 'touching (rending, piercing.) the v. s.' अरुंतुद, मर्मस्पृश्, मर्माणि कृंतत्. **-ity,** *s.* जीवनं, चेतनत्वं, सजीवत्वं, चेतना; प्राणः, जीवः, जीव-प्राण-शक्ति *f.*

Vitiate, *v. t.* **Corrupt,** q. v. **-ion,** *s.* दूषणं, भ्रंशनं.

Vitrious, *a.* काचज, काचाभ, काचमय (यी *f.*). **-Vitrify,** *v. t.* काचसात्कृ 8 U.

Vitriol, *s.* (Blue) तुत्थांजनं, शिखिग्रीवं, वितुन्नकं, मयूरकं, कर्परी; (green) कासीसं.

Vituperate,-ion, *See* **Censure.**

Vivacious, *a.* प्रफुल्ल, सोत्साह, सतेजस्. **-ness, -Vivacity,** *s.* उत्साहः; तेजस्विता, प्रफुल्लता, उल्लासः

Viva-voce, *See* **Orally.**

Vivid, *a.* सुस्पष्ट, विशद, परिस्फुट.

Vivify, *v. t.* जीव् c., सजीवीकृ 8 U.

Viviparous, *a.* जरायुज, जीवज. 2 सचेतनप्रज.

Vixen, *s.* कलहप्रिया, कर्कशा, चंडी.

Vocable, *s.* शब्दः, वाक्यं, वचनं.

Vocabulary, *s.* अभिधानं, कोशः, शब्दार्णवः, शब्दसंग्रहः-कोशः.

Vocal, *a.* वाचिक (की *f.*), वाङ्मय (यी *f.*), वाग्जात. 2 वाणीयुक्त, वाग्विशिष्ट. 3 सुस्वर, मधुर; 'v. music' कंठगीतं.

Vocation, *s.* वृत्ति *f.*, व्यवसायः, नियोगः, व्यापारः.

Vocative, *s.* संबोधनं, संबुद्धि *f.*

Vociferate, *v. i.* उच्चैः आक्रंद् 1 P, उत्क्रुश 1 P, उद्-घुष् 10. **-ion,** *s.* आक्रोशः, उद्घोषः. **-Vociferous,** *a.* महाशब्द, सकोलाहल, उद्घोषण. **-ly,** *adv.* महाशब्देन, उद्घोषेण.

Vogue, *s.* व्यवहारः, प्रवृत्ति *f.*, प्रचारः, रीति *f.*, क्षुण्णा पद्धतिः; 'it is not in v. here' अत्र नेदृशो व्यवहारः; 'being long in v.' चिरप्रवृत्त.

Voice, *s.* स्वरः, स्वनः, नादः, शब्दः, वाणी, वचनं, वाच् *f.*, कंठध्वनिः-रवः. 2 मतं, अभिप्रायः; 'with one v.' एकचित्तीभूय, ऐकमत्येन; 'cracked v.' भग्नस्वरः; 'active v.' कर्तृवाच्यं; 'passive v.' कर्मवाच्यं; 'neuter v.' भाववाच्यं.

Void, *a.* शून्य, रिक्त. 2 असिद्ध, अप्रमाण, अकिंचित्कर (री *f.*), निरर्थक. 3 **Destitute. Devoid,** of q. v. *-s.* शून्यं, शून्यस्थानं. *-v. t.* रिच् 7 P or c., शून्यीकृ. 8 U. 2 निष्फलीकृ. 3 (Excrement) उच्चर् c., वि-उत्-सृज्, उद्-गृ 6 P. **-able,** *a.* विवर्जनीय, परित्यक्तव्य.

Volatile, *a.* वायुपरिणामशील. 2 चंचल, लोल; *See* **Fickle. -ity,** *s.* चापल्यं, चांचल्यं.

Volcano, *s.* ज्वालामुखः, आग्नेयगिरिः.

Volition, *s.* संकल्पः, इच्छा; *See* **Will.**

Volley, *s.* वर्षः, (शिलावर्षः, शरवर्षः &c.), वृष्टि *f.*,-पातः.

Voluble, *a.* चंचल, चपल. 2 (Of tongue) वाचाल, चपलजिह्व. **-Volubility,** *s.* वाक्चापल्यं.

Volume, *s.* खंडः-डं, भागः, पुस्तकं (when the sense is clear). 2 अंतर्गतं घनफलं. 3 आवलि-ली *f.*, पटलं, राशिः, संहति *f.* **-Voluminous,** *a.* विस्तीर्ण, बहुपुस्तक.

Voluntary, *a.* ऐच्छिक-यादृच्छिक (की *f.*), इच्छा-मति-पूर्व; better ex. by 'v.-ily.' **-ily,** *adv.* यदृच्छया, इच्छापूर्वकं, स्वेच्छातः, प्र-नि-कामं, आत्मसंतोषेण. **-Volunteer,** *v. t.* अयाचितं उपानी 1 P or ऋ c. (अर्पयति) or दा 3 U or कृ 8 U. *-s.* यादृच्छिकः युयुत्सुः, स्वेच्छासैनिकः.

Voluptuary, Voluptuous, *s., a.* विषयासक्त, भोगनिरत, इंद्रियसुखासक्त, विषयिन्; *See* **Sensual.**

Vomit, *v.* उद्-,वम् 1 P, उद्-गृ 6 P, छर्द् 10, उत्क्षिप् 6 P. *-s.* वांतं. **2** वमनं (emetic). **-ing,** *s.* वमनं, वमः-मि *f.*, वमथुः, प्रच्छर्दिका. **-ive,** *a.* वमन (नी *f.*), वांतिकर (री *f.*), वांतिकृत्.

Voracious, *a.* घस्मर, गृध्नु, अतिलोलुप, औदरिक (की *f.*); *See* **Gluttonous.**

Vortex ,*s.* भ्रमि *f.*, आवर्तः.

Votary, *s.* भक्तः, उपासकः, पूजकः; आश्रितः.

vote, *s.* संमति *f.*, संमतं. *-v. t.* संमतिं-अनुमोदनं-दा 3 U, मतं प्रकाश् c.; संमतिपूर्वं वृ 5 U or नियुज् 7 A, 10 or दा.

Votive, *a.* संकल्प-संबंधिन्-दत्त.

Vouch, *v. t.* साक्षीकृ 8 U, प्रमाणीकृ, प्रम णं दा 3 U. **2** दृढीकृ, द्रढयति (D.). **-er,** *s.* प्रमाणपत्रं-लेखः, साधनपत्रं-लेखः, आगमः.

Vouchsafe, *v. t.* वि-तृ 1 P, कृपया दा 3 U; (with inf.) प्र-सद् 1 P; *See* **Condescend, Please;** भगवान् मारीचस्ते दर्शनं वितरति (S. 7:) 'v.s thee an audience' **2** अनु-ज्ञा 9 U.

Vow, *s.* व्रतं, संकल्पः, प्रतिज्ञा, शपथः, नियमः; 'under a v.' व्रतबद्ध, धृतव्रत, संकल्पबद्ध. *-v.* प्रति-ज्ञा 9 A. प्रतिज्ञां कृ 8 U or आरुह् 1 P, सशपथं-सप्रतिज्ञां वद् 1 P or अभि-धा 3 U, (**Say,** q. v.); 'he has v.ed to destroy us' अस्मद्विनाशे कृतसंकल्पोसौ.

Vowel, *s.* स्वरः, अच् *m.*, अज्वर्णः.

Voyage, *s.* जलयात्रा यानं, समुद्रयानं, संयात्रा. *-v.* Ex. by कृ with (*s.*) पोतेन गम् 1 P, जलवर्त्मना गम्. **-er,** *s.* सांयात्रिकः, जलयात्रिकः.

Vulgar, *a.* ग्राम्य, असभ्य, अश्लील, आशिष्ट; प्राकृत, लौकिक (की *f.*). **-ism,** *s.* ग्राम्या रीतिः. **2** ग्राम्यशब्दप्रयोगः. **-ity,** *s.* असभ्यता, अश्लीलता. **-ly,** *adv.* साधारणतः, लौकिकरीत्या. **2** असभ्यरीत्या, ग्राम्यतया. **-ize,** *v. t.* ग्राम्यीकृ.

Vulnerable, *a.* भेद्य, धृष्य; वेध्य; 'v. point' रंध्रं, छिद्रं, मर्मन् *n.*; आवृणोदात्मनो रंध्रं रंध्रेषु प्रहरन् रिपून् (R. XVIII. 61) 'guarded against his own v. points' &c.

Vulpine, *a.* धूर्त; शृगालवत्.

Vulture, *s.* गृध्रः, दाक्षाय्यः.

W.

Wad, *s.* चूर्णरोधनी.

Waddle, *v. i.* हंसवत् गम् 1 P or चर् 1 P.

Wade, *v. i.* तृ 1 P, कष्टेन गम् 1 P, कृच्छ्रेण पारं गम्.

Waft, *v. t.* वह् 1 P or c., उत्क्र 6 P; कर्णवाही मालिनीतरंगाणां (S. 3); पुष्परेणूत्किरैर्वातैः (R. I. 38); (boat &c.) वह् c., प्रणुद् c., प्रचुद् 10, प्रेर् c.; *See* **Drive.** *-v. i.* प्लु 1 A, वायुना वह्-नी-pass.

Wag, *v. t.* सं-,चल् c., वि-,धू 5, 9 U, विक्षिप् 6 P; 'w.ging the tail' लांगूलचालनं-विक्षेपः-विधूति *f.* *-v. i.* चल् 1 P, धू pass. *-s.* परिहासवादिन् *m.* **-gish,** *a.* *See* **Witty, -Wag=tail,** *s.* खंजनः.

Wage, *v. t.* (War) विग्रह् 9 P, युद्धं आरभ् 1 A.

Wager, *s.* ग्लहः, पणः. *-v.* ग्लह्-पण् 1 A, (with gen. of thing staked).

Wages, *s.* वेतनं, भृति *f.*, मूल्यं, निर्वेशः, पणः; *See* **Hire.**

Wagon, *s.* प्रवहणं, यानं, शकटः-टं, चातुरं. **-er,** *s.* शाकटिकः, शकटवाहः, चातुरिकः.

Waif, *s.* अज्ञातस्वामिकं द्रव्यं.

Wail,-ing, *See* **Lament,-ation.**

Wain, *s.* गोवहनं, शकटः-टं.

Wainscot, *s.* भित्तिपटलं.

Waist, *s.* मध्यः-ध्यं, मध्यमः-मं, कटि-टी *f.*, कटि-देशः; 'w.-coat' कटिवस्त्रं.

Wait, *v. i.* स्था 1 P; (for) प्रति-ईक्ष् 1 A, अनु-प्रति-पा c. (पालयति) (of time and persons); 'w. for some time' कालः कश्चित्प्रतीक्ष्यतां (K. II. :54); मां प्रतिपालय &c.; सह् 1 A, स्था, (of time only) (द्वित्राण्यहान्यर्हसि सोढुमर्हन् R. v. 25); स्फुलिंगावस्थया वह्निरेधापेक्ष इव स्थितः (S. 7) 'here is fire in the state of a spark (only) w.ing for fuel (to blaze up)'; (on or upon) उप-स्था 1 A, उप-अनु-आस् 2 A, उप-सेव् 1 A, उप-चर् 1 P; 'w. at table' परिविष् c. **-er,** *s.* सेवकः, परिवेषकः, परिवेष्टृ *m.*, (at table).

Waive, *v. t.* परि-,त्यज् 1 P; *See* **Abandon.**

Wake, *v. t.* प्र-बुध् c., जागृ c. *-v. i.* प्र-विबुध् 4 A, जागृ 2 P. *-s.* जागरणं, जागरः, प्रबोधः-धनं. **2** पदवी; 'follow in the w. of' पदवीं प्रतिपद् 4 A; *See* **Tread.** **-ful,** *a.* (lit.) रात्रिजागर, निद्राविमुख, विनिद्र, उन्निद्र; जागरूक, दक्ष, अवहित, सावधान. **-fulness,** *s.* जागरः-रणं, अस्वापः, अस्वप्नः, अनिद्रा, प्रबोधः, जाग्रदवस्था. **2** दक्षता, अवधानं, &c.

Walk, *v. i.* (पद्भ्यां) चङ्-चल्-गम् 1 P, परि-,क्रम् 1 U, 4 P, पादाभ्यां या 2 P &c.; 'w. about', 'w. to and fro' परिक्रम्, इतस्ततः भ्रम् 1, 4 P; (for pleasure) वि-हृ 1 P; 'w. away,-off' अपसृ 1 P, अपया-क्रम्-गम् &c. -*s.* **-ing,** *s.* पादचारः-गमनं; 'w. about' परिक्रमः-मणं; 'taking a w.' विहारः, विहरणं, (वायुसेवनार्थं) परिक्रमणं. **2** गमनागमनस्थानं; अध्वगमार्गः. **-er,** *s.* पादचारिन्, पा(प)दगः.

Wall, *s.* भित्ति *f.*, कुड्यं; 'enclosing w.' प्राकारः, वरणः, सालः, प्राचीरं; 'take the w. of' अग्रस्थानं आ-सद् c.; 'go to the w.' अव-सद् 1 P, अवसन्न-उच्छिन्न-*a.* भू 1 P; 'drive to the w.' अव-सद् c., उच्छिद् 7 P. -*v. t.* प्राकारेण आ-वृ 5 U.

Wallet, *s.* भस्त्रा; क्षुद्रकोषः.

Wallow, *v. i.* लुड् 6 P, लुद् 4 P; क्रीड् 1 P.

Walnut, *s.* अक्षोटः, अक्षोटं (fruit).

Wan, *a.* *See* **Pale.**

Wand, *s.* दंडः, यष्टि *f.*

Wander, *v. i.* परि-,भ्रम् 1, 4 P, अट् 1 P, वि-चर् 1 P, परि-,क्रम् 1 U, 4 P; 'w. from' भ्रंश् 1 A, 4 P, च्यु 1 A. -*s.*, **-ing,** *s.* परि-,भ्रमणं-अटनं. **-er,** *s.* परिभ्रमकः, भ्रमिन् *m.*

Wane, *v. i.* परि-,क्षि 1 P or pass., ऱ्हस् 1 P; *See* **Decay Decline.** -*s.* क्षयः, ऱ्हासः. **-ed,** *a.* परि-क्षीण, क्षीणकल, प्राप्तक्षय, निष्कल, कलाशेष (चंद्रः). **-ing,** *a.* क्षयिन्, क्षय in comp.; 'w. period' क्षयकालः, कृष्णपक्षः, बहुलः, तामिस्रपक्षः.

Want, *v.* अपेक्ष् 1 A, आ-,कांक्ष् 1 P, इष् 6 P; gen. ex. by, कार्यं, प्रयोजनं, अर्थः, किं, (with gen. of that which wants and instr. of thing wanted); 'I do not w. this house' ममानेन गृहेण न कार्यं, न प्रयोजनं &c.; 'why do you w. to see her' किं तया दृष्टया (S. 2). **2 Wish,** q. v. **3** परि-,हा pass.; हीन, रहित, निर् in comp.; आर्यस्य सुविहितप्रयोगतया न किमपि परिहास्यते (S. 1) 'nothing will be w. ing' &c.; 'w. ing in courage' शौर्यहीन, निर्वीर्य, &c.; 'he w. s. wisdom स निर्बुद्धिः, ज्ञानरहितः. -*s.* अपेक्षा, प्रयोजनं, कार्यं, आकांक्षा. **2** अभावः, विरहः, अप्राप्ति *f.*, राहित्यं, हीनता. **3** न्यूनता, ऊनत्वं, अपचयः. **4** दारिद्र्यं, धनाभावः, दुर्गति *f.*, कृच्छ्रं; 'come to or reduced to w.' दारिद्र्योपहत, भाग्यक्षयपीडितां दशां प्रपन्न (Mr. 1). **-ing,** *a.* ऊन, न्यून, विकल; *See* **Deficient.**

Wanton, *a* विलासवत्, विलासिन्; 'w. sport' विलसितं *See* **Playful. 2** अनियंत्रित, निर्मर्याद, स्वेच्छाप्रवृत्त, लोल, (स्वभावलोल); स्वैरिन्, स्वेच्छाचारिन्; काम in comp.; 'a w. woman' पुंश्चली, स्वैरिणी, बंधकी. **3** ज्ञानतः-कामतः-कृत, बोधपूर्वं कृत. **4** प्रचुर, विपुल. -*v. i.* विलस् 1 P, क्रीड् 1 P, वि-भ्रम् 1, 4 P. **-ly,** *adv.* सविलासं; निर्यंत्रणं, स्वैरं, स्वेच्छया, यथाकामं; कामतः. **-ness,** *s.* विलासः, कामचारः; न कामचारो मयि शंकनीयः 'do not suspect me of w.'

War, Warfare, *s.* विग्रहः, संप्रहारः, वैरारंभः, वैरं, संग्रामः, युद्धं, रणं, (a particular battle); 'w.-cry' सिंहनादः, क्ष्वेडा; 'w.-horse' वारकीरः. -*v. i.* विग्रह् 9 P, युध् 4 A, कृ with (*s.*). **-like,** *a.* रणप्रिय, युयुत्सु, युद्धदुर्दम; रणोत्सुक, रणवीर-शूर; 'w. qualities' क्षात्रधर्माः; 'w. tribe' क्षत्रियजातिः. **2** सांग्रामिक-सामरिक -(की *f.*),

Warble, *v.* कूज् 1 P, वि-रु 2 P.

Ward, *s.* रक्षा. **2** रक्षितः पुरुषः, आश्रितः; रक्षकाधीनः, रक्ष्यः. **3** विभागः. -*v. t.* वार् 10 or वृ c., नि-प्रति-°, निरुध् 7 U, निरस् 4 U, नि-प्रति-षिध् 1 P, प्रति-हन् 2 P, व्यपऊह् 1 U. **-en,** *s.* रक्षकः, रक्षापुरुषः. **-er,** *s.* रक्षकः, दौवारिकः, द्वाःस्थः.

Wardrobe, *s.* वासांसि (pl.); वस्त्रसमूहः. **2** वस्त्राधानं-आधारः.

Ware, Wares, *s.* पण्यं, पण्यद्रव्यं; 'w.-house' पण्यागारं, पण्याधानं, पण्यशाला.

Warm, *a.* तप्त, उष्ण, चंड, घर्म in comp.; fig.) तीक्ष्ण, चंड, सोत्साह. **2** घर्मार्त, आतपाक्रांत; 'grown w.' **Angry,** q. v. -*v. t.* तप् c., ईषत् तप्; 'w. oneself' (in the sun) सूर्यातपं सेव् 1 A, (सेवयेत्पृष्ठतो ह्यर्कं H. 2); 'w. oneself at the fire' अग्न्यातपं सेव्. **-ly,** *adv.* सोत्साहं, सस्नेहं, उष्णं &c. **-ness,-th,** *s.* तापः, उत्तापः, उष्मन् *m.*; 'w. of wealth' वित्तोष्मा. **2** चंडता, तीक्ष्णता. **3** उत्साहः; 'w. of affection' स्नेहातिशयः.

Warn, *v. t.* (पूर्वं) प्र-अनु-बुध् c., उप-दिश् 6 P, अनु-शास् 2 P. **2** सूच् 10, निर्दिश्, वि-ज्ञा c. (ज्ञापयति); 'I w. ed him of the impending danger' प्रत्यासन्नापदं तं प्राबोधयं; oft. by **Beware,** q. v.; अवहितो भव यदापत्प्रत्यासन्ना. **-ing,** *s.* प्रबोधनं, उपदेशः.

Warp, *v. t.* आ-वृत् c., संकुच् 1 P; (fig.) कलुषीकृ, दुष् c. (दूषयति). -*v. i.* आवृत् 1 A, संकुच् pass.

Warrant, *s.* प्रमाणं, अधिकारः; (written) अनुज्ञा-अधिकार-पत्रं. -*v. t.* प्रमाणं दा 3 U, प्रमाणीकृ 8 U, अधिकृ c.; *See* **Sanction. -ed,** *a.* सप्रमाण, साधार. **-y,** *s.* प्रमाणपत्रं.

Warren, *s.* शशकनिलयः.

Warrior, *s.* भटः, योधः, योद्धृ *m.*, वीरः, रथिन् *m.*, विक्रांतः; *See* **Hero, Soldier;** 'w. s on the enemy's side' प्रतिभटाः.

Wart, *s.* किणः, चर्मकीलः-लं, अधिमांसं.

Wary, *a.* सावधान, अप्रमत्त, दक्ष; *See* **Careful.**

Wash, *v. t.* प्र-,क्षल् 10, प्र-मृज् 2 P or c., निज् 3 U, अव-निज्-°, धाव् 1 U, 10; 'w. the mouth (after meals)' उपस्पृश् 6 P. **-s.,** **-ing,** *s.* धावनं, प्र-,क्षालनं, मार्जनं, अवसेकः, निर्णेकः. **2** आलेपः, वि-प्र-लेपः-पनं. **-ed,** *a.* प्रक्षालित, निर्णिक्त, धौत, धावित, मार्जित &c. **-y,** *a.* जलधर्मक. **-Washerman,** *s.* रजकः, धावकः, निर्णेजकः, (रजकी, रजकवधू *f.*).

Wasp, *s.* वरटा, गंधोली. **-ish,** *a.* कर्कशस्वभाव, वरटाशील.

